श्रीहेमचन्द्राचार्यग्रन्थावली.

धर्मपरीक्षा

स्वोपज्ञविवरणसहिता.

प्रकाशक–
श्री हेमचन्द्राचार्यसभा.
पाटण.

ॐ अर्हम्.

न्यायविशारद-न्यायाचार्य-श्रीमद्यशोविजयोपाध्याय-

विरचिता स्वोपज्ञविवरणयुता

धर्मपरीक्षा.

वळावास्तव्य—श्रावकहर्षचंद्रात्मज—पंडितभगवानदासेन

संशोधिता

श्रीमदाचार्यविजयनीतिसूरिप्रबोधित—भावसार 'मुगटराम उमेदभाइ' इत्येतस्य द्रव्यसाहाय्येन 'पाटण श्रीहेमचंद्राचार्यसभाया माननीयकार्यवाहक—जगजीवनदास उत्तमचंद्र' इत्यनेन प्रकाशिता च.

अमदावाद-टंकशालासमीपस्थ-युनीयनमुद्रणालये तदधिपतिना मोहनलाल चीमनलाल इत्यनेन मुद्रिता.

संवत्. १९७८. खिस्ताब्द. १९२२.

प्रत ५००.

विषयानुक्रमः

विषयः	पृष्ठं.	गाथा.
धर्मपरीक्षायाः प्रयोजनम् ।	१	१
धर्मस्य लक्षणम् ।	२	२
परीक्षामूलत्वेन माध्यस्थस्य निरूपणम् ।	३	,,
माध्यस्थस्य लक्षणम् ।	,,	३
परपक्षपतितस्यैवोत्सूत्रभाषिणोऽनन्तसंसारनियमः, न तु स्वपक्षपतितस्य यथाछन्दादेरिति मतस्य निराकरणम् ।	४	४
तीर्थोच्छेदस्येव सूत्रोच्छेदस्योन्मार्गित्वम् ।	४	५
उन्मार्गमाश्रितानामाभोगवतामनाभोगवतां नियमेनानन्त-संसारः' इति मतस्य निरासः ।	५	,,
यथाछन्दस्य नियतोत्सूत्रप्ररूपणम्, अत्रार्थे व्यवहारभाष्यस्य प्रामाण्यम् ।	६	,,
यथाछन्दस्य चारित्रविषयकं गतिविषयकं चोत्सूत्रप्ररूपणम् ।	७	,,
'नियतोत्सूत्रनिमित्तं संसारानन्त्यम्' इति मतस्य निरसनम् ।	११	६
'तीव्राध्यवसायनिमित्तसंसारानन्तता' इत्यस्योपपादनम् ।	११	,,
'कर्मण उत्कर्षतोऽपि असंख्येयकालस्थितिकत्वे कथमनन्त-संसारनियमः' इत्याशङ्क्य 'अशुभानुबन्धयोगादनन्त-संसारिता' इति समाधानम् ।	१५	७
अशुभानुबन्धमूलत्वेन मिथ्यात्वस्य तद्भेदानामाभिग्रहिकादीनां निरूपणम् ।	१९	८
आभिग्रहिकानाभिग्रहिकयोर्लक्षणम् ।	२०	,,
आभिनिवेशिकलक्षणम् ।	२१	,,
सांशयिकलक्षणम् ।	२२	,,
भव्याभव्ययोर्मिथ्यात्वभेदस्य योजनम् ।	२२	,,

'अभव्यानामनाभोगमिथ्यात्वमेव नाभिग्रहिकम्' इति मतमपाकृत्य योग्यतानुसारेणाभिग्रहिकरूपव्यक्तमिथ्यात्वमपि' इति सिद्धान्ततम् ।	२३	९
पूर्वपक्षिणा अव्यवहारित्वेन हेतुनाऽभव्यानामव्यक्तमिथ्यात्वसाधनम्, अनन्तपुद्गलपरावर्तकालस्थायित्वेन अव्यवहारित्वसाधनं च ।	२५	९
व्यावहारिकत्वेऽपि अनन्तपुद्गलपरावर्तभ्रमणसंभवात् अव्यवहारिकत्वस्य साधनमसंगतमिति प्रदर्शनम् ।	२७	,,
अनाभिग्रहिकादीनामाशयभेदेन बहुभेदत्वोपदर्शनम्, गुरुत्व-लघुत्वयोः प्ररूपणम् च ।	४१	१०
मिथ्यात्वमन्दताकृतं माध्यस्थं नासत्प्रवृत्तिहेतुः । ...	४३	११
अज्ञातविशेषाणां प्राथमिकं धर्ममधिकृत्य अनाभिग्रहिकं गुणाधायकम् ।	४३	१२
अत एव मिथ्यात्वेऽपि लब्धयोगदृष्टीनां प्रथममन्वर्थं गुणस्थानम् ।	४८	१३
असद्ग्रहनाशस्यावेद्यसंवेद्यपदगतानामपि भावेन जैनत्वप्राप्तौ कारणत्वम् ।	५०	१४
एतेषां भावजैनत्वे भावाज्ञाकारणत्वाद् द्रव्याज्ञाया अपि संभवः ।	५४	१५
द्रव्याज्ञाया मार्गानुसारिभावो लक्षणम् ।	५७	१५
चरमे पुद्गलपरावर्ते गुणवृद्ध्या मार्गानुसारिभावस्य प्रादुर्भावः ।	५९	१७
मार्गानुसारिभावे चतुर्भङ्गीप्ररूपणा ।	७१	१८
'मार्गानुसारिक्रियावान् ज्ञानदर्शनहीनश्च देशाराधकः' इति प्रथमभङ्गस्वामिनिरूपणम् ।	७३	१९
'वृत्तिकृन्मते प्रथमभङ्गस्वामी बालतपस्वी, अन्यमते गीतार्थानिश्रितोऽगीतार्थः, संप्रदायबाह्यमते समग्रमुनिमार्गक्रियाधरः केवललिङ्गधारी मिथ्यादृष्टिः' इति मतत्रयम् ।	७३	,,
संप्रदायबाह्यमतखण्डनम् ।	७४	२०
संप्रदायबाह्यमतखण्डने दोषान्तरम् ।	७५	२१
,, अन्यदपि दोषान्तरम् ।	७५	२२

अन्यमार्गस्थशीलादिक्रियाया अपि तत्त्वतो जैनीत्वेन देशाराधकत्वम् ।	७९	२३
अन्यत्रापि शास्त्रे अभिन्नार्थस्य जिनेन्द्रश्रुतमूलत्वेन तदनुसारिणो देशाराधकत्वम् ।	८०	२४
अन्याचार्यमते 'गीतार्थानिश्रितोऽगीतार्थः' इति भङ्गस्य नातिविशेषत्वसमर्थनम् ।	९४	२५
लौकिकमिथ्यात्वाल्लोकोत्तरमिथ्यात्वस्य बलवत्त्वेऽनेकान्तः ।	९६	२५
गीतार्थनिश्रितस्यापि देशाराधकत्वम् ।	९९	२७
देशस्य भङ्गादलाभाद्वा संविग्नपाक्षिकोऽविरतसम्यग्दृष्टिर्वा देशविराधकः' इति द्वितीयभङ्गविवेचनम् ।	१००	२८
श्रुतवान् शीलवाँश्च साधुः श्रावकश्च सर्वाराधकः' इति तृतीयभङ्गस्य, 'क्षुद्रत्वादि दोषवान् भवाभिनन्दी सर्वविराधकः' इति चतुर्थभङ्गस्य च प्ररूपणम् ।	१०१	२९
अशुद्धपरिणामवतां व्यवहारस्थितानामपि सर्वविराधकत्वम् ।	१०३	३०
भावोज्झितव्यवहाराणां न किमप्याराधकत्वम् ।	१०४	३१
एतेषु चतुर्षु भङ्गेषु त्रयाणां भङ्गानामनुमोदनीयत्वम् । ...	१०५	३२
अनुमोदनाया विषयः लक्षणं च ।	१०६	३३
अनुमोदनाप्रशंसयोः सामान्यविशेषत्वाद् भेदः ।	१०७	३४
अनुमोदनाप्रशंसयोर्विषमव्याप्तिपरिहारः ।	१०८	३५
'मिथ्यादृशां गुणा न ग्राह्याः' इति कदाग्रहस्त्याज्यः ।	११४	३६
मिथ्यादृशां मार्गानुसारिकृत्यमनुमोद्यम् ।	११४	३७
क्रियावादिनः शुक्लपाक्षिकस्य च स्वरूपम् ।	११८	,,
सकामाकामनिर्जरयोः स्वरूपम् ।	१२३	,,
'मिथ्यादृशां गुणानुमोदनेन परपाखण्डिप्रशंसालक्षणः सम्यक्त्वातिचारः स्याद्' इत्याशङ्क्य तत्समाधानम् ।	१२८	४२
'मिथ्यादृशां गुणा हीनत्वादेव नानुमोद्याः' इत्याशङ्काया निराकरणम् ।	१२९	४३
'उत्सूत्रं त्यक्त्वा सर्वेषां गुणा अनुमोदनीयाः' इत्युपदेशः ।	१३०	४४

'मरीचिवचनं नोत्सूत्रं, किन्तूत्सूत्रमिश्रं' इति पूर्वपक्षस्तत्खण्डनं च।	१३०	,,
'उत्सूत्रं त्याज्यम्, गुणानुमोदना च कर्तव्या सर्वेषामपि' इत्युपसंहारः।	१५३	
सूत्रभाषकाणां गुणः।	१५३	४५
हृदयस्थितस्य भगवतोऽनर्थनिवारकत्वम्।	१५३	४६
'केवलिनो योगात्कदाचिदपि कायवधो न भवति' इति कुविकल्पोपदर्शनम्।	१५४	४७
अस्य कुविकल्पस्य खण्डनम्।	१५४	४८
हिंसाया गर्हणीयत्वाद् भगवतस्तदभावसिद्धिमाशङ्क्य तत्खण्डनम्।	१५६	४९
'वीतरागो न किञ्चिद् गर्हणीयं करोति' इति यद् भणितं तदकरणनियमापेक्षं न तु द्रव्यहिंसाभावसापेक्षम्।	१६२	५०
वीतरागशब्देन क्षीणमोह एव ग्राह्यः; न तूपशान्तमोहः।	१६३	५१
यदि क्षीणमोहे गर्हाविषयस्य द्रव्याश्रवस्याभावस्तर्हि तत्रार्थतोऽगर्हणीयभावरूपं पापं स्वीकर्तव्यम्।	१६३	५२
द्रव्यास्रवस्य मोहजन्यत्वमेव व्यक्त्या निराकरोति।	१६४	५३
प्रमत्तस्य आरम्भिकीक्रियाया न जीवघातजन्यत्वं, किन्तु प्रमत्तयोगजन्यत्वम्।	१६५	,,
प्रमादस्य अष्टौ भेदाः।	१६५	,,
केवलिनो द्रव्यहिंसायां परापादितरौद्रध्यानप्रसङ्गपरिहारः।	१६६	५४
भगवतो द्रव्यपरिग्रहे अपवादस्वीकारे तव मते प्रतिज्ञाहानिः, अशुभयोगप्रसङ्गश्च।	१६८	५५
आनुषङ्गिकहिंसया जिनस्य दोषं भणतस्तव मते साधूनामपि आभोगाद् नद्युत्तारादेरनुपपत्तिः।	१७९	५६
नद्युत्तारादौ जलजीवानामनाभोगं वदतो निर्विचारत्वम्।	,,	५७
जलजीवानामनाभोगस्वीकारे दूषणम्। ...	१८५	५८
विशेषावश्यके जीवरक्षाविषयकप्रयत्नेनैव स्वान्तःशुद्धेर्हिंसाया उपपादनम्।	१९०	,,

नन्वुत्तारे आभोगाद् जलजीवविराधनायां सर्वविरतानां देश-विरतिर्भवेद् इत्याक्षेपस्य समाधानम् ।	...	१९३	५९
केवलिनो द्रव्यपरिग्रह–द्रव्यवधयोः समेऽप्याभोगे न दोषः ।		२०७	६०
हिंसाचतुर्भङ्ग्यनुसारेणैव द्रव्यहिंसया केवलिनो न दोषः ।		२०८	६१
अप्रमत्तादीनां सयोगिकेवलिचरमाणां हिंसाया अभावः ।		२०९	६२
'हिंसान्वितयोगतो हिंसकभावो भवेद्' इत्येतस्य तर्कस्य प्रश्लथिलमूलत्वम् ।	... .	२१२	६३
'अप्रमत्तानां हिंसान्वितयोगाभावादापादकासिद्धेर्न व्याप्ति-साधकतर्कस्य शिथिलत्वम्' इत्याशङ्काया निरसनम् ।	...	२१२	६४
एजनादिक्रियाया आरम्भादिनियतत्वाद् अन्तक्रिया-विरोधित्वेन केवलिनो द्रव्यहिंसायां न संदेहः ।	....	२१४	६६
केवलियोगस्यारम्भादियुतत्वं तच्छक्त्या, न तु साक्षादेव ।		२१७	६१
'केवलियोगेषु आरम्भस्वरूपयोग्यतासत्त्वेऽपि मोहनीयाभावेन नारम्भसंभवः' इत्याशङ्काया निराकरणम् ।	....	२१८	६७
केवलिनोऽपि चलोपकरणत्वात्स्थूलक्रियारूपारम्भो नियतः ।		२२०	६८
साक्षादारम्भस्य कादाचित्कत्वेन न विरोधः ।	....	२२२	६९
आरम्भरूपनिमित्ते सदृशे उपादानकारणापेक्षो बन्धाबन्धविशेषः ।		२२२	७०
कायस्पर्शनिमित्तारम्भस्य कारणत्वमर्यादा कारकसंबन्धेन, न तु कर्तृकार्यभावसंबन्धेन ।	....	२२६	७१
यः पुनः शैलेश्यवस्थायां कर्तारं मशकादिजीवमधिकृत्य भणति तस्य स्फुटातिप्रसंगः ।	... .	२२८	७२
'सयोगिकेवलिनि शुभयोगत्वादेव जीवरक्षा, अयोगि केवलिनि तु योगाभावेन मशकादिघातो मशकादिकर्तृक एव' इत्यभ्युपगमस्य निरसनम् ।	... .	२२९	७३
'केवलिनो योगा एव जीवरक्षाहेतवः स्वरूपेण, व्यापारेण वा' इति विकल्प्य दूषणम् ।	... .	२३१	७४
केवलिना बादरवायुकायिकोद्धरणं नैव शक्यम् ।	....	२३२	७६

'पुष्पचूलावद् जिनयोगाद् जलादिजीवानामघातपरिणामः' इति परस्याभ्युपगमः ।	....	२३३	७६
एतद् दृष्टान्तदार्ष्टान्तिकयोर्वैषम्याद् परस्परविरुद्धम् ।	....	२३३	७७
तयो वैषम्यनिरूपणम् ।	....	२३४	७८
केवलिनां नद्याद्युत्तारे जलादिस्पर्शाभावलक्षणोऽतिशयः कायकृतो योगकृतो वा' इति विकल्प्य दूषणम् ।	....	२३४	७९
केवलिनां योगादेवाघातपरिणामस्वीकारे जीवाकुलां भूमिं वीक्ष्य तेषां गमनागमनादेः वैफल्यम् ।	...	२३६	८०
अत एव केवलियोगव्यापारकाले जीवानां स्वत एवापसरणस्वभावत्वकल्पनानिरासः	....	२३७	८१
'लब्धिविशेषादेव केवलिनोऽनारम्भकत्वं' इति कल्पनाया अपि निरासः ।	....	२३८	८२
केवलिना जीवरक्षार्थं लब्धिविशेषोपजीवनेऽनुपजीवने च दूषणम् ।	....	२३९	८३
'योगगता सा लब्धिः' इति क्षायिक्यपि अयोगिकेवलिनि नास्ति' इति कल्पनायामपि दूषणम् ।	....	२३९	८४
'अवश्यंभाविन्या जीवविराधनया केवलिनोऽष्टादशदोषरहितत्वं न स्याद्' इत्याशङ्कायाः परिहारः ।	....	२४०	८५
अवश्यंभाविन्याऽपि जीवहिंसया असद्भूतदोषमुत्प्रेक्ष्य जिनवरनिन्दायामनन्तसंसारभ्रमणम् ।	...	२४१	८६
स्थानाङ्गस्थात् छद्मस्थ-जिनयोर्लिङ्गवचनाद् भ्रान्तिर्जायते साऽपि परमार्थदृष्टावुपयुक्तस्य न तिष्ठति ।	....	२४१	८७
'तीव्रकदाग्रहाज्जायमानान् एतादृशान् कुविकल्पानुच्छिद्य सम्यग् आज्ञायां मुनिः प्रवर्तेत' इत्युपदेशः ।	....	२५५	८८
तीर्थकरस्याज्ञा सम्यक् परीक्षाप्राप्ता एकान्तसुखावहा न तु नाममात्रेण अपरीक्षिता ।	....	२५७	८९
आज्ञापरीक्षोपायभूतकषादिप्ररूपणा ।	....	२५७	९०
कषादीनां स्वरूपम् ।	....	२५७	९१

कषादिपरीक्षाभिः शुद्धे धर्मे प्रवृत्ता गुरवोऽपि सुवर्णमिव शुद्धा एव ।	....	....	२५८	९२
गुरूणां सुवर्णसदृशत्वम् ।	....	....	२५८	९३
सुवर्णस्य अष्टगुणप्ररूपणम् ।	....	....	२५९	९४
सुवर्णसामान्येन साधुगुणाः ।	....	....	२५९	९५
सुवर्णसादृश्येन साधुगुणनिगमनम् ।	....	....	२६०	९७
' उचितगुणश्च गुरुर्न त्याज्यः, किन्तु तदाज्ञायामेव वर्तितव्यम् ' इत्युपदेशः ।	....	....	२६०	९८
गुर्वाज्ञास्थितस्य एकाग्रत्वसंपत्तिः ।	...	....	२६०	९९
एकाग्रत्वसंपत्तौ आत्मस्वरूपं प्रत्यक्षं भवति ।	....		२६१	१००
आत्मस्वरूपप्रत्यक्षे विकल्पोपरमः ।	...	....	२६१	१०१
' का अरतिः को वाऽऽनन्दः ' इति विकल्पस्याप्यभावः ।			२६१	१०२
' अन्ये पुद्गलभावाः, ज्ञानमात्रश्चान्योऽहं ' इत्येष शुद्धविकल्पः ।			२६२	१०३
अध्यात्मध्यानस्य स्तुतिः ।	....	....	२६३	१०५
अध्यात्माबाधेनैव धर्मवादेनैव तत्त्वनिर्णयार्थं प्रवृत्तिः कर्तव्या ।			२६३	१०५
' अस्मिन् ग्रन्थे धर्मवादस्य दिशैव किंचित् भणितम् ' इत्युपसंहारः ।	....	...	२६७	१०६
जिनाज्ञायाः सर्वस्वोपदर्शनम् ।	....	....	२६४	१०७
धर्मपरीक्षायाः प्रयोजनम्, तत्संशुद्धौ गीतार्थं प्रति प्रार्थना ।			२६४	१०८

प्रमाणत्वेनोद्धृतग्रन्थनामानि ।

नाम.	पृष्ठम.
अ.	
अनुयोगद्वार. ...	१८१.
अष्टकप्रकरण.	१३, ९१,
आ.	
आगम.	१८, १५०, १६०, १६१, १८५, १९८, २०८.
आचाराङ्ग.	१३, १९, १४३, २०२, २२२, २३८.
,, चूर्णि. ...	२२८.
,, निर्युक्ति.	५, १५५, २०१.
,, वृत्ति.	२०४, २२२, २२३.
आतुरप्रत्याख्यान.	७७.

आराधनापताका. ... ११५.
आवश्यक. .... ११२.
आवश्यककथानक. ... १७०.

उ.

उत्तराध्ययन.
,, निर्युक्ति. २१.
उत्सूत्रकन्दकुद्दाल. ११, १२.
उपदेशपद. १५, ३१, ४२, ५५, ५९, ६०, ६१, ७७, ७९, ८१, ८३, ८५, १०४, १०९, १२८, १४१, १४३, १६०, १६२.
,, वृत्ति. ५५, ५९, ६०, ६१, ८१, १०९.
उपदेशमाला. ९६,
,, वृत्ति. ९६, १५०, १५१.
उपदेशरत्नाकर. .... ११९, १३६.

ओ.

ओघनिर्युक्ति. १०६, १७१, १८०, २३२.

क.

कर्मप्रकृति. .... १२७.
कल्पभाष्य. .... २१०.
कायस्थितिस्तोत्र. .... २५.

ग.

गच्छाचारप्रकीर्णक. .... १०.
गुणस्थानक्रमारोह. ... २३.
,, टीका. ... २३.

च.

चतुःसरणपइन्ना. १६, ११४, २३०,
,, वृत्ति. ११५, २३०, २३८.

ज.

जीवाभिगम. .... १४९.

त.

तत्त्वार्थ. .... २५१.
तत्त्वार्थभाष्य. .... १२६, २५२.
,, वृत्ति. १५२, १७६, २०६.
त्रिषष्टीयनेमिचरित्र. ... ११.

द.

दशवैकालिकनिर्युक्ति. .... ८४.
,, वृत्ति. ८४, १६६.
दशाश्रुतस्कन्धचूर्णि. ११९, १९१, २०१.

ध.

धर्मबिन्दु. .... ६५, ८३, ९३.
धर्मरत्नप्रकरण. .... २, १३४.
,, वृत्ति. ३९, १३४.

न.

नन्दिसूत्र. .... १४१.
,, वृत्ति. .... १४१.
निशीथचूर्णि. .... २०१.
न्यायावतार. .... २४६.

प.

पञ्चसूत्री. ... ११७.
,, वृत्ति. .... ११७.
पञ्चाशक. ६५, ९५, १०२, १३३, २०५.
,, वृत्ति. ६५, ९५, १०२, १०८, १३३.
पाक्षिकसूत्र. .... १६.
,, चूर्णि. .... १६६.
,, वृत्ति. .... १६६.

पाक्षिकसप्ततिकावृत्ति..... १३३.
पापप्रतिघातगुणबीजाधान. १७.
पुष्पमाला बृहद्वृत्ति. .... ३८.
,, लघुवृत्ति. ... ३९.
प्रज्ञापना. १५७, १७४, २१९.
,, वृत्ति. २७, १७७, १८०.
प्रवचनसारोद्धारवृत्ति. ३१, २०५.
प्रश्नव्याकरण. २३०

ब.

बृहत्कल्पभाष्य. ११३, १८४, २१९.
,, वृत्ति. १७२, १८४, २०२.

भ.

भगवतीसूत्र. १६, ७२, १२१, १४३, १४५, १४७, १४८, १५१, १५२, १५९, १६८, १६९, १७५, १७६, २०१, २११, २१४, २२०, २४२, २५२,
,, वृत्ति. ७२, १४३, १७४, १७५, १७६, २१५, २१७, २२१, २५१.
भवभावनावृत्ति. .... ३६.
भारत. .... ८१.
भुवनभानुकेवलिचरित्र..... २६.

म.

महानिशीथ. ५, ७८, १२६, १२८.

य.

यतिजीतकल्प. .... २४८.
,, वृत्ति. .... २४९.
योगदृष्टिसमुच्चय. ४९, ५०, ५१.
योगबिन्दु. २७, ४४, ५७, ६२, ६८, ८३, ९२, ११०.
,, वृत्ति. २७, ५७, ५८, ६२.
योगशास्त्रवृत्ति. ३१, १२३, १३५, २४७, २४८.

ल.

लघूपमितभवप्रपञ्च. ... ३३.
ललितविस्तरा. .... ६५.

व.

वन्दारुवृत्ति. .... ६६.
विंशिका. .... ६६, ६८, ११०.
विशेषावश्यक. ७५, १६७, १९०, १९२. २०६, २०९, २१३, २५२.
वीरचरित्र (हैम) .... १४४.
,, (प्राकृत) .... १५०.
वृद्धोपमितभवप्रपञ्च. .... ३४.
व्यवहारभाष्य. ६, (१२ ?) ४९.

श.

शक्रस्तव. ... २३८.
,, वृत्ति. .... २३८.
श्राद्धजीतसूत्र. .... २५९.
,, वृत्ति. .... २५९.
श्राद्धप्रतिक्रमणचूर्णि, ... १३७.
श्राद्धविधिवृत्ति. .... १३५.
श्रावकदिनकृत्यवृत्ति. ३८, १३४.
श्रावकप्रज्ञप्ति. ... १२०.

ष.

षष्ठांग (ज्ञाताधर्म) .... २५९.

स.

संमति. ८८, २४०,
,, वृत्ति. ... २४०,

संग्रहणीवृत्ति. २६,
समयसारसूत्रवृत्ति. ३५, १२३.
समवायाङ्ग. .... १०४.
,, वृत्ति. .... १०४.
सिद्धहैम. १४७,
सूत्रकृतांग. ७३, ९२, ९३,१२३, १२४,१८३,२५०
,, चूर्णि. .... १९७.
,, वृत्ति. ९२, २२१.
संस्कृतनवतत्वसूत्र. .... ३९.
स्थानांग. १०७,१६७,१७९,२४१, २४५,२५४.
,, वृत्ति. .... २४२.
स्याद्वादरत्नाकर (आकर). १२.

ह.

हितोपदेशमाला. .... २३०.

ग्रन्थकारनामानि.

चन्द्रसूरिशिष्यदेवसूरि. .... ३३.
जिनभद्रगणि. ... ३३.
धनपालपंडित. ... ८८.
वाचकमुख्य. ... १०८.
संघदासगणि. ... २००.
सिद्धसेनदिवाकर.८२,८८,१११,१५५.
हरिभद्रसूरि. .... ९०,१०३.
हेमचन्द्रसूरि. .... ९०.

प्रमाणत्वेनोद्धृतानि अनिर्दिष्टग्रन्थप्रतीकानि.

अत्थि अणंता जीवा, २९, ३५.
अनधिगमविपर्ययौ मिथ्यात्वम. २०.
अनुकंपकामणिज्जर. ... ११८.
अहद्द सयलन्नपावा. .... १३५.
उस्सुत्तभासमाणं. .... १३५.
कज्जं इच्छंतेणं. .... १०६.
गुणठाणगपरिणामे. .... १२७.
छउमत्थनाणहेउ. .... २४२.
छउमत्थे पुण. .... २४२.
जइ पुग्गलपरिअट्टा. .... २८.
णय पच्चुप्पन्न वणस्सइ.... २९.
तस्स असंचेययओ. .... १५६.
तेणं मच्छियपमुहा. .... २३७.
दसारसिंहस्सय. ... १३०.
दुब्भासिएण इक्केण. १३४,१३८.
नाणं चरित्तहीणं. ... ९४.
परमरहस्समिसीणं. .... २६३.
पुढवीपमुहा. ... २३५.
प्रदानं प्रच्छन्नं. ... ११२.
फुडपागडमकहंतो. .... १३३.
महव्वय–अणुव्वएहि य. .... १२६.
यत्रोभयोः समो दोषः .... २४७.
वणस्सइ कायमइगओ. .... १३८.
वणस्सइ काइआणं पुच्छा. २६.
ववहारीणं नियमा. .... २६.
लद्धूणवि देवत्तं. .... १५०.
लोइअमिच्छत्तं पुण. .... २३.
वज्जेमित्ति परिणओ. .... १५८.
संथरणंमि असुद्धो. .... १०८.
सिज्जंति जत्तिआ किर. ... ३०.

अर्हम्

न्यायाचार्यश्रीमद्यशोविजयोपाध्यायविरचिता

स्वोपज्ञवृत्तिसंवलिता

धर्मपरीक्षा

ऐँ नमः

ऐन्द्रश्रेणिकिरीटकोटिरनिशं यत्पादपद्मद्वये
हंसालिश्रियमादधाति न च यो दोषैः कदापीक्षितः ।
यद्वीः कल्पलता शुभाशयभुवः सर्वप्रवादास्थिते-
र्ज्ञानं यस्य च निर्मलं स जयति त्रैलोक्यनाथो जिनः ॥१॥
यन्नामात्रस्मरणाज्जगतां प्रत्यूहकोटिः प्रलयं प्रयाति ।
अचिन्त्यचिन्तामणिकल्पमेनं शङ्खेश्वरस्वामिनमाश्रयामः ॥२॥
नत्वा जिनान् गणधरान् गिरं जैनीं गुरूनपि ।
स्वोपज्ञां विवेयद् धर्मपरीक्षां विवृणोम्यहम् ॥३॥

इह हि सर्वोपज्ञे प्रवचने प्रविततनयभङ्गप्रमाणगंभीरे परममाध्यस्थ्यपवित्रितैः श्रीसिद्धसेन-हरिभद्रप्रभृतिसूरिभिर्विशदीकृतेऽपि दुःषमादोषानुभावात्केषांचिद् दुर्विदग्धोपदेशविप्रतारितानां भूयः शङ्कोदयः प्रादुर्भवतीति तन्निरासेन तन्मनोनैर्मल्यमाधातुं धर्मपरीक्षा नामायं ग्रन्थः प्रारभ्यते, तस्य चेयमादिगाथा—

पणमिय पासजिणिंदं धम्मपरिक्खाविहिं पवक्खामि।
गुरुपरिवाडीसुद्धं आगमजुत्तीहिं अविरुद्धं ॥ १ ॥

प्रणम्य पार्श्वजिनेन्द्रं धर्मपरीक्षाविधिं प्रवक्ष्ये ।
गुरुपरिपाटीशुद्धं आगमयुक्तिभ्यामविरुद्धम् ॥

पणमियत्ति। प्रणम्य-प्रकर्षेण भक्तिश्रद्धाऽतिशयलक्षणेन नत्वा पार्श्वजिनेन्द्रम्, अनेन प्रारिप्सितप्रतिबन्धकदुरितनिरासार्थं शिष्टाचारपरिपालनार्थं च मङ्गलमाचरितम्। धर्मस्य धर्मत्वेनाभ्युपगतस्य, परीक्षाविधिम्-अयमित्थंभूतोऽनित्थंभूतो वेति विशेषनिर्द्धारणप्रकारं प्रवक्ष्ये। प्रेक्षावत्प्रवृत्त्युपयोगिविषयाभिधानप्रतिज्ञेयम्। प्रयोजनादयस्तु सामर्थ्यगम्याः, धर्मप्रतिपादकस्यास्य ग्रन्थस्य धर्मशास्त्रप्रयोजनादिभिरेव प्रयोजनादिमत्त्वादिति। किंभूतं धर्मपरीक्षाविधिम्? गुरुपरिपाटीशुद्धम्-अविच्छिन्नपूर्वाचार्यपरम्परावचनानुसरणपवित्रम्, तथाऽऽगमयुक्तिभ्यां-सिद्धान्ततर्काभ्यामविरुद्धमबाधितार्थम्। एतेनाभिनिवेशमूलकस्वकपोलकल्पनाशङ्का परिहृता भवति। इयं हि ज्ञानांशदुर्विदग्धानामैहिकार्थमात्रलुब्धानां महतेऽनर्थाय। यावानेव ह्यर्थः सुनिश्चितस्तावानेवानेन निरूपणीयः, न तु कल्पनामात्रेण यत्तदसंबद्धप्रलापो विधेय इति मध्यस्थाः। अत एव चिरप्ररूढमप्यर्थं कल्पनादोषभीरवो नाहत्य दूषयन्ति गीतार्थाः।

तदुक्तं धर्मरत्नप्रकरणे—

[1]जं च ण सुत्तेहिं विहियं णय पडिसिद्धं जणंमि चिररूढं।
समइविगप्पिअदोसा तंपि ण दूसंति गियत्था॥

ततश्च माध्यस्थमेव धर्मपरीक्षायां प्रधानं कारणमिति फलितम् ॥१॥

एतदेव आह—

सो धम्मो जो जीवं धारेइ भवण्णवे निवडमाणं।
तस्स परिक्खामूलं मज्झत्थत्तं चिय जिणुत्तं॥२॥

सो धम्मोत्ति। यो भवार्णवे निपतन्तं जीवं क्षमादिगुणोपष्टम्भदानेन धारयति स धर्मो भगवत्प्रणीतः श्रुतचारित्रलक्षणस्तस्य परीक्षा-

---

२ स धर्मो यो जीवं धारयति भवार्णवे निपतन्तम्।
तस्य परीक्षामूलं मध्यस्थत्वमेव जिनोक्तम्॥

---

१ यच्च न सूत्रैर्विहितं न च प्रतिषिद्धं जने चिररूढम्।
स्वमतिविकल्पितदोषास्तदपि न दूषयन्ति गीतार्थाः॥

मूलं मध्यस्थत्वमेव जिनोक्तम्, अज्ञातविषये माध्यस्थादेव हि गलितकुतर्कग्रहाणां धर्मवादेन तत्त्वोपलम्भप्रसिद्धेः।

ननु सदसद्विषयं माध्यस्थ्यं प्रतिकूलमेव।

तदुक्तम्—

"सुनिश्चितं मत्सरिणो जनस्य न नाथमुद्रामतिशेरते ते।
माध्यस्थ्यमास्थाय परीक्षका ये मणौ च काचे च समानुबन्धाः" ॥

इति कथं तद्भवद्भिः परीक्षानुकूलमुच्यते ? इति चेत्। सत्यम्, स्फुटातिशयशालिपरविप्रत्तिविषय*पक्षद्वयान्यतरनिर्द्धारणानुकूलव्यापाराभावलक्षणस्य माध्यस्थ्यस्य परीक्षाप्रतिकूलत्वेऽपि स्वाभ्युपगमहानिभयप्रयोजकदृष्टिरागाभावलक्षणस्य तदनुकूलत्वात् ॥२॥

अथ मध्यस्थः कीदृग्भवति ? इति तल्लक्षणमाह—

मज्झत्थो अ अणिस्सियववहारी तस्स होइ गुणपक्खो।
णो कुलगणाइणिस्सा इय ववहारंमि सुपसिद्धं ॥ ३ ॥

मध्यस्थश्चानिश्रितव्यवहारी स्यात्, उपलक्षणत्वादनुपश्रितव्यवहारी च। तत्र निश्रा रागः, उपश्रा च द्वेष इति रागद्वेषरहितशास्त्रप्रसिद्धभाव्याभाव्यसाधुत्वासाधुत्वादिपरीक्षारूपव्यवहारकारी स्यर्थः। अत एव तस्य मध्यस्थस्य गुणपक्षो 'गुणा एवादरणीयाः' इत्यभ्युपगमो भवति, न तु कुलगणादिनिश्रा—निजकुलगणादिना तुल्यस्य सद्भूतदोषाच्छादनयाऽसद्भूतगुणोद्भावनया च पक्षपातरूपा। तथा कुलगणादिना विसदृशस्यासद्भूतदोषोद्भावनया सद्भूतगुणाच्छादनयाऽपि चोपश्राऽपि न भवति इत्यपि द्रष्टव्यमित्येतद् व्यवहारग्रन्थे सुप्रसिद्धम्, निश्रितोपश्रितव्यवहारकारिणः सूत्रे महाप्रायश्चित्तोपदेशात् ॥ ३ ॥

इत्थं च मध्यस्थस्यानिश्रितव्यवहारित्वाद् यत्कस्यचिदभिनिविष्टस्य पक्षपातवचनं तन्मध्यस्थैर्नाङ्गीकरणीयमित्याह—

मध्यस्थश्चानिश्रितव्यवहारी तस्य भवति गुणपक्षः।
नो कुलगणादिनिश्रा इति व्यवहारे सुप्रसिद्धम् ॥ ३ ॥

---

* 'विषये' इति क्वपुस्तके।

तुल्लेवि तेण दोसे पक्खविसेसेण जा विसेसुत्ति ।
सा णिस्सियत्ति सु-तुत्तिण्णं तं बिंति मज्झत्था ॥४॥

तुल्लेवित्ति । तेन-मध्यस्थस्य कुलादिपक्षपाताभावेन तुल्येऽप्युत्सूत्रभाषणादिके दोषे सति पक्षविशेषेण या विशेषोक्तिः—'स्वपक्षपतितस्य यथाछन्दस्यापरमार्गाश्रयणाभावान्न तथाविधदोषः, परपक्षपतितस्य तून्मार्गाश्रयणान्नियमेनानन्तसंसारित्वम्' इति, सा विशेषोक्तिर्निश्रिता पक्षपातगर्भेति तां सूत्रोत्तीर्णामागमबाधितां ब्रुवते मध्यस्थाः । आगमे ह्यविशेषेणैवान्यथावादिनामन्यथाकारिणां च महादोषः प्रदर्शितस्तत्कोऽयं विशेषो यत्परपक्षपतितस्यैवोत्सूत्रभाषिणोऽनन्तसंसारित्वनियमो न तु स्वपक्षपतितस्य यथाछन्दादेरिति ॥ ४ ॥

नन्वस्त्ययं विशेषो यत्परपक्षगतस्योत्सूत्रभाषिणो 'वयमेव जैना अन्ये तु जैनाभासाः' इत्येवं तीर्थोच्छेदाभिप्रायेण प्रवर्तमानस्य सन्मार्गनाशकत्वान्नियमेनानन्तसंसारित्वम्, स्वपक्षगतस्य तु व्यवहारतो मार्गपतितस्य नायमभिप्रायः संभवति, तत्कारणस्य जैनप्रवचनप्रतिपक्षभूतापरमार्गस्याङ्गीकारस्याभावाद् इत्यत आह—

तित्थुच्छेओ व्व मओ सु-तुच्छेओवि हंदि उम्मग्गो ।
संसारो अ अणंतो भयणिज्जो तत्थ भाववसा ॥५॥

तित्थुच्छेओत्ति । तीर्थोच्छेद इव सूत्रोच्छेदोऽपि 'हंदि' इत्युपदर्शने उन्मार्ग एव मतः । तथा चोन्मार्गपतितानामुत्सूत्रभाषणं यदि तीर्थोच्छेदाभिप्रायेणैवेति भवतो मतं तदोत्सूत्राचरणप्ररूपणप्रवणानां व्यवहारतो मार्गपतितानां यथाछन्दादीनामुत्सूत्रभाषणमपि सूत्रोच्छेदाभिप्रायेणैव स्याद्, विरुद्धमार्गाश्रणस्येव सूत्रविरुद्धाश्रयणस्यापि मार्गोच्छेदकारणस्याविशेषात्, तथा च द्वयोरप्युन्मार्गः समान एव ।

---

४ तुल्येऽपि तेन दोषे पक्षविशेषेण या विशेषोक्तिः ।
सा निश्रितेति सूत्रोत्तीर्णां तां ब्रुवते मध्यस्थाः ॥
तीर्थोच्छेद इव मतः सूत्रोच्छेदोऽपि हंदि उन्मार्गः ।
संसारश्चानन्तो भजनीयस्तत्र भाववशाद् ॥ ५ ॥

संसारस्त्वनन्तस्तत्र भावविशेषाद्भज्यते, अध्यवसायविशेषं प्रतीत्य संख्यातानन्तभेदभिन्नस्य तस्यार्हदाद्याशातनाकृतस्यप्यभिधानात्। तथा च महानिशीथसूत्रम्—

"[1]जेणं तित्थकरादीणं महतिं आसायणं कुज्जा, से णं अज्झवसायं पडुच्च जाव णं अणंतसंसारिअत्तणं लभिज्जत्ति"।

इत्थं चोत्सूत्रभाषिणां नियमादनन्तः संसार इति नियमः परास्तः। किं च कालीदेवीप्रमुखाणां षष्ठाङ्गे "अहाछंदा अहाछंदविहारिणीउत्ति" पाठेन यथाच्छन्दत्वभणनादुत्सूत्रभाषित्वं सिद्धम्।

"[3]उस्सुत्तमायरंतो उस्सुत्तं चेव पण्णवेमाणो।
एसो उ अहाछंदो इच्छाछंदुत्ति एगट्ठा॥"

इत्यावश्यकनिर्युक्तिवचनात् तासां चैकावतारत्वं प्रसिद्धमिति नायं नियमो युक्तः।

यत्तून्मार्गमाश्रितानामाभोगवतामनाभोगवतां नियमेनानन्तसंसारः, प्रतिसमयं तीर्थोच्छेदाभिप्रायेण साम्यात्। यथाछन्दस्तु क्वचिदंशेनाभोगादेवोत्सूत्रभाषी स्यात्, तस्यानाभोगोऽपि प्रायः सम्यगागमस्वरूपापरिणतेः, न च तस्य तदुत्सूत्रभाषणमनन्तसंसारहेतुः, तीर्थोच्छेदाभिप्रायहेतुकस्यैव तस्यानन्तसंसारहेतुत्वादिति। तदसंबद्धम्, एतादृशनियमाभावाद्। नन्वुन्मार्गपतिताः सर्वेऽपि तीर्थोच्छेदपरिणामवन्त एव, सरलपरिणामानामपि केषांचिदर्शनाद्। न च यथाछन्दादयोऽनाभोगादेवोत्सूत्रभाषिणः, जानतामपि तेषां बहूनां सुविहितसाधुसमाचारप्रद्वेषदर्शनात्।

यस्त्वाह—यथाछन्दत्वभवनहेतूनां पार्श्वस्थत्वभवनहेतूनामिव नानात्वेनागमे भणितत्वाद् यथाछन्दमात्रस्योत्सूत्रभाषित्वनियमोऽप्रमाणिकै(क?) इति। तदरमणीयम्, आगम एव यथाछन्दस्योत्सूत्रप्ररूपणाया नियतव्यवस्थाप्रदर्शनात्।

---

१ येन तीर्थकरादीनां महतीमाशातनां कुर्यात्, स्याध्यवसायं प्रतीत्य यावदनन्तसंसारित्वं लभेत॥
२ यथाछन्दा यथाछन्दविहारिणी त्विति॥
३ उत्सूत्रमाचरन् उत्सूत्रं चैव प्रज्ञापयन्।
एष तु यथाच्छन्द इच्छाछन्द इत्येकार्थौ॥

तदुक्तं व्यवहारभाष्ये—

अहाछंदस्स परूवण उस्सुत्ता दुविह होइ णायव्वा ।
चरणेसु गईसु जा, तत्थ चरणे इमा होइ ॥ १ ॥
पडिलेहणि-मुहपोत्तिय-रयहरण-निसिज्ज-पायमत्तए पट्टे ।
पडलाइं चोल उण्णादसिआ पडिलेहणापोत्तं ॥ २ ॥
दंतछिन्नमलित्तं हरियट्ठिय मज्जणा यणं त (छत्र) स्स ।
अणुवाइ अणणुवाईपरूव चरणे गतीसुंपि ॥ ३ ॥
अणुवाइति नज्जइ जुत्तीपाडियं खु भासए एसो ।
जं पुण सुत्तावेयं तं होइ अणाणुवाइत्ति ॥
सागारिआइपालियंक-णिसिज्जासेवणा य गिहिपत्ते ।
णिग्गंथिचेट्ठणाइ पडिसेहो मासकप्पस्स ॥
चारे वेरज्जे वा पढमसमोसरण तह णितिएसु ।
सुण्णे अक्कपिए अ अणाउंछे य संभोगे ॥
किंवा अकप्पिएणं गहियं फासुंपि होइ उ अभोज्जं ।
अन्नाउंछं को वा होइ गुणो कीप्पए गहिए ॥
पंचमहव्वयधारी समणा सव्वेवि किं ण भुंजंति ।
इय चरणवितथवादी इत्तो वुच्छं गईसुं तु ॥

यथाछन्दस्य प्ररूपणा उत्सूत्रा द्विविधा भवति ज्ञातव्या ।
चरणेषु गतिषु या तत्र चरणे इयं भवति ॥ १ ॥
प्रतिलेखनी-मुखपोतिका रजोहरण-निषद्या पात्रमात्रके पट्टे ।
पटलानि चोल(पट्टः) ऊर्णादशा प्रतिलेखनापोतं ॥ २ ॥
दन्तच्छिन्नमलिप्तं हारितस्थित मार्जना चाछन्नस्य ।
अनुपात्यनुपातिप्ररूपणं चरणे गतिष्वपि ॥ ३ ॥
अनुपातीति ज्ञायते युक्तिपतितं खलु भाषते एषः ।
यत्पुनः सूत्रापेतं तद् भवति अननुपातीति ॥
सागारिकादिपर्यङ्कनिषद्यासेवना च गृहिपात्रे ।
निर्ग्रन्थीस्थानादि प्रतिषेधो मासकल्पस्य ॥
चारे वैराज्ये वा प्रथमसमवसरणे तथा नित्येषु ।
शून्ये अकल्पिके चाज्ञातोञ्छे च संभोगे ॥
किंवदकल्पिकेन गृहीतप्रासुकमपि भवति त्वभोज्यम् ।
अज्ञातोञ्छं को वा भवति गुणो कल्पिकेन गृहीते ॥
पञ्चमहाव्रतधारिणो श्रमणाः सर्वेऽपि किं न भुञ्जते ? ।
इति चरणवितथवादी इतो वक्ष्ये गतिषु तु ॥

खेत्तं गओ अडविं इक्को संचिट्ठए तहिं चेव ।
तित्थयरो पुण पियरो खेत्तं पुण भावओ सिद्धित्ति ॥

एतासां गाथानामयं संक्षेपार्थः—अहछंदस्सत्ति । यथाछन्दस्य प्ररूपणा उत्सूत्रा—सूत्रादुत्तीर्णा द्विविधा भवति ज्ञातव्या । तद्यथा—चरणेषु चरणविषया, गतिषु गतिविषया ॥ १ ॥

तत्र या चरणे चरणविषया सा इयं वक्ष्यमाणा भवति, तामेवाह—पडिलेहणित्ति । मुखपोतिका मुखवस्त्रिका सैव प्रतिलेखिनी पात्रप्रत्युपेक्षिका पात्रकेसरिका, किं द्वयोः परिग्रहेण ? अतिरिक्तोपधिग्रहणदोषादेकयैव मुखपोतिकया कायभाजनोभयप्रत्युपेक्षणकार्यनिर्वाहेणापरवैफल्यात् । तथा रयहरणणिसिज्जत्ति । किं रजोहरणस्य द्वाभ्यां निषद्याभ्यां कर्तव्यम् ? एकैव निषद्याऽस्तु । पायमत्तएत्ति । यदेव पात्रं तदेव मात्रकं क्रियताम्, मात्रकं वा पात्रं क्रियताम्, किं द्वयोः परिग्रहेण ? एकेनैवान्यकार्यनिष्पत्तेः । भणितं च—"यो भिक्षुस्तरुणो बलवान् स एकं पात्रं गृह्णीयाद्" इति । तथा पट्टएत्ति । य एव चोलपट्टकः स एव रात्रौ संस्तारकस्योत्तरपट्टः क्रियताम्, किं पृथगुत्तरपट्टग्रहेण ? । तथा पडलाइं च्चोलत्ति । पटलानि किमिति पृथग् धियेते (यन्ते ?), चोलपट्टक एव भिक्षार्थं हिण्डमानेन द्विगुणस्त्रिगुणो वा कृत्वा पटलस्थाने वा निवेश्यताम् । उण्णादसियत्ति । रजोहरणस्य दशाः किमित्यूर्णमय्यः क्रियन्ते, क्षौमिकाः क्रियन्ताम्, ता ह्यूर्णमयीभ्यो मृदुतरा भवन्ति । पडिलेहणापोत्तंति । प्रतिलेखनावेलायामेकं पोतं प्रस्तार्य तस्योपरिसमस्त वस्त्रप्रत्युपेक्षणां कृत्वा तदनन्तरमुपाश्रयाद्बहिः प्रत्युपेक्षणीयम्, एवं हि महती जीवदया कृता भवतीति ॥ २ ॥

दंतछिन्नमिति । हस्तगताः पादगता वा नखाः प्रवृद्धा दन्तैश्छेत्तव्याः न नखरदनेन । नखरदनं हि ध्रियमाणमधिकरणं भवति । तथा अलित्तंति । पात्रमलिप्तं कर्तव्यम्, लेपे बहु दोषसंभवान्न पात्रं लेपनीयमिति भावः । हरियट्ठियत्ति । हरितप्रतिष्ठितं भक्तपानादि डगलादि च ग्राह्यम्, तद्ग्रहणे हि तेषां हरितकायजीवानां भारापहारः कृतो भवति । पमज्जणा यछन्नस्सत्ति । यदि छन्ने जीवदयानिमित्तं प्रमार्जना क्रियते ततो बहिरप्रच्छन्ने क्रियताम्, दयापरि-

---

क्षेत्रं गतोऽटवीमेकः संतिष्ठते तत्रैव ।
तीर्थकरः पुनः पिता क्षेत्रं पुनः भावतः सिद्धिरिति ॥

णामविशेषात् । ईदृशी यथा छन्दस्य प्ररूपणा चरणेषु गतिषु चानुपातिन्यनुपातिनी च भवति ।

अनुपातिन्यननुपातिन्योः स्वरूपमाह—अणुवाइत्ति । यद् भाषमाणः स यथा छन्दो ज्ञायते, यथा खु निश्चितं युक्तियुक्तं युक्तिसंगतमेव भाषते तदनुपातिप्ररूपणम् । यथा—यैव मुखपोतिका सैव प्रतिलेखनिकेत्यादि । यत्पुनर्भाष्यमाणं सूत्रापेतं प्रतिभासते तद्भवत्यननुपाति । यथा चोलपट्टः पटलानि क्रियन्तामिति, षट्पदिकापतनसंभवेन सूत्रयुक्तिबाधात् । अथवा सर्वाण्येव पदान्यगीतार्थप्रतिभासापेक्षयाऽनुपातीनि, गीतार्थप्रतिभासापेक्षया त्वननुपातीनीति ॥ ४ ॥

इदं चान्यत्तत्प्ररूपणम्—सागारियाइत्ति । सागारिकः शय्यातरस्तद्विषये ब्रूते—शय्यातरपिण्डग्रहणे नास्ति दोषः, प्रत्युत शय्यातरस्य महालाभ इति । आदिशब्दात्स्थापनाकुलेष्वपि प्रविशतो नास्ति दोषः, प्रत्युत भिक्षाशुद्धिरित्यादि ग्राह्यम् । पलिअंकत्ति । पर्यङ्कादिषु मत्कुणादिरहितेषु परिभुज्यमानेषु न को पि दोषः, प्रत्युत भूमावुपविशतो लाघवादयो दोषाः । निसेज्जासेवणत्ति । गृहिनिषद्यायां न दोषः, प्रत्युत धर्मश्रवणेन लाभ इति । गिहिपत्तेत्ति । गृहिपात्रके भोजनं कस्मान्न क्रियते ? नात्र दोषः, प्रत्युत सुन्दरपात्रोपभोगात्तवचनानुपघातलक्षणोऽन्यपात्राभारावहनलक्षणश्च गुण इति । निग्गंथिचेट्ठणाइत्ति । निर्ग्रन्थीनामुपाश्रये च स्थानादौ को दोषः ? यत्र तया स्थितेन शुभं मनः प्रवर्तव्यम्, तच्च स्वायत्तमिति । तथा मासकल्पस्य प्रतिषेधस्तेन क्रियते, यदि दोषो न विद्यते, तदा परतोऽपि तत्र स्थेयमिति ॥ ५ ॥

चारेत्ति । चारश्चरणं गमनमित्यर्थस्तद्विषये ब्रूते—वृष्ट्यभावे चतुर्मासकमध्येऽपि गच्छतां को दोष इति । तथा वेरज्जे यत्ति । वैराज्येऽपि ब्रूते—साधवो विहारं कुर्वन्तु, परित्यक्तं हि तैः शरीरम्, सोढव्याः खलु साधुभिरुपसर्गा इति । पढमसमोसरणंति । प्रथमसमवसरणं वर्षाकालस्तत्र ब्रूते—किमिति प्रथमसमवसरणे शुद्धं वस्त्रादि न ग्राह्यम् ? द्वितीयसमवसरणेऽपि हृद्गमादिदोषशुद्धमिति गृह्यते, तत्कोऽयं विशेषः ? इति । तह णिइएसुत्ति । तथा नित्येषु नित्यवासिषु प्ररूपयति—नित्यवासे न दोषः, प्रत्युत प्रभूतसूत्रादिग्रहणलक्षणो गुण इति । तथा सुत्तत्ति । यदुपकरणं न केनापि ह्रियते ततः शून्यायां वसतौ को दोषः ? । अकप्पिये अत्ति । अकल्पिकोऽगीतार्थस्तद्विषये ब्रूते—अकल्पिकेनानीतमज्ञातोञ्छं किं न भुज्यते ?, तस्याज्ञातोञ्छतया विशेषतो परिभोगार्हत्वात् । संभोएत्ति ।

संभोगे वृते—सर्वेऽपि पञ्चमहाव्रतधारित्वेन साधवः सांभोगिका इति। अकप्पिए-अत्ति। विशिष्य विवृणोति किं वत्ति। किंवत्—केन प्रकारेणाकल्पिकेनागीतार्थेन गृहीतं प्रासुकमज्ञातोञ्छमपि अभोज्यमपरिभोक्तव्यं भवति। को वा कल्पिकेन (अत्र गाथायां सप्तमी तृतीयार्थे) गृहीते गुणो भवति? नैव कश्चिद्, उभयत्रापि शुद्धयविशेषाद्। संभोएत्ति व्याचष्टे—पंचमहव्वयधारित्ति। पञ्चमहाव्रतधारिणः सर्वे श्रमणाः किं नैकत्र भुञ्जते? यदेके सांभोगिका अपरे असांभोगिका क्रियन्ते इति। इत्येवमुपदर्शितप्रकारेणानालोचितगुणदोषो यथाछन्दश्चरणविषये वितथवादी॥

अत ऊर्ध्वं तु गतिषु वितथवादिनं वक्ष्यामि—खेत्तगओ यत्ति। स यथाछन्दो गतिष्वेवं प्ररूपणां करोति—एगो गाहावई। तस्स तिण्णि पुत्ता। ते सव्वेवि खित्तकम्मोवजीविणो पियरेण खित्तकम्मे णिओइया। तत्थेगो जहाणत्तं करेइ। एगो अडविं गओ देसं देसेण हिंडइत्ति। एगो जिमिउं देवकुलादिसु अच्छति। कालंतरेण तेसिं पिया मओ। तेहिं सव्वेवि पितिसंतियं तिकाउं समं विभत्तं। तेसिं जं एक्केणं उवज्जियं तं सव्वेसिं सामन्नं जायं। एवं अम्हं पिया तित्थयरो तस्संति उवदेसेणं सव्वेवि समणा कायकिलेसं कुव्वंति। अम्हे ण करेमो। जं तुज्झेहिं कयं तं अम्हं सामन्नं। जहा तुब्भे देवलोगं सुकुलपच्चायातिं सिद्धिं वा गच्छह तहा अम्हेवि गच्छिस्सामोत्ति"। एष गाथाभावार्थः। अक्षरयोजनिका त्वियम्—एकः पुत्रः क्षेत्रं गतः। एकोऽटवीदेशान्तरेषु परिभ्रमतीत्यर्थः। अपर एकस्तत्रैव संतिष्ठते। पितरि च मृते धनं सर्वेषामपि समानम्। एवमस्माकमपि मातापितृस्थानीयस्तीर्थंकरः, क्षेत्रं क्षेत्रकलं धनं पुनर्भावतः परमार्थतः सिद्धिस्तां यूयमिव युष्मदुपार्जनेन वयमपि गमिष्याम इति।

तदेवं यथाछंदस्याप्युत्सूत्रप्ररूपणाव्यवस्थादर्शनात्कथमेवलक्षणो गृहीत इति निर्णीयते—यदुत मार्गपतितस्य यथाछन्दस्य कस्यचिदनाभोगा-

---

१ एको गाथापातेः। तस्य त्रयः पुत्राः। ते सर्वेऽपि क्षेत्रकर्मोपजीविनः पित्रा क्षेत्रकर्मणि नियोजिताः। तत्रैको यथाऽऽज्ञप्तं करोति। एकोऽटवीं गतो देशदेशान्तरेषु भ्रमति। एको जिमित्वा देवकुलादिष्वास्ते। कालान्तरेण तेषां पिता मृतः। तैः सर्वमपि पितृसत्कं श्रीकृत्य समं विभक्तम्। तेषां यदेकेनोपार्जितं तत्सर्वेषां सामान्यं जातम्। एवमस्माकं पिता तीर्थकरः, तस्येत्युपदेशेन सर्वेऽपि श्रमणाः कायक्लेशं कुर्वन्ति। वयं न कुर्मः। यद् युष्माभिः कृतं तदस्माकं सामान्यम्। यथा यूयं देवलोकं सुकुलप्रत्यायातिं सिद्धिं वा गच्छत, तथा वयमपि गमिष्याम इति।

देवोत्सूत्रभाषणम्, तच्च नानन्तसंसारकारणम्, उन्मार्गपतितानां तु सर्वेषामाभोगवतामनाभोगवतां वा तदनन्तसंसारकारणमेव, तीर्थोच्छेदाभिप्रायमूलत्वादिति, साध्वाचारोच्छेदाभिप्रायस्य यथाछन्देऽप्यविशेषात्।

अथ—"उम्मग्गमग्गसंपट्ठिआण साहूण गोअमातूणं (?)।
संसारो अ अणंतो होइ य समग्गणासीणं॥"

इति गच्छाचारप्रकीर्णकवचनबलादुन्मार्गपतितानां निह्नवानामनन्त एव संसारो ज्ञायते न तु यथाछन्दानामपि, अपरमार्गाश्रयणाभावादिति चेद्। उन्मार्गपतितो निह्नव एवेति कथमुद्देश्यनिर्णयः? साधुपदेन शाक्यादिव्यवच्छेदेऽपि यथाछन्दादिव्यवच्छेदस्य कर्तुमशक्यत्वात्, गुणभेदादिनेव क्रियादिविपर्यासमूलकदालम्बनप्ररूपणयाऽप्युन्मार्गभावनाविशेषाद्। न हि 'मार्गपतित' इत्येतावता शिष्टाचारनाशको यथाछन्दादिरपि नोन्मार्गगामी।

अथ यथाछन्दादीनामप्युन्मार्गगामित्वमिष्यते एव, न त्वनन्तसंसारनियमः, तन्नियमाभिधायकवचने उन्मार्गसंप्रस्थितपदेन तीर्थोच्छेदाभिप्रायवत एव ग्रहणादिति चेद्,। अहो किंचिदपूर्वयुक्तिकौशलम्! यदुक्तवचनबलात्तीर्थोच्छेदाभिप्रायवतां निह्नवानामनन्तसंसारनियमसिद्धौ पदविशेषतात्पर्यग्रहः, तस्मिंश्च सति तत्सिद्धिरित्यन्योन्याश्रयदोषमापतन्तं न वीक्षसे। संप्रदायादीदृशोऽर्थो गृहीत इति न दोष इति चेद्। न, संप्रदायादध्यवसायं प्रतीत्य निह्नवानामपि संख्यातादिभेदभिन्नस्यैव संसारस्य सिद्धत्वाद्, उन्मार्गसंप्रस्थितानां तीव्राध्यवसायानामेव ग्रहणे बाहुल्याभिप्रायेण व्याख्याने दोषाभावाद्। न चेदेवं तदा 'वयमेव सृष्टिस्थित्यादिकारिणः' इत्यादुत्सूत्रभाषिणोऽनवच्छिन्नमिथ्यात्वसंतानपरमहेतोस्तीर्थोच्छेदाभिप्रायवतो बलभद्रस्य जीवस्याप्यनन्तसंसारोत्पत्तिः प्रसज्येत। न चैतदशास्त्रीयं वचनम्, त्रिषष्टीयनेमिचरित्रेऽप्येवमुक्तत्वात्। तथाहि—

---

१ उन्मार्गमार्गसंप्रस्थितानां साधूनां.....(?)।
संसारश्चानन्तो भवति स्वमार्गनाशिनाम्॥

"प्रतिपद्य तथा रामो जगाम भरतावनौ ।
तथैव कृत्वा ते रूपे दर्शयामास सर्वतः ॥
एवमूचे च भो लोकाः ! कृत्वा नौ प्रतिमाः शुभाः ।
प्रकृष्टदेवताबुद्ध्या यूयं पूजयतादरात् ॥
वयमेव यतः सृष्टिस्थितिसंहारकारिणः ।
वयं दिव इहायामो यामश्च स्वेच्छया दिवम् ॥
निर्मिता द्वारकाऽस्माभिः संहृता च यियासुभिः ।
कर्ता हर्ता च नान्योऽस्ति स्वर्गदा वयमेव च ॥
एवं तस्य गिरा लोकः सर्वो ग्रामपुरादिषु ।
प्रतिमाः कृष्णहलिनोः कारंकारमपूजयत् ॥
प्रतिमार्चनकर्तृणां महान्तमुदयं ददौ ।
स सुरस्तेन सर्वत्र तद्भक्तोऽभूज्जनोऽखिलः ॥" इति ॥६॥

ननु बलभद्रस्योत्सूत्रवचनमिदं न स्वारसिकमतो न नियतम्, नियतोत्सूत्रं च निह्नवत्वकारणम्, अत एवापरापरोत्सूत्रभाषिणां यथाछन्दत्वमेव, नियतोत्सूत्रभाषिणां च निह्नवत्वमेव । तदुक्तमुत्सूत्रश्रमन्दकुदालकृता—

"तस्मादनियतोत्सूत्रं यथाछन्दत्वगेषु ।
न तदवस्थितकोत्सूत्रं निह्नवत्वमुपास्थितम् ॥" इति

एतदेव च नियमतोऽनन्तसंसारकारणम् । अत एव यः कश्चिद् मार्गपतितोऽप्युत्सूत्रं भणित्वाऽभिमानादिवशेन स्वोक्तवचनं स्थिरीकर्तुं कुयुक्तिमुद्भावयति, न पुनरुत्सूत्रभयेन त्यजति स उन्मार्गपतित इवावसातव्यः, नियतोत्सूत्रभाषित्वात्, तस्यापरमार्गाश्रयणाभावेऽपि निह्नवस्येवासदाग्रहवत्त्वाद् इत्यस्मन्मतमित्याशङ्कायामाह—

णियउस्सुत्तणिमित्ता संसाराणंतया ण सुत्तुत्ता ।
अज्झवसायाणुगओ भिन्नो चिय कारणं तीसे ॥६॥

नियतोत्सूत्रनिमित्ता संसारानन्तता न सूत्रोक्ता ।
अध्यवसायानुगतो भिन्न एव कारणं तस्याः ॥ ६ ॥

णियउसुत्तत्ति । नियतोत्सूत्रं निमित्तं यस्यां सा तथा, संसारानन्तता न सूत्रोक्ता, नियतोत्सूत्रं विनाऽपि मैथुनप्रतिसेवायुन्मार्गसमाचरण-तद्वन्दनादिनाऽप्यनन्तसंसारार्जनेन व्यभिचारात् । न चोत्सूत्रभाषणजन्येऽनन्तसंसारार्जने नियतोत्सूत्रभाषणस्यैव हेतुत्वान्न दोषः, तादृशकार्यकारणभावबोधकनियतसूत्रानुपलम्भाद् ।

"[1]उस्सुत्तभासगाणं बोहीणासो अणंतसंसारो"—

इत्यादिवचनानां सामान्यत एव कार्यकारणभावग्राहकत्वाद् । उत्तरकालं तत्र नियतत्वाख्यो विशेषः कल्प्यते इति चेद्, नैतदेवम्, तथा सति यथाछन्दस्य क्रियाप्यनन्तसंसारानुपपत्तिप्रसक्तेः, तस्य त्वदभिप्रायेणापरापरभावेन गृहीतयुक्तोत्सूत्रस्य नियतोत्सूत्रभाषित्वाभावात् ।

तथा च—

"[2]सव्वप्पवयणसारं मूलं संसारदुक्खमुक्खस्स ।
संमत्तं मइलित्ता ते दुग्गइवड्ढया हुंति ॥"

इत्यादिभाष्यवचनविरोधः । अथ यथाछन्दस्यापि यस्यानन्तसंसारार्जनं तस्य क्लिष्टाध्यवसायविशेषादेव, उन्मार्गपतितस्य निह्नवस्य तु नियतोत्सूत्रभाषणादेवेति न दोष इति चेद् । नं, एवं सत्यनियतहेतुकत्वप्रसङ्गाद् । अनियतहेतुकत्वं नामेति व्यक्तमाकरे । तथा च विप्रतिपन्न उन्मार्गस्थोऽनन्तसंसारी, नियतोत्सूत्रभाषित्वाद् इत्यत्राप्रयोजकत्वम्, किं तर्हि अनन्तसंसारतायामनुगतं नियामकमित्याह—तस्याः संसारानन्तताया: कारणं भिन्न एवानुगतोऽध्यवसायस्तीव्रत्वसंज्ञितः केवलिना, केवलिना निश्चीयमानोऽस्तीति गम्यम् । यस्य संग्रहादेशात्स्वातन्त्र्येणैव तस्यामनुगतं हेतुत्वम्, व्यवहारादेशाच्च क्रियाविशेषे सहकारित्वं घटकत्वं वा । शब्दमात्रानुगततीव्राध्यवसायसहकृतायास्तत्पूर्वीकाया वा पापक्रियाया अनन्तसंसारहेतुत्वव्यवहारात् । स च

---

१ उत्सूत्रभाषकानां बोधिनाशोऽनन्तसंसारः ॥
२ सर्वप्रवचनसारं मूलं संसारदुःखमोक्षस्य ।
सम्यक्त्वं मलिनयित्वा ते दुर्गतिवर्द्धका भवन्ति ॥

तीव्राध्यवसाय आभोगयतामनाभोगवतां वा शासनमालिन्यनिमित्त-प्रवृत्तिमतां रौद्रानुबन्धानां स्याद्, अनाभोगेनापि शासनमालिन्यप्रवृत्तौ महामिथ्यात्वार्जनोपदेशात्। तदुक्तमष्टकप्रकरणे—

"यः शासनस्य मालिन्येऽनाभोगेनापि वर्तते।
स तन्मिथ्यात्वहेतुत्वादन्येषां प्राणिनां ध्रुवम्॥
बध्नात्यपि तदेवालं परं संसारकारणम्।
विपाकदारुणं घोरं सर्वानर्थनिबन्धनम्॥"

शासनमालिन्यनिमित्तप्रवृत्तिश्च निह्नवानामिव यथाछन्दादीनामप्यविशिष्टेति कोऽयं पक्षपातः? यदुत निह्नवानामनन्तसंसारनियम एव, यथाछन्दादीनां त्वनियम इति। अनाभोगेनापि विषयविशेषद्वेषस्य विषमविपाकहेतुत्वाद्, अनियतोत्सूत्रभाषणस्य निशङ्कताऽभिव्यञ्जकतया सुतरां तथाभावात्। यथा ह्याभोगेनोत्सूत्रभाषिणां रागद्वेषोत्कर्षादतिसंक्लेशस्तथाऽनाभोगेनोत्सूत्रभाषिणामप्यप्रज्ञापनीयानां मोहोत्कर्षादयं भवन्ननिवारित एव। अत एव तेषां भावशुद्धिरप्यप्रमाणम्, मार्गाननुसारित्वात्। तदुक्तमष्टकप्रकरणे—

"भावशुद्धिरपि ज्ञेया यैषा मार्गानुसारिणी।
प्रज्ञापना प्रियाऽत्यर्थं न पुनः स्वाग्रहात्मिका॥
रागो द्वेषश्च मोहश्च भावमालिन्यहेतवः।
एतदुत्कर्षतो ज्ञेयो ह्यन्तोत्कर्षस्य तत्त्वतः॥
तथोत्कृष्टे जगत्यस्मिन् शुद्धिर्वै शब्दमात्रकम्।
स्वबुद्धिकल्पनाशिल्पनिर्मितं नार्थवद् भवेदिति॥

किं च—पार्श्वस्थादीनां नियतोत्सूत्रमप्युक्तविहारिणामपवादलक्षणं द्वितीयबालतानियामकमस्त्येव। यदाचारसूत्रम्—

"सीलमंता उवसंता संखाए रीयमाणा असीला अणुवयमाणस्स बितिया मन्दस्स बालया णिअट्टमाणा वेगे आयारगोयरमाइक्खंति नाणभट्ठा दंसणलूसिणोत्ति॥"

---

१ शीलवन्त उपशान्ता संख्यया(ज्ञानेन) रीयमाना (पराक्रममाणाः) 'अशीलाः' अनुवदतो द्वितीया मन्दस्य बालता, निवर्तमाना वा एके आचारगोचरमाचक्षते-ज्ञानभ्रष्टा दर्शनलूषिण इति।

एतद्वृत्तिर्यथा—शीलमष्टादशशीलाङ्गसहस्रसंख्यम्, यदि वा महाव्रतसमाधानं पञ्चेन्द्रियजयः कषायनिग्रहस्त्रिगुप्तिगुप्तता चेत्येतच्छीलं विद्यते येषां ते शीलवन्तः। तथोपशान्ताः, कषायोपशमाद्। अत्र शीलवद्ग्रहणेनैव गतार्थत्वाद् 'उपशान्ताः' इत्येतद्विशेषणं कषायनिग्रहप्राधान्यख्यापनार्थम्। सम्यक् ख्याप्यते प्रकाश्यतेऽनयेति संख्या—ज्ञा, तया रीयमाणाः—संयमानुष्ठानेन पराक्रममाणाः। कस्यचिद्विश्रान्तभागधेयतया 'अशीला एते' इत्येवमनुवदतो अनु पश्चाद् वदतोऽपवदतः, अन्येन वा मिथ्यादृष्ट्यादिना 'कुशीलाः' इत्येवमुक्तेऽनुवदतः पार्श्वस्थादेर्द्वितीयैषा मन्दस्याज्ञस्य बालता—मूर्खता। एकं तावत्स्वतश्चारित्रापगमः, पुनरपरानुयुक्तविहारिणोऽपवदतीत्येषा द्वितीया बालता। यदि वा 'शीलवन्तो एते, उपशान्ता वा' इत्येवमन्येनाभिहिते 'क्वैषां प्रचुरोपकरणानां शीलवत्त्वोपशान्तता वा' इत्येवमनुवदतो हीनाचारस्य द्वितीया बालता भवतीति। अपरे तु वीर्यान्तरायोदयात्स्वतोऽवसीदन्तोऽप्यपरसाधुप्रशंसान्विता यथावस्थितमाचारगोचरमावेदयेयुरिति एतदर्शयितुमाह—णिअट्टमाणा इत्यादि। एके कर्मोदयात्संयमान्निवर्तमाना लिङ्गाद्वा वाशब्दादनिवर्तमाना वा यथावस्थितमाचारगोचरमाचक्षते। 'वयं तु कर्तुमसहिष्णवः, आचारस्त्वेवंभूतः' इत्येवं वदतां तेषां द्वितीयबालता न भवत्येव। न पुनर्वदन्ति एवंभूत एव आचारो योऽस्माभिरनुष्ठीयते, साम्प्रतं दुःषमानुभावेन बलाद्यपगमान्मध्यमभूतैव वर्तिनी श्रेयसी नोत्सर्गावसर इति। उक्तं हि—

"नात्यायतं न शिथिलं यथा युञ्जीत सारथिः।
तथा भद्रं वहन्त्यश्वा योगः सर्वत्र पूजितः॥"

अपि च—

"जो जत्थ होइ भग्गो ओगासं सो परं अविंदंतो।
गंतुं तत्थ वयंतो इमं पहाणंति घोसेइ॥"[1] इत्यादि।

किंभूताः पुनः? एतदेव समर्थयेयुरित्याह—णाणभट्ठा। सदसद्विवेको ज्ञानं तस्माद्भ्रष्टा ज्ञानभ्रष्टाः। तथा दंसणलूसिणोत्ति। सम्यग्दर्शनविध्वंसिनो सदनुष्ठानेन स्वतो विनष्टाः, अपरानपि शङ्कोत्पादनेन सन्मार्गाच्च्यावयन्तीति॥

---

१ यो यत्र भवति भग्नोऽवकाशं स परमविन्दन्।
गन्तुं तत्र व्रजन् इदं प्रधानमिति घोषयति॥

तथा च संविग्नपाक्षिकातिरिक्तस्य पार्श्वस्थादेरपि द्वितीयबालता, नियामकनियतोत्सूत्रसद्भावात्, तस्यानन्तसंसारनियमान्निह्नवस्यापि तदनियम एव, भवभेदस्य भावभेदनियतत्वादिति प्रतिपत्तव्यम्॥

ननु कर्म तावदुत्कर्षतोऽप्यसंख्येयकालस्थितिकमेव बध्नन्ति, तत्कथं तीव्राध्यवसायवतामप्युत्सूत्रभाषिणामनन्तसंसारित्वं स्याद्? इत्याशङ्कायामाह—

कम्मं बन्धइ पावं जो खलु अणुवरयतिव्वपरिणामो।
असुहाणुबन्धजोगा अणंतसंसारिआ तस्स ॥ ७॥

कम्मंति। कर्म बध्नाति पापं यः खल्वनुपरततीव्रपरिणामः—अविच्छिन्नतथाविधसंक्लिष्टाध्यवसायः स्वेच्छानुरोधान्नियतास्रवप्रवृत्तो वाऽनियतास्रवप्रवृत्तो वा नियतोत्सूत्रभाषी वाऽनियतोत्सूत्रभाषी वाऽप्राप्तानुशयस्तस्याशुभानां ज्ञानावरणीयादिपापप्रकृतीनामनुबन्धस्योत्तरवृद्धिरूपस्य बध्यमानप्रकृतिषु तज्जननशक्तिरूपस्य वा योगात्संबन्धादनन्तसंसारिता भवति। ग्रन्थिभेदात्प्रागप्यनन्तसंसारार्जनेऽशुभानुबन्धस्यैव हेतुत्वात्प्राप्तसम्यग्दर्शनानामपि प्रतिपातेन तत एवानन्तसंसारसंभवात्। तदुक्तमुपदेशपदे—

"[1]गंठीइ आरओ विहु असई बंधो ण अन्नहा होइ।
ताए सो वि हु एवं णेओ असुहाणुबन्धोत्ति॥"

ततश्च बन्धमात्रान्नानन्तसंसारिता, किन्त्वनुबन्धादिति स्थितम्। अत एवाभोगादनाभोगाद्वोत्सूत्रभाषिणामपीह जन्मनि जन्मान्तरे वाऽऽलोचितप्रतिक्रान्ततत्पातकानामनुबन्धविच्छेदान्नानन्तसंसारिता, केवलमनन्तभववेद्यनिरुपक्रमकर्मबन्धे तन्निःशेषतां यावत्प्रायश्चित्तप्रतिपत्तिरेव न स्याद्, अध्यवसायविशेषाद्। नियतोपक्रमणीयस्वभाव-

---

कर्म बध्नाति पापं यो खल्वनुपरततीव्रपरिणामः।
अशुभानुबन्धयोगादनन्तसंसारिता तस्य ॥ ७॥

---

१ ग्रन्थेरारतोऽपि खलु असकृद् बन्धो नान्यथा भवति।
तस्याः सोऽपि खल्वेवं ज्ञेयोऽशुभानुबन्ध इति॥

कर्मबन्धे चेह जन्मनि जन्मान्तरे वा प्रायश्चित्तप्रतिपत्तिः स्यात् । अत एव जमालिशिष्यादीनां भगवत्समीपमुपगतानां तद्भव एवोत्सूत्रभाषण-प्रायश्चित्तप्रतिपत्तिः । कालीप्रभृतीनां च " तस्स ठाणस्स अणालोइअपडिक्कंता कालमासे कालं किच्चा०" इत्यादिवचनाद् तद्भवानालोचितपार्श्व-स्थत्वादिनिमित्तपापानां भवान्तर एव प्रायश्चित्तप्रतिपत्तिः । " कालीणं भंते देवी ताओ देवलोगाओ अणंतरं उव्वट्टित्ता कहिं गच्छिहिति ? काइं उववज्जिहिति ? । गोयमा ! महाविदेहवासे सिज्झिहिति ॥" इत्यादिवचनात्तासां भवान्तर एव पूर्वभवाचीर्णपार्श्वस्थत्वादिजातपापकर्मप्रायश्चित्तकरणात् " सव्वा वि हु पव्वज्जा पायच्छित्तं भवंतरकडाणं कम्माणं " इत्यादिपूर्वाचार्य-वचनात्प्रव्रज्याया एव भवान्तरकृतकर्मप्रायश्चित्तरूपत्वाद् । एतेन 'कृतस्य पापस्य प्रायश्चित्तप्रतिपत्तिस्तस्मिन्नेव भवे भवति न पुनः जन्मान्तरेऽपि' इति वदन् तत्र " जावाउ सावसेसं " इत्यादिसंमतिमुद्भावयन् व्यक्ता-मसंलग्नकृतामनवगच्छन्निरस्तो बोध्यः ।

अथ पूर्वभवकृतपापपरिज्ञानाभावात्कुतस्तदालोचनम् ? कुतस्तरां च तत्प्रायश्चितम् ? इति चेत्, न, एतद्भवकृतानामपि विस्मृतानामिव पूर्वभवकृतानामपि पापानां सामान्यज्ञानेनालोचनप्रायश्चितसंभवात्, अत एव मिथ्यात्व.हिंसादेः पारभविकस्यापि निन्दागर्हादिकम् ।

" इहभवियमन्नभवियं मिच्छत्तपवत्तणं जमहिगरणं ।
जिणपवयणपडिकुट्ठं दुट्ठं गरिहामि तं पावं ॥ "

" इहं भवे अन्नेसु वा भवग्गहणेसु पाणाइवाओ कओ वा काराविओ वा कीरंतो वा परेहिं समणुण्णाओ तं निंदामि गरिहामि "

---

१ तस्य स्थानस्यानालोचिताप्रतिक्रान्ता कालमासे कालं कृत्वा० ।

२ कालो भगवन् देवी तस्माद्देवलोकादनन्तरमुद्वृत्य कस्यां (गतौ) गमिष्यति, कस्यामुत्पत्स्यते ? । गौतम ! महाविदेहवर्षे सेत्स्यतीति ॥

३ सर्वोऽपि खलु प्रव्रज्या प्रायश्चित्तं भवान्तरकृतानां कर्मणाम् ।

४ यावत्तु अवशेषम् ।

५ इहभविकमन्यभविकं मिथ्यात्वप्रवर्तनं यदधिकरणम् ।
जिनप्रवचनप्रतिक्रुष्टं दुष्टं गर्हे तत्पापम् ॥

६ इह भवे अन्येषु वा भवग्रहणेषु प्राणातिपातः कृतो वा कारितो वा क्रियमाणो वा परैः समनुज्ञातस्तं निन्दामि गर्हे ।

इत्यादि चतुःशरणप्रकीर्णकपाक्षिकसूत्रादावुक्तम्। पापप्रतिघात-गुणबीजाधानसूत्रे हरिभद्रसूरिभिरप्येतद्भवसंबन्धि भवान्तरसंबन्धि वा पापं यत्तत्पदाभ्यां परामृश्य मिथ्यादुष्कृतप्रायश्चित्तेन विशोधनीयमित्युक्तम्। तथाहि—

सरणमुवगओ अ एएसिं गरिहामि दुक्कडं।

जण्णं अरहंतेसु वा सिद्धेसु वा आयरिएसु वा उवज्झाएसु वा साहुसु वा साहुणीसु वा अन्नेसु वा धम्मट्ठाणेसु माणणिज्जेसु पूअणिज्जेसु तहा माईसु वा पिईसु वा बंधूसु वा मित्तेसु वा उवयारीसु वा ओहेण वा जीवेसु मग्गट्ठिएसु अमग्गट्ठिएसु मग्गसाहणेसु अमग्गसाहणेसु जं किंचि वितहमायरिअं अणायरिअव्वं अणिच्छिअव्वं पावं पावाणुबंधि सुहुमं वा बायरं वा मणेणं वायाए काएणं वा कयं वा कारावि वा अणुमोइअं वा रागेण वा दोसेण वा मोहेण वा इत्थ वा जम्मे जम्मांतरेसु वा गरहियमेयं दुक्कडमेयं उज्झियव्वमेअं वियाणिअं मए कल्लाणमित्त-गुरु-भगवंतवयणाओ 'एवमेअं' ति रोइअं सद्धाए अरहंतसिद्धसमक्खं गरहामि अहमिणं दुक्कडमेअं उज्झियव्वमेअं इत्थ मिच्छा मि दुक्कडं।

एतद्व्याख्या—यथा चतुःशरणगमनानन्तरं दुष्कृतगर्होक्ता, तामाह—शरणमुपगतश्च सन्नेतेषामर्हदादीनां गर्हे दुष्कृतम्। किंविशिष्टम्? इत्याह—जण्णं अरहंतेसु वा इत्यादि। अर्हदादिविषयमोघेन वा जीवेषु मार्गस्थितेषु—सम्यग्दर्शनादियुक्तेषु, अमार्गस्थितेषु—एतद्विपरीतेषु, मार्गसाधनेषु—पुस्तकादिषु, अमार्गसाधनेषु—खड्गादिषु, यत्किंचिद्वितथमाचरितम्—अविधिपरिभोगादि, अनाचरितव्यं क्रियया, अनेष्टव्यं मनसा पापम्; पापकारणत्वेन पापानुबन्धि, तथा-

---

१ शरणमुपगतश्च एतेषां गर्हे दुष्कृतं यद्।

२ अर्हत्सु वा सिद्धेषु वा आचार्येषु वा उपाध्यायेषु वा साधुषु वा साध्वीषु वा अन्येषु वा धर्मस्थानेषु माननीयेषु पूजनीयेषु तथा मातृषु वा पितृषु वा बन्धुषु वा मित्रेषु वा उपकारिषु वा ओघेण वा जीवेषु मार्गस्थितेषु अमार्गस्थितेषु मार्गसाधनेषु अमार्गसाधनेषु यत्किंचिद्वितथमाचरितम् अनाचरितव्यम् अनेष्टव्यं पापं पापानुबन्धि सूक्ष्मं वा बादरं वा मनसा वाचा कायेन वा कृतं वा कारितं वाऽनुमोदितं वा रागेण वा द्वेषेण वा मोहेन वा अत्र वा जन्मनि जन्मान्तरेषु वा गर्हितमेतद् दुष्कृतमेतद् उज्झितव्यमेतद्, विज्ञातं मया कल्याणमित्र-गुरु-भगवद्वचनाद् 'एवमेतदिति रोचितं श्रद्धया, अर्हत्सिद्धसमक्षं गर्हे। अहमिदं दुष्कृतमेतद् उज्झितव्यमेतद् अत्र मिथ्या मे दुष्कृतम्।

विपाकभावेन गर्हितमेतद् कुत्साऽऽस्पदम्, दुष्कृतमेतद् धर्मबाह्यत्वेन, उज्झितव्यमेतद् हेयतया, विज्ञातं मया कल्याणमित्रगुरुभगवद्वचनाद्, 'एवमेतद्' इति रोचितं श्रद्धया—तथाविधक्षयोपशमजया, अर्हत्सिद्धसमक्षं गर्हे कथम् ? इत्याह—दुष्कृतमेतद्, उज्झितव्यमेतद्। अत्र व्यतिकरे 'मिच्छा मि दुक्कडं' वारत्रयं पाठः।

अथ हिंसादिकस्य पापस्य पारभविकस्यापि प्रायश्चित्तप्रतिपत्तिः स्यात्, न तूत्सूत्रभाषणजनितस्य, उत्सूत्रभाषिणो निह्नवस्य क्रियाबलादेवकिल्बिषिकत्वप्रासावपि तत्र निजकृतपापपरिज्ञानाभावेन दुर्लभबोधित्वभणनाद्।

यदागमः—

लद्धूण वि देवत्तं उववन्नो देवकिब्बिसे।
तत्थवि से न याणइ किं मे किच्चा इमं फलं॥
तत्तोवि से चइत्ता णं लब्भिही एलमूअगं।
णरगं तिरिक्खजोणिं वा बोही जत्थ सुदुल्लहा॥

एतद्वृत्तिर्यथा—लद्धूणवित्ति। लब्ध्वाऽपि देवत्वं तथाविधक्रियापालनवशेनोपपन्नो देवकिल्बिषनिकाये, तत्राप्यसौ न जानाति विशुद्धाध्यसायाभावात् किं मम कृत्वेदं फलं किल्बिषिकदेवत्वमिति। अस्य दोषान्तरमाह—तत्तोवित्ति। ततोऽपि देवलोकादसौ च्युत्वा लप्स्यते एडमूकताम्—अजभवानुकारि मनुष्यत्वम्, तथा नरकं तिर्यग्योनिं वा पारम्पर्येण लप्स्यते। बोधिर्यत्र सुदुर्लभा—सकलसंपत्तिनिबन्धना यत्र जिनधर्मप्राप्तिर्दुरापा।

'प्राप्नोत्येडमूकताम्' इति वाच्ये असकृद्भवप्राप्तिख्यापनार्थं 'लप्स्यते' इति भविष्यत्कालनिर्देश इति चेद्, मैवम्, नहि तत्र निह्नव एवाधिकृतः किन्तु तपःस्तेनादिः "तवतेणे वयतेणे" इत्यादि पूर्वगाथैकवाक्यत्वात्तस्याप्युत्कृष्टफलप्रदर्शनमेतद् न तु सर्वत्र सादृश्यनियमः, अध्यवसायवैचित्र्यात्। किं चैवम्—

---

१ लब्ध्वाऽपि देवत्वं उपपन्नो देवकिल्बिषिके।
तत्रापि स न जानाति किं मम कृत्वेदं फलम्॥
ततोऽपि स च्युत्वा लप्स्यते एडमूकताम्।
नरकं तिर्यग्योनिं वा बोधिर्यत्र सुदुर्लभा॥

२ तपःस्तेनो व्रतस्तेनः।

"इति से परस्स अट्ठाए कराइं कम्माइं बाले पकुव्वमाणे तेण दुक्खेण मूढे विप्परियासमुवेइ"[1]—

इत्याचाराङ्गवचनात्क्रूराणि कर्माणि परस्यार्थाय कुर्वतो हिताहितबुद्ध्यादिविपर्यासवतो हिंसादिदोषस्यापि भवान्तरे प्रायश्चित्तानुपपत्तिरेव स्यात्। अथ सर्वस्यैव पापस्य प्रमादेन कृतस्य विपर्यासाधायकत्वाद्विपर्यासजलसिच्यमानानां क्लेशपादपानां चानुबन्धफलत्वाद् भवान्तरेऽपि तथाभव्यत्वाविशेषात्कस्यचित्कदाचिद्विपर्यासनिवृत्त्यैवानुबन्धनिवृत्तेर्हिंसादिप्रायश्चित्तोपपत्तिरिति चेत्, तदिदमुत्सूत्रप्रायश्चित्तेऽपि तुल्यम्। न चैवमुत्सूत्रभाषणादनन्तसंसारानियमनात्ततो भयानुपपत्तिरिति शङ्कनीयम्, एकान्ताभावेऽपि बाहुल्योक्तफलापेक्षया हिंसादेरिवोत्सूत्रादास्तिकस्य भयोपपत्तेः। आस्तिक्यं ह्यसत्प्रवृत्तिभयनिमित्तमिति दिग्।

अनन्तसंसारिताऽशुभानुबन्धयोगादित्युक्तम्, अथाशुभानुबन्धस्य किं मूलम्? के च तद्भेदाः? इत्याह—

तम्मूलं मिच्छत्तं अभिग्गहिआइ तं च पंचविहं।
भव्वाणमभव्वाणं आभिग्गहिअं वणाभोगो ॥ ८ ॥

तम्मूलंति। तस्यानन्तसंसारहेत्वशुभानुबन्धस्य मूलं मिथ्यात्वम्, उत्कटहिंसादिदोषानामपि मिथ्यात्वसहकृतानामेव तद्धेतुत्वात्, अन्यथा दोषव्यामूढताऽनुपपत्तेः। तच्चाभिग्रहिकादिकं पञ्चविधम् आभिग्रहिकमनाभिग्रहिकमाभिनिवेशिकं सांशयिकमनाभोगं चेति पञ्चप्रकारम्। यद्यपि जीवादिपदार्थेषु तत्त्वमिति निश्चयात्मकस्य सम्यक्त्वस्य प्रतिपक्षभूतं मिथ्यात्वं द्विविधमेव पर्यवस्यति—जीवादयो न तत्त्वमिति विपर्यासात्मकं जीवादयस्तत्त्वमिति निश्चयाभावरूपानधि-

---

तन्मूलं मिथ्यात्वमभिग्रहिकादि तच्च पञ्चविधम्।
भव्यानाम्, अभव्यानामाभिग्रहिकं वाऽनाभोगः ॥ ८ ॥

---

१ इति स परस्यार्थाय क्रू राणि कर्माणि बालः प्रकुर्वन् तेन दुःखेन मूढो विपर्यासमुपैति।

गमात्मकं च। तदाह वाचकमुख्यः—"अनधिगमविपर्ययौ च मिथ्यात्वम्" इति, तथाऽपि 'धर्मेऽधर्मसंज्ञा' इत्येवमादयो दश भेदा इवोपाधिभेदात्पञ्चैते भेदाः शास्त्रप्रसिद्धाः। तत्राभिग्रहिकम्—अनाकलिततत्त्वस्याप्रज्ञापनीयताप्रयोजकस्वस्वाभ्युपगतार्थश्रद्धानम्। यथा बौद्धसांख्यादीनां स्वस्वदर्शनप्रक्रियावादिनाम्। यद्यपि वैतण्डिको न किमपि दर्शनमभ्युपगच्छति, तथाऽपि तस्य स्वाभ्युपगतवितण्डावादार्थ एव निबिडाग्रहवत्त्वादाभिग्रहिकत्वमिति नाव्याप्तिः। 'अनाकलिततत्त्वस्य' इति विशेषणाद् यो जैन एव धर्मवादेन परीक्षापूर्वं तत्त्वमाकलय्य स्वाभ्युपगतार्थं श्रद्धत्ते तत्र नातिव्याप्तिः। यस्तु नाम्ना जैनोऽपि स्वकुलाचारेणैवागमपरीक्षां बाधते तस्याभिग्रहिकत्वमेव, सम्यग्दृशोऽपरीक्षितपक्षपातित्वायोगात्। तदुक्तं हरिभद्रसूरिभिः—

"पक्षपातो न मे वीरे न द्वेषः कपिलादिषु।
युक्तिमद्वचनं यस्य तस्य कार्यः परिग्रहः॥" इति।

यश्चागीतार्थो गीतार्थनिश्रितो माषतुषादिकल्पः प्रज्ञापाटवाभावादनाकलिततत्त्व एव स्वाभिगतार्थं जैनक्रियाकदम्बकरूपं श्रद्धत्ते तस्य स्वाभ्युपगतार्थश्रद्धानं नाप्रज्ञापनीयताप्रयोजकम्, असद्ग्रहशक्त्यभावात्, किन्तु गुणवदाज्ञाप्रामाण्यमूलत्वेन गुणवत्पारतन्त्र्यप्रयोजकमित्यप्रज्ञापनीयताप्रयोजकत्वविशेषणान्न तत्रातिव्याप्तिः। स्वपराभ्युपगतार्थयोरविशेषेण श्रद्धानमनाभिग्रहिकम्। यथा 'सर्वाणि दर्शनानि शोभनानि' इति प्रतिज्ञावतां मुग्धलोकानाम्। यद्यपि परमोपेक्षावतां निश्चयपरिकर्मितमतीनां सम्यग्दृष्टीनां स्वस्थाने सर्वनयश्रद्धानमस्ति, शिष्यमतिविस्फारणरूपकारणं विनैकतरनयार्थनिर्द्धारणन्याशास्त्रार्थत्वात्। तदाह संमतौ सिद्धसेनः—

"[१]णियवयणिज्जसच्चा सव्वणया परवियालणे मोहा।
ते पुण न दिट्ठसमओ वि भयइ सच्चे व अलिए व॥"

---

१ निजकवचनीयसत्याः सर्वनयाः परविचालने मोहाः।
तान् पुनर्न दृष्टसमयो विभजते सत्ये वा अलिके वा॥
(सम्मतितर्के. नयकाण्डः गा० २८)

[निजकवचनीये स्वांशे परिच्छेद्ये सत्याः—सम्यग्ज्ञानरूपाः सर्व एव नया[illegible] परविचालने

तथाऽपि स्वस्वस्थानविनियोगलक्षणेन विशेषेण तेषां सर्वनयश्रद्धानमस्तीति नातिव्याप्तिः ।

विदुषोऽपि स्वरसवाहिभगवत्प्रणीतशास्त्रबाधितार्थश्रद्धानमाभिनिवेशिकम् । स्वस्वशास्त्रबाधितार्थश्रद्धानं विपर्यस्तशाक्यादेरपीति तत्रातिव्याप्तिवारणाय भगवत्प्रणीतत्वं शास्त्रविशेषणम् । भगवत्प्रणीतशास्त्रे बाधितार्थश्रद्धानमिति सप्तमीगर्भसमासान्नातिव्याप्तितादवस्थ्यम्, तथाऽप्यनाभोगात्प्रज्ञापकदोषाद्वा वितथश्रद्धानवति सम्यग्दृष्टावतिव्याप्तिः, अनाभोगाद् गुरुनियोगाद्वा सम्यग्दृष्टेरपि वितथश्रद्धानभणनात् । तथा चोक्तमुत्तराध्ययननिर्युक्तौ—

"सम्मद्दिट्ठी जीवो उवइट्ठं पवयणं तु सद्दहइ ।
सद्दहइ असब्भावं अणाभोगा गुरुणिओगा वा ॥" (कर्मप्र.)[1]

इति तद्वारणाय स्वरसवाहीति सम्यग्वक्तृवचनानिवर्त्तनीयत्वं तदर्थः । अनाभोगादिजनितं मुग्धश्राद्धादीनां वितथश्रद्धानं तु सम्यग्वक्तृवचननिवर्त्तनीयमिति न दोषस्तथाऽपि जिनभद्रसिद्धसेनादिप्रावचनिकप्रधानविप्रतिपत्तिविषयपक्षद्वयान्यतरस्य वस्तुनः शास्त्रबाधितत्वात्तदन्यतरश्रद्धानवतोऽभिनिवेशित्वप्रसङ्ग इति तद्वारणार्थं विदुषोऽपीति—शास्त्रतात्पर्यबाधप्रतिसंधानवत इत्यर्थः । सिद्धसेनादयश्च स्वस्वाभ्युपगतमर्थं शास्त्रतात्पर्यबाधं प्रतिसंधायापि पक्षपातेन न प्रतिपन्नवन्तः, किन्त्वविच्छिन्नप्रावचनिकपरम्परया शास्त्रतात्पर्यमेव स्वाभ्युपगतार्थानुकूलत्वेन प्रतिसंधायेति न तेऽभिनिवेशिनः । गोष्ठामाहिलादयस्तु शास्त्रतात्पर्यबाधं प्रतिसंधायैवान्यथा श्रद्धत्ते इति न दोषः ।

परविषयोन्मूलने मोहाः—मुह्यन्तीति मोहा मिथ्याप्रत्ययाः, परविषयस्यापि सत्यत्वेनोन्मूलयितुमशक्यत्वात्, तदभावे स्वविषयस्याप्यव्यवस्थितेः, मतश्च परविषयस्याभावे स्वविषयस्याप्यसत्त्वात्, तत्प्रत्ययस्य मिथ्यात्वम् । एवं तद्व्यतिरिक्तप्राहकप्रमाणस्य चाभावात् तस्मात्तानेव नयान्, पुनःशब्दस्यावधारणार्थत्वात् । नेति प्रतिषेधो विभजनक्रियायाः । दृष्टः समयः सिद्धान्तवाच्यमनैकान्तात्मकं वस्तुतत्त्वं येन पुंसा स तथा सन् विभजते सत्येतरतया, स्वतरविषयमवधारयमाणोऽपि तथा तन्न विभजते, अपि त्वितरनयविषयसव्यपेक्षमेव स्वनयाभिप्रेतं विषयं सत्यमेवावधारयतीति यावत् ।]

१ सम्यग्दृष्टर्जीव उपदिष्टं प्रवचनं तु श्रद्धत्ते ।
श्रद्धत्ते असद्भावमनाभोगाद् गुरुनियोगाद्वा ॥

भगवद्वचनप्रामाण्यसंशयप्रयुक्तः शास्त्रार्थसंशयः सांशयिकम् । यथा सर्वाणि दर्शनानि प्रमाणं कानिचिद्वा, इदं भगवद्वचनं प्रमाणं नवेत्यादि । संशयानां मिथ्यात्वप्रदेशोदयनिष्पन्नानां साधूनामपि सूक्ष्मार्थसंशयानां मिथ्यात्वभावो मा प्रासाङ्क्षीदिति भगवद्वचनप्रामाण्यसंशयप्रयुक्तत्वं विशेषणम् । ते च नैवंभूताः, किन्तु भगवद्वचनप्रामाण्यज्ञाननिवर्तनीयाः, सूक्ष्मार्थादिसंशये सति " तमेव सच्चं णीसंकं जं जिणेहिं पवेइयं[1] " इत्यादयागमोदितभगवद्वचनप्रामाण्यपुरस्कारेण तदुद्धारस्यैव साध्वाचारत्वात् । या तु शङ्का साधूनामपि स्वरसवाहितया न निवर्तते सा सांशयिकमिथ्यात्वरूपा सत्यनाचारापादिकैव । अत एव काङ्क्षामोहोदयादाकर्षसिद्धिः ।

साक्षात्परम्परया च तत्त्वाप्रतिपत्तिरनाभोगम् । यथैकेन्द्रियादीनां तत्त्वातत्त्वानध्यवसायवतां मुग्धलोकानां च । यद्यपि माषतुषादिकल्पानां साधूनामपि साक्षात्तत्त्वाप्रतिपत्तिरस्ति, तथाऽपि तेषां गीतार्थनिश्रितत्वात्तद्गततत्त्वप्रतिपत्तिः परम्परया तेष्वपि सत्त्वान्न तत्रातिव्याप्तिः । तत्त्वाप्रतिपत्तिश्चात्र संशयनिश्चयसाधारणतत्त्वज्ञानसामान्याभाव इति न सांशयिकेऽतिव्याप्तिरिति दिक् ।

एतच्च पञ्चप्रकारमपि मिथ्यात्वं भव्यानां भवति । अभव्यानां त्वाभिग्रहिकमनाभोगो वेति द्वे एव मिथ्यात्वे स्याताम्, न त्वनाभिग्रहिकादीनि त्रीणि; अनाभिग्रहिकस्य विच्छिन्नपक्षपाततया मलाल्पतानिमित्तकत्वाद्, आभिनिवेशिकस्य व्यापन्नदर्शननियतत्वाद्, सांशयिकस्य च सकम्पप्रवृत्तिनिबन्धनत्वाद् अभव्यानां च बाधितार्थे निष्कम्पमेव प्रवृत्तेः; अत एव भव्याभव्यत्वशङ्काऽपि तेषां निषिद्धा । तदुक्तमाचारटीकायाम्—" अभव्यस्य भव्याभव्यत्वशङ्काया अभावाद् " इति ॥ ८ ॥

नन्वभव्यानामन्तस्तत्त्वशून्यानामनाभोगः सार्वदिको भवतु, आभिग्रहिकं तु कथं स्याद् ? इति भ्रान्तस्याशङ्कामपाकर्तुमाभिग्रहिकभेदानुपदर्शयति—

---

१ तदेव सत्यं निःशङ्कं यज्जिनैः प्रवेदितम् ।

णत्थि ण णिच्चो ण कुणइ कयं ण वेइए णत्थि णिव्वाणं ।
णत्थि मोक्खोवाओ आभिग्गहिअस्स छ विअप्पा ॥ ९ ॥

णत्थित्ति । १ नास्त्येवात्मा, २ न नित्य आत्मा, ३ न कर्ता, ४ कृतं न वेदयति, ५ नास्ति निर्वाणम्, ६ नास्ति मोक्षोपाय इत्याभिग्रहिकस्य चार्वाकादि-दर्शनप्रवर्तकस्य परपक्षनिराकरणप्रवृत्तद्रव्यानुयोगसारसंमत्यादिग्रन्थप्रसिद्धाः षड् विकल्पाः, ते च सदाऽनास्तिक्यमयानामभव्यानां व्यक्ता एवेति कस्तेषामाभिग्रहिकसत्त्वे संशय इति भावः ।

इत्थं च—

" लोइअमिच्छतं पुण सरूवभेएण हुज्ज चउभेअं ।
अभिगहिअमणभिगहिअं संसइअं तह अणाभोगं ॥
तत्थवि जमणाभोगं अव्वत्तं सेसगाणि वत्ताणि ।
चत्तारिवि जं णियमा संज्ञीणं हुंति भव्वाणं ॥ "

इति नवीनकल्पनां कुर्वन् अभव्यानां व्यक्तं मिथ्यात्वं न भवत्येवेति वदन् पर्यनुयोज्यः । ननु भोः कथमभव्यानां व्यक्तमिथ्यात्वं न भवति ?, नास्त्यात्मेत्यादिमिथ्यात्वविकल्पा हि व्यक्ता एव तेषां श्रूयन्ते । तथा—

" अभव्याश्रितमिथ्यात्वेऽनाद्यन्ता स्थितिर्भवेद् ।
सा भव्याश्रितमिथ्यात्वेऽनादिसान्ता पुनर्मता ॥

अभव्यानाश्रित्य मिथ्यात्वे—सामान्येन व्यक्ताव्यक्तमिथ्यात्वविषयेऽनाद्यन्ता स्थितिर्भवति । तथा सैव स्थितिर्भव्यजीवान्पुनराश्रित्यानादिसान्ता मता । यदाह—

" [3]मिच्छत्तमभव्वाणं तमणाइमणंतयं मुणेयव्वं ।
भव्वाणं तु अणाइसपज्जवसियं तु सम्मत्ते ॥ "

---

१ नास्ति न नित्यो न करोति कृतं न वेदयति नास्ति निर्वाणं ।
नास्ति मोक्षोपाय आभिग्रहिकस्य षड् विकल्पाः ॥

२ लौकिकमिथ्यात्वं पुनः स्वरूपभेदेन भवेच्चतुर्भेदम् ।
आभिग्रहिकमनाभिग्रहिकं सांशयिकं तथाऽनाभोगम् ॥
तत्रापि यदनाभोगमव्यक्तं शेषकाणि व्यक्तानि ।
चत्वार्यपि यन्नियमात् संज्ञिनां भवन्ति भव्यानाम् ॥

३ मिथ्यात्वमभव्यानां तदनाद्यनन्तकं ज्ञातव्यम् ।
भव्यानां त्वनादिसपर्यवसितं तु सम्यक्त्वे ॥

इति गुणस्थानक्रकमारोहसूत्रश्रुत्यनुसारेणाभव्यानां व्यक्तमपि मिथ्यात्वं भवतीत्यापातदृशाऽपि व्यक्तमेव प्रतीयते । अपि च पालक-संभवकादीनां प्रवचनार्हत्प्रत्यनीकानामुदीर्णव्यक्ततरमिथ्यात्वमोहनीयोदयानामेव समुद्भूता नानाविधाः श्रुतविकल्पाः श्रूयन्ते । किं च—मोक्षकारणे धर्मे एकान्तभवकारणत्वेनाधर्मश्रद्धानरूपं मिथ्यात्वमपि तेषां लब्ध्यार्थं गृहीतप्रव्रज्यानां व्यक्तमेव । यत्पुनरुच्यते—तेषां कदाचित्कुलाचारवशेन व्यवहारतो व्यक्तमिथ्यात्वे सम्यक्त्वे वा सत्यपि निश्चयतः सर्वकालमनाभोगमिथ्यात्वमेव भवतीति । तदभिनिवेशबिजृम्भितम्, शुद्धयप्रतिपत्त्यभावापेक्षया निश्चयेनानाभोगाभ्युपगमे आभिग्रहिकादिस्थलेऽपि तत्प्रसङ्गाद्, बहिरन्तर्व्यक्ताव्यक्तोपयोगद्वयाभ्युपगमस्य चापसिद्धान्तकलङ्कदूषितत्वाद् ।

अथ यदेकपुद्गलावशेषसंसारस्य क्रियावादित्वाभिव्यञ्जकं धर्मधिया क्रियारुचिनिमित्तं तन्मिथ्यात्वं व्यक्तम् ।

यदुक्तम्—

"तेसुवि एगो पुग्गलपरिअट्टो जेसिं हुज्ज संसारो ।
तहभव्वत्ता तेसिं केसिंचि होइ किरियरुई ॥
तीए किरियाकरणं लिंगं पुण होइ धम्मबुद्धीए ।
किरियारुईणिमित्तं जं वुत्तं तत्तमिच्छंति ॥"[१]

तोऽन्यच्चाव्यक्तं मिथ्यात्वम् । न चाभव्यस्य कदाप्येकपुद्गलपरावर्तावशेषः संसार इति सदैव तस्याव्यक्तं मिथ्यात्वमवस्थितमिति चेद्, मैवम्, एवं सति चरमपुद्गलपरावर्तातिरिक्तपुद्गलपरावर्तवर्तिनां भव्यानामप्यव्यक्तानाभोगमिथ्यात्वव्यवस्थितावाभिग्रहिकमिथ्यात्वोच्छेदप्रसङ्गात् । किं च—एवमनाभोगमिथ्यात्वे वर्तमाना जीवा न मार्गगामिनो नवोन्मार्गगामिनो भवन्ति, अनाभोगमिथ्यात्वस्यानादिमत्त्वेन सर्वेषामपि जीवानां निजगृहकल्पत्वाद् । लोकोऽपि निजगृहे भूयःकालं

१ तेष्वपि एको पुद्गलपरावर्तो येषां भवेत्संसारः ।
तथाभव्यता तेषां केषांचिद् भवेत्क्रियारुचिः ॥
तया क्रियाकरणं लिङ्गं पुनर्भवति धर्मबुद्ध्या ।
क्रियारुचिनिमित्तं यदुक्तं तत्तमिष्यत्वमिति ॥

वसन्नपि न मार्गगामी न वोन्मार्गगामीति व्यपदिश्यते, किन्तु गृहान्निर्गतः समीहितनगराभिमुखं गच्छन् मार्गगामी, अन्यथा तून्मार्गगामीति व्यपदिश्यते। एवं तथाभव्यत्वयोगेनानादिमिथ्यात्वान्निर्गतो यदि जैनमार्गमाश्रयते तदा मार्गगामी, जैनमार्गस्यैव मोक्षमार्गत्वाद्। यदि च शाक्यादिदर्शनं जमाल्यादिदर्शनं वाऽऽश्रयते तदोन्मार्गगामीति व्यपदिश्यते, तदीयदर्शनस्य संसारमार्गत्वेन मोक्षं प्रत्युन्मार्गभूतत्वादिति स्वकल्पितप्रक्रियापेक्षयाऽचरमपुद्गलपरावर्तवर्तिनः शाक्यादयोऽपि नोन्मार्गगामिनो स्युरिति, "कुप्पवयणपासंडी सव्वे उम्मग्गपट्ठिया" इत्यादि प्रवचनविरोधः। किं च-एवं धर्मधिया विरुद्धक्रियाकरणादुन्मार्गगामित्वं यथा व्यक्तमिथ्यात्वोपष्टम्भाच्चरमपुद्गलपरावर्त एव तथा धर्मधिया हिंसाकरणाद्धिंसकत्वमपि तदैवेत्यचरमपुद्गलपरावर्तेषु हिंसकत्वादिकमपि न स्यादिति सर्वत्र त्रैराशिकमतानुसरणे जैनप्रक्रियाया मूलत एव विलोपापत्तेर्महदसमञ्जसम्। तस्माद्भव्यानामपि दूरभव्यानामिव योग्यतानुसारेणाभिग्रहिकव्यक्तमिथ्यात्वोपगमे न दोष इति मन्तव्यम्।

अथाभव्या अव्यक्तमिथ्यात्ववन्तः, अव्यवहारित्वात्, संप्रतिपन्ननिगोदजीववद्-इत्यनुमानात्तेषामव्यक्तमिथ्यात्वसिद्धिः। अव्यवहारित्वं च तेषामनन्तपुद्गलपरावर्तकालस्थायित्वात् सिध्यति। व्यावहारिकाणामुत्कृष्टसंसारस्यावलिकासंख्येयभागपुद्गलपरावर्तमानत्वात्। तदुक्तं कायस्थितिस्तोत्रे—

"अव्ववहारियमज्झे भमिऊण अणंतपुग्गलपरट्टे।
कहवि ववहारारासिं संपत्तो नाह तत्थवि य॥
उक्कोसं तिरियगई-असण्णि-एगिंदि-वण-णपुंसेसु।
भमिओ आवलिअअसंखभागसमयपुग्गलपरट्टे॥"

---

१ अव्यवहारिकमध्ये भ्रान्त्वाऽनन्तपुद्गलपरावर्तान्।
कथमपि व्यवहारराशिं संप्राप्तो नाथ! तत्रापि च॥
उत्कृष्टं तिर्यग्गत्यसंज्ञ्येकेन्द्रिय-वण-नपुंसकेषु।
भ्रान्त आवलिकाऽसंख्यभागसमयपुद्गलपरावर्तान्॥

अत एवोत्कृष्टो वनस्पतिकालोऽपि प्रवचने व्यावहारिकापेक्षयैवोक्तः। तथाहि—

"वणस्सइकाइआणं पुच्छा, जहण्णेणं अंतोमुहुत्तं उक्कोसेणं अणंतं कालं—अणंता उस्सप्पिणिओसप्पिणीओ कालओ, खित्तओ अणंता लोया असंखेज्जा पुग्गलपरिअट्टा" इति।

इदमेव चाभिप्रेत्यास्माभिरुक्तम्—

"ववहारीणं णियमा संसारो जेसिं हुज्ज उक्कोसो।
तेसिं आवलिअअसंखभागसमपोग्गलपरट्टा॥"[2]

इत्यस्मन्मतमदुष्टमिति चेत्। नायमप्येकान्तः, अनन्तपुद्गलपरावर्तकालस्थायित्वेनाप्यव्यवहारित्वासिद्धेः। व्यावहारिकाणामप्यावलिकाऽसंख्येयभागपुद्गलपरावर्तान्तरितभूयोभवभ्रमणेनानन्तपुद्गलपरावर्तावस्थानस्यापि संभवात्। तदुक्तं संग्रहणीवृत्तौ—"एते च निगोदे वर्तमाना जीवा द्विधा—सांव्यवहारिका असांव्यवहारिकाश्च। तत्र ये सांव्यवहारिकास्ते निगोदेभ्य उद्वृत्य शेषजीवराशिमध्ये समुत्पद्यन्ते, तेभ्य उद्वृत्य केचिद् भूयोऽपि निगोदमध्ये समागच्छन्ति, तत्राप्युत्कर्षत आवलिकाऽसंख्येयभागगतसमयप्रमाणान् पुद्गलपरावर्तान् स्थित्वा भूयोऽपि शेषजीवेषु समागच्छन्ति, एवं भूयो भूयः सांव्यवहारिकजीवा गत्यागतीः कुर्वन्तीति"। यत्पुनरत्र भूयो भूयः परिभ्रमणेऽप्युक्तासंख्येयपुद्गलपरावर्तानतिक्रम एव, आवलिकाऽसंख्येयभागपुद्गलपरावर्तानामसंख्यातगुणानामप्यसंख्यातत्वमेवेति प्रतीतौ कुतः भूयो भूयः शब्दाभ्यामानन्त्यकल्पनाया गन्धोऽपि, तेन भूयो भूयः परिभ्रमणेऽप्यसंख्यातत्वं तदवस्थमेव। अतस्तावता कालेन व्यावहारिकाणां सर्वेषामपि सिद्धिर्भणितेति परेण स्वमतं समाहितम्, तदपि नैकान्तरमणीयम्। एवं "विकलेन्द्रियैकेन्द्रियेषु गतागतैरनन्तान् पुद्गलपरावर्तान् निरुद्धोऽतिदुःखितः" इत्यादिना "अन्यदा च कथमपि नीतोऽसावार्यदेशोद्भवमातङ्गेषु, तेभ्योऽप्यभक्ष्यभक्षणादिभिर्नरकपातादिक्रमेण रसगृद्ध्यकार्य-

---

१ वनस्पतिकायिकानां प्रश्नः, जघन्येन अन्तर्मुहूर्तमुत्कृष्टेनानन्तं कालम्-अनन्ता उत्सर्पिण्यवसर्पिण्यः कालतः, क्षेत्रत अनन्ता लोका असंख्येया पुद्गलपरिवर्त्ताः। इति।

२ व्यावहारिकाणां नियमात्संसारो येषां भवेदुत्कृष्टः।
तेषामावलिकासंख्यभागसमपुद्गलपरावर्ताः॥

प्रत्यनाभोगलीलया व्याकृत्य विधृतोऽनन्तपुद्गलपरावर्तान्" इत्यादिना महता ग्रन्थेन सुबन्धुकेवलिचारित्रादौ व्यावहारिकत्वमुपयुषोऽपि संसारे-जीवस्य विचित्रभवान्तरितताऽनन्तपुद्गलपरावर्तभ्रमणस्य निगदसिद्धत्वात्। तथा योगबिन्दुसूत्रवृत्तावपि नरनारकादिभावेनानादौ संसारेऽनन्तपुद्गलपरावर्तभ्रमणस्वाभाव्यमुक्तम्। तथाहि—

" अनादिरेष संसारो नानागतिसमाश्रयः।
पुद्गलानां परावर्ता अत्रानन्तास्तथा मताः॥

अनादिरविद्यमानमूलारम्भ एष प्रत्यक्षतो दृश्यमानः संसारो भवः, कीदृशः? इत्याह—नानागतिसमाश्रयः—नरनारकादिविचित्रपर्यायपात्रं वर्तते। ततश्च पुद्गलानामौदारिकादिवर्गणारूपाणां सर्वेषां परावर्ता ग्रहणमोक्षात्मका अत्र संसारेऽनन्तवारस्वभावाः, तथा तेन—समयप्रसिद्धप्रकारेण गता अतीताः। केषाम्? इत्याह—

सर्वेषामेव सत्त्वानां तत्स्वाभाव्यनियोगतः।
अन्यथा संविदे तेषां सूक्ष्मबुद्ध्या विभाव्यताम्॥

सर्वेषामेव सत्त्वानां प्राणिनां तत्स्वाभाव्यम्—अनन्तपुद्गलपरावर्तपरिभ्रमण-स्वभावता तस्य नियोगो व्यापारस्तस्माद्। अत्रैव व्यतिरेकमाह—न नैव अन्यथा—तत्स्वाभाव्यनियोगमन्तरेण संविद् अवबोधो घटते। एतेषामनन्तपुद्गलपरावर्तानां सूक्ष्मबुद्ध्या निपुणाभोगेन विभाव्यताम्—अनुचिन्त्यतामेतद्।

इति व्यावहारिकत्वेऽप्यनन्तपुद्गलपरावर्तभ्रमणसंभवात्, तेनाभव्यानामव्यावहारिकत्वसाधनमसंगतमिति द्रष्टव्यम्॥

ननु प्रज्ञापनावृत्तौ व्यावहारिकाणामुत्कर्षतोऽप्यावलिकाऽसंख्येयभागपुद्गलपरावर्तस्थितिः, तत ऊर्ध्वं चावश्यं सिद्धिरिति स्फुटं प्रतीयते। तथा च तद्ग्रन्थः—" ननु यदि वनस्पतिकालप्रमाणमसंख्येयाः पुद्गलपरावर्तास्ततो यदुच्यते सिद्धान्ते "मरुदेवीजीवो यावज्जीवभावं वनस्पतिरासीद्" इति तत्कथं स्यात्? कथं वा वनस्पतीनामनादित्वम्?, प्रतिनियतकालप्रमाणतया वनस्पतिभावस्यानादित्वविरोधात्। तथाहि—असंख्येयाः पुद्गलपरावर्तास्तेषामेव स्थानमानम्, तत एतावति कालेऽतिक्रान्ते नियमात्सर्वेऽपि कायपरावर्तं कुर्वते, यथा स्वस्थितिकाले सुरादयः। उक्तं च—

जइ पुग्गलपरिअट्टा संखाइआ वणस्सई कालो ।
तो अचंतवणस्सइजीवा कह नाम मरुदेवी ? ॥
हुज्ज व वणस्सईणं अणाइअन्तमत एव हेऊओ ।
जमसंखेज्जा पोग्गलपरिअट्टा तत्थवत्थाणं ॥
कालेणेवइएणं तम्हा कुव्वंति कायपल्लट्टं ।
सव्वेवि वणस्सइणो ठिइकालंते जह सुराई ॥

किंच—एवं यद्वनस्पतीनां निर्लेपनमागमे प्रतिषिद्धम्, तदपीदानीं प्रसक्तं कथम् ? इति चेद् । उच्यते—इह प्रतिसमयमसंख्येया वनस्पतिभ्यो जीवा उद्वर्तन्ते, वनस्पतीनां च कायपरिमाणमसंख्येयाः पुद्गलपरावर्ताः, ततो यावन्तोऽसंख्येयेषु पुद्गलपरावर्तेषु समयास्तैरभ्यस्ता एकसमयोद्वृत्ता जीवा यावन्तो भवन्ति तावत्परिमाणमागतं वनस्पतीनाम् । ततः प्रतिनियतपरिमाणतया सिद्धं निर्लेपनम्, प्रतिनियतपरिमाणत्वाद्, एवं गच्छता कालेन सिद्धिरपि सर्वेषां भव्यानां प्रसक्ता, तत्प्रसक्तौ च मोक्षपथव्यवच्छेदोऽपि प्रसक्तः, सर्वभव्यसिद्धिगमनानन्तरमन्यस्य सिद्धिगमनायोगात् । आह च—

" कायठिई कालेणं तेसिमसंखिज्जयावहारेणं ।
णिल्लेवणमावण्णं सिद्धीवि य सव्वभव्वाणं ॥
पइसमयमसंखिज्जा जेणुव्वट्टंति तो तदब्भत्था ।
कायठिईए समया वणस्सईणं परिमाणं ॥ "

---

१ यदि पुद्गलपरावर्ताः संख्यातिता वनस्पतिकालः ।
ततोऽत्यन्तवनस्पतिजीवाः कथं नाम मरुदेवी ? ॥
भवेद्वा वनस्पतीनामनाद्यन्तमत एव हेतोः ।
यदसंख्येया पुद्गलपरावर्तास्तत्रावस्थानम् ॥
कालेनैतावता तस्मात्कुर्वन्ति कायपर्यन्तम् ।
सर्वेऽपि वनस्पतयः स्थितिकालान्ते यथा सुरादिः ॥

२ कायस्थितिः कालेन तेषामसंख्येयताऽपहारेण ।
निर्लेपनमापन्नं सिद्धिरपि च सर्वभव्यानाम् ॥
प्रतिसमयमसंख्येया येनोद्वर्तन्ते ततस्तदभ्यस्ता ।
कायस्थित्या समया वनस्पतीनां परिमाणम् ॥

न चैतदस्ति, वनस्पतीनामनादित्वस्य निर्लेपनप्रतिषेधस्य सर्वभव्यासिद्धेर्मोक्षपथाव्यवच्छेदस्य च तत्र तत्र प्रदेशे सिद्धान्तेऽभिधानात्।

उच्यते—इह द्विविधा जीवाः—सांव्यवहारिका असांव्यवहारिकाश्च। तत्र ये निगोदावस्थात उद्वृत्त्य पृथिवीकायिकादिभवेषु वर्तन्ते ते लोकेषु दृष्टिपथमागताः सन्तः पृथिवीकायिकादिव्यवहारमनुपतन्तीति सांव्यवहारिका उच्यन्ते। ते च यद्यपि भूयोऽपि निगोदावस्थामुपयान्ति तथाऽपि ते सांव्यवहारिका एव, संव्यवहारपतितत्वात्। ये पुनरनादिकालादारभ्य निगोदावस्थामुपगता एवावतिष्ठन्ते ते व्यवहारपथातीतत्वादसांव्यवहारिकाः। कथमेतदवसीयते?। द्विविधा जीवाः—सांव्यवहारिका असांव्यवहारिकाश्चेति उच्यते युक्तिवशात्। इह प्रत्युपन्नवनस्पतीनामपि निर्लेपनमागमे प्रतिषिद्धम्, किं पुनः सकलवनस्पतीनां तथाभव्यानामपि। तच्च यद्यसांव्यवहारिकराशिनिपतिता अत्यन्तवनस्पतयो न स्युस्ततः कथमुपपद्येत?। तस्मादवसीयते—अस्त्यसांव्यवहारिकराशिरिति, यद्गतानां वनस्पतीनामनादिता। किं च—इयमपि गाथा गुरूपदेशादागता समये प्रसिद्धा—

" अत्थि अणंता जीवा जेहिं ण पत्तो तसाइपरिणामो।
तेवि णंताणंता णिगोअवासं अणुहवंति॥ "

तत इतोऽप्यसांव्यवहारिकराशिसिद्धिः। उक्तं च—

" णंय पच्चुपन्नवणस्सईणं णिल्लेवणं न भव्वाणं।
जुत्तं होइ ण तं जइ अच्चंतवणस्सई नत्थि॥
एवं चाणाइवणस्सईणमत्थित्तमत्थओ सिद्धं।
भण्णइ इमावि गाहा गुरूवएसागया समए॥

" अत्थि अणंता जीवा' इत्यादि १८ पदे॥ "

---

१ सन्त्यनन्ता जीवा यैर्न प्राप्तः त्रसादिपरिणामः।
तेऽप्यनन्तानन्ता निगोदवासमनुभवन्ति॥
न च प्रत्युत्पन्नवनस्पतीनां निर्लेपनं न भव्यानाम्।
युक्तं भवति तद् यदि अत्यन्तवनस्पतिर्नास्ति॥
एवं चानादिवनस्पतीनामस्तित्वमर्थतः सिद्धम्।
भण्यते इयमपि गाथा गुरूपदेशागता समये॥

ततोऽभव्या अव्यावहारिका एव, अन्यथाऽसंख्येयपुद्गलपरावर्तकालातिक्रमे तेषां सिद्धिगमनस्याव्यवहारित्वभवनस्य वा प्रसङ्गाद् । अत एव बादरनिगोदजीवा अप्यव्यावहारिकराशावभ्युपगन्तव्याः, अन्यथा बादरनिगोदजीवेभ्यः सिद्धानामनन्तगुणत्वप्रसङ्गात् । यावन्तो हि सांव्यवहारिकराशितः सिध्यन्ति, तावन्त एव जीवा असांव्यवहारिकराशेर्विनिर्गत्य सांव्यवहारिकराशावागच्छन्ति । यत उक्तम्—

" सिज्झंति जत्तिया किर इह संववहारजीवरासीओ ।
इंति अणाइवणस्सइमज्झाओ तत्तिया चेव ॥ [1] " इति ।

एवं च व्यवहारराशितः सिद्धा अनन्तगुणा एवोक्ताः । तत्र यदि बादरनिगोदजीवानां व्यावहारिकत्वं भवति, तर्हि बादरनिगोदजीवेभ्यः सिद्धा अनन्तगुणाः संपद्येरन्, सन्ति च सिद्धेभ्यो बादरनिगादजीवा अनन्तगुणाः; तेभ्यः सूक्ष्मजीवा असंख्येयगुणाः । यदागमः—

" एएसिं णं भंते ! जीवाणं सुहुमाणं बायराणं णोसुहुमाणं णोबायराणं कयरेकयरेहिंतो अप्पा वा, बहुआ वा, तुल्ला वा, विसेसाहिआ वा ? । गोयमा ! सव्वत्थोवा जीवा णोसुहुमा णोबायरा, बायरा अणंतगुणा, सुहुमा असंखेज्जगुणा" [2] इति ।

एतद्वृत्तिर्यथा—"एएसि णं भंते ! जीवाणं सुहुमाणमित्यादि । सर्वस्तोका जीवा णोसुहुमा णोबायरा, सिद्धा इत्यर्थः, तेषां सूक्ष्मजीवराशेर्बादरजीवराशेश्चानन्ततमभागकल्पत्वात् । तेभ्यो बादरा अनन्तगुणाः, बादरनिगोदजीवानां सिद्धेभ्योऽनन्तगुणत्वात् । तेभ्यश्च सूक्ष्मा असंख्येयगुणाः, बादरनिगोदजीवेभ्यः सूक्ष्मनिगोदजीवानामसंख्येयगुणत्वाद् " इति ।

तत एवमागमबाधापरिहारार्थं बादरनिगोदजीवा अव्यावहारिकाः स्वीकर्तव्याः । प्रयोगश्चात्र—बादरनिगोदजीवा न व्यवहारिणः, तेषां सिद्धेभ्योऽनन्तगुणत्वात् । यथा सूक्ष्मनिगोदजीवास्तथा अनादिमन्तः

---

१ सिध्यन्ति यावन्तः किल इह संव्यवहारजीवराशितः ।
यन्ति अनादिवनस्पतिमध्यात्तावन्त एव ॥

२ एतेषां भगवन् जीवानां सूक्ष्मानां बादराणां नोसूक्ष्माणां नोबादराणां (सिद्धानां) कतरे कतरेभ्योऽल्पा वा बहवो वा तुल्या वा विशेषाधिका वा ? । गौतम ! सर्वस्तोका जीवा नोसूक्ष्मा नोबादराः, बादरा अनन्तगुणाः, सूक्ष्मा असंख्येयगुणा इति ।

सूक्ष्मा बादराश्च निगोदजीवा अव्यवहारिण एव, अन्यथा व्यवहारित्व-भवनसिद्धिगमनयोरपर्यवसितत्वानुपपत्तेः। अपर्यवसितत्वं च "सिज्झंति जत्तिया किर०" इत्यादिना सिद्धम्, तथा सांव्यवहारिका जीवाः सिध्यन्त्येव, आवलिकाऽसंख्येयभागपुद्गलपरावर्तसमयपरिमाणत्वेन परिमितत्वाद्। व्यतिरेके सिद्धा निगोदजीवाश्च दृष्टान्ततया वाच्या इति।

ननु "सर्वे जीवा व्यवहार्यव्यवहारितया द्विधा सूक्ष्माः निगोद एवान्त्याः, तेभ्योऽन्ये व्यवहारिणः।" इति योगशास्त्रवृत्तिवचनाद् बादरनिगोदजीवानां व्यवहारित्वसिद्धेः कथमव्यवहारित्वमिति चेत्। न, तत्र 'सूक्ष्मनिगोदा एवान्त्याः' इति पाठस्यापि दर्शनात् तत्र सूक्ष्माश्च निगोदाश्चेतीतरेतरद्वन्द्वकरणेऽसंगतिगन्धस्याप्यभावाद्। सूक्ष्मपृथिव्यादिजीवानां चाव्यवहारित्वं प्रज्ञापनावृत्त्यभिप्रायेण स्फुटमेव प्रतीयते, लोकदृष्टिपथमागतानामेव पृथिव्यादिजीवानां व्यवहारित्वभणनाद्, अन्यथा 'प्रत्येकशरीरिणो व्यावहारिकाः' इत्येव वृत्तिकृदवक्ष्यत्। यच्च केवलं निगोदेभ्य उद्वृत्त्य पृथिवीकायिकादिभवेषु वर्तन्ते इत्यादि भणितम्, तत्सूक्ष्मपृथिव्यादिजीवानामसंख्येयत्वेनाल्पत्वाद् अवश्यभाविव्यवहारित्वाद्वाऽविवक्षणादिति संभाव्यते, सम्यग्निश्चयस्तु बहुश्रुतगम्य इति। एवं चासांव्यवहारिका जीवाः सूक्ष्मपृथिव्यादिषु निगोदेषु च सर्वकालं गत्यागतीः कुर्वन्तीति संपन्नम्। इत्थं च तत्र येऽनादिसूक्ष्मनिगोदेभ्य उद्वृत्त्य शेषजीवेषूत्पद्यन्ते पृथिव्यादिविविधव्यवहारयोगात्सांव्यवहारिकाः। ये पुनरनादिकालादारभ्य सूक्ष्मनिगोदेष्वेवावतिष्ठन्ते तथाविधव्यवहारातीतत्वादसांव्यवहारिका इति। प्रवचनसारोद्धारवृत्तावपि "अनादिसूक्ष्मनिगोदजीवा अव्यवहारिणः" इत्यत्र सूक्ष्मा पृथिव्यादयश्चत्वारो निगोदाश्च बादरसाधारणवनस्पतयः, न विद्यते आदिर्येषां तेऽनादयः—अप्राप्तव्यवहारराशय इत्यर्थः। तथा च सूक्ष्माश्च निगोदजीवाश्चेति द्वन्द्वः, अनादयश्च ते सूक्ष्मनिगोदजीवाश्चेति कर्मधारयः, इति समासविधिर्द्रष्टव्यः। सर्वत्रापि कर्मधारयकरणे बादरनिगोदजीवानां व्यवहारित्वसंपत्तावुक्तागमबाधप्रसङ्गादिति चेत्। उच्यते—एवं प्रज्ञापनावृत्त्यभिप्रायमनुसृत्याभव्यानामव्यावहारिकत्वं व्यवस्थाप्यते, तार्किकव्यावहारिकलक्षणयोगादुत परिभाषान्तराश्रयणात्? नाद्यो लोकव्यव-

हारविषयः, प्रत्येकशरीरवत्त्वादिस्तल्लक्षणस्याभव्येष्वपि सत्त्वादनन्त-द्रव्यक्रियाग्रहणपरित्यागवतां तेषामव्यावहारिकराशिविनिर्गतत्वेन व्यावहारिकत्वस्योपदेशपदप्रसिद्धत्वाच्च। तथा च तद्ग्रन्थः—

"[1]जं दव्वलिंगकिरियाणंतातीया भवंमि समलावि।
सव्वेसिं पाएणं ण य तत्थवि जायमेअंति॥"

जमित्यादि। यद् यस्माद्द्रव्यलिङ्गक्रियाः पूजाद्यभिलाषेण व्यावृत्तमिथ्या-त्वादिमोहमलतया द्रव्यलिङ्गप्रधानाः शुद्धश्रमणभावयोग्याः प्रत्युपेक्षणाप्रमार्जना-दिकाश्चेष्टाः, किम्? इत्याह—अनन्ता अनन्तनामकसंख्याविशेषानुगता व्यतिक्रान्ता भवे संसारे, सकला अपि—तथाविधसामग्रीवशात्परिपूर्णा अपि सर्वेषां भवभाजां प्रायेण अव्यावहारिकराशिगतानल्पकालतन्निर्गतांश्च मुक्त्वेत्यर्थः। ततोऽपि किम्? इत्याह—न च—नैव तत्रापि तास्वपि सकलासु द्रव्यलिङ्गक्रियासु जातमेतद्—धर्म-बीजमित्यादि॥"

अथ पृथिव्यादिव्यवहारयोगेन तेषां व्यावहारिकत्वेऽप्यावलिकाऽ-संख्येयभागपुद्गलपरावर्ताधिकसंसारवत्त्वेन न व्यावहारिकत्वमिति परिभाषान्तरमाश्रीयते इति द्वितीयः पक्षः परिगृह्यते इति चेत्, परि-गृह्यतां यदि बहुश्रुताः प्रमाणयन्ति, नैवमस्माकं काऽपि क्षतिः, मुख्य-व्यावहारिकलक्षणपरित्यागेन तेषामव्यक्तमिथ्यात्वनियमाभ्युपगमादि-विरुद्धप्रक्रियाया असिद्धेः। नहि परिभाषा वस्तुस्वरूपं त्याजयतीति। एतेन बादरनिगोदजीवानां व्यावहारिकत्वनिषेधोऽपि प्रत्युक्तः, परि-भाषामात्रेण लक्षणसिद्धस्य व्यावहारिकत्वस्य निषेद्धुमशक्यत्वात्। पृथिव्यादिविविधव्यवहारयोगित्वलक्षणस्य तस्य प्राप्तसूक्ष्मनिगोदेतर-त्वपर्यवसितस्यानुगतस्यानादिसूक्ष्मनिगोदेतरसर्वजीववृत्तित्वात्। चक्षु-र्ग्राह्यशरीरत्वरूपलक्षणं न तु लक्षणमित्यावयोः समानम्, अन्यथाऽ-स्माकं सूक्ष्मपृथिवीकायिकादिष्वव्याप्तेरिव तव मते बादरनिगोदेऽति-व्याप्तेरपि प्रसङ्गात्। किं च—प्रज्ञापनावृत्त्यभिप्रायेणापि बादरनिगोद-जीवानां व्यवहारित्वमेव प्रतीयते। ये पुनरनादिकालादारभ्यनिगोदा-

---

१ यद्द्रव्यलिङ्गक्रिया अनन्ताऽतीता भवे सकलाऽपि
सर्वेषां प्रायेण न च तत्रापि जातमेतदिति॥

वस्थामुपगता एवावतिष्ठन्ते ते व्यवहारपथातीतत्वादसांव्यवहारिकाः इति वचनादनादिवनस्पतीनामेवाव्यावहारिकत्वाभिधानात् । तत्रेदं सूत्रं सांव्यवहारिकानधिकृत्यावसेयम्, न चासांव्यवहारिकान्, विशेषविषयत्वात्सूत्रस्य । न चैतत्स्वमनिषिकाविजृम्भितम् । यत आहुर्जिनभद्रगणिक्षमाश्रमणपूज्यपादाः—

" तह कायठिईकालादओवि सेसे पडुच्च किर जीवे ।
नाणाइवणस्सइणो ये संववहारबाहिरिया ॥ "

अत्रादिशब्दात्सर्वैरपि जीवैः श्रुतमनन्तशः स्पृष्टमित्यादि । यदस्यामेव प्रज्ञापनायामेव वक्ष्यते, प्रागुक्तं च तत्परिग्रहस्ततो न कश्चिद्दोष इति, अग्रे व्यक्तमेव अनादिवनस्पत्यतिरिक्तानां व्यावहारिकत्वाभिधानाच्च । अनादिवनस्पतय इति सूक्ष्मनिगोदानामेवाभिधानम्, न तु बादरनिगोदानामिति ग्रथान्तरेऽप्ययमेवाभिप्रायो ज्ञायते । उक्तं च—लघूपमितभवप्रपञ्चग्रन्थे श्रीचन्द्रसूरिशिष्यश्रीदेवचन्द्रसूरिभिः—

" अस्त्यत्र लोके विख्यातमनन्तजनसंकुलम् ।
यथार्थनामकमसंव्यवहाराभिधं पुरम् ॥ ६७ ॥
तत्रानादिवनस्पतिनामानः कुलपुत्रकाः ।
वसन्ति तत्र कर्मपरिणाममहीभुजा ॥ ६८ ॥
नियुक्तौ तीव्रमोहोदयात्यन्ताबोधनामकौ ।
महत्तमबलाध्यक्षौ तिष्ठतः स्थायिनौ सदा ॥ ६९ ॥ युग्मम्
ताभ्यां कर्मपरिणाममहाराजस्य शासनात् ।
निगोदाख्यापवरकेष्वसंख्येयेषु दिवानिशम् ॥ ७० ॥
क्षिप्त्वा संपिण्ड्य धार्यन्ते सर्वेऽपि कुलपुत्रकाः ।
प्रसुप्तवन्मूर्छितवन्मत्तवन्मृतवच्च ते ॥ ७१ ॥ युग्मम्
ते स्पष्टचेष्टाचैतन्यभाषादिगुणवर्जिताः ।
छेदभेदप्रतीघातदाहादीन्नाप्नुवन्ति च ॥ ७२ ॥
अपरस्थानगमनप्रमुखो नापि कश्चन ।
क्रियतेऽन्योऽपि तैर्लोकव्यवहारः कदाचन ॥ ७३ ॥

---

१ तथा कायस्थितिकालादयोऽपि शेषान् प्रतीत्य किल जीवान् ।
नानादिवनस्पतेर्ये ये संव्यवहारबाह्याः ॥

संसारिजीवसंज्ञेन वास्तव्येन कुटुंबिना ।
कालो निर्गमितः पूर्वं तत्रानन्तो मयाऽपि हि ॥ ७४ ॥

तथा अत्रैव कियदन्तरे—

तत्रैकाक्षनिवासाख्ये नगरे प्रथमं खलु ।
अमीभिरस्ति गन्तव्यमर्थनं युवयोश्च तत् ॥ २६ ॥
ताभ्यामपि तथेत्युक्ते ते सर्वे तत्पुरं ययुः ।
तस्मिंश्च नगरे सन्ति महान्तः पञ्च पाटकाः ॥ २७ ॥
एकं पाटकमङ्गुल्या दर्शयन्नग्रतः स्थितम् ।
मामेवमथ तत्त्वंपि (?) तीव्रमोहोदयोऽब्रवीत् ॥ २८ ॥
त्वमत्र पाटके तिष्ठ भद्र ! विश्वस्तमानसः ।
पाश्चात्यपुरतुल्यत्वाद् भाव्येष धृतिदस्तव ॥ २९ ॥
यथा हि तत्र प्रासादगर्भागारस्थिताः जनाः ।
सन्त्यनन्ता पिण्डिताङ्गास्तथैवात्रापि पाटके ॥ ३० ॥
वर्त्तन्ते किन्तु ते लोकव्यवहारपराङ्मुखाः ।
मनिषिभिः समाम्नातास्तेनासांव्यवहारिकाः ॥ ३१ ॥
गमागमादिकं लोकव्यवहारममी पुनः ।
कुर्वन्ति सर्वदा तेन प्रोक्ताः सांव्यवहारिकाः ॥ ३२ ॥
अनादिवनस्पतय इति तेषां समाभिधा ।
एषां तु वनस्पतय इति भेदयथापरः ॥ ३३ ॥ "

बृहोपमितभवप्रपञ्चग्रन्थेऽप्येवमेवोक्तमस्ति । तथाहि—

" अस्तीह लोके आकालप्रविष्टमनन्तजनसंकुलमसंव्यवहारं नाम नगरम् । तस्मिन्नगरेऽनादिवनस्पतिनामानः कुलपुत्रकाः प्रतिवसन्ति इत्यादि । ×××
न भवितव्यतया महत्तरावलाधिकृतौ—यदुत मया युवाभ्यां चामीभिः सह यातव्यम् । यतो भर्तृदेवतानारीति न मोक्तव्यो मया संसारी जीवः । अद्यास्ति युवयोरपि प्रविजागरणीयमेकाक्षनिवासं नाम नगरम् । तत्रामीभिर्लोकैः प्रथमं गन्तव्यम् । ततो युज्यते युवाभ्यां सह चामीषां तत्रासितुं नान्यथा । ततो यद्भवती जानातीत्यभिधाय प्रतिपन्नं तद्वचनम् । महत्तमबलाधिकृताभ्यां प्रवृत्ताः सर्वेऽपि समागतास्तदेकाक्षनिवासं नगरम् । तत्र नगरे महान्तः पञ्च पाटका

विद्यन्ते। ततोऽहमेकं पाटकं कराग्रेण दर्शयता तीव्रमोहोदयेनाभिहितः—भद्र संसारिजीव! तिष्ठ त्वमत्र पाटके। यतोऽयं पाटकोऽसंव्यवहारनगरेण बहुतरं तुल्यो वर्तते। ततो भविष्यत्यत्र तिष्ठतो धृतिरित्यादि। ×××× ततोऽहं यदा तत्रासंव्यवहारनगरेऽभूवम्, तदा मम जीर्णायां जीर्णायामपरां गुटिकां दत्तवती, येनैतं सूक्ष्ममेव मे रूपमेकाकारं सर्वदा तत्प्रयोगेण विहितवती। तत्र पुनरेकाक्षनिवासनगरे समागता तीव्रमोहात्यन्तबोधयोः कुतूहलमिव दर्शयन्ती तेन गुटिकाप्रयोगेण ममानेकाकारं स्वरूपं प्रकटयति स्मेत्यादि।"

समयसारसूत्रवृत्त्योरप्युक्तम्—

"अहवा संववहारिया य असंववहारिया य।"[1]

अथवेति द्वैविध्यस्यैव प्रकारान्तरोद्द्योतने।

एतदेव स्पष्टयन्नाह—

तत्थ जे अणाइकालाओ आरब्भ सुहुमणिगोएसु चिट्ठंति न कयाइ तसाइभावं पत्ता ते असंववहारिया। जे पुण सुहुमणिगोएहिंतो निग्गया सेसजीवेसु उप्पन्ना ते संववहारिआ। ते अ पुणोवि सुहुमणिगोअपत्तावि संववहारिअत्ति भण्णंति॥"

इदमत्र हृदयम्—सर्वसंसारिणां प्रथममनादिकालादारभ्य सूक्ष्मनिगोदेष्वेवावस्थानम्, तेभ्यश्च निर्गताः शेषजीवेषूत्पन्नाः पृथिव्यादिव्यवहारयोगात्सांव्यवहारिकाः। ते च यद्यपि कदाचिद् भूयोऽपि तेष्वेव निगोदेषु गच्छन्ति, परं तत्रापि सांव्यवहारिका एव, व्यवहारपतितत्वात्। ये तु न कदाचित्तेभ्यो निर्गताः

"अत्थि अणंता जीवा जेहिं ण पत्तो तसाइ परिणामो।
तेवि अणंताणंता णिगोअवासं अणुहवंति॥"[3]—

---

१ अथवा सांव्यवहारिकाश्चासांव्यवहारिकाश्च॥

२ तत्र ये अनादिकालादारभ्य सूक्ष्मनिगोदेषु तिष्ठन्ति, न कदाचिद् त्रसादिभावं प्राप्ता ते असांव्यवहारिकाः। ये पुनः सूक्ष्मनिगोदेभ्यो निर्गता शेषजीवेषूत्पन्नास्ते सांव्यवहारिकाः। ते च पुनरपि सूक्ष्मनिगोदप्राप्ता अपि सांव्यवहारिका एव भण्यन्ते।

३ सन्त्यनन्ता जीवा यैर्नप्राप्तस्त्रसादिपरिणामः।
तेऽप्यनन्तानन्ता निगोदवासमनुभवन्ति॥

इति वचनात्तत्रैवोत्पत्तिव्ययभाजस्ते तथाविधव्यवहारातीतत्वादसांव्यवहारिका इति । तत्रैवाग्रेऽप्युक्तम्—

"तेरसविहा जहा णोसुहुमणिगोअरूवे असंववहारभेए । बारस संववहारिआ, ते अ इमे—पुढवी-आऊ-तेउ-वाउ-णिगोआ, सुहुमबायरत्तेण दु दु भेआ, पत्तेअवणस्सई तसा य ॥"

सांव्यवहारिकासांव्यवहारिकत्वेन जीवानां द्वैविध्यं प्राग् दर्शितम् । तत्रासांव्यवहारिको राशिरेक एव, सूक्ष्मनिगोदानामेवासांव्यवहारिकत्वात् । सांव्यवहारिकभेदास्तु द्वादश । ते च इमे पृथिव्यादयः पञ्च, सूक्ष्मबादरतया द्विभेदाः, प्रत्येकवनस्पतयः त्रसाश्चेति ॥

तथा भवभावनावृत्तावप्युक्तम्—

अणाइमं एस भवे, अणाइमं च जीवे, अणाई अ सामन्नेण तस्स नाणावरणाइकम्मसंजोगो, अपज्जवसिओ अभव्वाणं, सपज्जवसिओ उण भव्वाणं । विसेसओ उण मिच्छत्ता-विरइ-पमाय-कसाय-जोगेहिं कम्मसंजोगो जायइत्ति । सव्वेसिंपि जीवाणं साईओ चेव एसो जाओ अकामणिज्जरा-बालतवोकम्म-सम्मत्तनाणविरइगुणेहिं अवस्समेव विहडइत्ति । सव्वेसिं सपज्जवसिओ चेव । तेण य कम्मपोग्गलसंजोअणाणुभावेणं वसंति । सव्वेपि पाणिणो पुव्विं ताव अणंताणंतपोग्गलपरिअट्टे अणाइवणस्सइणिगोएसु पीडिजंति । तत्थेगणिगोअसरीरे अणंता परिणमंति असंखणिगोअसमुदयणिप्फण्णगोलयभावेणं, समगमणंता ऊससंति, समगं

---

१ त्रयोदशविधा यथा नोसूक्ष्मनिगोदरूपोऽसंव्यवहारभेदः । द्वादश सांव्यवहारिकाः, ते चेमे—पृथिव्यप्तेजोवायुनिगोदाः, सूक्ष्मबादरत्वेन द्वौ द्वौ भेदौ, प्रत्येकवनस्पतयः त्रसाश्च ।

२ अनादिमानेष भवः, अनादिमांश्च जीवः, अनादिश्च सामान्येन तस्य ज्ञानावरणादिकर्मसंयोगः, अपर्यवसितोऽभव्यानाम्, सपर्यवसितश्च पुनर्भव्यानाम् । विशेषतः पुनर्मिथ्यात्वाविरति-प्रमाद-कषाय-योगैः कर्मसंयोगो जायते इति । सर्वेषामपि जीवानां सादिक एव एष जातः, अकामनिर्जरा-बालतपःकर्म-सम्यक्त्व-ज्ञान-विरतिगुणैरवश्यमेव विघटते इति सर्वेषां सपर्यवसित एव । तेन च कर्मपुद्गलसंयोजनानुभावेन वसन्ति । सर्वेऽपि प्राणिनः पूर्वं तावदनन्तानन्तपुद्गलपरावर्तनानादिवनस्पतिनिगोदेषु पीड्यन्ते । तत्रैकनिगोदशरीरे अनन्ताः परिणमन्ति असंख्यनिगोदसमुदयनिष्पन्नगोलकभावेन । समकमनन्ता उच्छ्वसन्ति, समकं

णीससंति, समगं आहारेंति, समगं परिणामयंति, समगं उप्पज्जंति, समगं विज्जंति, थीणद्धीमहाणिद्दागाढनाणावरणाइकम्मपोग्गलोदएणं न वेअंति अप्पाणं, न मुणंति परं, न सुणंति सद्दं, न पेच्छंति सरूवं, न अग्घायंति गंधं, न बुज्झंति रसं, न विंदंति फासं, न सरंति कयाकयं, सइपुव्वं न चलंति, न फंदंति, ण सीयमणुसरंति, नायवमुवगच्छंति । केवलं तिव्वविसयवेयणाभिभूअमज्जपाणमत्त-मुदियपुरिसव्व जहुत्तरकालंते वसिऊण कहमवि तहाभव्वत्त-भविअव्वयाणिओगेणं किंपि तहाविहडिअकम्मपोग्गलसंजोगा तेहिंतो णिग्गंतुमुववज्जंति केइ साहारण-वणस्सइसु अल्लय-सूरण-गज्जर- वज्जकंदाइरूवेण " इत्यादि ।

तथा तत्रैव प्रदेशान्तरे प्रोक्तम्--" ततो बालिनरेन्द्रेणोक्तम्–स्वामिंस्त-हींदमेव श्रोतुमिच्छामि, प्रसादं विधाय निवेदयन्तु भगवन्तः । ततः केवलिना प्रोक्तम्-- महाराज ! सर्वायुषाऽप्येतत्कथयितुं न शक्यते । केवलं यदि भवतां कुतूहलं तर्हि समाकर्णयत, संक्षिप्य किंचित्कथ्यते--इतोऽनन्तकालात्परतो भवा-न्किल चारित्रसैन्यसहायो भूत्वा मोहारिबलक्षयं करिष्यतीति कर्मपरिणामेनासं-व्यवहारपुरान्निष्काश्य समानीतो व्यवहारानिगादेषु । ततो विज्ञातैतद्व्यतिकरैर्मो-हारिभिः प्रकुपितैर्विधृतस्तेष्वेव त्वमनन्तं कालम् । ततः पृथिव्यप्तेजोवायुवनस्पति-द्वित्रिचतुःपञ्चेन्द्रियतिर्यक्षु नरकेष्वनार्यमनुष्येषु चानीतस्त्वं कर्मपरिणामेन, पुनः पुनरनन्तवाराः कुपितैर्मोहादिभिर्व्यावर्त्य नीतोऽसि पश्चान्मुखो निगोदादिषु, एवं तावद् यावद्भ्रमितोऽस्यतिदुःखितस्तैरनन्तानन्तपुद्गलपरावर्तान् । ततश्चार्यक्षेत्रेऽपि लब्धं मनुष्यत्वमनन्तवाराः, किन्तु हारितं क्वचित् कुजातिभावेन, क्वापि कुल-दोषेण, क्वचिज्जात्यन्धबधिरखञ्जत्वादिरूपेण, क्वापि कुष्टादिरोगैः, क्वचिद-ल्पायुष्कत्वेन एवमनन्तवाराः(रम्), किन्तु धर्मस्य नामाप्यज्ञात्वा भ्रान्तस्तेष्वेव पराङ्मुखो व्यावृत्यानन्तपुद्गलपरावर्तानेकेन्द्रियादिषु । ततोऽन्यदा श्रीनिलयनगरे

निःश्वसन्ति, समकमाहारयन्ति, समकं परिणामयन्ति, समकमुत्पद्यन्ते, समकं विद्यन्ते, स्यानर्द्धिमहानिद्रा गाढ ज्ञानावरणादिकर्मपुद्गलोदयेन न वेदयन्ति आत्मानं, न जानन्ति परं, न शृण्वन्ति शब्दम्, न पश्यन्ति स्वरूपम्, नाजिघ्रन्ति गन्धम्, न बुध्यन्ते रसम्, न वेदयन्ति स्पर्शम्, न स्मरन्ति कृताकृतम्, मतिपूर्वं न चलन्ति, न स्पन्दन्ते, न शीतमनुस्मरन्ति, नातपमुपगच्छन्ति । केवलं- तीव्रविषय वेदनाभिभूतमद्यपानमत्त-मुदितपुरुषवद् यथोत्तरकालान्ते उषित्वा कथमपि तथा-भव्यत्व-भवितव्यतानियोगेन किमपि तथाविधटितकर्मपुद्गलसंयोगास्तेभ्यो निर्गत्यो-त्पद्यन्ते केचित्साधारणवनस्पतिषु आर्द्रक-सूरण-गर्जर-वज्रकन्दादिरूपेण ॥

धनतिलकश्रेष्ठिनो जातस्त्वं वैश्रमणनामा पुत्रः। तत्र च 'स्वजन-धन-भवन-यौवन-वनिता-तत्त्वाद्यनित्यमिदमखिलं ज्ञात्वा यत्राणसहं धर्मं शरणं भवत लोकाः' इति वचनश्रवणाज्जाता धर्मकरणबुद्धिः केवलम्। साऽपि कुदृष्टिसभवा महापाप-बुद्धिरेव परमार्थतः संजाता। तद्वशीकृतेन च स्वयंभूनाम्नात्रिदण्डिनः शिष्यत्वं प्रतिपन्नम्। ततस्तदपि मानुषत्वं हारयित्वा व्यावर्तितो भ्रामितः संसारेऽनन्त-पुद्गलपरावर्तानिति। ततोऽनन्तकालात्पुनरप्यन्तराऽन्तरा लब्धं मानुषत्वम्, परं न निवृत्ताऽसौ कुधर्मबुद्धिः। शुद्धधर्मश्रवणाभावोऽपि क्वापि सद्गुरुयोगाभावात्क्वचि-दालस्यमोहादिहेतुकलापात्। क्वचिच्छुद्धधर्मश्रवणेऽपि तन्निवृत्तोऽसौ शून्यतया तदर्थानवधारणात्। क्वचिच्च श्रद्धानेन ततः कुधर्मबुद्धयुपदेशाद्धर्मच्छलेन पशु-वधादिमहापापानि कृत्वा भ्रान्तस्तेष्वेवानन्तपुद्गलपरावर्तानिति॥"

तथा श्रावकदिनकृत्यवृत्तावप्युक्तम्—"इह हि सदैव लोकाकाश-प्रतिष्ठितानाद्यपर्यवसितभवचक्राख्यपुरोदरविपरिवर्ती जन्तुरनादिवनस्पतिषु सूक्ष्म-निगोदापरपर्यायेष्वनन्तानन्तपुद्गलपरावर्तान्समकाहारोच्छ्वासनिःश्वासोऽन्तर्मुहूर्ता-न्तर्जन्ममरणादिवेदनाव्रातमनुभवति इत्यादि। तथा ××××× एवं च तथाविध-भव्यजन्तुरप्यनन्तकालमव्यवहारराशौ स्थित्वा कर्मपरिणामनृपादेशात्तथाविधभवि-तव्यतानियोगेन व्यवहारराशिप्रवेशत उत्कर्षेण बादरनिगोदपृथिव्यप्तेजोवायुषु प्रत्येकं सप्ततिकोटिसागरोपमाणि तिष्ठन्ति। एषा च क्रिया सर्वत्र योज्या। एते-ष्वेवं सूक्ष्मेष्वसंख्यलोकाकाशप्रदेशसमा उत्सर्पिण्यवसर्पिण्यः" इत्यादि॥

पुष्पमालावृहद्वृत्तावप्युक्तम्— ननु कथमित्थं मनुष्यजन्मातिदुर्लभं प्रतिपाद्यते? उच्यते—समाकर्णय कारणम्।

"अव्ववहारणिगोएसु ताव चिट्ठंति जंतुणो सव्वे।
पढमं अणंतपोग्गलपरिअट्टे थावरत्तेणं॥ १॥
तत्तो विणिग्गया वि हु ववहारवणस्सइंमि णिवसंति।
कालमणंतपमाणं अणंतकायाइभावेणं॥ २॥

---

१ अव्यवहारनिगोदेषु तावत्तिष्ठन्ति जन्तवः सर्वे।
प्रथममनन्तपुद्गलपरावर्तान् स्थावरत्वेन। १॥
ततो विनिर्गता अपि च व्यवहारवनस्पतौ निवसन्ति॥
कालमनन्तप्रमाणमनन्तकायादिभावेन॥ २॥

तत्तोवि समुव्वट्टा पुढविजलानलसमीरमज्झंमि ।
असंखोसप्पिणिसप्पिणीओ णिवसंति पत्तेयं ॥ ३ ॥
संखेज्जं पुण कालं वसंति विगलिंदिएसु पत्तेयं ।
एवं पुणोपुणोवि य भमंति ववहाररासिंमि ॥ ४ ॥ "

तल्लघुवृत्तावप्युक्तम्—

आदौ सूक्ष्मनिगोदे जीवस्यानन्तपुद्गलविवर्तान् ।
तस्मात्कालमनन्तं व्यवहारवनस्पतौ वासः ॥ १ ॥
उत्सर्पिणीरसंख्याः प्रत्येकं भूजलाग्निपवनेषु ।
विकलेषु च संख्येयं कालं भूयो भ्रमणमेव ॥ २ ॥
तिर्यक्पञ्चेन्द्रियतां कथमपि मानुष्यकं ततोऽपीह ।
क्षेत्रकुलारोग्यायुर्बुद्ध्यादि यथोत्तरं तु दुरवापम् ॥ ३ ॥

धर्मरत्नप्रकरणवृत्तावप्युक्तम्—

इभ्यस्तूष्णमनार्थं प्रययौ नत्वा गुरून् समयाविधिना ।
निषसाद यथास्थानकमथ सूरिर्देशनां चक्रे ॥ १ ॥
अव्यवहारिकराशौ भ्रमयित्वाऽनन्तपुद्गलविवर्तान् ।
व्यवहृतिराशौ कथमपि जीवोऽयं विशति तत्रापि ॥ २ ॥
बादरनिगोद-पृथिवी-जल-दहन-समीरणेषु जलधीनाम् ।
सप्ततिकोटाकोट्यः कायस्थितिकाल उत्कृष्टः ॥ ३ ॥
सूक्ष्मेष्वमीषु पञ्चस्ववसर्पिण्यो ह्यसंख्यलोकसमाः ।
सामान्यबादरेऽङ्गुलगणनातीतांशमानास्ताः ॥ ४ ॥ " इत्यादि ॥

संस्कृतनवतत्त्वसूत्रेऽप्युक्तम्—

निगोदा एव गदिता जिनैरव्यवहारिणः ।
सूक्ष्मास्तदितरे जीवास्तान्यपि व्यवहारिणः ॥ १ ॥ " इति ।

ततोऽपि समुद्वृत्ता पृथिवी-जला-नल-समीरमध्ये ।
असंख्योत्सर्पिण्यवसर्पिणीर्निवसन्ति प्रत्येकम् ॥ ३ ॥
संख्येयं पुनः कालं वसन्ति विकलेन्द्रियेषु प्रत्येकम् ।
एवं पुनः पुनरपि च भ्रमन्ति व्यवहारराशौ ॥ ४ ॥

तदेवंविधवचनैरनादिसूक्ष्मनिगोदस्यैवासांव्यवहारिकत्वम्, अन्येषां च व्यावहारिकत्वमिति स्थितौ परोक्ता युक्तिरेकाऽवतिष्ठते। तत्र "सिज्झंति जत्तिया किर०" इत्यादिना व्यवहारराशितः सिद्धानामनन्तगुणत्वं व्यवस्थाप्य तदनन्तगुणत्वेन बादरनिगोदजीवानामव्यावहारिकत्वं च व्यवस्थापितम्। तदसत्, सिद्ध्यवच्छिन्नव्यवहारसद्भावापेक्षया सिद्धानामनन्तगुणत्वसिद्धावपि सामान्यापेक्षया तदसिद्धेः, व्यवहारित्वभवनासिद्धिगमनयोरपर्यवसितत्वं चानादिसूक्ष्मनिगोदान्नियतव्यवहारित्वाभिमुखजीवानां निर्गमान्नानुपपन्नम्। आवलिकासंख्येयभागपुद्गलपरावर्तमानत्वेन व्यवहारिकाणां सर्वेषां सिद्ध्यापत्तिस्तु स्यात्। तत्राभव्यस्य व्यावहारिकत्वानुरोधेन निगोदत्वेन तिर्यक्त्वनपुंसकत्वादिना च कायस्थितिप्रतिपादकानां सूत्राणां व्यावहारिकविशेषविषयत्वं वा कल्पनीयम्, अन्यो वा कश्चित्सूत्राभिप्राय इत्यत्र बहुश्रुता एव प्रमाणम्। अवश्यं च सूत्राभिप्रायः कोऽपि मृग्यः, अन्यथा बहवो भव्यास्तावदेतावतः कालात्सिध्यन्ति, अन्ये तु स्वल्पात्, अपरे तु स्वल्पतरात्, यावत्कोचिन्मरुदेवीस्वामिनीवत्स्वल्पेनैव कालेन सिध्यन्ति। अभव्यास्तु कदाचिदपि न सिध्यन्ति, भवभावनावृत्त्यादिवचनाद्भव्यानां भव्यानां च यदुक्ताधिकसंसारभेदभणनं तन्नोपपद्येत। यत्तु परेणोक्तम्—यत्तु क्वचिदाधुनिकप्रकरणादौ प्रज्ञापनाद्यागमविरुद्धानि वचनानि भवन्ति, तत्र तीर्थान्तरवर्तिनामसद्ग्रहाभावादनाभोग एव कारणम्। तथा अभव्या न व्यवहारिणो नाप्यव्यवहारिणः, किन्तु व्यवहारित्वादिव्यपदेशबाह्या इति ते व्यावहारिकमध्ये विवक्षितास्तेषां सम्यक्त्वप्रतिपतितानामनन्तभागवर्तित्वेनाल्पत्वादिति॥ तदतिसाहसविजृम्भितम्, अभिप्रायमज्ञात्वा प्राचीनप्रकरणादिलोपे महाशातनाप्रसङ्गात्। अभव्यानामपि व्यावहारिकबाह्यभाव-नियत-कायस्थितिसंसारपरिभ्रमणानुपपत्तेर्यादृच्छिककल्पनयाऽसमंजसत्वप्रसङ्गात्, नोव्यवहारित्व-नोअव्यवहारित्वपरिभाषामात्रस्य चाभव्येष्विवोक्ताधिकसंसारिजीवेष्वपि कल्पयितुं चाशक्यत्वाच्च न किंचिदेतदिति दिग्॥ ९॥

तदेवमभव्यस्याप्याभिग्रहिकं मिथ्यात्वं भवतीति प्रदर्शयितुमाभिग्रहिकस्य षड् भेदा उक्ताः। अथानाभिग्रहिकादीनामपि सामान्येन बहुप्रकारत्वं निर्दिशन्नेतेषु गुरुलघुभावं विवेचयति—

अणभिग्गहिआईणवि आसयभेएण हुंति बहुभेआ ।
लहुआइं तिण्णि फलओ एएसुं दुन्नि गरुआइं ॥१०॥

अणभिग्गहिआईणवित्ति । अनाभिग्रहिकादीनामपि मिथ्यात्वानामाशयभेदेन परिणामविशेषेण बहवो भेदा भवन्ति । तथाहि—अनाभिग्रहिकं किंचित्सर्वदर्शनविषयम्—यथा 'सर्वाणि दर्शनानि शोभनानि' इति । किंचिद्देशविषयम्—यथा 'सर्व एव श्वेताम्बरदिगम्बरादिपक्षाः शोभनाः' इत्यादि । आभिनिवेशिकमपि मतिभेदाभिनिवेशादिमूलभेदादनेकविधम्—जमालिगोष्ठामाहिलादीनाम् । उक्तं च व्यवहारभाष्ये—

"मइभेएण जमाली पुव्विं वुग्गाहिएण गोविंदो ।
संसग्गाए भिक्खू गोट्ठामाहिल अहिणिवेसत्ति ॥" इति ।

सांशयिकमपि सर्वदर्शन-जैनदर्शन-तदेकदेशपदवाक्यादिसंशयभेदेन बहुविधम् । अनाभोगोऽपि सर्वांशविषयाव्यक्तबोधस्वरूपो विवक्षितकिंचिदंशाव्यक्तबोधस्वरूपश्चेत्यनेकविधः । न खलु महामोहशैलूषस्यैको नर्तनप्रकारोऽस्तीति । एतेष्वाभिग्रहिकादिषु मिथ्यात्वेषु मध्ये त्रीण्यनाभिग्रहिक-सांशयिकानाभोगरूपाणि फलतः प्रज्ञापनीयतारूपं गुरुपारतन्त्र्यरूपं च फलमपेक्ष्य लघूनि, विपरीतावधारणरूपविपर्यासव्यावृत्तत्वेनैतेषां क्रूरानुबन्धफलकत्वाभावात् । द्वे आभिग्रहिकाभिनिवेशलक्षणे मिथ्यात्वे गुरू, विपर्यासरूपत्वेन सानुबन्धक्लेशमूलत्वात् । उक्तं चोपदेशपदे—

"एसो अ एत्थ गुरुओ णाणज्झवसाअसंसया एवं ।
जम्हा असप्पवित्ती एत्तो सव्वत्थणत्थफला ॥"

अनाभिग्रहिकादीनामपि आशयभेदेन भवन्ति बहुभेदाः ।
लघूनि त्रीणि फलतो एतेषु द्वे गुरू ॥ १० ॥

---

१ मतिभेदेन जमालिः पूर्वं व्युद्ग्राहितेन गोविन्दः ।
संसर्गाद् भिक्षुर्गोष्ठामाहिल अभिनिवेशीति ॥

२ एष चात्र गुरुर्नानध्यवसाय-संशयानेवम् ।
यस्मादसत्प्रवृत्तिरितः सर्वत्रानर्थफला ॥

दुष्प्रतीकारोऽसत्प्रवृत्तिहेतुत्वेनैष विपर्यासोऽत्र गरीयान् दोषः, मत्वनध्यवसाय-संशयावबंभूतौ, अतत्त्वाभिनिवेशाभावेन तयोः सुप्रतीकारत्वेनात्यन्तानर्थसंपादकत्वाभावादित्येतत्तात्पर्यार्थः ॥

नन्वत्र माषतुषादीनां चौरित्रिणामेव संशयानध्यवसाययोरसत्प्रवृत्त्यननुबन्धित्वमुक्तम्, तच्च युक्तम्, तेषां मिथ्यात्वमोहनीयानन्तानुबन्धिनां प्रबलबोधविपर्यासकारिणां प्रबलक्रियाविपर्यासकारिणां च तृतीयकषायादीनामभावात्। मिथ्यादृशां संशयानध्यवसाययोश्च न तथात्वं युक्तम्, विपर्यासशक्तियुक्तत्वात्तेषाम्। अत शुभपरिणामोऽपि तेषां फलतोऽशुभ एवोक्तः श्रीहरिभद्रसूरिभिः। तथाहि—

" गलमच्छ-भवविमोअग-विसन्नभोईण जारिसो एसो।
मोहो सुहोवि असुहो तप्फलओ एवमेसोत्ति ॥ "

गलत्यादि। गलो नाम प्रान्तन्यस्तामिषो लोहमयः कण्टको मत्स्यग्रहार्थं जलमध्ये संचारितः, तत्प्रसनप्रवृत्तो मत्स्यस्तु प्रतीत एव। ततो गलेनोपलक्षितो मत्स्यो गलमत्स्यः। भवाद्-दुःखबहुलकुयोनिलक्षणाद्दुःखितजीवान् काकशृगालपिपीलिकादीन् तथाविधकुत्सितवचनसंस्कारात्प्राणव्यपरोपणेन मोचयत्युत्तारयतीति भवविमोचकः—पाखण्डविशेषः। विषेण मिश्रमन्नं तद् भुङ्क्ते तच्छीलश्च यः स तथाविधः। ततो गलमत्स्यश्च भवविमोचकश्च विषान्नभोजी चेति द्वन्द्वः, तेषां यादृश एष परिणामः प्रत्यपायफल एव। कुतः? मोहादज्ञानात्पर्यन्तदारुणतया शुभोऽपि—स्वकल्पनया स्वरुचिमन्तरेण तेषां तथाप्रवृतेरयोगात्सुन्दरोऽपि सन्नशुभः संक्लिष्ट एव। कुतः? इत्याह—तत्फलतः—भावप्रधानत्वाद् निर्देशस्य तत्फलत्वाद्-अशुभपरिणामफलत्वाद्। अथ प्रकृते योजयन्नाह—एवं गलमत्स्यादिपरिणामवदेषोऽपि जिनाज्ञोल्लङ्घनेन धर्मचारिपरिणामः तत्फलत्वादशुभ एव, आज्ञापरिणामशून्यतयोभयत्रापि समानत्वेन तुल्यमेव किल फलम् " इति ॥१०॥

एतदाशङ्कायामाह—

---

१ गलमत्स्य-भवविमोचक-विषान्नभोजिनां यादृश एषः।
मोहात्शुभोऽपि अशुभः तत्फलत एवमेष इति ॥

मज्झत्थत्तं जायइ जेसिं मिच्छत्तमंदयाएवि ।
ण तहा असप्पवित्ती सदंधणाएण तेसिंपि ॥११॥

मज्झत्थत्तंति । मध्यस्थत्वं रागद्वेषरहितत्वं जायते येषां मिथ्यात्वमन्दतयाऽपि, किंपुनस्तत्क्षयोपशमाद् इत्यपिशब्दार्थः । तेषामपि मन्दमिथ्यात्ववतामपि, किं पुनः सम्यग्दृष्ट्यादीनाम् । न तथा दृढविपर्यासनियतप्रकारेणासत्प्रवृत्तिः स्यात् । केन ? सदन्धज्ञातेन समीचीनान्धदृष्टान्तेन । यथाहि-सदन्धः सातवेद्योदयादनाभोगेनाऽपि मार्ग एव गच्छति, तथा निर्बीजत्वेन निर्बीजभावाभिमुखत्वेन वा मोहापकर्षजनितमन्दरागद्वेषभावोऽनाभोगवान्मिथ्यादृष्टिरपि जिज्ञासादिगुणयोगान्मार्गमेवानुसरतीत्युक्तम् ।

उक्तं च ललितविस्तरायाम्—"अनाभोगतोऽपि मार्गगमनमेव सदन्धन्यायेन—इत्यध्यात्मचिन्तकाः" । इदमत्र हृदयम्—यः खलु मिथ्यादृशामपि केषांचित्स्वपक्षनिबद्धोद्धुरानुबन्धानामपि प्रबलमोहत्वे सत्यपि करणान्तरादुपजायमानो रागद्वेषमन्दतालक्षण उपशमो भूयानपि दृश्यते, स पापानुबन्धिपुण्यबन्धहेतुत्वात्पर्यन्तदारुण एव । तत्फलसुखव्यामूढानां तेषां पुण्याभासकमुपरमे नरकादिपातावश्यंभावादित्यसत्प्रवृत्तिहेतुरेवायम् । यश्च गुणवत्पुरुषप्रज्ञापनाऽर्हत्वेन जिज्ञासादिगुणयोगान्मोहापकर्षप्रयुक्तरागद्वेषशक्तिप्रतिघातलक्षण उपशमः, स तु सत्प्रवृत्तिहेतुरेवाग्रहविनिवृत्तेः सदर्थपक्षपातसारत्वादिति ॥११॥

यत एव मिथ्यात्वमन्दताकृतं माध्यस्थ्यं नासत्प्रवृत्त्याधायकम्, अत एव तदुपष्टम्भकमनाभिग्रहिकमिथ्यात्वमपि शोभनमित्याह—

इत्तो अणभिग्गहिय भणिअं हियकारि पुव्वसेवाए ।
अण्णायविसेसाणं पढमिल्लयधम्ममहिगिच्च ॥१२॥

मध्यस्थत्वं जायते येषां मिथ्यात्वमन्दतयाऽपि ।
न तथाऽसत्प्रवृत्तिः सदन्धज्ञातेन तेषामपि ॥ ११ ॥
इतोऽनाभिग्रहिकं भणितं हितकारि पूर्वसेवायाम् ।
अज्ञातविशेषाणां प्रथमधर्ममधिकृत्य ॥ १२ ॥

इत्तोत्ति । इतः पूर्वोक्तकारणादज्ञातविशेषाणां देवगुर्वादिविशेष-परिज्ञानाभाववतां प्राथमिकं धर्ममधिकृत्य—प्रथमारब्धस्थूलधर्ममाश्रित्य पूर्वसेवायां योगप्रासादप्रथमभूमिकोचिताचाररूपायां अनाभिग्रहिकं—सर्वदेवगुर्वादिश्रद्धानलक्षणं मिथ्यात्वं हितकारि भणितम्, अनुषङ्गतः सद्विषयभक्तिहेतुत्वाद्, अविशेषश्रद्धानस्यापि दशाभेदेन गुणत्वात्। तदुक्तं योगबिन्दौ—

अथ देवपूजाविधिमाह—

" पुष्पैश्च बलिना चैव वस्त्रैः स्तोत्रैश्च शोभनैः।
देवानां पूजनं ज्ञेयं शौचश्रद्धासमन्वितम् ॥ "

पुष्पैर्जातिशतपत्रकादिसंभवैः, बलिना पक्वान्नफलाद्युपहाररूपेण, वस्त्रैः वसनैः, स्तोत्रैश्च शोभनैः स्तवनैः, चशब्दाश्चैवशब्दश्च समुच्चयार्थाः। शोभनैरादरोपहितत्वेन सुन्दरैर्देवानामाराध्यमानानां पूजनं ज्ञेयम्। कीदृशम्? इत्याह—शौचश्रद्धासमन्वितम्। शौचेन शरीरवस्त्रद्रव्यव्यवहारशुद्धिरूपेण, श्रद्धया च बहुमानेन, समन्वितं युक्तमिति।

" अविशेषेण सर्वेषामधिमुक्तिवशेन वा।
गृहिणां माननीया यत्सर्वे देवा महात्मनाम् ॥ "

अविशेषेण-साधारणवृत्त्या सर्वेषां-पारगत-सुगत-हर-हरि-हिरण्यगर्भादीनाम्। पक्षान्तरमाह—अधिमुक्तिवशेन वा। अथवा यस्य यत्र देवतायामतिशयेन श्रद्धा तद्वशेन। कुतः? इत्याह-गृहिणाम्-अद्यपि कुतोऽपि मतिमोहादनिर्णीतदेवताविशेषाणां माननीया-गौरवार्हा यद् यस्मात्सर्वे देवा उक्तरूपाः, महात्मनां परलोकप्रधानतया प्रशस्तात्मनामिति ॥ एतदपि कथम्? इत्याह—

सर्वान्देवान्नमस्यन्ति नैकं देवं समाश्रिताः।
जितेन्द्रिया जितक्रोधा दुर्गाण्यतितरन्ति ते ॥

सर्वान् देवान्नमस्यन्ति-नमस्कुर्वते। व्यतिरेकमाह—नैकं कंचन दैवं समाश्रिताः प्रतिपन्ना वर्तन्ते। येन ते जितेन्द्रिया निगृहीतहृषीका जितक्रोधा अभिभूतकोपा दुर्गाणि-नरकपातादीनि व्यसनानि, अतितरन्ति-अतिक्रामन्ति ते सर्वदेवनमस्कर्तारः।

ननु नैते लोके व्यवह्रियमाणाः सर्वेऽपि देवा मुक्तिपथप्रास्थितानामनुकूलाचरणा भवन्तीति कथमविशेषेण नमस्करणीयाः ? इत्याशङ्क्याह—

चारिसंजीवनीचारन्याय एष सतां मतः ।
नान्यथाऽभेष्टसिद्धिः स्याद् विशेषेणादिकर्मणाम् ॥

चारेः प्रतीतरूपाया मध्ये संजीवनी-औषधिविशेषश्चारिसंजीवनी, तस्याश्चारश्चरणं स एव न्यायो दृष्टान्तश्चारिसंजीवनीचारन्यायः । एषो विशेषेण देवतानमस्करणीयताऽपदेशः सतां शिष्टानां मतोऽभिप्रेतः ।

भावार्थस्तु कथागम्यः सा चेयमभिधीयते ।
अस्ति स्वस्तिमती नाम नगरी नागराकुला ॥ १ ॥
तस्यामासीत्सुता काचिद् ब्राह्मणस्य तथा सखी ।
तस्या एव परं पात्रं सदा प्रेम्णो गतावधेः ॥ २ ॥
तयोर्विवाहवशतो भिन्नस्थाननिवासिता ।
जज्ञेऽन्यदा द्विजसुता जाता चिन्तापरायणा ॥ ३ ॥
कथमास्ते सखीत्येवं ततः प्राघूर्णिका गता ।
दृष्टा विषादजलधौ निमग्ना सा तया ततः ॥ ४ ॥
अपच्छ किं त्वमत्यन्तविच्छायवदना सखि ! ।
तयोचे पापसङ्घाऽहं पत्युर्दुर्भगतां गता ॥ ५ ॥
मा विषीद विषादोऽयं निर्विशेषो विषात् सखि ! ।
करोम्यनङ्वाहमहं पतिं ते मूलिकाबलात् ॥ ६ ॥
तस्याः सा मूलिकां दत्त्वा संनिवेशं निजं ययौ ।
अप्रीतमानसा तस्य प्रायच्छत्तामसौ ततः ॥ ७ ॥
अभूद् गौरुद्धुरस्कन्धो झगित्येव च सा हृदि
विद्राणाऽथ कथं सर्वकार्याणामक्षमो भवेत् ॥ ८ ॥
गोयूथान्तर्गतो नित्यं बहिश्चारयितुं सकः ।
तयाऽऽरब्धो वटस्याधः सोऽन्यदा विश्रमं गतः ॥ ९ ॥
तच्छाखायां नभश्चारिमिथुनस्य कथंचन
विश्रान्तस्य मिथो जल्पप्रक्रमे रमणोऽब्रवीत् ॥ १० ॥
भार्ये ! एष गौः स्वभावेन किन्तु वैगुण्यतोऽजनि ।
पत्नी प्रतिबभाषे सा पुनर्नाऽसौ कथं भवेत् ? ॥ ११ ॥

मूल्यान्तरोपयोगेन, क्वास्ते ? साऽस्य तरोरधः ॥
श्रुत्वेतत्सा पशोः पत्नी पश्चात्तापितमानसा ॥ १२ ॥
अभेदज्ञा ततश्चारिं सर्वां चासयितुं तकम् ।
प्रवृत्ता मूलिकाऽऽभोगात्सद्योऽसौ पुरुषोऽभवत् ॥१३॥
अजानाना यथा भेदं मूलिकायास्तया पशुः ।
चारितः सर्वतश्चारिं पुनर्नृत्वोपलब्धये ॥ १४ ॥
तथा धर्मगुरुः शिष्यं पशुप्रायविशेषतः ।
प्रवृत्तावक्षमं ज्ञात्वा देवपूजादिके विधौ ॥ १५ ॥
सामान्यदेवपूजादौ प्रवृत्तिं कारयन्नपि ।
विशिष्टसाध्यसिद्ध्यर्थं न स्याद्दोषी मनागपि ॥ १६ ॥ इति ।

विपक्षे बाधामाह—'न' नैव, 'अन्यथा' चारिसंजीवनीचारन्यायमन्तरेण 'अत्र' देवपूजादौ प्रस्तुते 'इष्टसिद्धिः' विशिष्टमार्गावताररूपा 'स्याद्' भवेत् । अयं चोपदेशो यथा येषां दातव्यस्तदाह—'विशेषेण' सम्यग्दृष्ट्यनुचितदेशनापरिहाररूपेण, 'आदिकर्मणाम्' प्रथममेवारब्धस्थूलधर्माचाराणाम् । नह्यत्यन्तमुग्धतया कंचन देवताविशेषमजानाना न विशेषप्रवृत्तेरद्यापि योग्याः, किन्तु सामान्यरूपाया एवेति ॥

तर्हि कदा विशेषप्रवृत्तिरनुमन्यते ? इत्याशङ्क्य आह—

गुणाधिक्यपरिज्ञानाद्विशेषेऽप्येतदिष्यते ।
अद्वेषेण तदन्येषां वृत्ताधिक्ये तथाऽऽत्मनः ॥

'गुणाधिक्यपरिज्ञात्' देवतान्तरेभ्यो गुणवृद्धेरवगमात्, विशेषेऽप्यर्हदादौ किं पुनः सामान्येन एतत्पूजनमिष्यते । कथम् ? इत्याह—'अद्वेषेण' अमत्सरेण 'तदन्येषाम्' पूज्यमानदेवताव्यतिरिक्तानां देवतान्तराणां 'वृत्ताधिक्ये' आचाराधिक्ये सति । 'तथा' इति विशेषणसमुच्चये । 'आत्मनः' स्वस्य देवतान्तराणि प्रतीत्येति ॥

अत्र ह्यादिधार्मिकस्य विशेषाज्ञानदशायां साधारणी देवभक्तिरेवोक्ता, दानाधिकारे पात्रभक्तिरप्यस्य विशेषाज्ञाने साधारण्येव, तज्ज्ञाने च विशेषत उक्ता । तथाहि—

व्रतस्था लिङ्गिनः पात्रमपचास्तु विशेषतः ।
स्वसिद्धान्ताविरोधेन वर्तन्ते ये सदैव हि ॥

व्रतस्था हिंसाऽनृतादिपापस्थानविरतिमन्तः, लिङ्गिनो व्रतसूचकतथाविधनेपथ्यधरन्तः पात्रमविशेषेण वर्तते। अत्रापि विशेषमाह—अपचास्तु स्वयमेवापाचकाः, पुनरुपलक्षणात्परैरपाचयितारः पच्यमाननानुमन्तारो लिङ्गिन एव विशेषेण पात्रम्। तथा 'स्वसिद्धान्ताविरोधेन' स्वशास्त्रोक्तक्रियाऽनुल्लङ्घनेन 'वर्तन्ते' चेष्टन्ते, 'सदैव हि' सर्वकालमेवेति ॥

इत्थं चास्यानाभिग्रहिकमपि गुणकारि संपन्नम्। तथा चानाभिग्रहिकमप्याभिग्राहेककल्पत्वात्तीव्रमेवेति सुनिश्चितमित्यादि संमतिप्रदर्शनपूर्वं यः प्राह तन्निरस्तम्, मुग्धानां स्वप्रतिपत्तौ तस्य गुणत्वात्। सुनिश्चितमित्यादिना विशेषज्ञस्यापि मायादिना माध्यस्थ्यप्रदर्शनस्यैव दोषत्वप्रतिपादनाद्। न चास्याविशेषप्रतिपत्तिः सम्यग्दृष्टेरिव दुष्टेति शङ्कनीयम्, अवस्थाभेदेन दोषव्यवस्थानाद्। अन्यथा साधोरिव सम्यग्दृशः साक्षादेवपूजादिकमपि दुष्टं स्यादिति विभावनीयम्। एतेन पृथिव्याद्यारम्भप्रवृत्तापेक्षया निजनिजदेवाराधनप्रवृत्तानामध्यवसायः शोभनः, देवादिशुभगतिहेतुत्वादित्यसत्, तथाभूताध्यवसायस्य शोभनत्वे सम्यक्त्वोच्चारिणो "कंप्पइ अण्णउत्थिए वा०" इत्यादिरूपेण मिथ्यात्वप्रत्याख्यानानुपपत्तिप्रसक्तेः। नहि शुभाध्यवसायस्य तद्धेतोर्वा प्रत्याख्यानं संभवति, ततः शुभाध्यवसायोऽपि तेषां पापानुबन्धिपुण्यप्रकृतिहेतुत्वेन नरकादिनिबन्धनत्वान्महानर्थहेतुरेव। नन्वत्रापेक्षिकमपि शुभत्वं घटते, स्वस्त्रीसङ्गपरित्यागेन परस्त्रीसङ्गप्रवृत्तस्यैव बहुपापपरित्यागमन्तरेणाल्पपापपरित्यागस्याशुभत्वाद्। अत एव पृथिव्याद्यारम्भप्रवृत्तस्यापि सम्यग्दृशोऽन्यतीर्थिकदेवाद्याराधनपरित्यागोपपत्तिरिति परस्यैकान्ताभिनिवेशो निरस्तः। उत्कटमिथ्यात्ववन्तं पुरुषं प्रतीत्य निजदेवाद्याराधनप्रवृत्तेर्महानर्थहेतुत्वेऽप्यनाग्रहिकमादिधार्मिकं प्रति तथात्वस्याभावात्, तस्याविशेषप्रवृत्तेर्दुर्गतरणहेतुत्वस्य हरिभद्रसूरिभिरेवोक्तत्वात्। प्रत्याख्यानं च पूर्वभूमिकायां शुभाध्यवसायहेतोरप्युत्तरभूमिकायां स्वप्रतिपन्नविशेषधर्मप्रतिबन्धकरूपेण भवति, नैतावता पूर्वभूमिकायामपि तस्य विलोपो युक्तः। यथाहि—प्रतिपन्न

कृत्स्नसंयमस्य जिनपूजायाः साक्षात्करणनिषेधात्, तस्य स्वप्रतिपन्न-चारित्रविरोधिपुष्पादिग्रहणरूपेण तत्प्रत्याख्यानेऽप्यकृत्स्नसंयमवतां श्राद्धानां न तदनौचित्यम्, तथा प्रतिपन्नसम्यग्दर्शनानां स्वप्रतिपन्न-सम्यक्त्वप्रतिबन्धकविपर्यासहेतुत्वेनाविशेषप्रवृत्तेः प्रत्याख्यानेऽपि नादिधार्मिकाणां तदनौचित्यमिति विभावनीयम्।

नन्वेवमादिधार्मिकस्य देवादिसाधारणभक्तेः पूर्वसेवायामुचितत्वे जिनपूजावत्साधूनां साक्षात्तदकरणव्यवस्थायामपि तद्भक्तेवानुमोद्यत्वा-पत्तिरिति चेद्। न, सामान्यप्रवृत्तिकारणतदुपदेशादिना तदनुमोद्य-ताया इष्टत्वात्, केवलं सम्यक्त्वाद्यनुगतं कृत्यं स्वरूपेणाप्यनुमोद्यमि-तरच्च मार्गबीजत्वादिनेत्यस्ति विशेष इत्येतच्चाग्रे सम्यग् विवेचयि-ष्यामः ॥ १२ ॥

अनाभिग्रहिकस्य शोभनत्वमेव गुणान्तराधायकत्वेन समर्थयति—

इत्तो अ गुणट्ठाणं पढमं खलु लद्धजोगदिट्ठीणं।
मिच्छत्तेवि पसिद्धं परमत्थगवेसणपराणं ॥ १३ ॥

इतश्चानाभिग्रहिकस्य हितकारित्वादेव च मिथ्यात्वेऽपि खल्विति निश्चये लब्धयोगदृष्टीनां मित्रादिप्रथमदृष्टिचतुष्टयप्राप्तिमतां परमार्थ-गवेषणपराणां मोक्षैकप्रयोजनानां योगिनां प्रथमं गुणस्थानमन्वर्थं प्रसि-द्धम्। अयं भावः—मिथ्यादृष्टयोऽपि परमार्थगवेषणपराः सन्तः पक्षपातं परित्यज्याद्वेषादिगुणस्थाः खेदादिदोषपरिहाराद् यदा संवेगतारतम्य-माप्नुवन्ति तदा मार्गाभिमुख्यात्तेषामिक्षुरस-कक्कव-गुडकल्पा मित्रा तारा बला दीप्रा चेति चतस्रो योगदृष्टय उल्लसन्ति, भगवत्पतञ्जलि-भदन्तभास्करादीनां तदभ्युपगमात्। तत्र मित्रायां दृष्टौ स्वल्पो बोधो यमो योगाङ्गदेवकार्यादावखेदो योगबीजोपादानं भवोद्वेगसिद्धान्तलेख-नादिकं बीजश्रुतौ परमश्रद्धा सत्संगमश्च भवति, चरमयथाप्रवृत्तकरण-सामर्थ्येन कर्ममलस्याल्पीकृतत्वात्। अत एवेदं चरमयथाप्रवृत्तकरणं परमार्थतोऽपूर्वकरणमेवेति योगविदो विदन्ति।

इतश्च गुणस्थानं प्रथमं खलु लब्धयोगदृष्टीनाम्।
मिथ्यात्वेऽपि प्रसिद्धं परमार्थगवेषणपराणाम् ॥ १३ ॥

उक्तं च—

" अपूर्वासन्नभावेन व्यभिचारवियोगतः ।
तत्त्वतोऽपूर्वमेवेदमिति योगविदो विदुः ॥ "

अस्यां चावस्थायां मिथ्यादृष्टावपि गुणस्थानपदस्य योगार्थघटनोपपद्यते । उक्तं च—

" प्रथमे यद्गुणस्थाने सामान्येनोपवर्णितम् ।
अस्यां तु तदवस्थायां मुख्यमन्वर्थयोगतः ॥ "

तारायां तु मनाक् स्पष्टं दर्शनम्, शुभा नियमाः, तत्त्वजिज्ञासा, योगकथास्वविच्छिन्ना प्रीतिः, भावयोगिषु यथाशक्त्युपचारः उचितक्रियाऽहानिः, स्वाचारहीनतायां महात्रासः, अधिककृत्यजिज्ञासा च भवति । तथाऽस्यां स्थितः स्वप्रज्ञाकल्पिते विसंवाददर्शनान्नानाविधमुमुक्षुप्रवृत्तेः कात्स्न्येन ज्ञातुमशक्यत्वाच्च शिष्टाचरितमेव पुरस्कृत्य प्रवर्तते ।

उक्तं च—

" नास्माकं महती प्रज्ञा सुमहान् शास्त्रविस्तरः ।
शिष्टाः प्रमाणमिह तदित्यस्यां मन्यते सदा ॥ "

बलायां दृष्टौ दृढं दर्शनम्, स्थिरसुखमासनम्, परमा तत्त्वशुश्रूषा, योगगोचरोऽक्षेपः, स्थिरचित्ततया योगसाधनोपायकौशलं च भवति । दीप्रायां दृष्टौ प्राणायामः, प्रशान्तवाहिता लाभादयोगोत्थानविरहः, तत्त्वश्रवणम्, प्राणेभ्योऽपि धर्मस्याधिकत्वेन परिज्ञानम्, तत्त्वश्रवणतो गुरुभक्तेरुद्रेकात्समापत्त्यादिभेदेन तीर्थकृद्दर्शनं च भवति । तथा मित्रादृष्टिस्तृणाग्निकणोपमा न तत्त्वतोऽभीष्टकार्यक्षमा, सम्यक् प्रयोगकालं यावदनवस्थानात्, अल्पवीर्यतया ततः पटुस्मृतिबीजसंस्काराधानानुपपत्तेः, विकलप्रयोगभावाद् भावतो वन्दनादिकार्यायोगादिति । तारादृष्टिर्गोमयाग्निकणसदृशी, इयमप्युक्तकल्पैव, तत्त्वतो विशिष्टवीर्यस्थितिविकलत्वाद् । अतोऽपि प्रयोगकाले स्मृतिपाटवासिद्धेः, तद्-

भावे प्रयोगवैकल्यात्, ततस्तथा तत्कार्याभावादिति। बलादृष्टिः काष्ठाग्निकणतुल्या, ईषद्विशिष्टोक्तबोधद्वयात्, तद्भावेनात्र मनाक्स्थितिवीर्ये अतः प्रदुग्राया स्मृतिरिह, प्रयोगसमये तद्भावे चार्थप्रयोगमात्रप्रीत्या यत्नलेशभावादिति। दीप्रादृष्टिर्दीपप्रभासदृशी, विशिष्टतरोक्तवीर्यत्रयाद्, अतोऽत्रोदग्रे स्थितिवीर्ये, तत्प्रद्व्यपि प्रयोगसमये स्मृतिः। एवं भावतोऽप्यत्र द्रव्यप्रयोगो वन्दनादौ, तथा भक्तितो यत्र भेदप्रवृत्तेरिति प्रथमगुणस्थानप्रकर्षं एतावानिति समयविदः। इत्थं चोक्तस्य योगदृष्टिसमुच्चयग्रन्थार्थस्यानुसारेण मिथ्यादृष्टीनामपि मित्रादिदृष्टियोगेन तथागुणस्थानकत्वसिद्धेः, तथाप्रवृत्तेरनाभिग्रहिकत्वमेव तेषां शोभनमित्यापन्नम् ॥ १३ ॥

ननु योगदृष्ट्याऽपि मिथ्यादृशां कथं गुणभाजनत्वम्? जैनत्वप्राप्तिं विना गुणलाभासंभवाद् दृष्टिविपर्यासस्य दोषस्य सत्त्वाद्। अत एवोक्तम्—

> " मिथ्यात्वं परमो रोगो मिथ्यात्वं परमं तमः।
> मिथ्यात्वं परमशत्रुर्मिथ्यात्वं पदमापदाम् ॥ "

इत्याशङ्क्याह—

गलिआसग्गहदोसा अविज्जसंविज्जपयगया तेवि।
सव्वण्णुभिच्चभावा जइत्तणं जंति भावेणं ॥ १४ ॥

गलिआसग्गहदोसत्ति। ते लब्धयोगदृष्टयो मिथ्यात्ववन्तोऽवेद्यसंवेद्यपदगता अपि तत्त्वश्रवणपर्यन्तगुणलाभेऽपि कर्मवज्रविभेदलभ्यानन्तधर्मात्मकवस्तुपरिच्छेदरूपसूक्ष्मबोधाभावेन वेद्यसंवेद्यपदाधस्तनपदस्थिता अपि भावेन जैनत्वं यान्ति वेद्यसंवेद्याः। वेद्यसंवेद्यपदयोर्लक्षणमिदम्—

गलितासद्ग्रहदोषा अवेद्यसंवेद्यपदगतास्तेऽपि।
सर्वज्ञभृत्यभावाद् यतित्वं यान्ति भावेन ॥ १४ ॥

" वेद्यं संवेद्यते यस्मिन्नपायादिनिबन्धनम् ।
पदं तद्वेद्यसंवेद्यमन्यदेतद्विपर्ययात् ॥ " इति ।

अस्यार्थः—वेद्यं वेदनीयं वस्तुस्थित्या तथाभावयोगिसामान्येनाविकल्पज्ञानग्राह्यमित्यर्थः । संवेद्यते क्षयोपशमानुरूपं विज्ञायते यस्मिन्नाशयस्थानेऽपायादिनिबन्धनं नरकस्वर्गादिकारणं स्त्र्यादि तद् वेद्यसंवेद्यपदं निश्चितागमतात्पर्यार्थयोगिनां भवति । अन्यदवेद्यसंवेद्यपदम्, एतद्विपर्ययात्—उक्तलक्षणव्यत्ययात् स्थूलबुद्धीनां भवति ॥

कथं ते भावजैनत्वं यान्ति ? इत्यत्र हेतुमाह—सर्वज्ञभृत्यभावात् सर्वत्र धर्मशास्त्रपुरस्कारेण तद्भक्तसर्वज्ञसेवकत्वाभ्युपगमात् । नन्वेमुच्छिन्ना जैनाः, जैनव्यवस्थाबाह्यैरपि सर्वैर्नाममात्रेण सर्वज्ञाभ्युपगमात् तेषामपि जैनत्वप्रसङ्गादित्यतस्तेषां विशेषमाह—गलितासद्ग्रहदोषा इति । येषां ह्यसद्ग्रहदोषात्स्वस्वाभ्युपगतार्थपुरस्कारस्तेषां रागद्वेषादिविशिल्पकल्पितसर्वज्ञाभ्युपगन्तृत्वेऽपि न भावजैनत्वम् । येषां तु माध्यस्थावदातबुद्धीनां विप्रतिपत्तिविषयप्रकारांशे नाग्रहस्तेषां मुख्यसर्वज्ञाभ्युपगन्तृत्वाद् भावजैनत्वं स्यादेव इति भावः । मुख्यो हि सर्वज्ञस्तावदेक एव निरतिशयगुणवत्त्वेन तत्प्रतिपत्तित्वं यावतां तावतां तद्भक्तत्वमविशिष्टमेव, सर्वविशेषाणां छद्मस्थेनाग्रहाद् दूरासन्नादिभेदस्य च भृत्यत्वजात्यभेदकत्वादिति ।

तदुक्तं योगदृष्टिसमुच्चये—

" न तत्त्वतो भिन्नमताः सर्वज्ञा बहवो यतः ।
मोहस्तदधिमुक्तीनां तद्भेदाश्रयणं ततः ॥ "
सर्वज्ञो नाम यः कश्चित् पारमार्थिक एव हि ।
स एक एव सर्वत्र व्यक्तिभेदेऽपि तत्त्वतः ॥
प्रतिपत्तिस्ततस्तस्य सामान्येनैव यावताम् ।
ते सर्वेऽपि तमापन्ना इति न्यायगतिः परा ॥
विशेषस्तु पुनस्तस्य कात्स्न्र्येनासर्वदर्शिभिः ।
सर्वैर्न ज्ञायते तेन तमापन्ना न कश्चन ॥
तस्मात्सामान्यतोऽप्येनमभ्युपैति य एव हि ।
निर्व्याजं तुल्य एवासौ तेनांशेनैव धीमताम् ॥

यथैकस्य नृपतेर्बहवोऽपि समाश्रिताः ।
दूरासन्नादिभेदेन तद्भृत्याः सर्व एव ते ॥
सर्वज्ञतत्त्वाभेदेन तथा सर्वज्ञवादिनः ।
सर्वे तत्तत्त्वगा ज्ञेया भिन्नाचारस्थिता अपि ॥
न भेद एव तत्त्वेन सर्वज्ञानां महात्मनाम् ।
तथा नामादिभेदेऽपि भाव्यमेतन्महात्मभिः ॥" इति ।

न च परेषां सर्वज्ञभक्तेरेवानुपपत्तिः, तेषामप्यध्यात्मशास्त्रेषु चित्राचित्रविभागेन भक्तिवर्णनात्, संसारिणां विचित्रफलार्थिनां नानादेवेषु चित्रभक्तेः, एकमोक्षार्थिनां चैकस्मिन् सर्वज्ञे चित्रभक्त्युपपादनात् । तथा च हारिभद्रं वचः—

" चित्राचित्रविभागेन यच्च देवेषु वर्णिता ।
भक्तिः सद्योगशास्त्रेषु ततोऽप्येवमिदं स्थितम् ॥
संसारिषु हि देवेषु भक्तिस्तत्कायगामिनाम् ।
तदतीते पुनस्तत्त्वे तदतीतार्थयायिनाम् ॥
चित्रा चाद्येषु तद्राग-तदन्यद्वेषसंगता ।
अचित्रा चरमे त्वेषा शमसाराऽखिलैव हि ॥" इति ।

प्राप्यस्य मोक्षस्य चैकत्वात् तदर्थिनां गुणस्थानपरिणतितारतम्येऽपि न मार्गभेद इति, तदनुकूलसर्वज्ञभक्तावप्यविवाद एव तेषाम् । उक्तं च—

प्राकृतेष्विह भावेषु येषां चेतो निरुत्सुकम् ।
भवभोगविरक्तास्ते भवातीतार्थयायिनः ॥
एक एव तु मार्गोऽपि तेषां शमपरायणः ।
अवस्थाभेदभेदेऽपि जलधौ तीरमार्गवत् ॥
संसारातीततत्त्वं तु परं निर्वाणसंज्ञितम् ।
तथैकमेव नियमाच्छब्दभेदेऽपि तत्त्वतः ॥
सदाशिवः परं ब्रह्म सिद्धात्मा तथेति च ।
शब्दैस्तदुच्यतेऽन्वर्थादेकमेवैवमादिभिः ॥
तल्लक्षणाविसंवादान्निराबाधमनामयम् ।
निष्क्रियं च परं तत्त्वं यतो जन्माद्ययोगवः ॥

ज्ञाते निर्वाणतत्त्वेऽस्मिन् न संमोहेन तत्त्वतः ।
प्रेक्षावतां न तद्भक्तौ विवाद उपपद्यते ॥" इति ।

ननु देशनाभेदान्नैकः सर्वज्ञः इति सर्वेषां योगिनां नैकसर्वज्ञभक्तत्वमिति चेद् । न, विनेयानुगुण्येन सर्वेषां देशनाभेदोपपत्तेः, एकस्या एव वा तस्या वक्तुरचिन्त्यपुण्यप्रभावेन श्रोतृभेदेन भिन्नतया परिणतः कपिलादीनामृषीणामेव वा कालादियोगेन नयभेदात्तद्वैचित्र्योपपत्तेः, तन्मूलसर्वज्ञप्रतिक्षेपस्य महापापत्वात् । उक्तं च—

" चित्रा तु देशनैतेषां स्याद्विनेयानुगुण्यतः ।
यस्मादेते महात्मानो सर्वव्याधिभिषग्वराः ॥
यस्य येन प्रकारेण बीजाधानादिसंभवः ।
साधुबन्धो भवत्येते तथा तस्य जगुस्ततः ॥
एकापि देशनैतेषां यद्वा श्रोतृविभेदतः ।
अचिन्त्यपुण्यसामर्थ्यात्तथा चित्राऽवभासते ॥
यथाभव्यं च सर्वेषामुपकारोऽपि तत्कृतः ।
जायते वन्ध्यताऽप्येवमस्याः सर्वत्र सुस्थिता ॥
यद्वा तत्तन्नयापेक्षा तत्तत्कालादियोगतः ।
ऋषिभ्यो देशना चित्रा तन्मूलैषाऽपि तत्त्वतः ॥
तदभिप्रायमज्ञात्वा न ततोऽर्वाग्दृशां सताम् ।
युज्यते तत्प्रतिक्षेपो महानर्थकरः परः ॥
निशानाथप्रतिक्षेपो यथाऽन्धानामसंगतः ।
तद्भेदपरिकल्पश्च तथैवार्वाग्दृशामयम् ॥
न युज्यते प्रतिक्षेपः सामान्यस्यापि तत्सताम् ।
आर्यापवादतस्तु पुनर्जिह्वाच्छेदाधिको मतः ॥
कुदृष्टादि च नो सन्तो भाषन्ते प्रायशः क्वचित् ।
निश्चितं सारवत्त्वेव किन्तु सत्त्वार्थकृत्सना ॥" इति ।

ननु यद्येवंविधं माध्यस्थ्यं परेषां स्यात् तदा मार्गाभावजैनत्वं भवेत्, तदेव तु व्यवहारतो जैनमार्गानाश्रयणे दुर्घटमिति न तेषां माध्यस्थ्यमिति चेद् । न, मोहमान्द्ये परेषामपि योगिनामेतादृशमाध्यस्थ्यस्येष्टत्वाद्, यदयं कालातीतवचनानुवादो योगबिन्दौ माध्यस्थ्य-

मवलम्ब्यैवमेदंपर्यव्यपेक्षया तत्त्वं निरूपणीयं स्यात्। कालातीतोऽप्यदोऽब्रवीत्—

" अन्येषामप्ययं मार्गो मुक्ताविद्यादिवादिनाम्।
अभिधानादिभेदेन तत्त्वनीत्या व्यवस्थितः॥
मुक्तो बुद्धोऽर्हन् वापि यदैश्वर्येण समन्वितः।
तदीश्वरः स एव स्यात् संज्ञाभेदोऽत्र केवलम्॥"
अनादिशुद्ध इत्यादिर्यो भेदो यस्य कल्प्यते।
तत्तन्त्रानुसारेण मन्ये सोऽपि निरर्थकः॥
विशेषस्यापरिज्ञानाद् युक्तीनां जातिवादतः।
प्रायो विरोधितश्चैव फलाभेदाच्च भावतः॥
अविद्याक्लेशकर्मादि यतश्च भवकारणम्।
ततः प्रधानमेवैतत्संज्ञाभेदमुपागतम्॥
अत्रापि यो परो भेदश्चित्रोपाधिस्तथा तथा।
गीयतेऽतीतहेतुभ्यो धीमतां सोऽप्यपार्थकः॥
ततः स्थानप्रयासोऽयं यत्तद्भेदनिरूपणम्।
सामान्यमनुमानस्य यतश्च विषयो मतः॥
साधु चैतद् यतो नीत्या शास्त्रमत्र प्रवर्तकम्।
तथाऽभिधानभेदात्तु भेदः कुचितिकाग्रहः॥" इत्यादि।

अथैतेषां भावजैनत्वे आज्ञाऽसंभवमाह—

दव्वाणा खलु तेसिं भावाणा कारणत्तओ नेया।
जं अपुणबंधगाणं चित्तमणुट्ठाणमुवइट्ठं॥ १५॥

दव्वाणत्ति। तेषामवेद्यसंवेद्यपदस्थानां भावजैनानां 'खलु'-इति निश्चये भावाज्ञायाः सम्यग्दर्शनादिरूपायाः कारणत्वतो द्रव्याज्ञा ज्ञेयाऽपुनर्बन्धकोचिताचारस्य पारम्पर्येण सम्यग्दर्शनादिसाधकत्वात्। तदुक्तं चोपदेशपदे—

द्रव्याज्ञा खलु तेषां भावाज्ञा कारणत्वतो ज्ञेया।
यदपुनर्बन्धकानां चित्रमनुष्ठानमुपदिष्टम्॥ १५॥

" [1]गंठीगसत्तापुणबंधगाइआणंपि दव्वओ आणा ।
णवरमिह दव्वसद्दो भइअव्वो समयणीईए ॥
एगो अप्पाहन्ने केवलए चेव वट्टई एत्थ ।
अंगारमद्दगो जह दव्वायरिओ सयाभव्वो ॥
अन्नो पुण जोग्गत्ते चित्तेण य भेअओ मुणेअव्वो ।
वेमाणिओववाओत्ति दव्वदेवो जहा साहू ॥
तत्थाभव्वादीणं गंठीगसत्ताणमप्पहाणत्ति ।
इयरेसिं जोग्गयाए भावाणा कारणत्तेणं ॥ "

अत्र हि द्रव्यशब्दस्य द्वावर्थौ—प्रधानभावकारणं भावांशविकलं केवलमप्राधान्यम् । संग्रहव्यवहारनयविशेषाद् विचित्रमेकभविकबद्धायुष्काभिमुखनामगोत्रलक्षणं तत्तत्पर्यायसमुचितभावरूपं योग्यत्वं च । तत्र प्रथमार्थेनाभव्यसकृद्बन्धकादीनां द्रव्यक्रियाभ्यासपराणां द्रव्याज्ञा । द्वितीयार्थेन चापुनर्बन्धकादीनामिति वृत्तितात्पर्यार्थः ।

नन्वेवमपुनर्बन्धकानां द्रव्याज्ञा व्यवस्थिता, तथाऽपि भिन्नमार्गस्थानां मध्यस्थानामपि मिथ्यादृशां कथमेषा संभवति ?, जैनमार्गक्रियैवाव्युत्पन्नदशायामपुनर्बन्धकत्वसिद्धे बीजाधानस्यैव तात्त्विकत्वात्, तस्य च सर्वज्ञवचनानुसारिजिनमुनिप्रभृतिपदार्थकुशलचित्तादिलक्ष्यत्वाद् । तदुक्तमुपदेशपदवृत्तिकृता—

" [2]आणापरतंतेहिं ता बीआहाणमेत्थ कायव्वं ।
धम्मंमि जहासत्ती परमसुहं इच्छमाणेहिं ॥ "— इति

---

१ ग्रन्थिगसत्त्वापुनर्बन्धकादीनामपि द्रव्यत आज्ञा ।
केवलमिह द्रव्यशब्दो भक्तव्यः समयनीत्या ॥
एकोऽप्राधान्ये केवले एव वर्ततेऽत्र ।
अङ्गारमर्दको यथा द्रव्याचार्यः सदाऽभव्यः ॥
अन्यः पुनर्योग्यत्वे चित्तेन च भेदतो ज्ञातव्यः ।
वैमानिकोपपात इति द्रव्यदेवो यथा साधुः ।
तत्राभव्यादीनां ग्रन्थिगसत्त्वानामप्रधानेति ।
इतरेषां योग्यतया भावाज्ञा कारणत्वेन ॥

२ आज्ञापरतन्त्रैस्तस्माद्बीजाधानमत्र कर्तव्यम् ।
धर्मे यथाशक्ति परमसुखमिच्छद्भिः ॥

गाथां विवृण्वता धर्मबीजानि चैवं शास्त्रान्तरे परिपठितानि दृश्यन्ते—

जिनेषु कुशलं चित्तं तन्नमस्कार एव च ।
प्रणामादि च संशुद्धं योगबीजमनुत्तमम् ॥
उपादेयधियाऽत्यन्तं संज्ञाविष्कम्भणान्वितम् ।
फलाभिसन्धिरहितं संशुद्धं ह्येतदीदृशम् ॥
आचार्यादिष्वपि ह्येतद्विशुद्धं भावयोगिषु ।
वैयावृत्यं च विधिवच्छुद्धाशयविशेषतः ॥
भवोद्वेगश्च सहजो द्रव्याभिग्रहपालनम् ।
तथा सिद्धान्तमाश्रित्य विधिवद् लेखनानि च ।
लेखना पूजना दानं श्रवणं वाचनोद्ग्रहः ।
प्रकाशनाऽथ स्वाध्यायचिन्तना भावनेति च ॥
दुःखितेषु दयाऽत्यन्तमद्वेषो गुणवत्सु च ।
औचित्यासेवनं चैव सर्वत्रैवाविशेषतः ॥ इति ।

ललितविस्तरायामप्युक्तम्—" एतत्सिद्धयर्थं तु यतितव्यमादिकर्मणि, परिहर्तव्योऽकल्याणमित्रयोगः, सेवितव्यानि कल्याणमित्राणि, न लङ्घनीयोचितस्थितिः, अपेक्षितव्यो लोकमार्गः, माननीया गुरुसन्ततिः, भवितव्यमेतत्तन्त्रेण, प्रवर्तितव्यं दानादौ, कर्तव्योदारपूजा भगवताम्, निरूपणीयः साधुविशेषः, श्रोतव्यं विधिना धर्मशास्त्रम्, भावनीयं महायत्नेन, प्रवर्त्तितव्यं विधानतोऽवलम्बनीयम्, पर्यालोचनीयाऽऽयतिः, अवलोकनीयो मृत्युः, परिहर्तव्यो विक्षेपमार्गः, पतितव्यं योगसिद्धौ, कारयितव्या भगवत्प्रतिमा, लेखनीयं भुवनेश्वरवचनम्, कर्तव्यो मङ्गलजापः, प्रतिपत्तव्यं चतुःशरणम्, गर्हितव्यानि दुष्कृतानि, अनुमोदनीयं कुशलम्, पूजनीया मन्त्रदेवता, श्रोतव्यानि सच्चेष्टितानि, भावनीयमौदार्यम्, वर्तितव्यमुत्तमज्ञानेन " एवंभूतस्य येह प्रवृत्तिः सा सर्वैव साध्वी मार्गानुसारीत्ययं नियमादपुनर्बन्धकादिस्तदन्यस्यैवंभूतगुणसंपक्षेऽभावादित्यत आह—यद् यस्माद् अपुनर्बन्धकानां चित्रमनेकविधमनुष्ठानमुपदिष्टम्, अतो भिन्नाचारस्थितानामपि तेषां द्रव्याज्ञाया नानुपपत्तिरिति ।

इदमत्र हृदयम्—नद्यादिधार्मिकस्य विधिः सर्व एव सर्वत्रोपयुज्यते, किन्तु क्वचित्कश्चिदेवेति। भिन्नाचारस्थितानामप्यन्तःशुद्धिमतामपुनर्बन्धकत्वमविरुद्धम्, अपुनर्बन्धकस्य हि नानास्वरूपत्वात् तत्तत्तन्त्रोक्ताऽपि मोक्षार्था क्रिया घटते, सम्यग्दृष्टेश्च स्वतन्त्रक्रियेवेति व्यवस्थितत्वात्। तदुक्तं योगबिन्दुसूत्रवृत्त्योः—

अपुनर्बन्धकस्यैवं सम्यग्नीत्योपपद्यते।
तत्तत्तन्त्रोक्तमखिलमवस्थाभेदसंश्रयात् ॥

अपुनर्बन्धकस्योक्तरूपस्यैवमुक्तरूपेण सम्यग्नीत्या—शुद्धयुक्तिरूपया उपपद्यते—घटते। किम्? इत्याह—'तत्तत्तन्त्रोक्तं' कापिल-सौगतादिशास्त्रप्रणीतं मुमुक्षुजनयोग्यमनुष्ठानमखिलं समस्तम्, कुतः? इत्याह—अवस्थाभेदसंश्रयात्—अपुनर्बन्धकस्यानेकस्वरूपाङ्गीकरणत्वात्, अनेकस्वरूपाभ्युपगमे हि अपुनर्बन्धकस्य किमप्यनुष्ठानं कस्यामप्यवस्थायामवतरतीति। अथापुनर्बन्धकानन्तरं यद्भवति तद्दर्शयति—

"स्वतन्त्रनीतितस्त्वेव ग्रन्थिभेदे तथा सति।
सम्यग्दृष्टिर्भवत्युच्चैः प्रशमादिगुणान्वितः ॥

'स्वतन्त्रनीतितस्त्वेव' जैनशास्त्रनीतेरेव, न पुनस्तन्त्रान्ताराभिप्रायेणापि, 'ग्रन्थिभेदे' रागद्वेषमोहपरिणामस्यातीवदृढस्य विदारणे, 'तथा' यथाप्रवृत्त्यादिकरणप्रकारेण 'सति' विद्यमाने, किम्? इत्याह—'सम्यग्दृष्टिः' शुद्धसम्यक्त्वधरो 'भवति' संपद्यते। कीदृशः? इत्याह—'उच्चैः' अत्यर्थं प्रागवस्थातः सकाशात् 'प्रशमादिगुणान्वितः' उपशम-संवेग-निर्वेदानुकम्पाऽऽस्तिक्याभिव्यक्तियुक्त इति।

एवं परेषामपि माध्यस्थ्ये द्रव्याज्ञासद्भावः सिद्धः ॥ १५ ॥

ननु द्रव्याज्ञाऽपि सिद्धान्तोदितक्रियाकरणं विना कथं परेषां स्यात्? इत्यत आह—

मग्गाणुसारिभावो आणाए लक्खणं मुणेयव्वं।
किरिया तस्स ण णियया पडिबंधे वावि उपगारे ॥१६॥

मार्गानुसारिभाव आज्ञाया लक्षणं ज्ञातव्यम्।
क्रिया तस्य न नियता प्रतिबन्धे वाऽप्युपकारे ॥ १६ ॥

मग्गाणुसारिभावोत्ति । मार्गानुसारिभावो निसर्गतस्तत्त्वानुकूलप्रवृत्तिहेतुः परिणाम आज्ञाया लक्षणं 'मुणेयव्वं'ति ज्ञातव्यम् । क्रिया स्वसमयपरसमयोदिताचाररूपा, तस्य मार्गानुसारिभावस्योपकारे प्रतिबन्धे वा न नियता, स्वसमयोदितक्रियाकृतनुपकारं विनाऽपि मेघकुमारजीवहस्त्यादीनां तथाभव्यत्वपरिपाकाहिताऽनुकम्पादिमहिम्ना मार्गानुसारित्वसिद्धेः, परसमयक्रियायां च सत्यामपि समुल्लसितयोगदृष्टिमहिम्नां पतञ्जल्यादीनां मार्गानुसारित्वाप्रतिघातात् ।

अत्र कश्चिदाह—ननु पतञ्जल्यादीनां मार्गानुसारित्वमशास्त्रसिद्धम्, उच्यते—नैतदेवम्, योगदृष्टिसमुच्चयग्रन्थ एव योगदृष्ट्यभिधानात् तेषां मार्गानुसारित्वसिद्धेः । उक्तं च—" निरूपितं पुनर्योगमार्गज्ञैरध्यात्मविद्भिः पतञ्जलिप्रभृतिभिस्तपोनिर्धूतकल्मषैः प्रशमप्रधानेन तपसा क्षीणप्रायमार्गानुसारिबोधबाधकमोहमलैरिति " । उक्तं च—" योगमार्गज्ञैस्तपोनिर्धूतकल्मषैः "—इति प्रतीकं विवृण्वता योगबिन्दुवृत्तिकृताऽपि तेषां तदभिधानाच्चेति । अयमिह परमार्थः—अव्युत्पन्नानां विपरीतव्युत्पन्नानां वा परसमयस्थानां जैनाभिमतक्रिया यथाऽसद्ग्रहपरित्याजनद्वारा द्रव्यसम्यक्त्वाद्यध्यारोपणेन मार्गानुसारिताहेतुः, तथा सद्ग्रहप्रवृत्तानां तेषामुभयाभिमतयमनियमादिस्वरूपशुद्धक्रियाऽपि पारमार्थिकवस्तुविषयपक्षपाताधानद्वारा । तथाहि—योपादेयविषयमात्रपरीक्षाप्रवणत्वाद्ध्यात्मविदां तथा च नियतक्रियाया मार्गानुसारिभावजननेऽनैकान्तिकत्वमात्यन्तिकत्वं वा, तथा च जैनक्रियां विनाऽपि भावजैनानां परेषां मार्गानुसारित्वादाज्ञासंभवोऽविरुद्ध इति । युक्तं चैतद्, न चेदेवं तदा जैनक्रियां विना भावलिङ्गबीजाभावाद् भावलिङ्गस्यापि परेषामनुपपत्तावन्यलिङ्गसिद्धादिभेदानुपपत्तेः ।

यः पुनराह—परसमयानभिमतस्वसमयाभिमतक्रियैव असद्ग्रहविनाशद्वारा मार्गानुसारिताहेतुरिति, तदसत्, उभयाभिमताकरणनियमादिनैव पतञ्जल्यादीनां मार्गानुसारिताऽभिधानात्, व्युत्पन्नस्य मार्गानुसारितायां तत्त्वजिज्ञासामूलविचारस्यैव हेतुत्वात्, अव्युत्पन्नस्य तस्यां गुरुपारतन्त्र्याधानद्वारा स्वसमया क्रियाहेतुत्वे परसमयानभिमतत्त्वप्रवेशे प्रमाणाभावाच्च । भवाभिनन्दिदोषप्रतिपक्षा गुणा एव हि

नियता मार्गानुसारिताहेतवः, क्रिया तु क्वचिदुभयाभिमता, क्वचिच्च स्वसमयाभिनिवेशेत्यनियता, हेतुः परकीयसंमतेर्निजमार्गदार्ढ्यहेतुत्वं वा व्युत्पन्नमभिनिविष्टं वा प्रति, न तु व्युत्पन्नमनभिनिविष्टं प्रतीति ।

यत्तु निश्चयतः परसमयबाह्यानामेव संगम-नयसाराम्बडप्रमुखानां मार्गानुसारित्वं स्यात्, नान्येषामिति केषांचिन्मतम्, तत्तेषामेव प्रतिकूलम्, सद्ग्रहप्रवृत्तिजनितनैश्चयिकपरसमयबाह्यतया पतञ्जल्यादीनामप्यम्बडादीनामिव मार्गानुसारित्वाप्रतिघातात् । इयानेव हि विशेषो यदेकेषामपुनर्बन्धकत्वेन तथात्वम्, अपरेषां तु श्राद्धत्वादिनेति ॥१६॥

अयं मार्गानुसारिभावः कदा स्यात् ? इत्येतत्कालमानमाह—

मग्गाणुसारिभावो जायइ चरमंमि चेव परिअट्टे ।
गुणवुड्ढीए विगमे भवाभिनंदिदोसाणं ॥ १७ ॥

मग्गाणुसारिभावोत्ति । भवाभिनन्दिदोषाणाम्—

" क्षुद्रो लोभरतिर्दीनो मत्सरी भयवान् शठः ।
अज्ञो भवाभिनन्दी स्यान्निष्फलारम्भसंगतः ॥ "

इति श्लोकोक्तानां विगमे सति गुणवृद्ध्या चरमपुद्गलपरावर्त एव मार्गानुसारिभावो भवति । अपुनर्बन्धकादेर्मार्गानुसारिप्रौढप्रज्ञानुगतत्ववचनात् तस्य चैतावत्कालमानत्वात् । अत एव च नौषधप्रयोगकालश्चरमपुद्गलपरावर्त एवोक्तो व्यवहारतः, निश्चयतस्तु ग्रन्थिभेदकालस्तत्रापि ग्रन्थिभेदकाल एव न्यूनत्वेन पुरस्कृतः । तथा चोपदेशपदसूत्रवृत्ती—

" घणमिच्छत्तो कालो एत्थ अकालो उ होइ णायव्वो ।
कालो अ अपुणबंधगपभिई धीरेहिं णिद्दिट्ठो ॥

मार्गानुसारिभावो जायते चरम एव परिवर्ते ।
गुणवृद्ध्या विगमे भवाभिनन्दिदोषाणाम् ॥ १७ ॥

---

१ घनमिथ्यात्वः कालोऽत्राकालस्तु भवति ज्ञातव्यः ।
कालश्चापुनर्बन्धकप्रभृतिर्धीरैर्निर्दिष्टः ॥

णिच्छयओ पुण एसो विन्नेओ गंठिभेअकालंमि ।
एयंमि विहिसयपालणाउ आरोग्गमेयाओ ”

घनं-महामेघावलुप्तसकलनक्षत्रादिप्रभाप्रसरभाद्रपदाद्यमावास्या मध्यभाग-समुद्भूतान्धकारनिबिडं मिथ्यात्वं—तत्त्वविपर्यासलक्षणं यत्र स तथा, कालश्चरम-पुद्गलपरावर्तव्यतिरिक्तशेषपुद्गलपरावर्तलक्षणः, अत्र-वचनौषधप्रयोगे, अकालस्तु-अकाल एव भवति ज्ञातव्यः । चरमपुद्गलपरावर्तलक्षणस्तु तथाभव्यत्वपरिपाकतो बीजाधानोद्भेदपोषणादिषु स्यादपि काल इति । अत एवाह—कालस्त्ववसरः पुनर-पुनर्बन्धकप्रभृतिः । तत्रापुनर्बन्धकः “ पावं ण तिव्वभावा कुणइ ” इत्यादिलक्षणः, आदिशब्दान्मार्गाभिमुख-मार्गपतितौ गृह्यते । तत्र मार्गो ललितविस्तरायामनेनैव शास्त्रकृतेत्थंलक्षणो निरुपितः । ‘ मग्गदयाणं ’ इत्याद्यालापकव्याख्यायां मार्गश्चेतसोऽवक्रगमनम् , भुजंगमनलिकायामतुल्यो विशिष्टगुणस्थानावाप्तिप्रवणः स्वर-सवाही क्षयोपशमविशेषो हेतु-स्वरूप फलशुद्धामुखेत्यर्थः, तत्र पतितो भव्यविशेषो मार्गपतित इत्युच्यते, तदादिभावापन्नश्च मार्गाभिमुख इति । एतौ च चरमयथा-प्रवृत्तकरणभागभाजावेव विज्ञेयौ । अपुनर्बन्धकोऽपुनर्बन्धककालः प्रभृतिर्यस्य स तथा धीरैस्तीर्थकरादिभिर्निर्दिष्टो व्यवहारत इति । निश्चयतो निश्चयनयमतेन पुनरेष वचनौषधप्रयोगकाले विज्ञेयः । कः ? इत्याह—ग्रन्थिभेदकालस्तु ग्रन्थिभेद-काल एव, यस्मिन् कालेऽपूर्वकरणानिवृत्तिकरणाभ्यां ग्रन्थिर्भिन्ना भवति तस्मि-न्नेवेत्यर्थः । कुतः ? यत एतस्मिन् ग्रन्थिभेदे सति विधिना-अवस्थोचितकृत्यकरण-लक्षणेन, सदा सर्वकालं या पालना च वचनौषधस्य, तया कृत्वाऽऽरोग्यं—संसार-व्याधिरोधलक्षणम् , एतस्माद्वचनौषधप्रयोगाद् भवति । अपुनर्बन्धकप्रभृतिषु वचनप्रयोगः क्रियमाणोऽपि न तथा सूक्ष्मबोधविधायकः, अनाभोगबहुलत्वात्त-त्कालस्य । भिन्नग्रन्थ्यादयस्तु व्यावृत्तमोहत्वेन निपुणबुद्धितया तेषु कृत्येषु वर्त-मानास्तत्कर्मव्याधिसमुच्छेदका जायन्त इति । ग्रन्थिभेदमेव पुरस्कुर्वन्नाह—

“ इहरावि हंदि एअंमि एस आरोग्गसाहगो चेव ।
पोग्गलपरिअट्टद्धं जमूणमेअंमि संसारो ॥ ”[3]

---

१ निश्चयतः पुनरेष विज्ञेयो ग्रन्थिभेदकाले ।
एतस्मिन् विधिशतपालनया आरोग्यमेतस्मात् ॥

२ पापं न तीव्रभावात्करोति ।

३ इतरथाऽपि खलु एतस्मिन्नेष आरोग्यसाधकश्चैव ।
पुद्गलपरावर्तार्द्धं यदूनमेतस्मिन् संसारः ॥

इतरथाऽपि विधेः सदापालनाभन्तरेणापि, हन्दीति पूर्ववत्, एतस्मिन् ग्रन्थिभेदे कृते सत्येष वचनप्रयोग आरोग्यसाधकश्चैवभावारोग्यनिष्पादक एव संपद्यते। तथा च पठ्यते—

" लब्ध्वा मुहूर्तमपि ये परिवर्जयन्ति
सम्यक्त्वरत्नमनवद्यपदप्रदायि।
यास्यन्ति तेऽपि न चिरं भववारिराशौ
तद्विभ्रतां चिरतरं किमिहास्ति वाच्यम् ॥

अत्र हेतुमाह— पुद्गलानामौदारिक- तैजस- भाषा-ऽऽनप्राण-मनः कर्म-ग्रहणपरिणतानां विवक्षितकालमादौ कृत्वा यावतां सामस्त्येनैकजीवस्य ग्रहनिसर्गौ संपद्येते स कालः पुद्गलपरावर्त इत्युच्यते, पुद्गलग्रहणनिसर्गाभ्यां परिवर्तन्ते परापर-परिणतिं लभन्ते तस्मिनिति व्युत्पत्तेः, तस्यार्द्ध यावद् यद् यस्मादूनं किंचिद्धीनम्, एतस्मिन् ग्रन्थिभेदे सति संसारिजीवानां तीर्थकराद्याशातनाबहलानामपि। अत्र दृष्टान्ताः कूलवालकगोशालकादयो वाच्या इति। एवं चोत्कर्षतोऽप्यपार्ध-पुद्गलपरावर्तावशेषसंसारस्यैव मार्गानुसारित्वमिति यत्केनचिदुक्तम्, तत्केनाभि-प्रायेणेति विचारणीयं मध्यस्थैः। नह्येवमपुनर्बन्धकापेक्षया कालभेदेन ग्रन्थिभेदस्य पुरस्करणमुपपद्यते, पराभिप्रायेणापार्द्धपुद्गलावर्तकालमानस्योभयत्राविशेषाद् एवं वदतो भ्रान्तिमूलं तावच्चरमयथाप्रवृत्तकरणभागभाजामेवापुनर्बन्धकादीनामधिकारित्वभणनम्, तादृशानां तेषां सम्यक्त्वसंनिहितत्वाद्। अत एव—

" भवहेउनाणमेयस्स पायसो सप्पवित्तिभावेणं।
तह तयणुबंधओ चिय तत्तेयरनिंदणाइओ ॥[1]"

भवहेतुः संसारनिबन्धनं ज्ञानं—शास्त्राभ्यासजन्यो बोध एतस्य मिथ्यादृष्टेः, कथम्? इत्याह—प्रायशो बाहुल्येन, असत्प्रवृत्तिभावेन—विपर्यस्तचेष्टाकरणात्, तस्य यदिह प्रायोग्रहणं तद् यथाप्रवृत्तकरणचरमविभागभाजां संनिहितग्रन्थिभे-दानामत्यन्तजीर्णमिथ्यात्वज्वराणां केषांचिदुःखितदया-गुणवद्द्वेष-समुचिताचार-प्रवृत्तिसाराणां सुन्दरप्रवृत्तिभावेन व्यभिचारवारणार्थम्। तथेति हेत्वन्तरसमुच्चये। तदनुबन्धत एवासत्प्रवृत्त्यनुबन्धादेव। एतदपि कुतः? इत्याह—तत्त्वेतरनिन्दना-

१ भवहेतुर्ज्ञानमेतस्य प्रायशोऽसत्प्रवृत्तिभावेन।
तथा तदनुबन्धत एव तत्त्वेतरनिन्दनादितः ॥

दितः । स हि मिथ्यात्वोपघातात्समुपात्तविपरीतरुचिः, तत्त्वं च सद्भूतदेवतादिकमर्हत्त्वादिलक्षणम्, 'निंद'त्ति इतरज्ञातत्त्वं तत्कुयुक्तिसमुपन्यासेन पुरस्करोति ततस्तत्त्वेतरनिन्दनादितो दोषाद् भवान्तरेऽप्यसत्प्रवृत्तिरनुबन्धयुक्तस्यैव स्यादित्युपदेशपदवचनान्तरमनुसृत्यात्रानादिप्रवाहपतितस्य यथाप्रवृत्तकरणस्य चरमविभागः सम्यक्त्वप्राप्तिहेतुकर्मक्षयोपशमलक्षितावस्थाविशेषस्तद्वतां संनिहितग्रन्थिभेदानां स्वल्पकालप्राप्तव्यसम्यक्त्वानामत्यन्तजीर्णमिथ्यात्वज्वराणां सुन्दरप्रवृत्तिरिति भणनेन तद्व्यतिरिक्तानां तु सर्वेषामपि मिथ्यादृशामसुन्दरप्रवृत्तिरेवोक्तेति सूक्ष्मदृशा पर्यालोच्यमिति तेनोक्तम् । तत्रेदं विचारणीयम्—चरमत्वं यथाप्रवृत्तकरणस्यानन्तपुद्गलपरावर्तभाविनश्चरमैकावर्तमात्रेणापि निर्वाह्यम्, संनिहितग्रन्थिभेदत्वस्य तु स्वल्पकालप्राप्तव्यसम्यक्त्वाक्षेपकता ।

" आसन्ना चेयमस्योच्चैश्चरमावर्तिनो यतः ।
भूयांसोऽमी व्यतिक्रान्तास्तदेकोऽत्र न किंचन ॥

आसन्ना चाभ्यर्णवर्तिन्येव इयमुक्तिरस्योच्चैरतीवचरमावर्तिनश्चरमपुद्गलपरावर्तभाजो जीवस्य, यतः कारणाद् भूयांसोऽतीवबहवोऽमी आवर्ता व्यतिक्रान्ता अनादौ संसारे व्यतीतास्तत एकोऽपश्चिमोऽत्र ' न किंचन ' न किंचिद्भयस्थानमेष इत्यर्थः "

इति योगबिन्दुसूत्रवृत्तिवचनाच्चरमावर्तिन आसन्नसिद्धिकत्वस्यापि स्वल्पकालप्राप्तव्यसिद्ध्याक्षेपकत्वापत्तेः, आपेक्षिकासन्नतया समाधानं चोभयत्र सुघटमिति

अथैकभविकाद्यचितयोग्यतानियतत्वाद् द्रव्याज्ञायाः सम्यक्त्वप्राप्त्यपेक्षया तदधिकव्यवधाने मिथ्यादृशो न मार्गानुसारितेति निश्चीयते इति चेद् । न, असति प्रतिबन्धे परिपाके वाऽपुनर्बन्धकादेर्मार्गानुसारिणोऽभावाज्ञाव्यवधानेऽपि सति प्रतिबन्धादौ तद्व्यवधानस्यापि संभवात् तत्कालेऽपि भावाज्ञाबहुमानाप्रतिघातात्, उचितप्रवृत्तिसारतया द्रव्याज्ञाया अविरोधाद्, अन्यथा चारित्रलक्षणाद् भावस्तवादेकभविकाद्यधिकव्यवधाने द्रव्यस्तवस्याप्यसंभवप्रसङ्गाद्, भावस्तवहेतुत्वेनैव द्रव्यस्तवत्वप्रतिपादनात् । तदुक्तं पञ्चाशके—

ता भावत्थयहेऊ जो सो दव्वत्थओ इहं इट्ठो ।
जो उण णेवं भूओ स अप्पहाणो परं होइ ॥" इति ।

यदि च भावलेशयोगाद्व्यवहितस्यापि द्रव्यस्तवत्वमविरुद्धं तदा तत एव तादृशस्य मार्गानुसारिणो द्रव्याज्ञाप्यविरुद्धैव । यथाहि— निर्निदानं सूत्रविधिलक्षणेन भावस्तवानुरागलक्षणेन वा प्रकारेण जिनभवनाद्युचितानुष्ठानस्य द्रव्यस्तवत्वमव्याहतम्, एकान्तेन भावशून्यस्यैव विपरीतत्वात् । तथा अपुनर्बन्धकस्यापि भावाज्ञानुराग-भावलेशयुक्तस्य व्यवधानेऽपि द्रव्याज्ञाया न विरोध इति । अत एव भवाभिष्वङ्गानाभोगासंगतत्वात् अन्यावर्तापेक्षया विलक्षणमेव चरमावर्ते गुरुदेवादिपूजनं व्यवस्थितम् । तदुक्तं योगबिन्दौ—

एतद् युक्तमनुष्ठानमन्यावर्तेषु तद् ध्रुवम् ।
चरमे त्वन्यथा ज्ञेयं सहजाल्पमलत्वतः ॥
एकमेव ह्यनुष्ठानं कर्तृभेदेन भिद्यते ।
सरुजेतर भेदेन भोजनादिगतं यथा ॥
इत्थं चैतद् यतः प्रोक्तं सामान्येनैव पञ्चधा ।
विषादिकमनुष्ठानं विचारेऽत्रैव योगिभिः ॥
विषं गरोऽननुष्ठानं तद्धेतुरमृतं परम् ।
गुर्वादिपूजाऽनुष्ठानमपेक्षादिविधानतः ॥
विषं लब्ध्याद्यपेक्षात इदं सच्चित्तमारणात् ।
महतोऽल्पार्थनाद् ज्ञेयं लघुत्वापादनात्तथा ॥
दिव्यभोगाभिलाषेण गरमाहुर्मनीषिणः ।
एतद्विहितनीत्यैव कालान्तरनिपाननात् ॥
अनाभोगवतश्चैतदननुष्ठानमुच्यते ।
संप्रमुग्धं मनोऽस्येति ततश्चैतद् यथोदितम् ॥
एतद्रागादिदं हेतुः श्रेष्ठो योगविदो विदुः ।
सदनुष्ठानभावस्य शुभभावांशयोगतः ॥
जिनोदितमिति त्वाहुर्भावसारमदः पुनः ।
संवेगगर्भमत्यन्तममृतं मुनिपुङ्गवाः ॥

एवं च कर्तृभेदेन चरमेऽन्यादृशं स्थितम् ।
पुद्गलानां परावर्ते गुरुदेवादिपूजनम् ॥
यतो विशिष्टकर्ता यां तदन्येभ्यो नियोगतः ।
तद्योगयोग्यतो भेदादिति सम्यग् विचिन्त्यताम् ॥

अत्र पूर्वं ह्येकान्तेन योगायोग्यस्यैव देवादिपूजनमासीत्, चरमावर्ते तु समुल्लसितयोगायोग्यभावस्येति । चरमावर्तदेवादिपूजनस्यान्यावर्तदेवादिपूजनादन्यादृशत्वमिति वृत्तिकृद् विवृतवानेतेन । यत्त्वन्यतीर्थिकाभिमताकरणनियमादेः सुन्दरत्वेन भणनं तद् हिंसाद्यासक्तजनस्य मनुष्यत्वस्येव स्वरूपयोग्यतया व्यवहारतो मन्तव्यम् । निश्चयतस्तु मिथ्यादृगकरणनियमो हिंसाद्यासक्तजनमनुष्यत्वं वेत्युभयमपि संसारकारणत्वेनानर्थहेतुत्वादसुन्दरमेवेति यत्केनचिदुक्तम्, तदपास्तम् । नह्येतादृशं वचनमभिनिवेशं विना संभवति, यतः पूर्वसेवाऽपि मुक्त्यद्वेषादिसंगता चरमावर्तभाविनी, निश्चयतः प्राच्यावर्तभावितद्विलक्षणा योगयोग्यतयाऽऽचार्यैरतिशयितोक्ता, किं पुनरकरणनियमस्य साक्षाद् योगाङ्गस्य वक्तव्यमिति । नहि मनुष्यत्वसदृशमकरणनियमादिकम्, अन्येषामपि सदाचाररूपस्य तस्य सामान्यधर्मप्रविष्टत्वात्, सामान्यधर्मस्य च भावलेशसंगतस्य विशेषधर्मप्रकृतित्वात्, मनुष्यत्वं चानीदृशम् । किं च-हिंसाद्यासक्तमनुष्यत्वस्थानीयं यदि मिथ्यात्वविशिष्टमकरणनियमादिकं तदा मेघकुमारजीवहस्त्यादिदयाऽपि तादृशी स्याद्, उत्कटमिथ्यात्वविशिष्टस्य तस्य तथात्वे चेष्टापत्तिः, अपुनर्बन्धकादीनामुत्कटमिथ्यात्वाभावात्पूर्वसेवायामपि च तेषामेवाधिकृतत्वात् । तदुक्तम्—

" अस्यैषा मुख्यरूपा स्यात्पूर्वसेवा यथोदिता ।
कल्याणाशययोगेन शेषस्याप्युपचारतः ॥ " इति ।

न चापुनर्बन्धकादेरपि न सम्यगनुष्ठानमिति शङ्कनीयम्,

" सम्माणुट्ठाणं चिय ता सव्वमिणंति तत्तओ णेयं[1] ।
ण य अपुणबंधगाइं मुत्तुं एयं इहं होइ ॥ "

---

१ सम्यगनुष्ठानमेव तस्मात्सर्वमिदं तत्त्वतो ज्ञेयम् ।
न चापुनर्बन्धकादिं मुक्त्वा एतदिह भवति ॥

सम्यगनुष्ठानमेवाज्ञानुकूलाचरणमेव, तत्—तस्मात्सर्वं त्रिप्रकारमपि इदमनुष्ठानं तत्त्वतः—पारमार्थिकव्यवहारनयदृष्ट्या ज्ञेयम्। अत्र हेतुमाह—'न' नैव, यतोऽपुनर्बन्धक-मार्गाभिमुख-मार्गपतितान् मुक्त्वा एतदनुष्ठानमिहैतेषु जीवेषु भवति 'अपुनर्बन्धकादयश्च सम्यगनुष्ठानवन्त एव'—इति उपदेशपदसूत्रवृत्तिवचनाद् अपुनर्बन्धकादेः सम्यगनुष्ठाननियमप्रतिपादनात् त्रिप्रकारं ह्यनुष्ठानं सततभ्यास-विषयाभ्यास-भावाभ्यासभेदात्। तत्र नित्यमेवोपादेयतया लोकोत्तरगुणावाप्तियोग्यतापादकमातापितृविनयादिवृत्तिः सततभ्यासः। विषयेऽर्हल्लक्षणे मोक्षमार्गस्वामिनि वा विनयादिवृत्तिः स विषयाभ्यासः। दूरं भवादुद्विग्नस्य सम्यग्दर्शनादीनां भावानामभ्यासश्च भावस्याभ्यास इति। तच्च निश्चयतो मोक्षानुकूलभावप्रतिबद्धत्वाद् विषयगतमेवेत्यपुनर्बन्धकादिः सम्यगनुष्ठानवानेवेति योगमार्गोपनिषद्विद्, येन चात्यन्तं सम्यक्त्वाभिमुख एव मिथ्यादृष्टिर्मार्गानुसारी गृह्यते, तेनादिधार्मिकप्रतिक्षेपाद् अपुनर्बन्धकादयस्त्रयो धर्माधिकारिण इति मूलप्रबन्ध एव न ज्ञातः, सम्यक्त्वाभिमुखस्यैवापुनर्बन्धकस्य पृथग्गणने चारित्राभिमुखादीनामपि पृथग्गणनापत्त्या विभागव्याघातात्। तस्माद् यथा चारित्राद्व्यवहितस्यापि सम्यग्दृशः शमसंवेगादिना सम्यग्दृष्टित्वं निश्चीयते, तथा सम्यक्त्वाद् व्यवहितस्यापुनर्बन्धकादेरपि तल्लक्षैस्तद्भावो निश्चेयः। तल्लक्षणप्रतिपादिका ज्ञेयं पञ्चाशकगाथा—

"पावं ण तिव्वभावा कुणइ ण बहु मन्नइ भवं घोरं।
उचियठिइं च सेवइ सव्वत्थवि अपुणबंधो॥" त्ति।

एतद्वृत्तिर्यथा—पापमशुद्धं कर्म, तत्कारणत्वाद् हिंसाद्यपि पापं तद् 'न' नैव तीव्रभावाद् गाढं संक्लिष्टपरिणामात्करोति विधत्ते, अत्यन्तोत्कटमिथ्यात्वादित्रयोपशमेन लब्धात्मनैर्मल्यविशेषत्वाद्। तीव्रेति विशेषणादापन्नमतीव्रभावात्करोत्यपि, तथाविधकर्मदोषात्। तथा 'न बहु मन्यते' न बहु मानविषयी करोति 'भवं' संसारं 'घोरं' रौद्रम्, तस्य घोरत्वावगमात्। तथा उचितस्थितिम्—अनुरूपप्रतिपत्तिम्, चशब्दः समुच्चये, सेवते-भजते, कर्मलाघवात् सर्वत्रापि, आस्तामेकत्र, देशकालावस्थापेक्षया समस्तेष्वपि देवातिथि-माता-पितृप्रभृतिषु,

१ पापं न तीव्रभावात्करोति, न बहु मन्यते भवं घोरम्।
उचितस्थितिं च सेवते सर्वत्रापि अपुनर्बन्धः॥

मार्गानुसारिताऽभिमुखत्वेन मयूरशिशुदृष्टान्तादपुनर्बन्धक उक्तनिर्वचनो बीज इत्येवंविधक्रियालिङ्गो भवतीति माधार्थ इति ।

न चापुनर्बन्धकस्य क्वचिन्मार्गानुसारितायाः क्वचिच्च तदभिमुखत्वदर्शने भ्रमकलुषितं चेतो विधेयम्, द्रव्यभावयोगाभिप्रायेणोभयाभिधानाविरोधात् । एतेन 'मार्गानुसारित्वात्' इत्यत्र धर्मबिन्दुप्रकरणे मार्गस्य सम्यग्ज्ञानादेर्मुक्तिपथस्यानुवर्तनादिति व्याख्यानात्, यन्दारुवृत्तावपि 'मग्गाणुसारिअ'त्ति असद्ग्रहपरित्यागेनैव तत्त्वप्रतिपत्तिर्मार्गानुसारितेत्येव व्याख्यानाद् मिथ्यादृष्टेरकरणनियमादिकारिणोऽपि मार्गानुसारित्वमित्यपास्तम्, पराभिमतस्य सम्यक्त्वाभिमुखस्यैवापुनर्बन्धकादेः सर्वस्यापि धर्माधिकारिणो योग्यतया तत्त्वप्रतिपत्तेर्मार्गानुसारिताया अप्रतिघातात्, मुख्यतत्त्वप्रतिपत्तेश्च मेघकुमारजीवादावपि वक्तुमशक्यत्वात् । तस्मात्संगमनयसारादिवदासन्नसंनिहितसम्यक्त्वप्राप्तीनामेव मार्गानुसारित्वमिति मुग्धप्रतारणमात्रम्, अपुनर्बन्धकादिलक्षणवतामेव तथाभावाद्, अन्यथा तादृशसंनिहितत्वानिश्चयेऽपुनर्बन्धकाद्युद्देशेनादिधार्मिकाचाराद्युपदेशोऽप्युच्छिद्येतेति सकलजैनप्रक्रियाविलोपापत्तिः । किं च-बीजादीनां चरमपुद्गलपरावर्तभावित्वस्य तत्प्राप्ताबुत्कर्षतः एकपुद्गलपरावर्तकालमानस्य तेषां सान्तरेतरत्वभेदस्य च प्रतिपादनान्न सम्यक्त्वातिसंनिहितमेव मार्गानुसारित्वं भवतीति नियमः श्रद्धेयः । तदुक्तं पञ्चविंशिकायाम्-

बीजाइकमेण पुणो जायइ एसुत्थ भव्वसत्ताणं ।
णियमा न अन्नहा वि हु इट्ठफलो कप्परुक्खुव्व ॥ १ ॥
बीजं विमस्स णेयं दट्ठूणं एयकारिणो जीवे ।
बहुमाणसंगयाए सुद्धपसंसाइ करणिच्छा ॥ २ ॥
तीए चेवणुबंधो अकलंको अंकुरो इहं णेओ ।

बीजादिक्रमेण पुनर्जायते एषोऽत्र भव्यसत्त्वानाम् ।
नियमाद् नान्यथाऽपि खलु इष्टफलः कल्पवृक्ष इव ॥ १ ॥
बीजमप्यस्य ज्ञेयं दृष्ट्वा एतत्कारिणो जीवान् ।
बहुमानसंगतायाः शुद्धप्रशंसायाः करणेच्छा ॥ २ ॥
तस्यामेवानुबन्धोऽकलङ्कोऽङ्कुर इह ज्ञेयः ।

कट्ठं[1] पुण विण्णेयो तदुवायन्वेसणा चित्ता ॥ ३ ॥
वेसु पवत्ती य तहा चित्ता पत्ताइ सरूसिगा होइ ।
तस्संपत्ती पुप्फं गुरुसंजोगाइरूवं तु ॥ ४ ॥
तत्तो सुदेसणाईहिं होइ जो भावधम्मसंपत्ती ।
तं फलमिह विन्नेयं परमफलपसाहगं णियमा ॥ ५ ॥
बीजस्सावि संपत्ती जायइ चरमंमि चेय परिअट्टे ।
अच्चंतसुंदरा जं एसावि तओ ण सेसेसु ॥ ६ ॥
न य एअंमि अणंतो जुज्जइ णेयस्स णाम कालुत्ति ।
उस्सप्पिणी अणंता हुंति जओ एगपरिअट्टे ॥ ७ ॥
बीजाइआ य एए तहा तहा संतरेतरा णेया ।
तहभव्वत्तखित्ता एगंतसहाव बाहाए ॥ " त्ति ॥ ८ ॥

एतेन यदुच्यते केनचिद् बीजादिप्राप्तौ मार्गानुसार्यां सम्यक्त्वोपलम्भं संज्ञित्वमेव न व्यभिचरतीति[2] तदपास्तं द्रष्टव्यम् ॥ " सेण्णिं पुच्छा—गोयमा ! जहण्णेणं अंतोमुहुत्तं, उक्कोसेणं सागरोवमसतपुहुत्तं सातिरेगं । " इत्यागमवचनात्संज्ञिकालस्योत्कर्षतः सातिरेकसागरोपमशतपृथक्त्वमानत्वाद्, अपुनर्बन्धकपदस्यापुनर्बन्धकत्वेनोत्कृष्टकर्मस्थितिक्षपणार्थपर्यालोचनायामप्येतदधिकसंसारावश्यकत्वाद् बीजादिप्राप्तपूर्व्यप्येक पुद्गलपरावर्तनियतानन्तोत्सर्पिण्यवसर्पिणीरूपकालमाननिर्देशात् ।

---

१ काष्ठं पुनर्विज्ञेयस्तदुपायान्वेषणा चित्रा ॥ ३ ॥
वेषु प्रवृत्तिश्च तथा चित्रा.....
तत्संप्राप्तिः पुष्पं गुरुसंयोगादिरूपं तु ॥ ४ ॥
ततः सुदेशनादिभिर्भवति यो भावधर्मसंप्राप्तिः ।
तत्फलमिह विज्ञेयं परमफलप्रसाधकं नियमाद् ॥ ५ ॥
बीजस्यापि संप्राप्तिर्जायते चरम एव परावर्ते ।
अत्यन्तसुन्दरा यदेषाऽपि न शेषेषु ॥ ६ ॥
न चैतस्मिन् अनन्तो युज्यते नैतस्य नाम काल इति ।
उत्सर्पिण्योऽनन्ता भवन्ति यत एकपरावर्ते ॥ ७ ॥
बीजादिकाश्च ज्ञेया तथा तथा सान्तरेतरा ज्ञेया ।
तथाभव्यत्वाक्षिप्ता एकान्तस्वभावबाधया ॥ इति ॥ ८ ॥

२ संज्ञिनां प्रश्नः—भदन्त ! जघन्येनान्तर्मुहूर्तम्, उत्कर्षेण सागरोपमशतपृथक्त्वं सातिरेकम् ।

न च पञ्चमारके ज्ञानपञ्चकसद्भावाभिधानबहुशोजादिप्राप्तौ चरमपुद्गलपरावर्तकालमानाभिधानेऽपि नोत्कर्षतस्तावदन्तरं तस्य लभ्यते इति वाच्यम्, बीजादिप्राप्तौ चरमावर्तमान एव संसार इति परिपाट्याव्यापककालस्यैव लाभादधिकरणकालमानाभिप्रायेणेत्थमभिधानासंभवाद् अन्यथा सम्यक्त्वेऽप्येतावान् संसार इति वचनस्याप्यनवद्यत्वप्रसङ्गात्। किं च—

" अंचरमपरिअट्टेसुं कालो भववालकालओ भणिओ।
चरमो अ धम्मजुव्वणकालो तह चित्तभेओत्ति ॥ "

" ता बीजपुव्वकालो णेओ भववालकाल एवेह।
इयरो उ धम्मजुव्वणकालो विहिलिंगगम्मुत्ति ॥ "—

इत्येतच्चतुर्थपञ्चमविंशिकागाथाद्वयार्थविचारणया बीजकालस्य चरमावर्तमानत्वमेव सिध्यति ॥

अपि च—

" नवनीतादिकल्पस्तद्भावेऽत्र निबन्धनम् ॥
पुद्गलानां परावर्तश्चरमो न्यायसंगतः ॥ "

इति योगबिन्दुवचनाच्चरमावर्तस्य घृतादिपरिणामस्थानीये योगे अक्षणादिस्थानीयत्वसिद्धौ सत्यन्यकारणसाम्राज्येऽपार्द्धपुद्गलपरावर्तमध्ये सम्यक्त्वादिगुणानामिव चरमावर्तमध्ये बीजोचितगुणानामप्युत्पत्तिः कदाप्यविरुद्धैव, कालप्रतिबन्धाभावादिति व्यक्तमेव प्रतीयते। अत एव हि भोगाद्यर्थं यमनियमाराधनरूपां कापिलादिभिरभ्युपगतां पूर्वसेवाम्—

" अत एव हि निर्दिष्टा पूर्वसेवाऽपि या परैः।
सासन्नान्यगतावन्ये भवाभिष्वङ्गभावतः ॥ "—

---

१ अचरमपरावर्तेषु कालो भववालकालको भणितः।
चरमश्च धर्मयौवनकालस्तथा चित्रभेद इति ॥
तस्माद् बीजपूर्वकालो ज्ञेयो भववालकाल एवेह।
इतरस्तु धर्मयौवनकालो विधिलिङ्गगम्य इति ॥

इति ग्रन्थेन चरमावर्तासन्नान्यतरपरावर्तवर्तिनां हरिभद्रसूरिरभ्यर्थ्य, तात्त्विकपूर्वसेवाया अपार्द्धपुद्गलपरावर्तादिमानत्वे चासन्नतोपलक्षणाय तत्पूर्वकालनियतामेवैनामवक्ष्यद् ग्रन्थकार इति। अपि च—"मनागपि हि तन्निवृत्तौ तस्यापुनर्बन्धकत्वमेव स्याद्"—इति वचनात् मनागपि संसारासङ्गनिवृत्तौ जीवस्यापुनर्बन्धकत्वं सिध्यति, तन्निवृत्तिश्च मुक्त्यद्वेषेणापि स्यात्, तस्य च चरमपुद्गलपरावर्तव्यवधानेनापि मोक्षहेतुत्वमुक्तम्। तथा च योगबिन्दुसूत्रवृत्ती—

"नास्ति येषामयं तत्र तेऽपि धन्याः प्रकीर्तिताः।
भवबीजपरित्यागात्तथा कल्याणभागिनः॥

'न' नैव, 'अस्ति' विद्यते, 'येषां' भव्यविशेषाणाम्, 'अयं' द्वेषः, 'तत्र' मुक्तौ, 'तेऽपि' किपुनस्तत्रानुरागभाज इत्यपिशब्दार्थः, 'धन्याः' धर्मधनलग्नाः प्रकीर्तिताः। पुनरपि कीदृशाः? इत्याह—'भवबीजपरित्यागात्' मनाक् स्वगतसंसारयोग्यतापरिहाणेः सकाशात्, 'तथा' तेनप्रकारेण चरमपुद्गलपरावर्तव्यवधानादिना; 'कल्याणभागिनः' तीर्थकरादिपदप्राप्तिद्वारेण शीवधर्मभाज इति॥"

तथा च चरमपुद्गलपरावर्तवर्तिनां मुक्त्यद्वेषतदरागाक्षुद्रतादिगुणवतां गलितकदाग्रहाणां सम्यक्त्वप्राप्तिसांनिध्यव्यवधानविशेषेऽपि सर्वेषामपुनर्बन्धकादीनामविशेषेण मार्गानुसारित्वमङ्गीकर्तव्यम्।

यत्तु "पंढमकरणोवरि तहा अणहिनिविट्ठाण संगया एसा"[1]—इति वचनात्प्रथमकरणोपर्येव ग्रतत्त्वाभिनिवेशिनो भवन्तीति। 'प्रथमकरणोपरि वर्तमानानामपुनर्बन्धकादीनां शुद्धवन्दना भवति' इत्यभिधाय—

"णेो भावओ इमीए परोवि हु अवड्ढपोग्गला अहिगो।
संसारो जीवाणं हंदि पसिद्धं जिणमयंमि॥"[2]

इत्यनेन ग्रन्थेन शुद्धाध्यवसायशुद्धायां वन्दनायां सत्यामुत्कृष्टोऽप्यपार्द्धपुद्गलावर्ताधिकः संसारो जीवानां न भवतीति पञ्चाशके प्रो-

१ प्रथमकरणोपरि तथाऽनभिनिविष्टानां संगता एषा॥
२ नो भावतोऽस्याः परोऽपि खलु अपार्द्धपुद्गलावधिकः।
संसारो जीवानामेव प्रसिद्धं जिनमते॥

मतम्, तदपुनर्बन्धकस्यावस्थाभेदेन विचित्रत्वाद् विधिशुद्धजैनक्रियाऽऽराधकमपुनर्बन्धकमधिकृत्यावसेयम्; सर्वस्यापुनर्बन्धकस्य प्रागुक्तपुक्तस्यैतावत्कालमानानियमाद् भावशुद्धजैनक्रियाया एव एतावत्कालनियतत्वात्। अत एवास्मिन्नर्थे—

"कालमणंतं च सुए अद्धा परिअट्टओ अ देसूणो।
आसायणबहुलाणं उक्कोसं अंतरं होइ॥"[३]—

इति संमतितयोद्भावितं वृत्तिकृता। मोक्षार्थितया क्रियमाणा हि विधिशुद्धा जैनक्रिया उत्कर्षत एतावत्कालव्यवधानेन मोक्षं प्रापयतीति विषयविशेष एषः। भवति च भावाविशेषेऽपि विषयविशेषात्फलविशेषः, सामान्यसाधु-भगवद्दानादौ तद्दर्शनादिति श्रद्धेयम्। न चैवं तदा स्वतन्त्रान्यतन्त्रसिद्धक्रियाकार्यपुनर्बन्धकभेदो न स्यादिति भावनीयं सुधीभिः।

यदपि बीजाधानमपि ह्यपुनर्बन्धकस्य, न चास्यापि पुद्गलपरावर्तः संसार इति भगवतां सर्वसत्यनाथत्वेऽन्यतरस्माद् भगवतो बीजाधानादिसिद्धेरल्पेनैव कालेन सर्वभव्यमुक्तिः स्यादित्यत्र हेतुतयोक्तं तदपि भगवत्प्रदेयविचित्रबीजापेक्षया। अत एव पूर्वसेवादेः पृथग्गणनया बीजाधाने पुद्गलपरावर्ताभ्यन्तरसंसारभणनोपपत्तिः, अन्यथाऽल्पतरकालाक्षेपकतया, न चास्याप्यपार्द्धपुद्गलपरावर्ताधिकः संसार इत्येकोपन्यसनीयं स्यादिति सूक्ष्मधिया विभावनीयम्।

ये तु वदन्ति—"मिथ्यादृष्टीनां मार्गानुसारित्वाभ्युपगमे तेषां गुणवत्त्वावश्यंभावाद् मिथ्यात्वेऽपि गुणश्रेण्यभ्युपगम प्रसङ्गः"। न चैतदिष्टम्, सम्यक्त्वप्रतिपत्तिमारभ्यैव कर्मग्रन्थादौ गुणश्रेण्यभिधानादिति तेषामृजुबुद्धीनां हरिभद्राचार्योपदर्शिताऽन्वर्थगुणस्थानपदप्रवृत्तिरेव मिथ्यात्वेऽपि गुणसद्भावसाक्षिणी गुणश्रेणी च धर्मपृच्छादौ मिथ्यादृशामपि सम्यक्त्वोत्पत्त्याद्युपलक्षितैव द्रष्टव्या। यदाचारवृत्तिकृद्—"इह मिथ्यादृष्टयो देशोनकोटीकोटिकर्मस्थितिकाश्च ग्रन्थिकसत्त्वास्ते

३ कालमनन्तं च श्रुते अर्धपरिवर्तश्च देशोनः।
आशातनाबहुलानामुत्कृष्टमन्तरं भवति॥

कर्मनिर्जरामाश्रित्य तुल्याः, धर्मपृच्छनोत्पन्नसंज्ञास्तेभ्योऽसंख्येयगुणनिर्जरकः, ततोऽपि पिपृच्छिषुः सत्साधुजिगमिषुः, तस्मादपि क्रियाऽऽविष्टः प्रतिपद्यमानः, तस्मादपि पूर्वप्रतिपन्नोऽसंख्येयगुणनिर्जरकः इति" सम्यक्त्वोत्पत्तिव्याख्यातेति। यदि चैतद्वचनबलादेव चारित्रादाविव सम्यक्त्वेऽप्यभिमुख-प्रतिपद्यमान-प्रतिपन्नत्रयस्यैव गुणश्रेणिसद्भावात् सम्यक्त्वानभिमुख-मिथ्यादृष्टेर्न मार्गानुसारित्वमित्याग्रहस्तदा संगम-नयसारादेरपि मार्गानुसारित्वं न स्याद्। न हि भवान्तरव्यवधानेऽपि गुणश्रेण्यनुकूलमाभिमुख्यं संभवतीति सम्यक्त्वादिनियतगुणश्रेणिं विनाऽपि मिथ्यादृशामप्यल्पमोहमलानां संसारप्रतनुताकारिणी दयादानादिगुणपरिणतिर्मार्गानुसारितानिबन्धनं भवतीति प्रतिपत्तव्यम्। अत एव—

" भवाभिनन्दिदोषाणां प्रतिपक्षगुणैर्युतः।
वर्द्धमानगुणः प्रायो ह्यपुनर्बन्धको मतः॥ "

इति योगबिन्दावुक्तम्,। अपुनर्बन्धकश्च प्रथमगुणस्थानावस्थाविशेष इति तत्र सर्वथा गुणप्रतिक्षेपवचनं निर्गुणानामेवेति मन्तव्यम्॥ १७॥

तदेवं मार्गानुसारिभावस्य कालमानमुक्तम्, अथानेन सदाचारक्रियारूपेण ज्ञानदर्शनयोगायोगाभ्यां यथा चतुर्भङ्गी निष्पद्यते तथाऽऽह

एअम्मि नाणदंसणजोगाजोगेहिं देससव्वकओ।
चउभंगो आराहगविराहगत्तेसु सुअसिद्धो॥१८॥

एअम्मीति। एतस्मिन्— मार्गानुसारिभावे सदाचारक्रियारूपे ज्ञानदर्शनयोगायोगाभ्यामाराधकत्वविराधकत्वयोर्देशसर्वकृतश्चतुर्भङ्गसमाहारः श्रुतसिद्धः। तथाहि— १ मार्गानुसारिक्रियावान् ज्ञानदर्शनहीनश्च देशाराधक इति प्रथमो भङ्गः। २ ज्ञानदर्शनसंपन्नः क्रियाहीनश्च देशविराधक इति द्वितीयः। ३ ज्ञानदर्शनसंपन्नः क्रियासंपन्नश्च

एतस्मिन् ज्ञानदर्शनयोगायोगाभ्यां देशसर्वकृतः।
चतुर्भङ्गमाराधकविराधकत्वयोः श्रुतसिद्धः॥ १८॥

सर्वाराधक इति तृतीयः । ४ ज्ञानदर्शनसंपन्नः क्रियाहीनश्च सर्वविराधक इति चतुर्थः । तथा च भगवतीसूत्रम्—

" एवं खलु मए चत्तारि पुरिसजाया पण्णत्ता । तं जहा– १ सीलसंपन्नो णामं एगे णो सुअसंपन्ने । २ सुअसंपन्ने णामं एगे णो सीलसंपन्ने । ३ एगे सीलसंपन्नेवि सुअसंपन्नेवि । ४ एगे णो सुअसंपन्ने णो सीलसंपन्ने ॥ तत्थ णं जे से पढमे पुरिसजाए से णं पुरिसे सीलवं असुअवं, उवरए अविण्णायधम्मे । एस णं गोअमा ! मए पुरिसे देसाराहए पण्णत्ते । तत्थ णं जे से दुच्चे पुरिसजाए से णं पुरिसे असीलवं सुअवं, अणुवरए विण्णायधम्मे । एस णं गोअमा ! मए पुरिसे देसविराहए पण्णत्ते । तत्थ णं जे से तच्चे पुरिसजाए से णं पुरिसे सीलवं सुअवं, उवरए विण्णायधम्मे । एस णं गोअमा ! मए पुरिसे सव्वाराहए पण्णत्ते । तत्थ णं जे से चउत्थे पुरिसजाए से णं पुरिसे असीलवं असुअवं, अणुवरए अविण्णायधम्मे । एस णं गोअमा मए पुरिसे सव्वविराहए पण्णत्तेत्ति " ॥

एतद्वृत्तिर्यथा—एवमित्यादि । एवं वक्ष्यमाणन्यायेन, 'पुरिसजाए'त्ति पुरुषप्रकारः । 'सीलवं असुवं'ति, कोऽर्थः–' उवरए अविण्णायधम्मे'त्ति उपरतो निवृत्तः स्वबुद्ध्या पापात्, अविज्ञातधर्मा भावतोऽनधिगतश्रुतज्ञानो बालतपस्वीत्यर्थः, गीतार्थानिश्रिततपश्चरणरतोऽगीतार्थ इत्यन्ये । ' देसाराहए'त्ति स्तोकमंशं मोक्षमार्गस्याराधयतीत्यर्थः, सम्यग्बोधरहितत्वात् क्रियापरत्वाच्चेति । ' असीलवं असुअवं'ति कोऽर्थः—' अणुवरए विण्णायधम्मे'त्ति पापादनिवृत्तो विज्ञातधर्मा चाविरतिसम्यग्दृष्टिरिति भावः । 'देसविराहए'त्ति स्तोकमंशं ज्ञानादित्रयरूपस्य मोक्षमार्गस्य तृतीयभागरूपं चारित्रं विराधयतीत्यर्थः, प्राप्तस्य तस्यापालनाद्

---

१ एवं खलु मया चत्वारः पुरुषजाताः प्रज्ञप्ताः । तद् यथा— १ शीलसंपन्नो नाम एको नो श्रुतसंपन्नः । २ श्रुतसंपन्नो नाम एको नो शीलसंपन्नः । ३ एकः शीलसंपन्नोऽपि श्रुतसंपन्नोऽपि । ४ एको नो श्रुतसंपन्नो नो शीलसंपन्नः । तत्र च यः स प्रथमः पुरुषजातः स पुरुषः शीलवान् अश्रुतवान्, उपरतोऽविज्ञातधर्मा । एष गौतम ! मया पुरुषो देशाराधकः प्रज्ञप्तः । तत्र यः स द्वितीयः पुरुषजातः स पुरुषः अशीलवान् श्रुतवान्, अपुनरतो विज्ञातधर्मा । एष गौतम ! मया पुरुषो देशविराधकः प्रज्ञप्तः । तत्र यः स तृतीयः पुरुषजातः स खलु पुरुषः शीलवान् श्रुतवान्, उपरतो विज्ञातधर्मा । एष खलु गौतम ! मया पुरुषः सर्वाराधकः प्रज्ञप्तः । तत्र खलु यः स चतुर्थपुरुषजातः स खलु पुरुषोऽशीलवान् अश्रुतवान्, अनुपरतोऽविज्ञातधर्मा । एष खलु गौतम ! मया पुरुषः सर्वविराधकः प्रज्ञप्त इति ॥

अप्पणेवो । ' सव्वाराहए त्ति सर्वं त्रिप्रकारमपि मोक्षमार्गमाराधयतीत्यर्थः, श्रुतशब्देन ज्ञानदर्शनयोः संगृहीतत्वात्, न हि मिथ्यादृष्टिर्विज्ञातधर्मा तत्त्वतो भवति । एतेन समुदितयोः शीलश्रुतयोः श्रेयस्त्वमुक्तमिति " ॥ १८ ॥

अत्र प्रथमभङ्गस्वामिनं भगवतीवृत्त्यनुसारेणैव स्वयं विवृण्वन्नन्यमतं दूषयितुमुपन्यस्यति—

पढमो बालतवस्सी गीयत्थाणिस्सिओ व अग्गीओ।
अण्णे भणंति लिंगी समग्गमुणिमग्गकिरियधरो ॥ १९ ॥

पढमोत्ति । प्रथमः प्रथमभङ्गस्वामी ज्ञानदर्शनरहितः क्रियापरश्च देशाराधकत्वेनाधिकृतो बालतपस्वी परतन्त्रोक्तमुमुक्षुजनोचिताचारवान् वृत्तिकृन्मते । गीतार्थानिश्रितोऽगीतः—पदैकदेशे पदसमुदायोपचारादगीतार्थो वाऽन्येषामाचार्याणां मते । अस्मिंश्च सांप्रदायिकमतद्वये नातिभेद इत्यग्रे दर्शयिष्यते । अन्ये—संप्रदायबाह्या भणन्ति—लिङ्गी—केवललिङ्गभृत् समग्रमुनिमार्गक्रियाधरो मिथ्यादृष्टिरेव सन् कुतश्चिन्निमित्तादधीतजिनोक्तसाधुसामाचारीपरिपालनपरायणो देशाराधकः प्रथमभङ्गस्वामीति । अयमेतेषामाशयः—शाक्यादिमार्गस्थः शीलवानपि न देशाराधकः, प्रतिपन्नयदनुष्ठानाकरणेन जिनाज्ञाया विराधकत्वात्, तदनुष्ठानकरणेनैव जिनाज्ञाया आराधकत्वमिति नियमात् शाक्यादिमार्गानुष्ठानस्य चानीदृशत्वात् तदङ्गीकृत्यापि तत्करणाकरणाभ्यां जिनाज्ञाराधनविराधनयोरभावाद्, अन्यथा तन्मार्गानुष्ठानत्याजनेन जैनमार्गानुष्ठानव्यवस्थापनाऽयुक्तत्वप्रसङ्गात् । किं च—मिथ्यादृष्टीनां ज्ञानस्याप्यज्ञानत्वेनैव तन्मार्गपतितशीलस्याप्यशीलत्वेन प्रज्ञप्तत्वाद्न्यमार्गस्थानां शीलवत्त्वमेव नेति कुतस्तेषां देशाराधकत्वम् ? । अन्यभिक्षवो हि जीवाद्यास्तिक्यरहिताः सर्वथाऽचारित्रिण एवेति । " सन्ति एगेहिं भिक्खुहिं गारत्था संजमुत्तरा० " इत्यादि बहुग्रन्थप्रसिद्धम्, अन्यथाऽन्यतीर्थिकाभिमतदेवादयोऽपि देवत्वादिनाभ्युप-

प्रथमो बालतपस्वी गीतार्थानिश्रितो वाऽगीतः ।
अन्ये भणन्ति लिङ्गी समग्रमुनिमार्गक्रियाधरः ॥ १९ ॥

१ सन्ति एके भिक्षवो गौरवार्थाः संयमोत्तराः० ॥

गन्तव्याः प्रसज्येरन्, मोक्षमार्गभूतशीलस्योपदिष्टत्वात्। तस्माद् भव्या अभव्याश्च निखिलजैनसामाचार्यनुष्ठानयुक्ता मिथ्यादृष्टय एव देशाराधका ग्राह्याः, तेषां द्रव्यशीलस्यापि मार्गपतितत्वेन व्यवहारनयापेक्षया प्रशस्तत्वाद्। अत एवाराधकानां सतामेतेषां नवमग्रैवेयकं यावदुपपातो न विरुद्धः, अखण्डसामाचारीपरिपालनबलेन तत्रोत्पादात्। यदागमः—" अह[1] भंते असंजयभविअदव्वदेवाणं....यावत्—जहण्णेणं भवणवासीसु उक्कोसेण उवरिमगेविज्जएसुं "त्ति भ० श० २३२ वृत्त्येकदेशो यथा—" तस्मान्मिथ्यादृष्टय एव भव्या अभव्याश्चासंयतभव्यद्रव्यदेवाः श्रमणगुणधारिणो निखिलसामाचार्यनुष्ठाने युक्ता द्रव्यलिङ्गधारिणो गृह्यन्ते। ते ह्यखिलसामाचारीप्रभावत एवोपरितनग्रैवेयकेषूत्पद्यन्ते, असंयताश्च सत्यप्यनुष्ठाने चारित्रपरिणामशून्यत्वादिति "। इत्थं चैतदङ्गीकर्तव्यम्—जिनोक्तमनुष्ठानमन्तरेणाराधकत्वाभावाद् मिथ्यादृष्टित्वमन्तरेण बालतपस्वित्वाभावाच्चेति ॥१९॥

एतन्मतं दूषयति—

तं मिच्छा, जं फलओ मुक्खं आराहगत्तमिह पगयं।
तं च ण एगंतेणं किरियाए भावसुन्नाए ॥२०॥

तंमिच्छत्ति। तत्संप्रदायबाह्योक्तं मतं मिथ्या, यद् यस्मादिह प्रकृतचतुर्भङ्गीप्रतिपादकभगवत्सूत्रे मुख्यं मोक्षानुकूलमाराधकत्वं प्रकृतम्, ज्ञान-क्रियाऽन्यतरमोक्षकारणवादिनामन्यतीर्थिकानां मतनिरासार्थं तत्समुच्चयवादे विशदीकरणायैतत्सूत्रप्रवृत्तेः। प्रत्येकं ज्ञानक्रिययोः स्वल्पसामर्थ्यस्य समुदितयोश्च तयोः सम्पूर्णसामर्थ्यस्य प्रदर्शनार्थं देशाराधकादिचतुर्भङ्ग्युपन्यासस्य सार्थक्यात्, प्रत्येकं स्वल्पसामर्थ्यस्याभावे च सिकतासमुदायात्तैलस्येव तत्समुदायादपि मोक्षस्यानुपपत्तेः। तदिदमाहाक्षेपसमाधानपूर्वं भाष्यकारः—

---

१ अथ भगवन्! असंयतभव्यद्रव्यदेवानां यावत् जघन्येन भवनवासिषु, उत्कृष्टेनोपरितनग्रैवेयकेषु इति ॥

तन्मिथ्या, यत्फलतो मुख्यमाराधकत्वमिह प्रकृतम्।
तच्च नैकान्तेन क्रियया भावशून्यया ॥ २० ॥

"पत्तेयमभावाओ णिव्वाणं समुदियासु ण जुत्तं ॥
नाणक्रियासु वोत्तुं सिकतासमुदाये तेलं व ॥
वीसुं ण सव्वह चिय सिकतातेलं व साहणाभावो ।
देसोवगारिया जा समवायंमि संपुण्णा ॥"

अग्रिमगाथार्थो यथा—न च विष्वक् पृथक् सर्वथैव सिकताकणानां तैल इव साध्ये ज्ञानक्रिययोर्मोक्षं प्रति साधनत्वाभावः, किन्तु या च यावती च तयोर्मोक्षं प्रति देशोपकारिता प्रत्येकावस्थायामप्यस्ति सा च समुदाये संपूर्णा भवत्येतावान् विशेषः, अतः संयोग एव ज्ञानक्रिययोः कार्यसिद्धिरिति ॥

तच्च मुख्यमाराधकत्वमसंयतभव्यद्रव्यदेवानामेकान्तेन भावशून्यया क्रियया न संभवतीति । यदि च देशाराधकत्वमभ्युदयापेक्षया व्याख्येयं तदा सर्वाराधकत्वमप्यभ्युदयापेक्षयैव पर्यवस्येदिति न काचित्प्रयोजनसिद्धिः, प्रत्युत प्रत्येकपक्षविशेषसंघटनानुपपत्तिः । किं च—'शीलवान् श्रुतवान् देशाराधकः' इत्यत्र योग्यताबलादपि मार्गानुसारी बालतपस्व्येव गृहीतुं शक्यते नान्यः, तद्गतभावशून्यक्रियायाः समुदायादेशत्वादपुनर्बन्धकादिक्रियायामेव मोक्षसमुचितशक्तिसमर्थनाद्, अनुपचितशक्तिकोपादानकारणस्यैव देशत्वेन शास्त्रे व्यवहाराद्, अत एव मृद्द्रव्यमेव घटदेशो न तु तन्त्वादिर्दण्डादिर्वा । मोक्षोपादानत्वं च क्रियायां योगरूपायामुपयोगरूपायां वेत्यन्यदेतत् ॥ २० ॥

असुख्याराधकत्वाङ्गीकारेऽपि दोषान्तरमाह—

जइणीए किरियाए दव्वेणाराहगत्तपक्खे य ।
सव्वाराहगभावो होज्ज अभव्वाइलिङ्गीणं ॥ २१ ॥

प्रत्येकमभावाद् निर्वाणं समुदितयोर्न युक्तम् ।
ज्ञानक्रिययोर्वक्तुं सिकतासमुदाये तैलमिव ॥
विष्वग् न सर्वथैव सिकतातैलमिव साधनाभावः ।
देशोपकारिता या समवाये संपूर्णा ॥

जैन्या क्रियया द्रव्येणाराधकत्वपक्षे च ।
सर्वाराधकभावो भवेद् अभव्यादिद्रव्यलिङ्गिनाम् ॥ २१ ॥

जइणीए'त्ति । जैन्या क्रियया निखिलसाधुसामाचार्यनुष्ठानरूपया द्रव्येणाराधकत्वपक्षे च देशाराधकत्वाभ्युपगमे चाभव्यादिलिङ्गिनामभव्यादीनां द्रव्यलिङ्गधारिणां सर्वाराधकभावो भवेत्, कुतोऽपि प्रयोजनात्तेषां निखिलसाधुसामाचारीग्रहणे तस्याः पञ्चाररूपत्वाद्, द्रव्यतश्चारित्रस्येव द्रव्यतो ज्ञानदर्शनयोरप्याराधकत्वस्य तेषां बलादुपनिपातात्। न हि ते सम्यक्त्वांशेऽनाराधका एव चारित्रांशे त्वाराधका इत्यर्धजरतीयन्यायाश्रयणं प्रेक्षावतां घटते। सम्यक्त्वांशे भावतः सम्यक्त्वाभावेनोत्सूत्रभाषण-व्रतभङ्गाद्यभावेन चाराधकविराधकत्वभावाभावादनाराधकत्वस्येव चारित्रांशेऽपि भावतश्चारित्राभावेन प्राणातिपातादिव्रतभङ्गाद्यभावेन चाराधकविराधकस्वभावाभावादनाराधकत्वस्याविशेषाद् द्रव्यतश्चोभयाराधकत्वाविशेषादिति। यत्तु तेषां द्रव्यतोऽपि स्वेच्छाविशेषाद् व्रतांशस्यैव ग्रहणं न तु श्रद्धानांश इति परस्य मतम्, तदुन्मत्तप्रलपितम्, अखण्डसामाचारीपालनबलेनैव तेषां ग्रैवेयकोत्पादाभिधानादिति ॥ २१ ॥

दोषान्तरमप्याह—

तह णिण्हवाण देसाराहगभावो अवट्ठिओ हुज्जा ।
तो परिभासा जुत्ता वित्तिं परिगिज्झ वुत्तुं जे ॥२२॥

'तह'त्ति । तथेति दोषान्तरसमुच्चये। एकान्तद्रव्यक्रिययैवाराधकत्वाभ्युपगमे निह्नवानामभिनिवेशादिना परित्यक्तरत्नत्रयाणां सर्वविराधकत्वकालेऽपि देशाराधकत्वाभावो भवेद् । यथा प्रतिज्ञातद्रव्यक्रियया अपरित्यक्तत्वादिष्टापत्तौ को दोषः? इति चेद्, व्यवहारविरोध एव, न हि सर्वविराधको देशाराधकश्च कोऽपि व्यवह्रियते। अथ द्रव्यक्रियामाश्रित्यैवाराधकत्व-विराधकत्वव्यवस्थाकरणात्सर्वविराधकत्वं निह्नवानां नेष्यत एव, प्रतिपन्नचारित्रविषयकद्रव्याज्ञाभङ्गाभावाद्देशाराधकत्वम्, उत्सूत्रभाषणेन सम्यक्त्वविषयकप्रतिपन्नजिनाज्ञापरित्या-

---

तथा निह्नवानां देशाराधकभावोऽवस्थितो भवेत् ।
ततः परिभाषा युक्ता वृत्तिं परिगृह्य वक्तुं हि ॥ २२ ॥

गादेशविराधकत्वं चाविरुद्धमेव, अंशभेदादेकत्रैव सप्रतिपक्षोभयधर्मसमावेशाविरोधादिति चेद् । न, एवं सत्यसंयतभव्यद्रव्यदेवानां निह्नवानामभव्यादीनां चोपपत्तिमधिकृत्य साम्याभावप्रसङ्गात् । अथ नास्त्येव तेषामुपपातसाम्यम्, ग्रैवेयकेष्वपि निह्नवस्य देवदुर्गतितयोत्पादाद् । देवदुर्गतत्वं च न केवलं देवकिल्बिषिकत्वादेनैव, तत्र तेषामभावाद्, किन्तु संमोहत्वेन । स च देवदुर्गतस्ततश्च्युतोऽनन्तकालं संसारे परिभ्रमति । यदागमः—

" कंदप्पदेवकिल्बिसअभिओगा आसुरी य संमोहा ।
तो देवदुग्गईओ मरणंमि विराहिआ हुंति ॥ "त्ति ।

आतुरप्रत्याख्यानप्रकीर्णके व्याख्यादेशो यथा—" संमोह'त्ति संमोहयन्ति-उन्मार्गदेशनादिना मोक्षमार्गाद् भ्रंशयन्ति ये ते संमोहाः, संयता अप्येवंविधा देवत्वेनोत्पन्ना संमोहा एवं रूपा दुर्गतिः, ता एव देवदुर्गतयो मरणाऽप्यध्यानादिना विराधिता भवन्ति, ततश्च्युता अनन्तसंसारं परिभ्रमन्तीति चेद् । न, अभव्यादीनामप्यकालवचनौषधप्रयोगात् प्राप्तग्रैवेयकोत्पादानां संमोहप्राबल्येन लुप्तसुखानां देवदुर्गतत्वाविशेषाद् । उक्तं चोपदेशपदे—

" कह णु अकालपओगे इत्तो गेविज्जगाइ सुहसिद्धी ।
णणु साहिगओसहजोगसोक्खतुल्ला मुणेयव्वा ॥ १ ॥
कुणइ इह संणिताए सदोसहजोगसुक्खमित्तं तु ।
तह एयं विण्णेयं अणोरपारंमि संसारे ॥ २ ॥
ण य तत्तओ तयंपि हु सुक्खं मिच्छत्तमोहिअमइस्स ।
जह रोद्दवाहिगहिअस्स ओसहदेवे य तब्भावे ॥ ३ ॥

---

१ कन्दर्पदेव-किल्विषाभियोगा आसुरी च संमोहाः ।
ता देवदुर्गतयो मरणे विराधिता भवन्ति ॥
कथं न्वकालप्रयोगे इतो ग्रैवेयकादिसुखसिद्धिः ।
ननु साधिकौषधयोगसौख्यतुल्या ज्ञातव्या ॥ १ ॥
करोतीह संज्ञितया सदोषधयोगसौख्यमात्रं तु ।
तथैतद् विज्ञेयं अनवारपारे संसारे ॥ २ ॥
न च तत्त्वतस्तदपि खलु सौख्यं मिथ्यात्वमोहितमतेः ॥
यथा रौद्रव्याधिगृहीतस्य.....

जह चेवोवहयनयणो सम्मं रूवं ण पासइ पुरिसो ।
तह चेव मिच्छदिट्ठी विउलं सुक्खं ण पावेइ ॥ ४ ॥
असदभिणिवेसवसो णिओगओ ताण तत्तओ भोगो ।
सव्वत्थ तदुवघायावि सघारियजोगतुल्लोत्ति ॥ ५ ॥

एतस्माद्धि वचनादभव्यादीनामेव निह्नवाद्यपेक्षयाऽप्यकालवचनौषधप्रयोगेण मिथ्याभिनिवेशदार्ढ्यादतिदुःखितत्वेन क्लिष्टतरदेवदुर्गतत्वं प्रतीयते, परेण त्वभव्यनिह्नवानामनाराधकत्वविराधकत्वाभ्यां वैपरीत्यमङ्गीकृतं प्रसज्यते च तत्प्रक्रियया द्रव्याज्ञापेक्षयाऽभव्यादीनामपि सर्वाराधकत्वात् तात्त्विकसुदेवत्वमेवेति यत्किंचिदेतत् ।

अथ चारित्रापेक्षयाऽऽराधकत्वं द्रव्यप्रतिपत्त्यैव परिभाष्यते, ज्ञानदर्शनापेक्षया तु भावप्रतिपत्त्या ततोऽभव्यादीनां द्रव्यलिङ्गिनां देशाराधकत्वमेव । निह्नवानां च देशाराधकत्वं देशविराधकत्वं च ततो देशाराधकत्वापेक्षयोभयोपपातसाम्यं दुर्गतित्वनिबन्धनं चैकस्य साहजिकं मिथ्यात्वम्, अपरस्य च विराधनाजन्यमिति परिभाषायां को दोषः ? इति चेद्, नन्वेवं परिभाषाश्रयणावश्यकत्वे वृत्तिकृत्स्वारस्येनैव साऽऽश्रयणी या इत्यभिप्रायवानाह–तत् तस्मादवृत्तिं परिगृह्य परिभाषा वक्तुं युक्ता । 'जे' इति पादपूरणार्थो निपातः । वृत्तौ हि श्रुतशब्देन ज्ञानदर्शनयोः शीलशब्देन च प्राणातिपातादिक्रियाया एव परिभाषणाद् । अश्रुतवान् शीलवांश्च मार्गानुसार्येव बालतपस्वी पर्यवस्यतीति भावः । नहि द्रव्यलिङ्गधरोऽभव्यादिर्व्यवहारेण बालतपस्वी वक्तुं युज्यते । " तं एते बालतवस्सिणो दट्ठव्वेत्ति " महानिशीथे नागिलवचनं कुशीलेषु बालनिश्रयाभिप्रायकमेवेति । न चैकस्मिन्नेव वाक्ये देशाराधकत्वमशुद्धव्यवहारात्, तदुपपादकं बालतपस्वित्वं च निश्रयादिति वक्तुं युक्तम्, संदर्भविरोधात्, किन्तु निश्रयप्रायका-

---

यथवोपहतनयनो सम्यग् रूपं न पश्यति पुरुषः ।
तथेव मिथ्यादृष्टिर्विपुलं सौख्यं न प्राप्नोति ॥ ४ ॥
असदभिनिवेशवशो नियोगतस्तेषां तत्त्वतो भोगः ।
सर्वत्र तदुपघातादपि.....योगतुल्य इति ॥ ५ ॥

१ तत एते बालतपस्विनो द्रष्टव्या इति ।

द्रव्यव्यवहारादेशाराधकत्वं तदुपपादकं च मार्गानुसारियमनियमादिक्रियावत्त्वं बालतपस्वित्वमित्येवं संदर्भाविरोधः । न च व्यवहारे निश्चये प्रायकत्वाप्रायकत्वाभ्यां विशेषः शास्त्रासिद्ध इति व्यामूढधिया शङ्कनीयम्, योगबिन्दूपदेशपदादावेतद्विशेषप्रसिद्धेः । नन्वस्यामपि परिभाषायां कथं बालतपस्विनो देशाराधकत्वम्, तद्गतमार्गानुसारिक्रियाया अपि मोक्षमार्गत्वाभावात्, तदंशचारित्रक्रियाया एवांशत्वादिति चेद् । न, संग्रहनयादेशादनुयोगद्वारसिद्धप्रदेशदृष्टान्तेन स्वदेशदेशस्यापि स्वदेशत्वाविरोधादिति सूक्ष्ममीक्षणीयम् ॥ २२ ॥

नन्वन्यमार्गस्थशीलादिक्रियाया अपि जैनमार्गानुष्ठानत्वाभावात्कथं तया देशाराधकत्वम् ? इत्यत्राह—

मग्गाणुसारिकिरिया जइणिच्चिय भावओ उ सव्वत्थ।
जेणं जिणोवएसो चित्तो अपमायसारोवि ॥ २३ ॥

'मग्गाणुसारिकिरिय'त्ति । मार्गानुसारिणी क्रिया शीलदयादानादिरूपा सर्वत्र भावतस्तु जैन्येव, आदितो भगवत्प्रणीताया एव तस्याः सर्वत्रोपनिबन्धात्, मार्गानुसारिणां च तन्मात्र एव तात्पर्यात्। ते हि क्षीरनीरविवेककृतो हंसा इव निसर्गत एव शुद्धाशुद्धक्रियाविशेषग्राहिण इति कथमियं जनो ? इत्यत्र हेतुमाह—यद्—यस्माद् अप्रमादसारोऽपि-परमोपेयाप्रमादमुख्यो देशोऽपि जिनोपदेशः चित्रः—पुरुषविशेषापेक्षयोचितगुणाधायकतया नानाप्रकारो यो यत्प्रमाणोपदेशयोग्यस्तस्य तावत्प्रमाणगुणाधानपर्यवसन्न इति यावत्। तदुक्तमुपदेशपदे

एवं जिणोवएसो उचियावेक्खाइ चित्तरूवोत्ति ।
अपमायसारया ए वि तो सविसओ मुणेयव्वो ॥ १ ॥

मार्गानुसारिक्रिया जैन्येव भावतस्तु सर्वत्र ।
येन जिनोपदेशश्चित्रोऽप्रमादसारोऽपि ॥ २३ ॥

---

१ एवं जिनोपदेश उचितापेक्षया चित्ररूप इति ।
अप्रमादसारतायामपि ततः स्वविषयो ज्ञातव्यः ॥

एतद्वृत्तिर्यथा—एवं गुरुकर्मणो प्रव्रज्याप्रतिपत्त्यसहिष्णुत्वे सति जिनोपदेशः—सर्वज्ञप्रज्ञापनारूप उचितापेक्षया यो यत्प्रामाण्यस्योपदेशस्य योग्यस्तदपेक्षया चित्ररूपो नानारूपतया प्रवर्तते इति प्राग्वत्। अप्रमादसारतायामपि अप्रमादः सारः करणीयतया यत्र जिनोपदेशे स तथा तस्य भावस्तत्ता, तस्यामपि तत् तस्मात् सविषयः सगोचरो 'मुणेयव्वो'त्ति मुणितव्यः।"

यदा हि जिनोपदेशश्चित्ररूपतया व्यवस्थितोऽप्रमादसारोऽपि तदाऽपुनर्बन्धकादौ निर्वाणमार्गप्रज्ञापनायोग्यानधिकृत्य केचित्सामान्यदेशनायाः, केचित्सम्यग्दृष्टिगुणयोग्यप्रज्ञापनायाः, केचिद्देशविरतिगुणस्थानार्हप्ररूपणायाः, केचिन्निर्दूतचारित्रमोहमालिन्या अप्रमत्ततारूपप्रव्रज्यादेशनाया योग्या इति नाऽविषयाऽप्रमत्ततायाप्रज्ञापनेति। ततश्च मार्गानुसारिक्रियाऽपि भगवत्सामान्यदेशनार्थ इति भावतो जैन्येवेति प्रतिपत्तव्यम् ॥ २३ ॥

नन्वेवं भागवतीं सामान्यदेशनामनुसृत्य प्रवर्तमानानां मिथ्यादृशामपि सा मार्गानुसारिणी क्रिया सिद्ध्यनुदयादानादिका जैनी, पतञ्जल्याद्युक्तमनुसृत्य प्रवर्तमानानां तु सा कथं जैनी? जिनदेशनाऽनुसंधानमूलप्रवृत्त्यनुपहितत्वादित्याशङ्क्यायामाह—

अण्णत्थावि जमभिण्णं अत्थपयं तं जिणिंदसुअमूलं।
अण्णोवि तयणुसारी तो देसाराहगो जुत्तो ॥ २४ ॥

'अण्णत्थवि'त्ति। अन्यत्रापि पातञ्जलादिशास्त्रेऽपि यदभिन्नं पुरुषार्थोपयोगिवचनम् अभिन्नं-भगवद्वचनैकार्थं तज्जिनेन्द्रश्रुतमूलम्, तदनुसारेणैव तत्र तदुपनिबन्धात्। तथा च ततोऽपि जायमाना मार्गानुसारिणी क्रिया वस्तुतो भगवद्देशनाविषयत्वेन भावतो जैन्येव। न हि मध्यस्थस्यान्योक्ततत्त्वज्ञानं तत्फलप्रतिबन्धकम्, दृष्टिरागसहकृतस्यैव तस्य तथात्वात्। अत एव नाभिन्नार्थेऽन्योक्ततत्त्वमात्रेण सर्वनय-

---

अन्यत्रापि यदभिन्नमर्थपदं तज्जिनेन्द्रश्रुतमूलम्।
अन्योऽपि तदनुसारी ततो देशाराधको युक्तः ॥ २४ ॥

वादसंग्रहहेतुचिन्ताज्ञानापादने माध्यस्थगुणानां साधुश्रावकाणां प्रकर्षः, तत्प्रद्वेषस्य तन्मूलदृष्टिवादप्रद्वेषमूलत्वेन महापापत्वात्। तदुक्तमुपदेशपदसूत्रवृत्त्योः—

"[1]जं अत्थओ अभिन्नं अण्णत्था सद्दओवि तह चेव।
तंमि पओसो मोहा विसेसओ जिणमयठिआणं॥"

यद्वाऽन्यथार्थतो वचनभेदेऽप्यर्थमपेक्ष्याभिन्नमेकाभिप्रायम्, तथा अन्वर्थाद् अनुगतार्थाच्छब्दतोऽपि शब्दसंदर्भमपेक्ष्य तथैव-अभिन्नमेव। इह परसमये द्विधा वाक्यान्युपलभ्यन्ते। कानिचिदर्थत एवाभिन्नानि—

"अप्पा णई वेयरणी अप्पा मे कुडसामली।
अप्पा कामदुहा धेणू अप्पा मे नंदणं वनं॥"—

इत्यादिभिर्वाक्यैर्यथा भारतोक्तानि—

"इन्द्रियाण्येव तत्सर्वं यत्स्वर्गनरकावुभौ।
निगृहीतविशिष्टानि स्वर्गाय नरकाय च॥
आपदां प्रथितः पन्था इन्द्रियाणामसंयमः।
तज्जयः संपदामग्र्य येनेष्टं तेन गम्यताम्॥" इत्यादीनि।

कानिचिच्छब्दतोऽर्थतश्च—"जीवदया सच्चवयणं"—इत्यादिभिः प्रसिद्धैरेव वाक्यैः सह यथा—

"पञ्चैतानि पवित्राणि सर्वेषां धर्मचारिणाम्[2]।
अहिंसा सत्यमस्तेयं त्यागो मैथुनवर्जनम्॥" इत्यादीनि।

एवं स्थिते तस्मिन्नभिन्नार्थेऽकरणनियमादौ वाक्ये विशिष्टक्षयोपशमादिवाक्येन सह प्रद्वेषः—'परसमयप्रज्ञापनेयम्' इतीर्ष्या मोहो मूढभावलक्षणो वर्तते बौद्धादिसामान्यधार्मिकजनस्यापि विशेषतो जिनमतस्थितानां सर्वनयवादसंग्रहान्मध्यस्थभावानीतहृदयानां साधुश्रावकाणाम्"। अत एवान्यत्राप्यनेनोक्तम्—

---

१ यदर्थतोऽभिन्नमन्यथार्थाच्छब्दतोऽपि तथा चैव।
तस्मिन्प्रद्वेषो मोहात् विशेषतो जिनमतस्थितानाम्॥

२ आत्मा नदी वैतरणी आत्मा मे कूटशाल्मली।
आत्मा कामदुघा धेनुरात्मा मे नन्दनं वनम्॥

३ जीवदया सत्यवचनम्॥

" गुणतस्तत्त्वे तुल्ये संज्ञाभेदागमान्यथादृष्टिः ।
भवति यतोऽसावधमो दोषः खलु दृष्टिसंमोहः ॥ " इति

एतत्सर्वं समर्थयन्नाह—

" सव्वप्पवायमूलं दुवालसंगं जओ समक्खायं ।
रयणागरतुलं खलु तो सव्वं सुंदरं तंमि ॥ "[१]

सर्वप्रवादमूलं—भिक्षु-कणभक्षाक्षपादादितीर्थान्तरीयदर्शनप्रज्ञापनानामादिकारणम् । किं तद् ? इत्याह–द्वादशाङ्गं–द्वादशानामाचारादीनामङ्गानां प्रवचनपुरुषावयवभूतानां समाहारो यतः कारणात्समाख्यातं सम्यक् प्रज्ञप्तम् । सिद्धसेनदीवाकरादिभिर्यतः पठ्यते—

" उदधाविव सर्वसिन्धवः समुदीर्णास्त्वयि नाथ ! दृष्टयः ।
न च तासु भवान् प्रदृश्यते प्रविभक्तासु सरित्स्विवोदधिः ॥ "

अत एव रत्नाकरतुल्यं-क्षीरोदधिप्रभृतिजलनिधिनिभम्, खलु निश्चये, ततस्मात् सर्वमपरिशेषसुन्दरं यत्किंचित्प्रवादान्तरेषु समुपलभ्यते तत्तत्र समवतारणीयम् ।

इत्यकरणनियमादीन्यपि वाक्यानि तेषु तेषु योगशास्त्रेषु व्यासकपिलातीतपतञ्जल्यादीनि प्रणीतानि जिनवचनमहोदधिमध्यलब्धोदयान्येव द्रष्टव्यानीति । तेषामवज्ञाकरणे सकलदुःखमूलभूताया भगवदवज्ञायाः प्रसङ्गात् न काचित्कल्याणसिद्धिरिति ।

यत्तु कश्चिदाह–" जैनानामकरणनियमपरिहारशङ्कानिरासार्थमेव तीर्थान्तरीयवर्णितत्वमुपवर्णितं नत्वन्यतीर्थिकेष्वकरणनियमोऽस्तीति भणितम् । वर्णनं च वर्णनीयवस्तुविषयकयथार्थज्ञानसापेक्षमेव, अन्यथा च तथाभूतवर्णनं सम्यगेव स्यात्, तथा च तद्दर्शनेऽपि धर्मसद्भावप्रसङ्गः । इत्थं च कपिलस्य पुरस्तान्मनागिहापि धर्मोऽस्तीति परिव्राजकदर्शनमधिकृत्य मरीचिवचनमुत्सूत्रं न स्यादिति । तदसत्, तीर्थान्तरीयाणा-

---

१ सर्वप्रवादमूलं द्वादशाङ्गं यतः समाख्यातम् ।
रत्नाकरतुल्यं खलु ततः सर्वं सुन्दरं तस्मिन् ॥

मपि सद्भूताकरणनियमवर्णनस्य शुभभावविशेषसापेक्षत्वेन मार्गानुसारितया तेषु सामान्यधर्मसिद्धेः । शुभभावविशेषसापेक्षत्वं च तस्य

" इत्तो अकरणनियमो अण्णेहिवि वण्णिओ[1] ससत्थंमि ।
सुहभावविसेसाओ ण चेवमेसो ण जुत्तोत्ति ॥ " इति

उपदेशपदवचनेनैव प्रसिद्धम् । न चैवंविधस्तेषां शुभाध्यवसायस्तथाभूतमोहनीयक्षयोपशमजनितत्वेन स्वयमेवोक्तो निरनुबन्धशुभप्रकृतिहेतुत्वादनर्थहेतुरेवेति परेण वक्तुं युक्तम् । निरुपधिभवबीजप्रहाणेच्छागोचरमार्गानुसारिशुभाध्यवसायस्य शुभानुबन्धिपुण्यनिमित्तत्वेनोक्तत्वात् । तदुक्तमनुबन्धकाधिकारे योगबिन्दौ—

" क्रोधाद्यवासितः शान्त उदात्तस्तु महाशयः ।
शुभानुबन्धिपुण्याच्च विशिष्टप्रतिसंगतः ॥
ऊहते यमतः प्रायो भवबीजादिगोचरम् ।
कान्तादिगतगेयादि तथा भोगीव सुन्दरम् ॥ " इति ।

अत एव परेषामकरणनियमवर्णनं हेतुः शुभभावविशेषो वज्रबद्भेद्यः प्रशस्तपरिणामभेद उपदेशपदवृत्तौ विवृतः । अयमेव ह्यस्य विशेषो यद्विशेषदेशनाप्रतिसंधानं विनाऽपि तद्विशेषपर्यवसायित्वमिति । अत एव मार्गानुसारिणां परेषां जैनाभिमतप्रकारेण जीवाद्यनभ्युपगमान्न नास्तिकत्वम्, विप्रतिपन्नांशे पक्षपातपरित्यागे सति वस्तुतस्तदभ्युपगमपर्यवसानाद् । अत एव शुभभावविशेषादकरणनियमवर्णनं मार्गानुसारेणामेव यदृच्छाप्रणयनप्रवृत्तानामर्वाचीनानां च प्रवाहपतितत्वेन घुणाक्षरन्यायेनैवेति जिनवचनविषयकपरोपनिबन्धेऽप्यस्ति विशेषः । तदिदमुक्तं धर्मबिन्दुवृत्तौ—" यच्च यदृच्छाप्रणयनप्रवृत्तेषु तीर्थान्तरीयेषु रागादिमत्स्वपि घुणाक्षरोत्किरणव्यवहारेण क्वचित्किंचिदविरुद्धमपि वचनमुपलभ्यते मार्गानुसारिबुद्धौ वा प्राणिनि क्वचित् तदपि जिनप्रणीतमेव, तन्मूलत्वात्तस्येति । एतेन घुणाक्षरन्यायेन जैनाभिमतवस्तुवर्णनानुकारि वर्णनमन्यतीर्थिकेषु भवत्यपि

१ इतोऽकरणनियमोऽन्यैरपि वर्णितः स्वशास्त्रे ।
शुभभावविशेषाद् न चैवमेष न युक्त इति ॥

प्रवचने प्रतीतमेवेति तेषामकरणनियमवचनमाकृतिमात्रमेवेत्यपास्तम्। [illegible] नसारिदृष्ट्या तद्गुणनस्य घुणाक्षरविलक्षणत्वाद्, औदयिकयोग-दृष्ट्या सर्व विशेषावगाहिसम्यक्त्वाभावेऽपि सामान्यधर्मप्रदर्शनाविरोधात् सामान्यधर्मसत्ता च तेषु बौद्धादिसामान्यधार्मिकजनस्येति [illegible] जपदवृत्तिकर्तुरेव वचनाद् व्यक्तं प्रतीयते। एवं सति भागिहापि धर्मोऽस्तीति मरीचिवचनस्योत्सूत्रत्वं न स्यादिति त्वसमीक्षितभिधानम्, स्वतन्त्रप्रमाणप्रतिपत्त्यनुबन्धिविषयतयाऽन्यदर्शने मनाग् धर्मस्याप्यभावेन तद्वचनस्योत्सूत्रत्वात्, तद्वृत्तिसामान्यधर्मेऽपि भगवद्वचनस्यैव स्वतन्त्रप्रमाणत्वाद्। अथवा कपिलस्य बालत्वादन्यलिङ्गमेवान्यदर्शनत्वेन तेन प्रतीतम्, तत्र च स्वनिरूपितकारणताविशेषेण न कोऽपि धर्मोऽस्तीति भावासत्यत्वात् तद्वचनस्योत्सूत्रत्वाव्याघात इति यथातन्त्रं विभावनीयम्।

अथैवमन्यदर्शने क्वचित्सत्यत्वम्, क्वचिच्चासत्यत्वमिति मिश्रत्वं स्याद् नत्वेकान्तमिथ्यात्वम्, न चैवमिष्यते, तस्यैकान्तमिथ्यारूपस्यैवाभ्युपगमात्। तदुक्तं दशवैकालिकनिर्युक्तौ—

"सम्मदिट्ठीउ सुअंमि अणुवउत्तो अहेउअं चेव।
जं भासइ सा मोसा मिच्छदिट्ठीवि य तहेवत्ति॥"[१]

एतद्वृत्तिर्यथा—सम्यग्दृष्टिरेव श्रुते आगमेऽनुपयुक्तः प्रमादाद् यत्किंचिदहेतुकं चैव युक्तिविकलं चैव भाषते 'तन्तुभ्यः पट एव भवति' इत्यादि, सा मृषा, विज्ञानादेरपि तत एव भावादिति। मिथ्यादृष्टिरपि तथैवोपयुक्तोऽनुपयुक्तो वा यद् भाषते सा मृषैव घुणाक्षरन्यायेन संवादेऽपि "सदसतोरविशेषाद् यदृच्छोपलब्धेरुन्मत्तवत्" इति गाथार्थः, इति चेद्। न, अनभिनिविष्टं प्रत्यन्यदर्शनस्य सर्वस्यैव फलतोऽप्रामाण्यात्, मार्गानुसारिणं प्रति च सुन्दरवचनस्य जैनवचनपर्यवसिततयाऽवशिष्टस्यान्यदर्शनस्यैकान्तमिथ्यात्वतादवस्थ्यात्।

कश्चित्तु दृढदृष्टिरागविप्लुतबुद्धिः पातञ्जलादिगताकरणनियमादिवाक्यानां जिनवचनमूलत्वमनभिमन्यमानः "सव्वप्पवायमूलं,"

---

१ सम्यग्दृष्टिः श्रुतेऽनुपयुक्तोऽहेतुकं चैव।
यद् भाषते सा मृषा मिथ्यादृष्टिरपीति च तथैवेति॥

इत्याद्युपदेशपदगाथायामिमामनुपपत्तिमुद्भावयति–'सर्वप्रवादानां मूलं द्वादशाङ्गम्' इत्यत्र प्रवादा नयवादविशेषास्ते च सर्वग्रहणेन शुभा अशुभाश्च ग्राह्याः। तत्र शुभा जीवरक्षाद्यभिप्रायघटिताः, अशुभाश्च ततो विलक्षणाः तेषां च मूलं द्वादशाङ्गं श्रीवीरवचनाद्योधितश्री सुधर्मस्वामिसबन्धि न भवति, अशुभानामपि प्रवादानां प्रवृत्तेर्जिनवचनमूलकत्वप्रसक्त्या शुभानामिवोपादेयता स्यादिति। ते च प्रवादाः शुभाशुभरूपा अपि संख्यया च न संख्याकाः। तदुक्तम्–"जावइआ वयणपहा०" इत्यादि, तेषां प्रवृत्तिरनादिप्रवाहपतिता कथं जिनवचनमूलिका संभवति ?, प्रत्यक्षबाधात्। किं च–तेषां सर्वेषामप्यवज्ञाकरणेन जिनावज्ञाऽभ्युपगमे "जीवो हन्तव्यः" इत्यादिनयप्रवादानामप्यवज्ञाकरणे तथात्वापत्तिरिति॥ एतदन्यथाऽनं कल्पयति–द्वादशाङ्गं हि सर्वोत्कृष्टं श्रुतज्ञानं केवलज्ञानदिवाकरस्य प्रकाशभूतं केवलज्ञानमिव प्रत्यात्मवर्तित्वाधिकरणभेदेन भिन्नमपि स्वरूपतो न भिन्नम्, किन्तु केवलज्ञानमिवैकमेव, तुल्यविषयकत्वात् तुल्यसंबन्धित्वाच्च। उदयमधिकृत्य तु स्वरूपतोऽपि भिन्नमेव, तत्कारणस्य क्षयोपशमस्य प्रत्यात्मभिन्नत्वात्, श्रुतज्ञानोदयस्य च क्षायोपशमिकत्वात्। ते च प्रवादा निजद्वादशाङ्गमूलका अपि सामान्यतो द्वादशाङ्गमूलका एवोच्यन्ते। यथा नानाजलसंभूतान्यपि कमलानि सामान्यतो जलजान्येव, अत एव सर्वप्रवादानां मूलं द्वादशाङ्गमेवेति सामान्यतोऽभिहितम्, सर्वस्यापि द्वादशाङ्गस्य सर्वोत्कृष्टश्रुतत्वेन सर्वाक्षरसंनिपातात्मकत्वात् प्रवादा अप्यक्षरात्मका एव। अत एव द्वादशाङ्गं रत्नाकरतुल्यम्, रत्नाकरस्यैकतरस्यापि नेकजातीयशुभाशुभनयलक्षणवस्तूनामाश्रयत्वात्। परं मिथ्यादृशां यद् द्वादशाङ्गं तत्स्वरूपत एव सर्वनयात्मकं सत्तामात्रवर्तित्वाद्, न पुनः फलतोऽपि कस्यापि मिथ्यादृशः कदाचिदपि सर्वांशक्षयोपशमाभावात्, मिथ्यादृष्टिमात्रस्योत्कृष्टतोऽपि क्षयोपशमः सर्वांशक्षयोपशमलक्षणसमुद्रापेक्षया बिन्दुकल्पो भवति। यदुक्तं "जयति विजितसग०" इत्यादि। सम्यग्दृशां तु केषांचित्संयतानां फलतोऽपि द्वादशाङ्गस्य सर्वनयात्मकत्वम्, सर्वांशक्षयोपशमस्य संभवाद्।

---

[1] यावन्तो वचनपथाः।

अत एव गौतमादयः सर्वाक्षरसंनिपातिनः प्रवचने भणिताः, परं तेषां संयतानां सकलमपि द्वादशाङ्गं शुभनयात्मकत्वेनैव परिणमति, सावद्यनयविषयकानुज्ञादिवचनप्रवृत्तेरप्यभावाद् । एतेन सर्वेऽपि शाक्यादिप्रवादा जैनागमसमुद्रसंबन्धिनो बिन्दव इति भ्रान्तिरपि निरस्ता, "षट्शतानि नियुज्यन्ते पशूनां मध्यमेऽहनि" इत्यादि प्रवादानामपि जैनागममूलकत्वापत्त्या संयतानां सावद्यभाषाप्रवृत्तिप्रसक्तेः । तस्मात्सर्वाक्षरयोपशमसमुत्थद्वादशाङ्गलक्षणसमुद्रस्य पुरस्तादन्यतीर्थिकाभिमतप्रवादाः समुदीता अपि बिन्दूपमा इत्यर्थो युक्तः, अन्यथा 'बिन्दुभावं भजन्ते' इति प्रयोगानुपपत्तिः स्यात् । अवयवावयविनोरुपमानोपमेयभावेन वर्णने निजावयवापेक्षया महत्वेऽप्यवयविनो गौरवाभावाद्, नखाङ्गुष्ठो हस्तावयवभावं भजते इति हस्तस्य स्तुतिः संभवति । किं च—समुद्रस्य बिन्दव इति भणनमप्यसङ्गतम्, समुद्रप्रभवा हि वेलाकल्लोलोर्म्यादयो भवन्ति न पुनर्बिन्दवः, तेषां चोत्पत्तिर्मेघाद् हस्तवस्त्रादिव्यापाराद्वा स्यादिति सर्वानुभवसिद्धम् । अन्यथा समुद्रान्निर्गतबिन्दुभिः समुद्रस्य न्यूनत्वापत्त्या तस्य गाम्भीर्यहानिः स्याद् इत्येवंस्थिते वृत्तिव्याख्यानसंगतिरियम्—यद् यस्मात्कारणाद् द्वादशाङ्गं रत्नाकरोपमया शुभाशुभसर्वप्रवादमूलम्, तस्मात्कारणात्स्वरूपतः फलतश्च यावत्सुन्दरमात्मनिष्ठाकरणनियमादिवाच्यवाचकं वाक्यादिकं तत्सर्वमिह द्वादशाङ्गे, एवकारो गम्यः, द्वादशाङ्ग एव समवतारणीयं, तत्र वर्तते एवेत्यर्थः, द्वादशाङ्गस्य सर्वोत्कृष्टश्रुतत्वेन तद्व्यापकभूतस्य सर्वसुन्दरात्मकत्वस्यावश्यंभावात्; परं सम्यग्दृशां यावत्सुन्दरं तावत्सर्वमपि द्वादशाङ्गमूलकमुदितं भवति, फलतोऽपि शुभत्वात्, तदागमनविधिपरिज्ञानाच्च । तच्च सानुबन्धपुण्यप्रकृतिहेतुः । मिथ्यादृशां तु स्वरूपतः क्वचिदंशे शुभत्वेऽपि फलतोऽशुभमेवेति । विरुद्धस्वरूपपरिणतयोरुभयोः सम्यग्मिथ्यादृशोरकरणनियमयोरभेदेन भणनमुदितस्याकरणनियमस्यावज्ञया जिनाज्ञा स्यात्, सा चानन्तसंसारहेतुरिति भणितम् । यथा मोक्षाङ्गं स्वरूपतः शुभमपि मनुष्यत्वं संयतजनस्य फलतोऽपि शुभमेव, मोक्षप्राप्तिपर्यन्तं सुगतिहेतुत्वात् । तदेव मनुष्यत्वं व्याधादेः फलतोऽशुभमेव, जीवघातावद्यसंयमहेतुत्वेन दुर्ग-

तिहेतुत्वात् । एवं सत्यपि भेदे द्वयोरपि मनुष्यत्वयोस्तुल्यतया भणनं संयतजनमनुष्यत्वस्यावज्ञया जिनावज्ञैव, जिनेनैव भेदेनाभिधानात् दृश्यते च लोकेऽपि लक्षणोपेत-तदनुपेतयोर्मण्योस्तुल्यतया भणने लक्षणोपेतमणेरवज्ञया तत्परिक्षकस्यावज्ञैवेति ॥ तदिदमखिलमकाण्डतुण्डताण्डवाडम्बरमात्रम्, अनुपपत्तेरेवाभावात्। द्वादशाङ्गस्य विधिनिषेधविधया स्वसमयपरसमयप्रज्ञापनाविधया वाऽशुभाशुभसर्वप्रवादमूलत्वे दोषाभावात्। न चाशुभानामपि प्रवादानां ततः प्रवृत्तेस्तन्मूलकतयोपादेयताप्रसङ्गः, तज्जन्यप्रतिपत्तिविषयत्वरूपस्य तन्मूलकत्वस्योपादेयत्वाप्रयोजकत्वात्, जिनवचनविहितत्वस्यैवोपादेयतायां तन्त्रत्वात्। सर्वेषामपि परवादानामवज्ञाकरणे च न जिनावज्ञाऽभ्युपगम्यते, किन्तु तद्गतसुन्दरप्रवादानामेवेति। 'जीवो हन्तव्यः' इत्यादिनयप्रवादानामवज्ञायां जिनावज्ञाऽपादनमसङ्गतमेवेति, ततो भाष्यान्तरकल्पनं निर्मूलकमेवासंगततरं च। अन्योक्ताकरणनियमावज्ञापरिहारार्थं प्रकृतगाथोपन्यासात्परकल्पितभावस्य च तद्विपरीतत्वात् तदनुसारेणोभयाकरणनियमवर्णनाभेदे भगवदवज्ञाप्रसङ्गात्, तद्भेदव्यक्तये अन्याकरणनियमवर्णनावज्ञाया एव न्याय्यत्वप्रसङ्गादिति। तथाऽपि तत्र किञ्चिदुच्यते—द्वादशाङ्गं हि सर्वोत्कृष्टश्रुतज्ञानं सन्तानभेदाविवक्षया गृह्यते, तच्छ्रुतज्ञानमेव ज्ञानाज्ञानसाधारणं वा श्वेतस्य सर्वप्रवादमूलत्वानुपपत्तिः, शुद्धाशुद्धयोरैक्यायोगाद्। अन्ये च संग्रहनयाश्रयणेन द्वादशाङ्गसामान्यस्य वस्तुतः सर्वनयप्रवादात्मकत्वसिद्धावपि व्यक्त्यनुपसंग्रहापत्तिः। न हि यथा नानाजलोत्पन्नानि जलजानि जलजत्वेनोच्यन्ते तथा 'जलं सर्वजलजोत्पादकम्' इत्यपि व्यवहारः क्रियते, एवमेव हि 'सर्वप्रवादमूलं द्वादशाङ्गम्' इत्यपि न स्यात्। यदि चैकवचनेनापि व्यक्त्युपसंग्रहः क्रियते, भेदविवक्षयैव च मिथ्यादृशां द्वादशाङ्गमत्यल्पक्षयोपशमात्मकं सर्वांशक्षयोपशमशुद्धसम्यग्दृष्टिद्वादशाङ्गरत्नाकरापेक्षया बिन्दुतुल्यं व्यवस्थाप्यते, तदा कथं वाचोयुक्तिः ?, 'सर्वेऽपि शाक्यादिप्रवादा जैनागमसमुद्रसंबन्धिनो बिन्दव इति भ्रान्तिः' इति ज्ञानवाक्ययोर्मिथ्यारूपोरविशिष्टयोरेकत्र जैनागमसंबन्धित्वमपरत्र नैवत्र प्रमाणाभावात्, प्रत्युत

वाक्यमुत्सर्गतो न प्रमाणं नवाऽप्रमाणम्, अर्थापेक्षया तु तत्र प्रामाण्यमप्रामाण्यं वा व्यवतिष्ठते इति कल्पभाष्यप्रसिद्धार्थानुसारेणादासीनेषु वाक्यरूपपरप्रवादेषु तत्संबन्धित्वमल्पसुन्दरम्, साक्षात्प्रतिपक्षभूतेषु मिथ्याज्ञानरूपेषु प्रवादेषु तदत्यन्तासुन्दरमिति भावभेदे च सति वाक्यरचनायां न विशेषः। 'सम्यग्दृष्टिपरिगृहीतं मिथ्याश्रुतमपि सम्यक्श्रुतम्; मिथ्यादृष्टिपरिगृहीतं च सम्यक्श्रुतमपि मिथ्याश्रुतम्' इति सिद्धान्तव्यवस्थितत्वाच्छाक्यादिप्रवादेषु जैनागमोद्भूतत्वरूपतत्संबन्धित्वाभ्युपगमस्य तदेकानुपूर्वीकरचनारूपसंबन्धाभावेन खण्डमत्स्यपाण्डित्यविजृम्भितमेव। नह्येवंभूतसंबन्धेन साधूनां तद्वचनादसंयतत्वापत्तिः, शुद्धाशुद्धविवेकेनैव साधुभिस्तत्परिग्रहात्। न च 'शाक्यादिप्रवादा जैनागमसमुद्रसंबन्धिनो बिन्दवः' इति प्रवाहपतितमेव वचनम्;

"पावंति असमंजसावि वयणेहिं जेहिं परसमया।
तुह समयमहोअहिणो ते मंदा बिंदुणिस्संदा॥"[1]

इत्यत परमश्रावकेण धनपालपण्डितेनापीत्थमभिधानात्। किं च—

"जं काविलं दरिसणं एअं दव्वट्ठिअस्स वत्तव्वं।
सुद्धोअणतणयस्स उ परिसुद्धो पज्जवविअप्पो॥
दोहिवि णएहिं णीअं सत्थमुलूएण तहवि मिच्छत्तं।
जं सविसयपहाणत्तणेण अण्णोण्णणिरवेक्खं॥"[2]

इत्यादि सम्मतिग्रन्थेऽपि शाक्यादिप्रवादानां जैनागममूलत्वे सुप्रसिद्धम्; तस्य द्रव्यार्थिक-पर्यायार्थिकोभय नयरूपत्वात्।

यच्च सिद्धसेनः—

---

१ आप्नुवन्ति असमञ्जसा अपि यैर्वचनैः परसमयाः।
तव समयमहोदधेस्ते मन्दा बिन्दुनिःस्यन्दाः॥

२ यत्कापिलं दर्शनमेतद् द्रव्यार्थिकस्य वक्तव्यम्।
शुद्धोदनतनयस्य तु परिशुद्धः पर्यवविकल्पः॥
द्वाभ्यां नयाभ्यां नीतं शास्त्रमुलूकेन तथाऽपि मिथ्यात्वम्।
यत्स्वविषयप्रधानत्वेन अनुज्ञादिनिरपेक्षम्॥

"तित्थयरवयणसंगहविसेसपत्थारमूलवागरणी।
दव्वट्ठिओ अ पज्जवणओ अ सेसा विअप्पासिं॥" इति।

(संमति नयकाण्ड. गा. ३)

यच्चोक्तम्—'बिन्दुभावं भजन्ते' इति प्रयोगानुपपत्तिः, अवयवावयविनोरुपमानोपमेयभावे गौरवाभावादिति। तदसत्, नह्यत्र हस्त्यवयवसाधारणमवयवत्वम्, किन्तु समुदितेषु परप्रवादेषु तदेकदेशार्थत्वमिति गौरवाप्रतिघातात्।

यच्चोक्तम्—'समुद्रस्य बिन्दव इति भणनमप्यसंगतम्' इत्यादि, तदपि असत्, समुद्रस्थानीयजैनमहाशास्त्रप्रभवकल्लोलस्थानीयावान्तरशास्त्रेभ्यः सामान्यदृष्टिपवनप्रेरितपरसमयबिन्दूद्गमस्याविरोधात्, 'समुद्रान्निर्गतबिन्दुभिः समुद्रस्य गाम्भीर्यहानिः' इति तु न पामरस्यापि संमतमिति यत्किंचिदेतत्। एवकाराद्यध्याहारेण वृत्तिसंघटना तु वृत्तिकृदभिप्रायेणैव विरुद्धा, 'अन्यत्र न सुन्दरम्' इत्यस्यार्थस्य वृत्तिकृदनभिप्रेतत्वात्, उदितानुदितयोः करणनियमयोरभेदेन भणनं च यद्युदितस्याकरणनियमस्यावज्ञा तद्भेदवादिभगवदवज्ञापर्यवसायिनी स्यात्, तदा तद्भेदवर्णनमपि सामान्याकरणनियमावज्ञा तदभेदवादिभगवदवज्ञापर्यवसायिनी स्यात्, न हि तद्भेदमेव भगवान् वदति नाभेदमित्येकान्तोऽस्ति, भेदाभेदवादित्वात्तस्येति वक्तव्यं परित्यज्य विचारणीयम्; परगुणद्वेष एव भगवतामवज्ञेति। एतदर्थसमर्थनायैव हि 'सर्वप्रवादमूलं द्वादशाङ्गं रत्नाकरतुल्यम्' इत्यत्र "उदधाविव" इत्यादिसंमतितयोद्भावितं वृत्तिकृता।

अत्र परः प्राह—यत्तु 'सर्वप्रवादानां द्वादशाङ्गं रत्नाकरतुल्यम्' इति समर्थनाय टीकाकारेण "उदधाविव सर्वसिन्धवः०" इत्यादिरूपं श्रीसिद्धसेनदिवाकरवचनं संमतितयोद्भावितं तच्च विचार्यमाणमसंगतमिवाभाति। तथाहि—यदि द्वादशाङ्गं रत्नाकरतुल्यम्, तर्हि नदीतुल्याः प्रवादा न भवेयुः, समुद्रान्नदीनामुत्पत्तेरभावात्, समुद्रस्य च नदी-

१ तीर्थकरवचनसंग्रहविशेषप्रस्तारमूलव्याकरणी।
द्रव्यार्थिकश्च पर्यवनयश्च शेषा विकल्पा अनयोः॥

पितृत्वापत्त्या 'नदीपतिः समुद्रः' इति कविसमयव्याहतिप्रसक्तेः, समुद्रस्य गाम्भीर्यहानिप्रसक्तेश्च। तस्मात्स्तुतिकर्तुरभिप्रायोऽयम्—हे नाथ! 'त्वयि' सर्वज्ञे दृष्टयोऽन्यतीर्थिकानां निजनिजमार्गश्रद्धानलक्षणाः 'समुदीर्णाः' सम्यगुदयं प्राप्ताः तद्विषयो भगवान् जात इत्यर्थः। अयं भावः—यत्किंचिद्करणनियमादिकं जिनेन सुन्दरतया भणितम्, तदन्यतीर्थिकैरपि तथैव प्रतिपन्नम्। एतच्च साम्प्रतं नालिकेरादिफलाहारेणैकादशीपर्वोपवासं कुर्वाणा जैनाभिमतोपवासं सम्यक्तया मन्यन्ते, जैनाश्च तदुपवासं लेशतोऽपि न मन्यन्ते। अत एव च 'न च तासु भवान् प्रदृश्यते' इति। तासु—अन्यतीर्थिकदृष्टिषु 'भवान् न प्रदृश्यते' अन्यतीर्थिकश्रद्धानविषयीभूतं धार्मिकानुष्ठानं गङ्गास्नानादिकं भवान् लेशतोऽपि न मन्यते इत्यर्थः। अन्यतीर्थिकानां दृष्टयो भगवति वर्तन्ते। तत्र दृष्टान्तमाह—यथोदधौ सर्वाः सिन्धवः समुदीर्णा भवन्ति—सम्यगुदयं प्राप्ताः स्युः, लोकेऽपि भर्तृसंबन्धेन स्त्रिय उदिता भवन्तीति प्रसिद्धेः। 'तासु भवान्नास्ति' इत्यत्र दृष्टान्तमाह—यथा प्रविभक्तासु सरित्सु नदीषु समुद्रो नास्ति। तासु च समुद्रो नावतरतीत्यर्थः। अनेनाभिप्रायेण स्तुतिः, न पुनरर्हदुपदिष्टप्रवचनद्वाराऽर्हत्सकाशादन्यतीर्थिकदृष्टयः समुत्पन्ना इत्यभिप्रायेणेति॥

तदसत्, प्राचीनाचार्यव्याख्यामुल्लङ्घ्य विपरीतव्याख्यानस्यापसिद्धान्तत्वात्। तदाहुः श्रीहेमचन्द्रसूरयः—

"यदार्जवादुक्तमयुक्तमन्यैस्तदन्यथाकारमकारिशिष्यैः।
न विप्लवोऽयं तव शासनेऽभूदहो अधृष्या तव शासनश्रीः॥" इति।

न चेदमुपदेशपदवृत्तिकृत एव दूषणदानम्, किन्तु "एक एव मार्गोऽपि तेषां शमपरायणः।" इत्यादिवदतां श्रीहरिभद्रसूरीणां 'समाख्यातम्' इति पदसूचितग्रन्थकृदेकवाक्यतालालिश्रीसिद्धसेनदिवाकराणां तदनुसारिणामन्येषां चेत्यतिदुरन्तोऽयं कोऽपि मोहमहिमा। यावानुपपत्तिरुद्भाविता 'यदि द्वादशाङ्गं रत्नाकरतुल्यम्' इत्यादिना साऽनुपपन्ना, समुद्राज्जलं गृहीत्वा मेघो वर्षति, ततश्च नद्यः प्रवृद्धा भवन्तीति प्रसिद्धेः, परप्रवादानामपि नदीतुल्यानां जैनागमस्य समुद्र-

दृष्टीनार्थजलादांशिकक्षयोपशममेघात्प्रवृद्धिसंभवात्। एवं नदीतुल्यानां परप्रवादानां जैनागमसमुद्रमूलत्वे लोकरीत्याऽपि बाधकाभावात्। अत एव न समुद्रस्य नदीपितृत्वापत्तिदोषोऽपि, लोकरीत्याऽपि तदनुपपत्तेः। यदि चोपमानबललभ्यधर्मेण तत्सहचरितानभिमतधर्मापत्तिः स्यात्, तदा चन्द्रोपमया मुखादौ कलङ्कितत्वाद्यापत्तिरपि स्यादिति॥ न चैवं मेघात्प्राग्नदीनामिव जैनागमानुसारिक्षयोपशमात्प्राक् परवादानामनुपचितापस्थत्वप्रसङ्गः, इष्टत्वात्, जैनागमानुसारिनयपरिज्ञानं विनाऽनुपनिबद्धमिथ्यात्वरूपतयैव तेषां स्थितत्वात्। न चैवं जिनदेशनाया उपचितमिथ्यात्वमूलत्वेनानर्थमूलत्वापत्तिः, विश्वहितार्थिप्रवृत्तावनुषङ्गतस्तदुपस्थितावपि दोषाभावाद् भावस्यैव प्राधान्यात्॥ तदुक्तमष्टके—

"इत्थं चैतद्धितेष्टव्यमन्यथा देशनाऽप्यलम्।
कुधर्मादिनिमित्तत्वाद्दोषायैव प्रसज्यते॥" इति

परामिप्रायेण प्रकृतस्तुतिवृत्तव्याख्याने च त्वत्तः समुदीर्णाः— इति वाच्ये 'त्वयि समुदीर्णाः' इति पाठस्य क्लिष्टत्वापत्तिः। किं च— 'एवं परेषां भगवदभिहितार्थश्रद्धानं भगवतश्च तल्लेशस्याप्यश्रद्धानम्' एतावता भगवत्यतिशयालाभः। सांप्रदायिके त्वर्थे 'भगवत्यन्यदृष्टयः समवतरन्ति, भवांश्च न तासु' इत्येवं स्वेतरसकलदर्शनार्थव्याप्यार्थप्रवचनवक्तृत्वरूपातिशयालाभ इत्युपमया व्यतिरेकालंकाराक्षेपात् दुष्टार्थकत्वं काव्यस्य स्यात्। किं च—एवमपि परेषां जिनाभिहितार्थश्रद्धानाभ्युपगमे सत्प्रशंसारूपबीजलाभाभ्युपगमप्रसङ्गः। न च तेषां क्वचिद् यथार्थजिनोक्तश्रद्धानेऽपि तत्प्रणेतर्यर्हति देवत्वेन भावाभावाद्। देवो रागद्वेषरहितः सर्वज्ञ एव भवति नापरः, स चास्मदभिमतः सुगतादिरेवेति शाक्यादीनाम्, देवोर्हन्नेव, परमस्मन्मार्गप्रणेतेत्यादि च मिथ्यात्वबीजं दिगम्बरादीनामस्त्येवेति न तेषु धर्मसंभव इति वाच्यम्। तथाऽपि तादृशपक्षपातरहितानां 'यः कश्चिद् रागादिरहितो विशिष्टपुरुषः स देवः' इत्यादिसंमुग्धश्रद्धानवतां भगवदभिहितकतिपयसुन्दरार्थग्राहिणां धर्मबीजसद्भावस्य प्रतिहन्तुमशक्य-

त्वात्; औघिकयोगदृष्ट्या तत्प्रणीतवाक्येषु सुन्दरार्थमुपलभ्येत्यस्याप्यादिधार्मिकत्वोपपत्तेश्चेत्यध्यात्मदृष्ट्या विचारणीयम्, तां विना वादप्रतिवादादिव्यापारात् तत्त्वाप्रतिपत्तेः। तदुक्तं योगबिन्दौ—

"वादांश्च प्रतिवादांश्च वदन्तो निश्चितांस्तथा।
तत्त्वान्तं नैव गच्छन्ति तिलपीडकवद् गतौ॥
अध्यात्ममत्र परम उपायः परिकीर्तितः।
गतौ सन्मार्गगमनं यथैव ह्यप्रमादिनः॥" इति।

नन्वेतदयुक्तम्—मिथ्यादृशां प्राणातिपातादिविनिवृत्तेरप्यधर्मपक्षे निवेशितत्वात् तया तेषां देशाराधकत्वाभावात्। तदुक्तं सूत्रकृताङ्गे—"अहावरे तच्चस्स ट्ठाणस्स मीसगस्स विभंगे एवमाहिज्जइ, जे इमे भवंति आरण्णिआ" इत्यादि यावत् ××× "असव्वदुक्खप्पहीण मग्गे एगंतमिच्छे असाहु"त्ति। एतद्वृत्त्येकदेशो यथा—"अत्र चाधर्मपक्षेण युक्तो धर्मपक्षो मिश्र इत्युच्यते, तत्राधर्मस्येह भूयिष्ठत्वादधर्मपक्ष एव यैर्द्रष्टव्यः। एवदुक्तं भवति—यद्यपि मिथ्यादृष्टयः कांचित्तथाप्रकारां प्राणातिपातादिविनिवृत्तिं विदधति, तथाप्याशयस्याशुद्धत्वादभिनवपित्तोदये सति शर्करामीश्रक्षीरपानवदूषरप्रदेशवृष्टिवद्विवक्षितार्थासाधकत्वान्निरर्थकतामापद्यते, तथा मिथ्यात्वानुभावाद् मिश्रपक्षोऽप्यधर्मपक्ष एवावगन्तव्यः"। इत्यादीति चेत्। **सत्यम्, नहि वयमपि सन्मार्गगर्हादिहेतुप्रबलमिथ्यात्वविशिष्टया प्राणातिपातादिविनिवृत्तिक्रियया देशाराधकत्वं ब्रूमः, किन्तु रागद्वेषासद्ग्रहादिमान्द्येन मार्गानुसारिण्यैव तया। सा च सामान्यधर्मपर्यवसन्नाऽपि धर्मपक्षे न समवतरति, तत्र भावविरतेरेव परिगणनात्, तदभावे बालत्वात्, तदुक्तम्**—"अविरइं पडुच्च बाले आहिज्जइ"त्ति। एतद्वृत्तिर्यथा—"येयमविरतिरसंयमरूपा सम्यक्त्वाभावान्मिथ्यादृष्टेर्द्रव्यतो विरतिरप्यविरतिरेव, तां प्रतीत्य—आश्रित्य बालवद् बालोऽज्ञः, सदसद्विवेकविकलत्वाद् इत्येवमाधीयते व्यवस्थाप्यते वेति"॥ **द्रव्यविरतिश्च मिथ्यात्वप्राबल्येऽप्राधान्येन तन्मान्द्ये च मार्गानुसारित्वरूपप्राधान्येनापि संभवतीत्येवं विषयविभागप-**

१ अथापरस्तृतीयस्य स्थानस्य मिश्रकस्य विभङ्गे एवमाख्यायते—य इमे भवन्ति आरण्यिकाः। असर्वदुःखप्रक्षीणमार्गमेकान्तमिथ्याऽसाध्विति॥

२ अविरतिं प्रतीत्य बाल आधीयते।

र्यालोचनायां न कोऽपि दोष इति। अवश्यं चैतदङ्गीकर्तव्यम्, अन्यथा परस्य मार्गानुसारिणो मिथ्यादृष्टेर्विलोपापत्तिः, मिथ्यात्वसहितायाः अनुकम्पादिक्रियाया अप्यकिंचित्करत्वाद्, 'यदीयानन्तानुबन्धिनां जीर्णत्वेन सम्यक्त्वप्राप्तिप्रतिबन्धकत्वं तेषां मार्गानुसारित्वम्, ते च सम्यक्त्वाभिमुखत्वेन सम्यग्दृष्टिवदेवावसातव्याः' इति त्वावयोः समानमिति। न चेदेवं तदादिधार्मिकविधिः सर्वोऽप्युच्छिद्येतेति सर्वाभिनिविष्टचित्तानां मिथ्यादृशां दयादिकमदुष्टम्, अनभिनिविष्टानां तु मार्गानुसारितानिमित्तमिति ध्येयम्, सामान्यधर्मस्यापि सद्धर्मबीजप्ररोहत्वेनोक्तत्वात्।

तदुक्तं धर्मबिन्दौ—

"प्रायः सद्धर्मबीजानि गृहिष्वेवंविधेष्वलम्।
रोहन्ति विधिनोप्तानि यथा बीजानि सत्क्षितौ॥ इति।

एतेन—

"[1]जे अबुद्धा महाभागा वीरा असम्मत्तदंसिणो।
असुद्धं तेसिं परक्कंतं सफलं होइ सव्वसो॥"

इति सूत्रकृताऽष्टमाध्ययनगाथायां तेषां च बालानां यत्किमपि तपो-दानाध्ययन-नियमादिषु पराक्रान्तमुद्यमः कृतस्तदशुद्धम्—अविशुद्धकारि प्रत्युत कर्मबन्धाय, भावोपहतत्वाद् सनिदानत्वाद्वेति, कुवैद्यचिकित्सावद् विपरीतानुबन्धित्वाच्चेति। सह फलेन कर्मबन्धेन वर्तते इति सफलं। सर्वश इति। सर्वा अपि क्रियास्तपोऽनुष्ठानादिकाः, कर्मबन्धायैव इत्युत्तरार्द्धव्याख्यानात्। 'पण्डितानामपि त्यागादिभिर्लोकपूज्यानामपि सुभटवादं वहतामपि सम्यक्त्वपरिज्ञानविकलानां सर्वक्रियावैफल्याद् न मिथ्यादृशां केषामपि क्रियावतामपि लेशतोऽप्याराधकत्वम्' इत्यपास्तम्। एतेन भवाभिनन्दिनां मिथ्यादृशां सर्वक्रियावैफल्यसिद्धावपि तद्विलक्षणानां भावानुपहतत्वेन देशाराधकत्वाप्रतिघातात्। एतेन 'मिथ्यादृशां सर्वं कृत्यं निरर्थकम्' इत्यादी-

---

१ ये अबुद्धा महाभागा वीरा असम्यक्त्वदर्शिनः।
अशुद्धं तेषां पराक्रान्तं सफलं भवति सर्वशः॥

न्यपि वचनानि व्याख्यातानि, विशिष्टफलाभावापेक्षयाऽपि निरर्थकत्व-वचनदर्शनात् ।

पठ्यते च—

" नाणं चरित्तहीणं लिंगग्गहणं च दंसणविहूणं ।
संजमहीणं च तवं जो चरइ णिरत्थयं तस्स ॥ " इत्यादि ।

अथ पोषमासे वटवृक्षाम्रवृक्षयोः सहकारफलं प्रत्यकारणत्ववचनयोर्यथा स्वरूपयोग्यता-सहकारियोग्यताऽभावेन विशेषस्तथा मिथ्यादृक्कृत्यचारित्रहीनज्ञानादिनिरर्थकतावचनयोरपि स्फुट एव विशेष इति-चेत्, तर्हि अयमपरोऽपि विशेषः परिभाव्यताम्। सहकारफलस्थानीयं मोक्षं प्रति भवाभिनन्दिमिथ्यादृक्कृत्यं वटवृक्षवदयोग्यम्, अपुनर्बन्धकादिकृत्यं तु सहकाराङ्कुरवत्पारम्पर्येण योग्यमिति सर्वमिदं निपुणं निभालनीयमम् ॥२४॥

'तदेवं श्रुतवांश्च बालतपस्वी देशाराधकः' इति वृत्तिगतः प्रथमपक्षः समर्थितः, अथ तद्गतं द्वितीयं पक्षं समर्थयते—

पक्खंतरम्मि भणिओ गीयत्थाणिस्सिओ अगीओ सो ।
जो णभिणिविट्ठचित्तो भीरू एगंतसुत्तरुई ॥ २५ ॥

पक्खंतरम्मित्ति । पक्षान्तरे—अन्येषामाचार्याणां व्याख्याने गीतार्थानिश्रितोऽगीतार्थः स देशाराधको भणितः, योऽनभिनिविष्टचित्तः—आत्मोत्कर्ष—परद्रोह—गुरु—गच्छादिप्रद्वेषमूलासद्ग्रहाकलङ्कितचित्तः, भीरुः—कुतोऽपि हेतोरेकाकिभावमाश्रयन्नपि स्वेच्छानुसारेण प्रवर्तमानोऽपि सारसिक जिनाज्ञाभयः, एकान्तसूत्ररुचिः—अव्याकृतसूत्रमात्रानुसारी ।

पक्षान्तरे भणितो गीतार्थानिश्रितोऽगीतः सः ।
योऽनभिनिविष्टचित्तो भीरुरेकान्तसूत्ररुचिः ॥ २५ ॥

---

१ ज्ञानं चारित्रहीनं लिङ्गग्रहणं च दर्शनविहीनम् ।
संयमहीनं च तपो यश्चरति निरर्थकं तस्य ॥

अयं भावः—एकाकिनस्तावत्प्रायश्चारित्रासंभव एव, सूत्रं गीतार्थस्य तन्निश्रितागीतार्थस्य वा चारित्रसंभवात्। न हि चारित्रपरिणामे सति गुरुकुलवासमोचनादिकमसमञ्जसमापद्यते।

उक्तं च पञ्चाशके—

ताण चरणपरिणामे एयं असमंजसं इह होइ।
आसन्नसिद्धियाणं जीवाण तहा य भणियमिणं॥
नाणस्स होइ भागी थिरयरो दंसणे चरित्ते य।
धन्ना आवकहाए गुरुकुलवासं न मुंचंति॥

ततः कष्टविहारिणोऽप्येकाकिनो गुरुकुलवासैकाकिविहारयोर्गुणदोषविपर्यासमवबुध्यमानस्य स्वाभिनिवेशात्तपोरतस्यागामिकत्वेनैकाकित्वेन च प्रवचननिन्दाकारिणः शेषसाधुषु पूजाविच्छेदाभिप्रायतश्च प्रायो बहुसमीक्षितकारित्वेनाभिन्नग्रन्थित्वाद् बाह्यवदसाधुत्वमेव

तदुक्तम्—

"जे उ तह विवज्जत्था सम्मं गुरुलाघवं अयाणंता।
सग्गाहा किरियरया पवयणखिंसावहा खुद्दा॥
पायं अभिन्नगंठी तमा(वो)उ तह दुक्करंपि कुव्वंता।
बज्झव्व ण ते साहू धंखाहरणेण विन्नेया॥" त्ति।

तथापि न सर्वेषां सदृशः परिणाम इति यस्यैकाकिनो विहारिणो नातिक्रूरः परिणामः, किन्तु मृगपर्षदन्तर्गतस्य साधोरपवादादिभीरुतयैव तथाविधकर्मवशाद् गच्छवासभीरुतयैवैकाकित्वं संपन्नम्, सूत्र-

---

१ ततो न चरणपरिणामे एतदसमञ्जसमिह भवति।
आसन्नसिद्धिकानां जीवानां तथा च भणितमिदम्॥
ज्ञानस्य भवति भागी स्थिरतरो दर्शने चारित्रे च।
धन्या यावत्कथायां गुरुकुलवासं न मुञ्चन्ति॥

२ ये तु तथा विपर्ययार्थाः सम्यग् गुरुलाघवमजानन्तः।
सद्ग्राहा क्रियारता प्रवचननिन्दावहा क्षुद्राः॥
प्रायोऽभिन्नग्रन्थिः तपस्तु तथा दुष्करमपि कुर्वन्तः।
बाह्या इव न ते साधवः ध्वांक्षाहरणे न विज्ञेयाः॥

रुचिश्च न निवृत्ता, तस्य स्वमत्यनुसारेण सदाप्रवृत्तेर्बह्वज्ञानकष्टे पतति किंचित् तु कदाचित्परिणामविशेषवशादागमानुपात्यपि स्यात्।

तदुक्तमुपदेशमालायाम्—

" अपरिणिच्छिय सुअणिहसस्स केवलमभिन्नसुत्तचारिस्स ।
सव्वुज्जमेणवि कयं अन्नाणतवे बहुं पडइ ॥ " इति ।

एतद्वृत्तिर्यथा—" अपरिनिश्चितः सम्यगपरिच्छिन्नः श्रुतनिकष आगमसद्भावो येन स तथा तस्य, केवलमभिन्नमविवृतार्थं यत्सूत्रं विशिष्टव्याख्यानरहितं सूत्रमात्रमित्यर्थः, तेन चरितुं तदनुसारेणानुष्ठानं कर्तुं धर्मो यस्य सोऽभिन्नसूत्रचारी तस्य, सर्वोद्यमेनापि समस्तयत्नेनापि कृतमनुष्ठानमज्ञानतपसि पञ्चाग्निसेवनादिरूपे बहु पतति स्वल्पमेवागमानुसारि भवति, विषयविभागविज्ञानशून्यत्वादिति ॥"

यद्यपि स्वमत्या प्रवर्तमानानां घुणाक्षरन्यायात्समागतं किंचिच्छुद्धमपि कृत्यं नागमानुपाति, अन्यथा निह्नवानामपि तदापत्तेः; तथाऽपि शुद्धक्रियाजन्यनिर्जराप्रतिबन्धकस्वमतिविकल्पे यात्किञ्चिदागमानुपाति शिष्टसंमतं च तत्प्रमाणम्, न तु मन्मतानुसारित्वेनैवागमः प्रमाणमित्येवंविधोऽनभिनिवेशाधिकल्प उत्तेजक इति न दोषः। तदेवंविधो गीतार्थनिश्रिततपश्चरणरतोऽगीतार्थः बालतपस्वी च शीलवान् श्रुतवान् मार्गानुसारित्वेन देशाराधक इत्युभयोः पक्षयोर्नातिविशेष इति द्रष्टव्यम् ॥ २५ ॥

ननु ' लौकिकमिथ्यात्वाल्लोकोत्तरमिथ्यात्वं बलीयः ' इति हेतोरुभयोर्महाभेद एव इत्यत आह—

लोइअमिच्छत्ताओ लोउत्तरियं तयं महापावं ।
इअ णेगंतो जुत्तो जं परिणामा बहुविअप्पा ॥२६॥

लौकिकमिथ्यात्वाल्लोकोत्तरिकं तद् महापापम् ।
इत्येकान्तो न युक्तो यत्परिणामा बहुविकल्पाः ॥ २६ ॥

१ अपरिनिश्चितश्रुतनिकषस्य केवलमभिन्नसुत्रचारिणः ।
सर्वोद्यमेनापि कृतमज्ञानतपसि बहु पतति ॥

लोइअमिच्छत्ताओत्ति । 'लौकिकमिथ्यात्वाल्लोकोत्तरिकं तत् मिथ्यात्वं महापापम्' इत्येकान्तो न युक्तः; यत्परिणामा बहुविकल्पा नानाभेदाः संभवन्ति । तथा च यथा लौकिकं मिथ्यात्वं तीव्रमन्दादिभेदान्नानाविधं तथा लोकोत्तरमपीति न विशेषः, प्रत्युत ग्रन्थिभेदानन्तरमल्पबन्धापेक्षया लोकोत्तरमेवाल्पपापमिति । तदुक्तं योगबिन्दुसूत्रवृत्त्योः—

"भिन्नग्रन्थेस्तृतीयं तु सम्यग्दृष्टेरतो हि न ।
पतितस्याप्यतो बोधो ग्रन्थिमुल्लङ्घ्य देशितः ॥

'भिन्नग्रन्थेस्तृतीयं तु' अनिवृत्तिकरणं पुनर्भवति । एवं सति यत्सिद्धं तदाह—सम्यग्दृष्टेर्जीवस्य 'अतो हि' अत एव करणत्रयलाभादेव हेतोः 'न' नैव 'पतितस्य' तथाविधसंक्लेशात्परिभ्रष्टस्य अतो लभ्यते बन्धो ज्ञानावरणादिपुद्गलग्रहरूपः; कीदृशः ? इत्याह—'ग्रन्थि' ग्रन्थिभेदकालभाविनीं कर्मस्थितिमित्यर्थः, 'उल्लङ्घ्य' अतिक्रम्य 'देशितः' सप्ततिकोट्यादिप्रमाणतया प्रज्ञप्तः, "बंधेण ण वोलइ कयाइ" इत्यादिवचनप्रामाण्यात् ॥"[1]

"एवं सामान्यतो ज्ञेयः परिणामोऽस्य शोभनः ।
मिथ्यादृष्टेरपि सतो महाबन्धविशेषतः ॥

'एवं' ग्रन्थेरुल्लङ्घनेन बन्धाभावात् 'सामान्यतः' न विशेषेण ज्ञेयः परिणामोऽस्य—सम्यग्दृशः 'शोभनः' प्रशस्तो मिथ्यादृष्टेरपि 'सतः' तथाविधमिथ्यात्वमोहोदयात्; कुतः ? इत्याह—'महाबन्धविशेषतः' इह द्विधा बन्धः; महाबन्ध इतरबन्धश्च । तत्र मिथ्यादृष्टेर्महाबन्धः, शेषश्चेतरस्य । ततो महाबन्धस्य विशेषतोऽवस्थान्तरविशेषात् । इदमुक्तं भवति—लब्धसम्यक्त्वस्य प्राणिनो मिथ्यादृष्टित्वेऽपि न सामान्यमिथ्यादृष्टेरिव बन्धः, किन्तु कश्चिदत्यन्तन्यूनः ॥"

तद्विशेष एव कुतः ? इत्याह—

"सागरोपमकोटीनां कोट्यो मोहस्य सप्ततिः ।
अभिन्नग्रन्थिबन्धो न त्वेकापीतरस्य तु ॥

---

१ बन्धेन नातिक्रामति कदाचिद् ।

सागरोपमकोटीनां कोट्यो मोहस्य सप्ततिः कर्मग्रन्थप्रसिद्धा अभिन्नग्रन्थेर्जीवस्योत्कर्षतो बन्धो 'यद्' यस्मात्कारणात् 'न तु' न पुनरेकाऽपि सागरोपमकोटीबन्धः, 'इतरस्य तु' भिन्नग्रन्थेः पुनर्मिथ्यादृष्टेरपि सतः ॥

अथोपसंहरन्नाह—

तदत्र परिणामस्य भेदकत्वं नियोगतः ।
बाह्यं त्वसदनुष्ठानं प्रायस्तुल्यं द्वयोरपि ॥

यतो ग्रन्थिमतिक्रम्यास्य न बन्धस्तत् तस्माद् 'अत्र' अनयोर्भिन्नग्रन्थीतरजीवयोर्विषये 'परिणामस्य' अन्तःकरणस्य भेदकत्वं भेदकभावो 'नियोगतः' नियोगेन, 'बाह्यं तु' बहिर्भवं पुनरसदनुष्ठानमर्थोपार्जनादि 'प्रायो' बाहुल्येन 'तुल्यं' समं द्वयोरप्यनयोरिति" सैद्धान्तिकमतमेतद् । येऽपि कार्मग्रन्थिका भिन्नग्रन्थेरपि मिथ्यात्वप्राप्तावुत्कृष्टस्थितिबन्धमिच्छन्ति, तेषामपि मतेन तथाविधरसाभावात् तस्य शोभनपरिणामत्वे न विप्रतिपत्तिः। यद्यपि अल्पबन्धेऽपि भिन्नग्रन्थेरशुभानुबन्धान्मिथ्यात्वप्राबल्येऽनन्तसंसारित्वं संभवति, तथाऽपि मन्दीभूतं लोकोत्तरमिथ्यात्वं संनिहितमार्गावतरणबीजं स्यादिति विशेषः ।

न चैवं 'लौकिकमिथ्यात्वाल्लोकोत्तरमिथ्यात्वं शोभनं'—इत्येकान्तोऽपि ग्राह्यः, लोकोत्तरस्यापि भिन्नग्रन्थीतरसाधारणत्वात्, मुग्धानां परेषां मिथ्यात्ववृद्धिजनकतया लोकोत्तरमिथ्यात्वस्यापि महापापत्वेनोक्तत्वाच्च । यदागमः—

"जो जहवायं ण कुणइ मिच्छादिट्ठी तओ हु को अण्णो ।
वड्ढेइ मिच्छत्तं परस्स संकं जणेमाणो ॥" इति ।[1]

तस्मादत्रानेकान्त एव श्रेयानिति ॥ २६ ॥

गीतार्थनिश्रितमपि देशाराधकमाह—

---

१ यो यथा वादं न करोति मिथ्यादृष्टिस्ततः खलु कोऽन्यः ।
वर्द्धयति मिथ्यात्वं परस्य शङ्कां जनयन् ॥

पढमकरणभेएणं गंथासन्नो जई व सड्ढो वा।
णेगमणयमयभेआ इह देसाराहगो णेओ ॥ २७॥

पढमत्ति। प्रथमकरणभेदेन यथाप्रवृत्तकरणावस्थाविशेषेण ग्रन्थ्यासन्नो ग्रन्थिनिकटवर्ती अपुनर्बन्धकादिभावशाली यतिर्वा श्राद्धो वा इह प्रकृतविचारे नैगमनयभेदात्प्रस्थककन्यायेन—विचित्रावस्थाऽभ्युपगन्तृनैगमनयमतविशेषाश्रयणादेशाराधको ज्ञेयः।

अयं भावः—गीतार्थस्तावत्प्रकृतिभद्रकत्वादिगुणवतां प्राणिनां योग्यताविशेषमवगम्य केषांचिज्जिनपूजा—तपोविशेष—प्रतिक्रमण—सामायिकादि श्रावकधर्मं समर्पयन्ति, केषांचिच्च प्रव्रज्यामपि; तेषां चाऽव्युत्पन्नदशायां सदनुष्ठानरागमात्रेण तदनुष्ठानं धर्ममात्रहेतुतया पर्यवस्यति। तदुक्तं पूजामधिकृत्य विंशिकायाम्—

"पढमकरणभेएणं गंथासन्नस्स धम्ममित्तफलो।
साहुत्तगाइभावो जायइ तह नाणुबंधत्ति ॥"

तपोविशेषमाश्रित्योक्तं पञ्चाशके—

"एवं पडिवत्तीए इत्तो मग्गाणुसारिभावाओ।
चरणं विहिअं बहवे पत्ता जीवा महाभागा ॥"

तथा प्रव्रज्यामाश्रित्य तत्रैवोक्तम्—

"दिक्खाविहाणमेअं भाविज्जंतं तु तंतणीईए।
सइअपुणबंधगाणं कुगाहविरहं लहु कुणइ ॥"

प्रथमकरणभेदेन ग्रन्थ्यासन्नो यतिर्वा श्राद्धो वा।
नैगमनयमतभेदादिह देशाराधको ज्ञेयः॥ २७॥

---

१ प्रथमकरणभेदेन ग्रन्थ्यासन्नस्य धर्ममात्रफलो।
साधुत्वकादिभावो जायते नानुबन्ध इति॥

२ एवं प्रतिपत्त्येतः मार्गानुसारिभावात्।
चरणं विहितं बहवो प्राप्ता जीवा महाभागाः॥

३ दीक्षाविधानमेतद् भाव्यमानं तु तन्त्रनीत्या।
सकृदपुनर्बन्धकयोः कुग्रहविरहं लघु करोति॥

" एतद्वृत्तिर्यथा—दीक्षाविधानं जिनदीक्षाविधिरेतदनन्तरोक्तं ' भाविज्जंतं तु ' त्ति भाव्यमानमपि पर्यालोच्यमानमपि आस्तामासेव्यमानं सकृद्बन्धकापुनर्बन्धकाभ्यामिति गम्यम् । अथवा भाव्यमानमेव नाभाव्यमानमपि, तुशब्दोऽपिशब्दार्थ एवकारार्थो वा, तन्त्रनीत्या—आगमन्यायेन, कयोः ? इत्याह-सकृदेकदा न पुनरपि च बन्धो मोहनीयकर्मोत्कृष्टस्थिति बन्धनं यस्यास्तौ सकृदपुनर्बन्धकौ तयोः, सकृद्बन्धकस्यापुनर्बन्धकस्य चेत्यर्थः । तथा यो यथाप्रवृत्तकरणेन ग्रन्थिप्रदेशमागतोऽभिन्नग्रन्थिः सकृदेवोत्कृष्टां सागरोपमकोटाकोटिसप्ततिलक्षणां स्थितिं भन्त्स्यति असौ सकृद्बन्धक उच्यते, यस्तु तां तथैव क्षपयन् ग्रन्थिप्रदेशमागतः पुनर्नेतां भन्त्स्यति भत्स्यति च ग्रन्थि सोऽपुनर्बन्धक उच्यते । एतयोश्चाभिन्नग्रन्थित्वेन कुग्रहः संभवति, न पुनर्विरतसम्यग्दृष्ट्यादीनाम्, मार्गाभिमुखमार्गपतितयोस्तु कुग्रहसंभवेऽपि तत्त्याग एतद्भावनामात्रसाध्य इत्यत उक्तं—सकृद्बन्धकापुनर्बन्धकयोरिति । एतयोश्च भावसम्यक्त्वाभावादीक्षायां द्रव्यसम्यक्त्वमेवमारोप्यते इति कुग्रहाविरहमसदभिनिवेशवियोगं लघु शीघ्रं करोति विधत्ते इति ॥ "

तथा च धर्ममात्रफलानुष्ठानवतां गीतार्थनिश्रितसाधुश्रावकाणामपि भावतोऽनधिगतश्रुतज्ञानत्वाच्छीलवत्त्वाच्च देशाराधकत्वमेव तथैव परिभाषणात्, चारित्रमोहनीयक्षयोपशमविशेषाद्भावतोऽधिगतश्रुतज्ञानानां शीलवतां द्रव्यतोऽल्पश्रुतानामपि माषतुषादीनां त्वेवं सर्वाराधकत्वमेव परिशिष्यते इति द्रष्टव्यम् ॥ २७ ॥

विवेचितः प्रथमो भङ्गः, अथ द्वितीयं भङ्गं विवेचयन्नाह—

देसस्स भंगओ वा अलाहओ वा विराहगो बीओ।
संविग्गपक्खिओ वा सम्मद्दिट्ठी अविरओ वा ॥२८॥

देसस्सत्ति । देशस्य मोक्षमार्गतृतीयांशभूतस्य चारित्रस्य गृहीतस्य भङ्गादलाभाद्वा देशस्य विराधको ज्ञेयः । स च देशभङ्गापेक्षया संविग्नपाक्षिको देशाप्राप्त्यपेक्षया चाविरतसम्यग्दृष्टिः, तथा च ज्ञानदर्शनवत्त्वे सति चारित्रभङ्गप्राप्त्यन्यतरवत्त्वं देशविराधकत्वमिति परिभाषितं भवति ॥ इत्थं च जिनोक्तानुष्ठानमधिकृत्यैव कृतप्रतिज्ञा-

देशस्य भङ्गतो वा आराधको वा विराधको द्वितीयः ।
संविग्नपाक्षिको वा सम्यग्दृष्टिरविरतो वा ॥ २८ ॥

विरतिलक्षणदेशाराधकः, विरतिपरित्यागेनैव चाविरतसम्यग्दृष्टिरपि देशविराधकः, "प्राप्तस्य तस्यापालनाद्" इति वचनात् इत्युभयोरपि प्रकारयोः सविषयत्वेन प्रामाण्यसिद्धे 'यदप्राप्तेर्वा' इति विकल्पेन व्याख्यानं तत्केनाभिप्रायेण ? इति संशये सम्यग्वक्तृवचनं वयमपि श्रोतुकामाः स्म इति बोध्यम्, यतो यद्यप्राप्तिमात्रेण विराधकत्वं स्यात् तर्हि चरकपरिव्राजकादीनां ज्योतिष्कादूर्ध्वमुपपाताभावः प्रसज्येत, मोक्षकारणभूतानां सम्यग्ज्ञानादीनां त्रयाणां लेशतोऽप्यभावेन देशविरतिसर्वविरत्योर्युगपद्विराधकत्वात्। तथा 'द्वादशाङ्गपर्यन्तनानाश्रुतावधिप्रवृत्त्यप्राप्तिमान् छद्मस्थसंयतो दूरे, केवल्यप्यप्राप्तजिनकल्पादेर्विराधकः प्रसज्येत' इति यत्परेण प्राचीनग्रन्थदूषणरसिकेन प्रोक्तं तत्परिभाषाज्ञानाभावविजृम्भितमिति द्रष्टव्यम्। यो यदप्राप्तिमान् स तद्विराधक इति व्याप्तौ च तत्र तात्पर्याभावात्, किन्तूक्तपरिभाषायामेव तात्पर्यात्। तत्फलं च देशविराधकत्वेन देशद्वयाराधकत्वाक्षेपः। तथा च पूर्वभङ्गादाधिक्यं लभ्यते, तेन देशविराधकत्वेऽविरतसम्यग्दृष्टेर्देशाराधकादप्यधमत्वं स्यादित्यपास्तम्, परिभाषितस्य विराधकत्वस्याधमत्वाप्रयोजकत्वात् प्रत्युत देशद्वयाराधकत्वाक्षेपकतयोत्कर्षप्रयोजकत्वात्। न च परिभाषा न सूत्रनीतिरिति शङ्कनीयम्, "सव्वामगंधं परिच्चज्ज निरामगंधो परिव्वए" इत्यादीनां परिभाषासूत्राणामपि तन्त्रव्यवस्थापितत्वाद्। यदि च देशविराधकत्वं नैवं पारिभाषिकमङ्गीक्रियते, तदाऽनुपात्तव्रतः सम्यग्दृष्टिः कस्मिन् भङ्गेऽवतारणीयः ?। न च नावतारणीय एव, सर्वाराधकादन्यत्र सहकारियोग्यताभावाभिधानाय त्रिभिरेव भङ्गैः सर्वेषां तद्विलक्षणानां संग्राह्यत्वादिति सूक्ष्ममीक्षणीयम् ॥ २८ ॥

तृतीयचतुर्थभङ्गौ विवेचयति=

तइए भंगे साहू सुअवंतो चेव सीलवंतो अ।
उवयारा सड्ढोवि य भवाभिणंदी चउत्थंमि ॥२९॥

तृतीये भङ्गे साधुः श्रुतवाँश्चैव शीलवाँश्च।
उपचारात् श्राद्धोऽपि च भवाभिनन्दी चतुर्थे ॥ २९ ॥

१ सर्वामगन्धं परित्यज्य निरामगन्धः परिव्रजेत् ॥ (आचार)

तइए भंगेत्ति। श्रुतवाँश्चैव शीलवाँश्च साधुस्तृतीयभङ्गे सर्वाराधकलक्षणे समवतारणीयः, उपरतत्वाद् भावतो विज्ञातधर्मत्वाच्च त्रिप्रकारस्यापि मोक्षमार्गस्याराधकत्वात्। श्राद्धोऽपि चोपचारात्तृतीयभङ्ग एव, देशविरतौ सर्वविरत्युपचारात् ज्ञानदर्शनयोश्चाप्रतिहतत्वात्। तत्र च चतुर्थभङ्गे सर्वविराधकलक्षणे भवाभिनन्दी क्षुद्रत्वादिदोषवान् देशतोऽप्यनुपरतो मिथ्यादृष्टिरिति ॥ २९ ॥

अत्र केचिद्वदन्ति यो मिथ्यादृष्टिरन्यमार्गस्थः स सर्वविराधको भवतु, यस्तु जैनमार्गस्थः स भवाभिनन्द्यपि न तथा, व्यवहारस्य बलवत्त्वात्, "ववहारोवि हु बलवन्तो" इति वचनप्रामाण्यादिति तन्मतनिराकरणार्थमाह—

भावो जेसिमसुद्धो ते ववहारट्ठियावि एरिसया।
णिच्छयपरंमुहो खलु ववहारो होइ उम्मग्गो ॥३०॥

भावोत्ति। भावश्चित्तपरिणामो येषामशुद्धः—अपुनर्बन्धकादुत्तीर्णत्वेन लेशेनापि निश्चयास्पर्शी ते व्यवहारस्थिता अपि—स्वाभिमतैहिकप्रयोजनार्थं व्यवहारमाश्रिता अपि ईदृशकाः सर्वविराधका एव, निश्चयपराङ्मुखः खलु व्यवहार उन्मार्गो भवतीति न तेषां क्लिष्टकर्मणां स त्राणायेति। यस्तु व्यवहारो बलवानभ्युपायि स निश्चयप्रापको न तु तदप्रापकः। अत एव 'अधिधिनाप्यभ्यासो विधेयः, दुःषमायां विधेर्दुर्लभत्वात्, तस्यैव चाश्रयणे मार्गोच्छेदप्रसङ्गात्'—इत्याद्यशास्त्रीयाभिनिवेशपरित्यागार्थं विधियन्त एव व्यवहारशुद्धयेतुः शास्त्रे कर्तव्यतयोपदेशितः। तदुक्तं पञ्चाशके—

"आलोइऊण एयं तंतं पुव्वावरेण सूरीहिं।
विहिजत्तो कायव्वो मुद्धाण हियट्ठया सम्मं ॥" इति।

भावो येषामशुद्धस्ते व्यवहारस्थिता अपीदृशकाः।
निश्चयपराङ्मुखः खलु व्यवहारो भवत्युन्मार्गः ॥ ३० ॥

---

१ व्यवहारोऽपि खलु बलवान्।
२ आलोच्य एतं तन्त्रं पूर्वापरेण सूरिभिः।
विधियन्तः कर्तव्यो मुग्धानां हितार्थाय सम्यग् ॥

एतद्वृत्तिर्यथा–"आलोच्य-विमृश्यैवं पूर्वोक्तन्यायेन तन्त्रवचनम्, कथम्? इत्याह-पूर्वश्च-तन्त्रस्य पूर्वो भागोऽपरश्च-तस्यैवापरो भागः पूर्वापरं तेन, सप्तम्यर्थे वा एनप्रत्यये सति पूर्वापरेणेति पूर्वापरभावयोरित्यर्थः, तयोरविरोधेनेति यावत्। अनेन चालोचनमात्रस्य व्यवच्छेदः, तस्य तत्त्वावबोधासमर्थत्वादिति सूरिभिराचार्यैः पण्डितैर्वा विधौ विधाने वन्दनागतवेलाद्याराधनरूपे यत्न उद्यमो विधियत्नः स कर्तव्यो विधातव्यो विमुक्तालस्यैः। स्वयं विधिना वन्दना कार्या, अन्येऽपि विधिनैव तां विधापयितव्या इत्यर्थः। किमर्थमेतदेवम्? इत्याह–मुग्धानामव्युत्पन्नबुद्धीनां हितं श्रेयस्तद्रूपो योऽर्थः स हितार्थस्तस्मै हितार्थाय, सम्यगविपरीततया। यदा हि गीतार्था विधिना स्वयं वन्दनां विदधति, अन्यांश्च तथैव विधापयन्ति, तदा मुग्धबुद्धयोऽपि तथैव प्रवर्तन्ते, प्रधानानुसारित्वान्मार्गाणाम्।।"

आह च–

"जो उत्तमेहिं मग्गो पहओ सो दुक्करो न सेसाणं।
आयरिअंमि जयंते तयणुचरा के णु सीयंति॥

तथा–

जे जत्थ जया जइआ बहुस्सुआ चरणकरणउज्जुत्ता।
जं ते समायरंती आलंबणं तिव्वसद्धाणं॥"

'जय'त्ति दुषमादौ, 'जइअ'त्ति दुर्भिक्षादाविति। तथाप्रवृत्ताश्च ते वन्दनाधनजन्यं हितमासादयन्ति, तद्विराधनाजन्यद्रव्यपापेभ्यश्च मोचिता भवन्तीति। अयं चोपदेशोऽसमञ्जसतया स्वयं वन्दनां विदधानाँस्तथाऽनवाप्तापुनर्बन्धकाद्यवस्थेभ्यस्तथाविधजिज्ञासादितल्लिङ्गविकलेभ्यो जनेभ्यस्तां प्रयच्छतः सूरीन् वीक्ष्य आचार्येण विहितः, एवं हि तत्प्रवृत्तौ तेषामन्येषां चानर्थोऽसमञ्जसक्रियाजन्या च शासनापभ्राजना मा भूदित्यभिप्रायेणेति गाथार्थ। इति। अत एव च कालानुभावाज्जैनप्रवचनेऽप्यल्पस्यैव जनस्याराधकस्य दर्शनात् जिनाज्ञारुचिशुद्धेष्वेव भक्तिमानादिकार्यमिति पूर्वाचार्या वदन्ति॥

---

१ य उत्तमैर्मार्गः प्रहतः स दुष्करो न शेषाणाम्।
आचार्ये जयति तदनुचराः के नु सीदन्ति॥

२ ये यत्र यदा यदा बहुश्रुताश्चरणकरणोपयुक्ताः।
यत्ते समाचरन्ति आलम्बनं तीव्रश्रद्धानाम्॥

उक्तं चोपदेशपदे—

"एवं पाएण जणा कालणुभावा इहंपि सव्वेवि ।
णो सुंदरत्ति तम्हा आणासुद्धेसु पडिबंधो ॥" त्ति ॥

एतद्वृत्तिर्यथा—एवमनन्तरोक्तोदाहरणवत्प्रायो बाहुल्येन जना लोकाः कालानुभावाद्वर्तमानकालसामर्थ्याद् इहापिजैनमतेऽपि सर्वेऽपि साधवः श्रावकाश्च नो—नैव सुन्दरा वर्तन्ते; किन्त्वनाभोगादिदोषाच्छात्रप्रतिकूलवृत्तय इति पूर्ववत् तस्मात्कारणादाज्ञाशुद्धेषु— सम्यगधीतजिनागमाचारवैशाच्छुद्धिमागतेषु साधुषु श्रावकेषु च बहुमानः कर्तव्य इति ॥ ३० ॥

नन्वेवं विधिविकलव्यवहारस्याराधकत्वाप्रयोजकत्वेऽपि विधिशुद्धव्यवहारस्य भावहीनस्याप्याराधकत्वप्रयोजकत्वे किं बाधकं परं प्रति, तस्य निश्चयप्रापकत्वाद् इत्यत आह—

भावुज्झियववहारा ण किंपि आराहगत्तणं होइ ।
भावो उ बोहिबीजं सव्वण्णुमयंमि थोवोवि ॥३१॥

भावोज्झिअत्ति । भावोज्झितव्यवहाराद् भवाभिनन्दिनां द्रव्यव्रतधारिणां विधिसमग्रादपि न किमप्याराधकत्वं भवति, परं प्रति निश्चयप्रापकस्यापि तस्य स्वकार्याकारित्वाद् । भावस्तु सर्वज्ञमते स्तोकोऽपि बोधिबीजम्, विशेषधर्मविषयस्य स्तोकस्यापि भावस्य विशेषफलत्वाद् । अत एवापूर्वा धर्मचिन्ताऽपि प्रथमं समाधिस्थानमुक्तम् ।

तदुक्तं समवायाङ्गे—"धम्मचिंता वा से असमुप्पण्णपुव्वा समुप्पज्जेज्जा सव्वं धम्मं जाणित्तए "त्ति ॥

एतद्वृत्तिर्यथा—"तत्र धर्मा जीवादिद्रव्याणां संयोगोत्पादादयः स्वभावास्तेषां चिन्ता-अनुप्रक्षा, धर्मस्य वा श्रुतचारित्रात्मकस्य सर्वज्ञभाषितस्य 'हरिहरा-

---

भावोज्झितव्यवहारान्न किमप्याराधकत्वं भवति ।
भावस्तु बोधिबीजं सर्वज्ञमते स्तोकोऽपि ॥ ३१ ॥

---

१ एवं प्रायेण जना कालानुभावादिहापि सर्वेऽपि ।
न सुन्दरा इति तस्मादाज्ञाशुद्धेषु प्रतिबन्धः ॥

२ धर्मचिन्ता वा ते असमुत्पन्नपूर्वा समुत्पद्येत सर्वं धर्मं ज्ञातुम् ॥

दिनिगदितधर्मेभ्यः प्रधानोऽयम् ' इत्येवं चिन्ता, वाशब्दो वक्ष्यमाणसमाधिस्थानापेक्षया विकल्पार्थः 'से' इति, यः कल्याणभागी तस्य साधोरसमुत्पन्नपूर्वापूर्वस्मिन्ननादावतीतकालेऽनुपजाता, तदुत्पादे ह्यपार्द्धपुद्गलपरावर्तान्ते कल्याणस्यावश्यंभावात् समुत्पद्येत-जायेत। किं प्रयोजना चेयम्? अत आह—सर्वं निरवशेषं धर्मं जीवादिद्रव्यस्वभावमुपयोगोत्पादादिकं श्रुतादिरूपं वा ' जाणित्तए ' ज्ञपरिज्ञया ज्ञातुं ज्ञात्वा च प्रत्याख्यानपरिज्ञया परिहरणीयधर्मं परिहर्तुम्। इदमुक्तं भवति—धर्मचिन्ता धर्मज्ञानकरणरूपा जायते इति ॥ "

अत्रापूर्वधर्मचिन्तायां उत्कर्षतोऽपार्द्धपुद्गलपरावर्तं व्यवधानेन कल्याणकारणत्वमुक्तम्, अन्यत्र च मुक्त्यद्वेषादिगुणानां चरमपुद्गलपरावर्तव्यवधानेनेति प्रवचनपूर्वापरभावपर्यालोचनया गुणसामान्यस्य चरमावर्तमानत्वमस्माभिरुन्नीयते। यदि चैवमपि स्वतन्त्रपरतन्त्रसाधारणापुनर्बन्धकादिगुणानामपार्द्धपुद्गलपरावर्तमानत्वमेव सकलगीतार्थसंमतं स्यात् तदा नास्माकमाग्रह इत्यस्यां परीक्षायामुपयुक्तैर्भवितव्यं गीतार्थैः प्रवचनाशातनाभीरुभिः ॥ ३१ ॥

तदेवं विवेचिता चतुर्भङ्गी, अथास्यां को भङ्गोऽनुमोद्यः? को वा न? इति परीक्षते—

तिण्णि अणुमोयणिज्जा एएसुं णो पुणो तुरियभंगो।
जेणमणुमोयणिज्जो लेसोवि हु होइ भावस्स ॥३२॥

तिण्णित्ति। एतेषु देशाराधकादिषु चतुर्षु भङ्गेषु त्रयो भङ्गा। देशाराधक-देशविराधक-सर्वाराधकलक्षणा अनुमोदनीया न पुनस्तुरीयो भङ्गः सर्वविराधकलक्षणः, येन कारणेन भावस्य लेशोऽपि ह्यनुमोदनीयः, न चासौ सर्वविराधके संभवति, देशाराधकादिषु तु मार्गानुसारिभावविशेषसंभवात्, तदनुमोदनीयत्वे तद्द्वारा तेषामप्यनुमोदनीयत्वमावश्यकमिति भावः ॥३२॥

अथ किमनुमोदनीयत्वम्? का चानुमोदना? इत्येतल्लक्षणमाह—

त्रयोऽनुमोदनीया एतेषु न पुनस्तुरीयभङ्गः।
येनानुमोदनीयो लेशोऽपि हि भवति भावस्य ॥ ३२ ॥

अणुमोअणाइ विसओ जं तं अणुमोअणिज्जयं होइ।
सो पुण पमोअमूलो वावारो तिण्ह जोगाणं ॥३३॥

'अणुमोअणाइ'त्ति। अनुमोदनाया विषयो यद्वस्तु तदनुमोदनीयं भवति। तद्विषयत्वं च भावस्य साक्षाद् भावप्रधानत्वात्साधूनाम्।

तदुक्तमोघनिर्युक्तौ—

" परमरहस्समिमाणं समत्तगणिपिडयझरिअसाराणं।
परिणामयं पमाणं णिच्छयमवलंबमाणाणं ॥ 'ति।

तत्कारणक्रियायाश्च तदुत्पादनद्वारा।

यद् हरिभद्रं वचः—

" कज्जं इच्छंतेण अणंतरं कारणंपि इट्ठंति।
जह आहारजतित्तिं इच्छंतेणेहमाहारो ॥ "त्ति।

पुरुषस्य च तत्संबन्धितयेति तत्त्वतः सर्वत्र भावापेक्षमेवानुमोदनीयत्वं पर्यवस्यति। साऽनुमोदना पुनः प्रमोदमूलो हर्षपूर्वकस्त्रयाणां योगानां कायवाङ्मनसां व्यापारो रोमाञ्चोद्गम-प्रशंसा-प्रणिधानलक्षणो न तु मानसव्यापार एव, अनुमोदनाया अपि योगभेदेन त्रिविधायाः सिद्धान्तप्रतिपादनात्। मानसव्यापारस्यैवानुमोदनात्वे प्रशंसादिसंवलनादनुमोदनाफलविशेषानुपपत्तेश्च। न च यथा नैयायिकैकदेशिनां मङ्गलत्वादिकमानसत्वव्याप्या जातिस्तथाऽस्माकमनुमोदनात्वमपि तथेति, त्रयाणामपि योगानां हर्षमूलो व्यापारोऽनुमोदनेति वस्तुस्थितिः यश्चानुमोदनाव्यपदेशः क्वचिच्चित्तोत्साहे एव प्रवर्तते स सामान्यवाचकपदस्य विशेषपरत्वाद् निश्चयाश्रयणाद्वेत्यवधेयम् ॥ ३३ ॥

अनुमोदनीया विषयो यद्वस्तु तदनुमोदनीयं भवति।
स पुनः प्रमोदमूलो व्यापारो त्रयाणां यागानाम् ॥ ३३ ॥

---

१ परमरहस्यमेषां समस्तगणिपिटकक्षरितसाराणाम्।
परिणामः प्रमाणं निश्चयमवलम्बमानानाम् ॥
कार्यमिच्छता अनन्तरं कारणमिष्टमिति।
यथाऽऽहारजतृप्तिमिच्छता इहाहारः ॥

एवं सति योऽनुमोदनाप्रशंसयोर्विषयभेदेन भेदमेवाभ्युपगच्छति तन्मतनिरासार्थमाह—

सामन्नविसेसत्ता भेओ अणुमोअणापसंसाणं ।
जह पुढवीदव्वाणं ण पुढो विसयस्स भेएणं ॥३४॥

'सामन्नविसेसत्त'त्ति । अनुमोदनाप्रशंसयोः सामान्यविशेषत्वात् सामान्यविशेषभावाद्भेदः, यथा पृथिवीद्रव्ययोः । द्रव्यं हि सामान्यं, पृथिवी च विशेषः । एवमनुमोदना सामान्यं प्रशंसा च विशेष इत्येतावाननयोर्भेदः, न पुनः पृथग् विषयस्य भेदेनात्यन्तिको भेदः, प्रशंसाया अनुमोदनाभेदत्वेन तदन्यविषयत्वासिद्धेः । नहि घटप्रत्यक्षं प्रत्यक्षभिन्नविषयमिति विपश्चिता वक्तुं युक्तम्, न च मानसोत्साहरूपाऽनुमोदनाया अपि प्रशंसाया भिन्नविषयत्वनियमः, प्रकृतिसुन्दरस्यैव वस्तुनः सम्यग्दृशामनुमोदनीयत्वात्प्रशंसनीयत्वाच्च । न चानुमोदनायाः स्वेष्टसाधकमेव वस्तु विषयः, तादृशस्यैव तपःसंयमादेरारम्भपरिग्रहादेर्वा विरतैरविरतैश्चानुमोदनात्, न तु परेष्टसाधकम्, आत्मनश्चानिष्टसाधनमपि निजधनापहारस्याप्यनुमोदनीयत्वापत्तेः । प्रशंसायाश्चेष्टमनिष्टं च वस्तु विषयः, इष्टस्य धार्मिकानुष्ठानस्यानिष्टस्य चाज्ञाबाह्यस्य वस्तुनः प्रशंसाव्यवस्थितेः । भवति हि निजकार्यादिनिमित्तमसद्गुणस्यापि प्रशंसा । अत एवायमागमोऽपि—

"चउहिं ठाणेहिं असंते गुणे दीवेज्जा, १ अब्भासवत्तियं २ परछंदाणुवत्तियं ३ कज्जहेउ ४ कयपडिकइए"त्ति ।

सा चेयमनिष्टप्रशंसाऽतिचाररूपापि प्रयोजनविशेषेण कस्यचित्कादाचित्की स्यादित्येतदपि वचनं शोभनम्, स्वारसिकप्रशंसाया अनिष्टाविषयत्वात्, पुष्टालम्बनकानिष्टप्रशंसाया अपीष्टविषयत्वपर्यवसानात् । न हि किंचिज्जात्येष्टमनिष्टं वा वस्तु विद्यते, किंतु परिणा-

---

सामान्यविशेषत्वाद् भेदोऽनुमोदनाप्रशंसयोः ।
यथा पृथिवीद्रव्ययोः, न पृथग् विषयस्य भेदेन ॥ ३४ ॥

---

१ चतुर्भिः स्थानैरसन्तो गुणान् दीपयेत्, १ अभ्यासप्रत्ययं २ परच्छन्दानुवर्तित्वं ३ कार्यहेतु ४ कृतप्रतिकृत्याः इति ॥

मविशेषेण भजनीयमिति । यदुवाच कल्पाकल्पविभागमाश्रित्य वाचकमुख्यः—

किञ्चिच्छुद्धं कल्प्यमकल्प्यं स्यादकल्प्यमपि कल्प्यम् ।
पिण्डः शय्या वस्त्रं पात्रं वा भेषजाद्यं वा ॥ "इति ।

मोहप्रमादादिनाऽनिष्टविषयत्वं च प्रशंसाया इवानुमोदनाया अपि भवतीति न कोऽपि विषयभेदः । न चानिष्टविषयतावच्छेदेनोपचारानुपचारप्रवृत्त्याऽनयोरतिचारभङ्गभावाद् भेदः, अभिमतोपचारेणातिचारत्वाभावात् । अन्यथा—

" [1]संथरणंमि असुद्धं दोण्हवि गिण्हंतदिंतयाणहियं ।
आउरदिट्ठंतेणं तं चेव हियं असंथरणे ॥ "

इत्यादौ कारणिकाशुद्धग्रहणप्रशंसाया अप्यतिचारबलप्रसङ्गाद् । अनभिमतोपचारादतिचारभङ्गयोस्तु परिणामभेदः प्रयोजको न तु विषयभेद इति यत्किंचिदेतत् । शास्त्रेऽपि प्रशंसा अनुमोदनाविशेष एव गीयते ।

तदुक्तं पञ्चाशकवृत्तिकृता—" जेइणोवि हु दव्वत्थयभेओ अणुमोअणेण अत्थित्ति "—इति प्रतिकं विवृण्वता यतेरपि-भावस्तवारूढसाधोरपि न केवलगृहिण एव । हुशब्दोऽलंकृतौ । द्रव्यस्तवभेदो द्रव्यस्तवविशेषोऽनुमोदनेन जिनपूजादिदर्शनजनितप्रमोदप्रशंसादिलक्षणयाऽनुमत्या अस्ति विद्यते इतिशब्दो वाक्यपरिसमाप्तमिति ॥

एवमनुमोदनाप्रशंसयोर्विषयभेदाभावे सिद्धेऽनुमोदनीयप्रशंसनीययोर्विषमव्याप्तिं परिहरन्नाह—

तेणमणुमोअणिज्जं पसंसणिज्जं च होइ जाईए ।
सुद्धं किच्चं सव्वं भावविसिट्ठं तु अन्नंपि ॥ ३५ ॥

तेनानुमोदनीयं प्रशंसनीयं च होइ जात्या ।
शुद्धं कृत्यं सर्वं भावविशिष्टं त्वन्यदपि ॥ ३५ ॥

---

१ संस्तरणे अशुद्धं द्वयोरपि गृह्णद्ददतोरहितम् ।
आतुरदृष्टान्तेन तदेव हितमसंस्तरणे ॥

२ यतेरपि खलु द्रव्यस्तवभेदोऽनुमोदनेन ॥

'तेणं' ति। तेनानुमोदनाप्रशंसयोर्विषयभेदाभावेनानुमोदनीयं प्रशंसनीयं च सर्वं शुद्धं स्वरूपकृत्यं दया दान-शीलादिकं च जात्या स्वरूपयोरयताऽवच्छेदकरूपेण भवति। यद्रूपावच्छेदेन यत्र सुन्दरत्वज्ञानं तद्रूपविशिष्टप्रतिसंधानस्य तद्रूपावच्छिन्नविषयकहर्षजनकत्वाद्। अत एव शुद्धाहारग्रहणदानादिव्यक्तीनां सर्वासामसुन्दरत्वेऽपि कासांचिच्चाशुद्धाहारदानादिव्यक्तीनामप्यवाद्कालभाविनीनां सुन्दरत्वेऽपि साधोः शुद्धाहारग्रहणं सुन्दरम्, श्रावकस्य च शुद्धाहारदानमित्यय-मेवोपदेशो युक्तो न त्वशुद्धाहारग्रहणदानोपदेशोऽपि, सामान्यपर्य-वसायित्वात्तस्य; सामान्यपर्यवसानस्य च स्वरूपशुद्ध एव वस्तुन्युचि-तत्वात्, स्वरूपशुद्धं हि वस्तु जात्याऽप्यनुमोद्यमानं हितावहमिति। भावविशिष्टं तु—अपुनर्बन्धकादिभावसंवलितं तु, अन्यदपि विषयशु-द्धादिकमपि वस्त्वनुमोद्यम्। 'भावविशिष्टा क्रिया सुन्दरा' इत्यादि-प्रशंसया भावकारणत्वेन विषयशुद्धादावपि कृत्ये स्वोत्साहसंभवात्। न चैवमपुनर्बन्धकोचितविषयशुद्धकृत्येऽपि साधोः प्रवृत्यापत्तिः, स्वा-भिमततत्तद्धर्माधिकारीष्टसाधनत्वेन प्रतिसंहितेऽधस्तनगुणस्थानवर्त्य-नुष्ठाने स्वोत्साहसंभवेऽपि स्वाधिकाराभावेन तत्राप्रवृत्तेः। अत एव 'शोभनमिदमेतावज्जन्मफलमविरतानाम्' इतिवचनलिङ्गगम्यस्वोत्सा-हविषयेऽपि जिनपूजादौ श्राद्धाचारे न साधूनां प्रवृत्तिरिति बोध्यम्। इत्थं च भावानुरोधादपुनर्बन्धकादेरारभ्यायोगिकेवलिगुणस्थानं याव-त्सर्वमपि धर्मानुष्ठानमनुमोदनीयं प्रशंसनीयं चेति सिद्धम्॥

उक्तं चोपदेशपदसूत्रवृत्त्योः—

तो एअंम्मि पयत्तो ओहेणं वीअराअवयणंमि।
बहुमाणो कायव्वो धीरेहिं कयं पसंगेणं॥"

"तत् तस्माद् एतस्मिन् धर्मबीजे प्रयत्नो यत्नातिशयः 'कर्तव्यो धीरैः' इत्युत्तरेण योगः। किंलक्षणः प्रयत्नः कर्तव्यः? इत्याशङ्क्य आह—ओघेन सामा-न्येन वीतरागवचने वीतरागागमप्रतिपादितेऽपुनर्बन्धकचेष्टाप्रभृत्ययोगिकेवलिप-

---

१ तत एतस्मिन् प्रयत्न ओघेनः वीतरागवचने।
बहुमानः कर्तव्यो धीरैः कृतं प्रसङ्गेन॥

र्यवसाने तत्तच्चित्रशुद्धसमाचारे बहुमानो भावप्रतिबन्धः क्षयोपशमवैचित्र्यान्मृदुमध्याधिमात्रः कर्तव्यो धीरैर्बुद्धिमद्भिः । उपसंहरन्नाह—कृतं प्रसङ्गेन पर्यायधर्मबीजप्रख्यापनेनेति । भावानुरोधेन ह्यनुष्ठानस्यानुमोदनप्रशंसे विहिते, भावश्चापुनर्बन्धकाद्यनुष्ठाने नियत एव, अन्ततो मोक्षाशयस्यापि सत्त्वात्, तस्याप्यचरमपुद्गलपरावर्ताभावित्वेन मोहमलमन्दतानिमित्तकत्वेन शुद्धत्वात् ।

तदुक्तं विंशिकायाम्—

"मोक्खासओवि णण्णत्थ होइ गुरुभावमलपहावेणं ।
जह गुरुवाहिविगारेण जाउ पच्छासओ सम्मं ॥" इति[1]

अन्यत्र चरमपुद्गलपरावर्तादन्यत्र । ततो विषयशुद्धादिकं त्रिविधमप्यनुष्ठानं प्रशस्तमिति सिद्धम् ॥

उक्तं च विंशिकायामेव—

"[2]विसयसरूवणुबंधेण होइ सुद्धो तिहा इहं धम्मो ।
जं ता मुक्खासयाओ सव्वो किल सुन्दरो णेओ ॥" इति

विषयशुद्धादिभेदश्चायं योगबिन्दावुपदर्शितः—

"विषयात्मानुबन्धैस्तु त्रिधा शुद्धमुदाहृतम् ।
अनुष्ठानप्रधानत्वं ज्ञेयमस्य यथोत्तरम् ॥
आद्ये यदेव मुक्त्यर्थं क्रियते पतनाद्यपि ।
तदेव मुक्त्युपादेयलेशभावाच्छुभं मतम् ॥
द्वितीयं तु यमाद्येव लोकदृष्ट्या यमादिकम् ।
न यथाशास्त्रमेवेह सम्यग्ज्ञानाद्ययोगतः ॥
तृतीयमप्यदः किन्तु तत्त्वसंवेदनानुगम् ।
प्रशान्तवृत्त्या सर्वत्र दृढमौत्सुक्यवर्जितम् ॥" इति ।

ननु भवतु विषयशुद्धाद्यनुष्ठानत्रयमपुनर्बन्धकादौ कथंचित्सुन्दरम्, तथाऽपि वीतरागवचनप्रतिपादितस्यैव तद्गतस्यानुष्ठानस्यानुमोद्यत्वं

---

१ मोक्षाशयोऽपि नान्यत्र भवति गुरुभावमलप्रभावेण ।
यथा गुरुव्याधिविकारेण जातपथ्याशयः सम्यक् ॥

२ विषयस्वरूपानुबन्धैन भवति शुद्धो त्रिधेह धर्मः ।
यत्ततो मोक्षाशयात्सर्वः किल सुन्दरो ज्ञेयः ॥

नान्यस्य, "जो चेव भावलेसो सो चेव भगवओ अणुमओ।"[1] इत्यत्र भगवद्बहुमानरूपस्यैव भावलेशस्यानुमोद्यत्वप्रतिपादनादिति चेद्। न, अन्यत्रापि भवाभिनन्दिदोषप्रतिपक्षमोक्षाशयभावस्य तत्त्वतो भगवद्बहुमानरूपत्वाद् 'भवनिर्वेदस्यैव भगवद्बहुमानत्वाद्' इति ललितविस्तरापञ्जिकावचनात्, स्वरूपशुद्धं चानुष्ठानं सर्वत्रापि तत्त्वतो भगवत्प्रणीतमेवेति, तत्प्रशंसया भवत्येव भगवद्बहुमानः। व्युत्पन्ना ह्यन्यशास्त्रे कथंचिदुपनिबद्धानपि मार्गानुसारिगुणान् भगवत्प्रणीतत्वेनैव प्रतियन्ति।

तदाहुः श्रीसिद्धसेनसूरयः—

"सुनिश्चितं यः परतन्त्रयुक्तिषु स्फुरन्ति याः काश्चन सूक्तसंपदः।
तदेव ताः पूर्वमहार्णवोद्धृता जगत्प्रमाणं जिनवाक्यविप्रुषः॥"[2] इति

नन्दिवृत्तावप्येवमेवोक्तम्—"परदर्शनशास्त्रेष्वपि हि यः कश्चित्समीचीनार्थः संसारासारता-स्वर्गादिहेतुप्राण्यहिंसादिरूपः स भगवत्प्रणीतशास्त्रेभ्य एव समुद्धृतो वेदितव्यः। न खल्वतीन्द्रियार्थपरिज्ञानमन्तरेणातीन्द्रियः प्रमाणाबाधितार्थः पुरुषमात्रेणोपदेष्टुं शक्यते, अविषयत्वाद्। न चातीन्द्रियार्थपरिज्ञानं परतीर्थिकानामस्तीत्यग्रे वक्ष्यामः। ततस्ते भगवत्प्रणीतशास्त्रेभ्यो मौलं समीचीनमर्थलेशमुपादाय पश्चादभिनिवेशवशतः स्वमत्यनुसारेण तास्ताः प्रक्रियाः प्रपञ्चितवन्तः। उक्तं च स्तुतिकारेण—"सुनिश्चित०" इत्यादि।

ननु दयादिवचनानि परमते तत्त्वतो जिनवचनमूलान्यपि स्वस्वमताधिदैवतवचनत्वेन परिगृहीतत्वादेव नानुमोदनीयानि, अत एव मिथ्यादृष्टिभिः स्वस्वदैवतबिम्बत्वेन परिगृहीताऽर्हत्प्रतिमाऽप्युपासकदशाङ्गादिष्ववन्द्यत्वेन प्रतिपादितेति चेत्। अत्र वदन्ति सम्प्रदायविदः यथा मिथ्यादृक्परिगृहीता तीर्थकृत्प्रतिमा मिथ्यात्वाभिवृद्धिनिवारणाय न विशेषेण नमस्क्रियते, सामान्येन तु "[3]जं किंचि नाम तित्थं०" इत्यादिना "[4]जावंति चेइआइं०" इत्यादिना चाभिवन्द्यते एव, तत्त्वत-

---

१ य एव भावलेशः स एव भगवतोऽनुमतः॥
२ यत्किंचिद् नाम तीर्थ०।
३ यावन्ति चैत्यानि०॥

स्त्रासामपि तीर्थत्वात् जिनबिम्बत्वाच्च। तथाऽत्रापि मिथ्यादृशां गुणाः 'सर्वेषां जीवानां दयाशीलादिकं शोभनम्' इत्येवं सामान्यरूपेणानुमोद्यमानाः केन वारयितुं शक्यन्ते? इति। युक्तं चैतत्, धर्मबिन्दुसूत्रवृत्त्योरपि सद्धर्मदेशनाधिकारसाधारण्येन लोकलोकोत्तरगुणप्रशंसाप्रतिपादनात्। तथाहि "साधारणगुणप्रशंसेति"॥ "साधारणानां लोकलोकोत्तरयोः सामान्यानां गुणानां प्रशंसा-पुरस्कारो देशनार्हस्याग्रतो विधेया।

यथा—

प्रदानं प्रच्छन्नं गृहमुपगते संभ्रमविधिः
प्रियं कृत्वा मौनं सदसि कथनं चाप्युपकृतेः।
अनुत्सेको लक्ष्म्या निरभिभवसाराः परकथाः
श्रुते चासंतोषः कथमनभिजाते निवसति॥"—इति।

इयं च पुरुषविशेषानुपग्रहात्सामान्यप्रशंसैवेति। यद्यप्यत्रापि वाक्यार्थस्य विशेष एव पर्यवसानम्, तथाऽपि साधारणगुणानुरागस्यैवाभिव्यङ्ग्यत्वान्न मिथ्यात्वाभिवृद्धिरिति द्रष्टव्यम्। स्यादत्र परस्येदमाशङ्का—एवं सति मिथ्यादृष्टेः पुरुषविशेषस्य दयाशीलादिगुणपुरस्कारेण प्रशंसा न कर्तव्या स्यात्, अन्यतीर्थिकपरिगृहीतार्हत्प्रतिमाया विशेषेणावन्द्यत्ववद् अन्यतीर्थिकपरिगृहीतगुणानामपि विशेषतोऽप्रशंसनीयत्वात्। दोषवत्त्वेन प्रतिसंधीयमाने पुरुषे तद्गतगुणप्रशंसायास्तद्गतदोषानुमतिपर्यवसितत्वात्। अत एव सुखशीलजनवन्दनप्रशंसयोस्तद्गतप्रमादस्थानानुमोदनापत्तिरुक्ता।

"किइकम्मं च पसंसा सुहसीलजणंमि कम्मबंधाय।
जे जे पमायठाणा ते ते उवबूहिया हुंति॥"[1]

इत्यादिना आवश्यकादाविति॥

तत्र ब्रूमः—यदि नाम तद्गतदोषज्ञानमेव तत्प्रशंसायास्तदीयतदोषानुमतिपर्यवसायकमिति मिथ्यादृष्टिगुणप्रशंसात्यागस्तवाभिमतस्तदाऽविरतसम्यग्दृष्टेः सम्यक्त्वादिगुणप्रशंसाऽप्यकर्तव्या स्यात्, तद्गताविरतिदोषज्ञानात्तस्यास्तदनुमतिपर्यवसानात्।

---

१ कृतिकर्म च प्रशंसा सुखशीलजे कर्मबन्धाय।
ये ये प्रमादस्थानानि ते ते उपबृंहितानि भवन्ति॥

अथाविरतसम्यग्दृष्ट्यादावविरत्यादेर्न स्फुटदोषप्रतिसन्धानमेव च तद्गतप्रशंसाया दोषानुमतिपर्यवसानबीजम्, अत एव शैलकराजर्षिप्रभृतीनां पार्श्वस्थत्वादिस्फुटदोषप्रतिसन्धाने हीलनीयत्वमेवोक्तं शास्त्रे न तु गुणसामान्यमादाय प्रशंसनीयत्वम्, तत्कालीनतत्प्रशंसाया दोषानुमतिरूपत्वादित्यविरतसम्यग्दृष्ट्यादीनां सम्यक्त्वादिगुणानुमोदनेन दोष इति चेत्। तर्हि मार्गानुसारिणां मिथ्यादृशां मिथ्यात्वमपि न स्फुटो दोषः, तत्त्वेतरनिन्दनाद्युपहितप्रबलमिथ्यात्वस्यैव स्फुटदोषत्वादिति तद्गतगुणप्रशंसायामपि न दोषः,। अवश्यं चैतदित्थं प्रतिपत्तव्यम्, अन्यथा मेघकुमारजीवहस्तिनोऽपि दयागुणपुरस्कारेण प्रशंसानुपपत्तिरिति। अन्यतीर्थिकपरिगृहीतत्वं चार्हत्प्रतिमायामिव दयादिगुणेषु न स्फुटो दोषः, दयादिगुणानामभिनिविष्टान्यतीर्थिकसाक्षिकत्वाभावेन मिथ्यात्ववृद्धिनिबन्धनत्वाभावात्, प्रत्युत तत्त्वतो जिनप्रवचनाभिहितत्वप्रतिसन्धानेन तदस्फुटीकृतमेव। अतः 'स्तोकस्यापि भगवद्भिमतस्य गुणस्योपेक्षा न श्रेयसी' इत्यध्यवसायदशायां तत्प्रशंसा गुणानुरागातिशयद्वारा कल्याणावहा। अत एव गुणानुरागसंकोचपरिहाराय स्तोकगुणालम्बनेनापि भक्त्युद्भावनं विधेयमित्युपदिशन्ति पूर्वाचार्याः।

तदुक्तं बृहत्कल्पभाष्यवृत्त्योः—

दंसणनाणचरित्तं तवविणयं जत्थ जत्तियं पासे।
जिणपन्नत्तं भत्तीए पूयए तं तहिं भावं॥[1]

"दर्शनं च निःशङ्कितादिगुणोपेतं सम्यक्त्वं, ज्ञानं चाचारादि, चारित्रं च मूलोत्तरगुणानुपालनात्मकं दर्शनज्ञानचारित्रं द्वन्द्वैकवद्भावः। एवं तपश्चानशनादि, विनयश्चाभ्युत्थानादिरूपस्तपोविनयम्। एतद्दर्शनादि यत्र पार्श्वस्थादौ पुरुषे यावत् यत्परिमाणं स्वल्पं बहु वा जानीयात्, तत्र तमेव भावं जिनप्रज्ञप्तं स्वचेतसि व्यवस्थाप्य तावत्यैव भक्त्या कृतिकर्मादिलक्षणया पूजयेद्" इति॥

तेन मार्गानुसारिकृत्ये सर्वमपि भावयोगादनुमोदनीयं प्रशंसनीयं चेति सिद्धम्॥ ३५॥

---

१ दर्शनज्ञानचारित्रं तपोविनयं यत्र यावत्पार्श्वे।
जिनप्रज्ञप्तं भक्त्या पूजयेद् तं तत्र भावम्॥

ततश्च 'मिथ्यादृशां गुणा न ग्राह्याः' इति कदाग्रहः परित्याज्य इत्यभिप्रायेणाह—

इअ लोइअलोउत्तर सामन्नगुणप्पसंसणे सिद्धे ।
मिच्छदिट्ठीण गुणे ण पसंसामोत्ति दुव्वयणं ॥३६॥

'इअ'त्ति । इत्यमुना प्रकारेण लौकिकलोकोत्तरसामान्यगुणप्रशंसने सिद्धे इष्टसाधनत्वेन व्यवस्थिते 'मिथ्यादृष्टीनां गुणान्न प्रशंसामः' इति दुर्वचनं गुणमात्सर्यादेव, तथावचनप्रवृत्तेः । न च नैवंभूतं मात्सर्यादेवोच्यते, किन्तु सम्यग्दृष्टिमिथ्यादृष्टिसाधारणगुणप्रशंसया विशेषगुणातिशयभङ्गापत्तिभयादेवेति शङ्कनीयम् । एवं सति विरताविरतसाधारणसम्यक्त्वादिगुणप्रशंसाया अपि परिहारापत्तेः, तथापि विरतविशेषगुणातिशयभङ्गापत्तिभयतावदस्थ्यादिति ॥ ३६ ॥

दुर्वचनत्वं चास्य व्यक्त्या तत्प्रशंसाविधायकसद्वचनबाधात्सिध्यतीति तदुपदर्शयति—

मग्गाणुसारिकिच्चं तेसिमणुमोअणिज्जमुवइट्ठं ।
सिवमग्गकारणं तं गम्मं लिंगेहिं धीरेहिं ॥३७॥

मग्गाणुसारित्ति । मार्गानुसारिकृत्यं तेषामपि मिथ्यादृशामप्यनुमोदनीयमुपदिष्टं भगवता ।

तदुक्तं चतुःशरणप्रकीर्णके—

"अहवा सव्वं चिय वायरायवयणाणुसारि जं सुकडं ।
कालत्तएवि तिविहं अणुमोएमो तयं सव्वं ॥"

इति लौकिकलोकोत्तरसामान्यगुणप्रशंसने सिद्धे ।
मिथ्यादृष्टीनां गुणान् न प्रशंसाम इति दुर्वचनम् ॥ ३६ ॥
मार्गानुसारिकृत्यं तेषामनुमोदनीयमुपदिष्टम् ।
शिवमार्गकारणं तद् गम्यं लिङ्गैर्धीरैः ॥ ३७ ॥

अथवा सर्वमेव वीतरागवचनानुसारि यत्सुकृतम् ।
कालत्रयेऽपि त्रिविधमनुमोदयामस्तत्सर्वम् ॥

एतद्वृत्तिर्यथा—" अथवेति सामान्यरूपप्रकारदर्शने । 'चिय'त्ति एवार्थे । ततः सर्वमेव वीतरागवचनानुसारि जिनमतानुयायि यत्सुकृतं जिनभवन-बिम्ब-कारण-तत्प्रतिष्ठा-सिद्धान्तपुस्तकलेखन-तीर्थयात्रा-श्रीसंघवात्सल्य-जिनशासन-प्रभावना-ज्ञानाद्युपष्टम्भ-धर्मसांनिध्यक्षमामार्दवसंवेगादिरूपं मिथ्यादृक्संबन्ध्यपि मार्गानुयायिकृत्यं कालत्रयेऽपि त्रिविधं मनोवाक्कायैः कृतं कारितमनुमतं च यद्भूद् भवति भविष्यति चेति तत्तदित्यर्थः, तत्सर्वं निरवशेषमनुमन्यामहे हर्षगोचरतां प्रायायाम इति ॥"

ननु मार्गानुसारिकृत्यं न जैनाभिमतधार्मिकानुष्ठानानुकारिमिथ्यादृष्टिमार्गपतितं क्षमादिकम्, किन्तु सम्यक्त्वाभिमुखगतं जैनाभिमतमेव, तच्च सम्यग्दृष्टिगतानुष्ठानान्न पार्थक्येन गणयितुं शक्यमित्याशङ्कायामाह—तन्मार्गानुसारिकृत्यं शिवमार्गस्य ज्ञानदर्शनचारित्रलक्षणस्य कारणं धीरैर्निश्चितागमतत्त्वैर्लिङ्गैः " पावं ण तिव्व भावा कुणई[1]" इत्याद्यपुनर्बन्धकादिलक्षणैर्गम्यम् । अयं भावः—सम्यग्दृष्टिकृत्यं यथा वस्तुतश्चारित्रानुकूलमेवानुमोदनीयं तथा मार्गानुसारिकृत्यमपि सम्यक्त्वानुकूलमेव । स्वल्पकालप्राप्तव्याफलज्ञानं च तत्रानुमोदनीयतायां न तन्त्रम्, किन्तु स्वलक्षणज्ञानमेव । तथा च यत्र भवाभिनन्दिदोषप्रतिपक्षगुणानामपुनर्बन्धकादिलक्षणानां निश्चयस्तत्र मार्गानुसारिकृत्यानुमोदनायां न बाधकम्, विविच्याग्रिमकालभाविफलज्ञानस्य प्रवर्तकत्वे तु छद्मस्थस्य प्रवृत्तिमात्रोच्छेदप्रसङ्ग इति । अत एव मार्गानुयायिकृत्यं लक्षणशुद्धं जिनभवनकारणमध्येवोक्तम्, तस्यैव मोक्षमार्गकारणत्वाद् । मोक्षमार्गो हि भावाज्ञा सम्यग्दर्शनादिरूपा, तत्कारणं चापुनर्बन्धकचेष्टा द्रव्याज्ञा । तत्र भावाज्ञा मोक्षं प्रति कारणत्वेनानुमोदनीया, द्रव्याज्ञा तु कारणकारणत्वेनेति न कश्चिद्दोष इति ।

तदिदमुक्तं व्यक्तैवाराधनापताकायाम्—

> अह दुक्कडगरहानलज्झामियकम्मिंधणो पुणो भागइ (?)
> सुकडाणुमोअणं तिव्वसुद्धपुलयंचियसरीरो ॥ १ ॥

---

१ पापं न तीव्रभावात्करोति ॥

२ अथ दुष्कृतगर्हाऽनलध्यातकर्मेन्धनः पुनः····· ।
सुकृतानुमोदनं तीव्रशुद्धपुलकाञ्चितशरीरः ॥ १ ॥

चउतीसबुद्ध(सु)अइसअअट्ठमहापाडिहेरधम्मकहा ।
तित्थपवत्तणपभिई अणुमोएमि जिणिंदाणं ॥ २ ॥
सिद्धत्तमणंताणं वरदंसणनाणसुक्खविरिआइं ।
इगतीसं सिद्धगुणे अणुमन्ने सव्वसिद्धाणं ॥ ३ ॥
पंचविहं आयारं देसकुलाईगुणे य छत्तीसं ।
सिस्सेसु अत्थभासणमुहं सूरीण अणुमोए ॥ ४ ॥
अंगाण उवंगाणं पइण्णसुअछेअमूलगंथाणं ।
उवज्झायाणं अज्झावणाइ सव्वं समणुमन्ने ॥ ५ ॥
समिईगुत्तीमहव्वयसंजमजइधम्मगुरुकुलणिवासं ।
उज्जुअविहारपमुहं अणुमोए समणसमणीणं ॥ ६ ॥
सामाइअपोसहाइं अणुव्वयाइं जिणिंदविहिपूयं ।
एक्कारपडिमपभिई अणुमन्ने सद्धसड्ढीणं ॥ ७ ॥
जिणजम्माइसु ऊसवकरणं तह महरिसीणं पारणए ।
जिणसासणंमि भत्तीपमुहं देवाण अणुमन्ने ॥ ८ ॥
तिरियाण देसविरइं पज्जंताराहणं च अणुमोए ।
सम्मद्दंसणलंभं अणुमन्ने तारयाणंपि ॥ ९ ॥

---

१ चतुस्त्रिंशद्बुद्धातिशयाष्टमहाप्रातिहार्यधर्मकथा ।
तीर्थप्रवर्तनप्रभृतीरनुमोदयामि जिनेन्द्राणाम् ॥ २ ॥
सिद्धत्वमन्तानां वरदर्शनज्ञानसौख्यवीर्याणि ।
एकत्रिंशतं सिद्धगुणान् अनुमन्ये सर्वसिद्धानाम् ॥ ३ ॥
पञ्चविधमाचारं देशकुलादिगुणांश्च षट्त्रिंशतम् ।
शिष्येषु अर्थभाषणमुखं सूरीणामनुमोदे ॥ ४ ॥
अङ्गानामुपाङ्गानां प्रकीर्णकश्रुतच्छेदमूलग्रन्थानाम् ।
उपाध्यायानामध्यापनादि सर्वं समनुमन्ये ॥ ५ ॥
समिति-गुप्ति-महाव्रत-संयम-यतिधर्म-गुरुकुलनिवासम् ।
उद्युक्तविहारप्रमुखं अनुमोदे श्रमणश्रमणीनाम् ॥ ६ ॥
सामायिकप्रौषधादि अणुव्रतानि जिनेन्द्रविधिपूजाम् ।
एकादशप्रतिमाप्रभृतीरनुमन्ये श्राद्ध-श्राद्धानाम् ॥ ७ ॥
जिनजन्मादिषूत्सवकरणं तथा महर्षीणां पारणकम् ।
जिनशासने भक्तिप्रमुखं देवानामनुमन्ये ॥ ८ ॥
तिरश्चां देशविरतिं पर्यन्ताराधनं च अनुमोदे ।
सम्यग्दर्शनलाभमनुमन्ये तारकानामपि ॥ ९ ॥

सेसाणं जीवाणं दाणरुइत्तं सहावविणिअत्तं ।
तह पयणुकसायत्तं परोवयारित्त भव्वत्तं ॥ १० ॥
दक्खिन्नदयालुत्तं पियभासित्ताइ विविहगुणणिवहं ।
सिवमग्गकारणं जं तं सव्वं अणुमयं मज्झ ॥ ११ ॥

पञ्चसूत्र्यामप्युक्तम्—

"अणुमोएमि सव्वेसिं अरहंताणमणुट्ठाणं, सव्वेसिं सिद्धाणं सिद्धभावं, सव्वेसिं आयरिआणं आयरं, सव्वेसिं उवज्झायाणं (सुत्तपयाणं) सव्वेसिं साहूणं साहूकिरियं, सव्वेसिं सव्वेसिं सावगाणं मुक्खसाहणजोए, सव्वेसिं देवयाणं सव्वेसिं जीवाणं होउकामाणं कल्लाणासयाणं मग्गसाहणजोए। होउ मे एसा अणुमोअणा॥"

एतद्वृत्तिर्यथा—"अनुमोदेऽहमिति प्रक्रमः। सर्वेषामर्हतामनुष्ठानं धर्मकथादि, सर्वेषां सिद्धानां सिद्धभावमव्याबाधादिरूपम्, एवं सर्वेषामाचार्याणामाचारं ज्ञानाचारादिलक्षणम्, एवं सर्वेषामुपाध्यायानां सूत्रप्रदानं सद्विधिवद्, एवं सर्वेषां साधूनां साधुक्रियां सत्स्वाध्यायादिरूपाम्, एवं सर्वेषां श्रावकाणां मोक्षसाधनयोगान् वैयावृत्त्यादीन् एवं सर्वेषां देवानामिन्द्रादीनां सर्वेषां जीवानां सामान्येनैव भवितुकामानामासन्नभव्यानां कल्याणाशयानाम्, एतेषां किम्? इत्याह—मार्गसाधनयोगान् सामान्येनैव कुशलव्यापारान् 'अनुमोदे' इति क्रियानुवृत्तिः। भवन्ति चैतेषामपि मार्गसाधनयोगाः, मिथ्यादृष्टीनामपि गुणस्थानकत्वाभ्युपगमाद्। अनभिग्रहे सति प्रणिधिशुद्धिमाह—भवतु ममैषाऽनुमादनेत्यादि॥"

अत्र हि सामान्येनैव कुशलव्यापाराणामनुमोद्यत्वमुक्तमिति मिथ्यादृशामपि स्वाभाविकदानरुचित्वादिगुणसमूहो व्यक्त्याऽनुमोद्यो न तु तद्विशेष एवाश्रयणीयः। यत्तु दानमपि परेषामधर्मपोषकत्वाद-

---

१ शेषाणां जीवानां दानरुचित्वं स्वभावविनीतत्वम्।
तथा प्रतनुकषायत्वं परोपकारित्व-भव्यत्वं ॥ १० ॥
दाक्षिण्यदयालुत्वं प्रियभाषित्वादिविविधगुणनिवहम्।
शिवमार्गकारणं यत्तत्सर्वमनुमतं मम ॥ ११ ॥

२ अनुमोदे सर्वेषामर्हतामनुष्ठानम्, सर्वेषां सिद्धानां सिद्धभावम्, सर्वेषामाचार्याणामाचारम्, सर्वेषामुपाध्यायानां सूत्रप्रदानम्, सर्वेषां साधूनां साधुक्रियाम्, सर्वेषां श्रावकाणां मोक्षसाधनयोगान्, सर्वेषां देवतानां सर्वेषां जीवानां भवितुकामानां कल्याणाशयानां मार्गसाधनयोगान्। भवतु मे एषाऽनुमोदनेति।

धिकरणमिति दानरुचित्वादिगुणेष्वपि विशेषाश्रयणमावश्यकमित्या-सन्नसम्यक्त्वसंगमनयसारादिसदृशसाधुदानादिनैव दानरुचित्वादिकं ग्राह्यमिति परस्याभिमतम्, तदसत्। भूमिकाभेदेन दानविधेरपि भेदात्, सम्यग्दृष्टिं प्रति प्रासुकैषणीयादिदानविधेरिवादिधार्मिकं प्रति "पात्रे दीनादिवर्गे च" इत्यादेरपि दानविधेः प्रतिपादनात्। ततः सामान्येन कुशलव्यापारा आदिधार्मिकयोग्या एव ग्राह्या इति युक्तं पश्यामः। एतेन पुण्यप्रकृतिहेतोरेवानुमोद्यत्वे क्षुत्तृट्सहन-रज्जुग्रहण-विषभक्षणादीनामप्यनुमोद्यत्वापत्तिः। पुण्यप्रकृत्युदयप्राप्तस्यैव धर्मस्यानुमोद्यत्वे च चक्रवर्तिनः स्त्रीरत्नोपभोगादेरप्यनुमोद्यत्वापत्तिः। सम्यक्त्वनिमित्तमात्रस्थ चानुमोद्यत्वेऽकामनिर्जराव्यसनादेरप्यनुमोद्यत्वापत्तिः।

"अणुकंप-कामणिज्जर-बालतवो-विणय-दाण-विब्भंगे।
संजोगविप्पओगे वसणूसव-इड्ढिसक्कारे॥"[1]

इत्यादिनाऽनुकम्पादीनामपि सम्यक्त्वप्राप्तिनिमित्तप्रतिपादनात्। धर्मबुद्ध्या क्रियमाणस्यैवानुष्ठानस्यानुमोद्यत्वे चाभिग्रहिकमिथ्यादृशा धर्मबुद्ध्या क्रियमाणस्य जैनसमयत्यजनत्याजनादेरप्यनुमोद्यत्वापत्तिरिति 'सम्यक्त्वाभिमुखस्यैव मार्गानुसारिकृत्यं साधुदानधर्मश्रवणाद्यनुमोद्यम्, नत्वन्यमार्गस्थस्य क्षमादिकमपि' इति परस्य कल्पनाजालमपास्तम्, सामान्येनैव कुशलव्यापाराणामादिधार्मिकयोग्यानामनुमोद्यत्वप्रतिपादनात्, असत्कल्पनाऽनवकाशात्, तीव्रप्रमादादिशवलस्य सम्यक्त्वस्येव तीव्राभिनिवेशदुष्टस्य मोक्षाशयादेरप्यननुमोद्यत्वेऽपि जात्या तदनुमोद्यत्वाऽनपायादिति फलतः स्वरूपतश्चानुमोद्यत्वविशेषव्यवस्था न काप्यनुपपत्तिरिति।

यस्त्वाह—सम्यग्दृष्टय एव क्रियावादिनः शुक्लपाक्षिकाश्च न तु मिथ्यादृष्टय इति तेषां कृत्यं किमपि नानुमोद्यमिति। तेन न सुष्ठु दृष्टम्, धर्मरुचिशालिनां सम्यग्दृशां मिथ्यादृशां चाविशेषेण क्रियावादित्वस्य शुक्लपाक्षिकत्वस्य च प्रतिपादनात्॥

---

१ अनुकम्पाऽकामनिर्जरा-बालतपो-विनय-दानविभंगम्।
संयोगविप्रयोगौ व्यसनोत्सवर्द्धिसत्कारम्॥

तदुक्तं दशाश्रुतस्कन्धचूर्णौ–"जो अकिरियावाई सो भविओ वा, णियमा कण्हपक्खिओ। किरियावादी णियमा भविओ णियमा सुक्कपक्खिओ अंतो पुग्गलपरिअट्टस्स णियमा सिज्झिहिति, सम्मदिट्ठी वा मिच्छदिट्ठी वा हुज्जत्ति ॥"

एतत्समंतिपूर्वमुपदेशरत्नाकरेऽप्येवमुक्तम्–तथाहि–"केचित्संसारवासिनो जीवा देवादिगतौ च्यवनादिदुःखभग्ना मोक्षसौख्यमनुपमं ज्ञात्वा तदर्थजातस्पृहाः कर्मपरिणतिवशादेव मनुष्यगतिं प्रापुः। तत्र चैकः प्रथमः कुगुरूपदिष्टशास्त्रार्थभावितितयाऽभिगृहीतमिथ्यात्वे दिग्मोहसमतत्त्वव्यामोहवान् पूर्वोक्तमिथ्याक्रियासु मनोवाक्कायधनादिबलवत्तया भृशमुद्युक्तो विष्णुपुराणोक्तशतधनुर्नृपादिदृष्टान्तेभ्यो वेदपुराणाद्युक्तिभ्यश्च संजातजिनधर्मद्वेषात्स्वज्ञानक्रियागर्वाच्च यक्षतुल्यं सम्यग्गुरुं तदुपदेशांश्च दूरतः परिहारादिनाऽवगणय्य सर्वेभ्यः प्रागेवेष्टपुरसमं मोक्षं गन्तुं समुत्थितो ज्ञानक्रियादि गर्वादिनाऽन्यदर्शनिसंसर्गालापजप्रायश्चित्तभिया मार्गमिलितसम्यक्पथिकतुल्यान् जैनमुनिश्राद्धादीन् सुमार्गमपृच्छन् यथा यथा प्रबलपादत्वरितगतिसमा अनन्तजीवपिण्डात्मकमूलक–सेवालादिभोजनाग्निहोत्रादिका मिथ्यात्वक्रियाः प्रबलाः कुरुते, तथा तथा तज्जनितमहारम्भजीवघातादिपापकर्मावेशादश्वग्रीवनृपतिपुरोहितवद् गाढगाढतरगाढतमदुःखमयकुमानुष्यतिर्यग्नरकादिकुगतिपतितो दुर्लभबोधितयाऽनन्तचतुरशितिलक्षजीवयोनिषु भ्राम्यन् शिवपुराद् भृशं दुरवर्त्येव जायते पुनरनन्तेन कालेन तत्रागामुकत्वात्।

"[1]किरियावाई णियमा भविओ, णियमा सुक्कपक्खिओ, अंतो पुग्गलपरिअट्टस्स णियमा सिज्झिहिति, सम्मदिट्ठी वा मिच्छादिट्ठी वा हुज्जा" ॥–इति दशाश्रुतस्कन्धचूर्ण्युपासकप्रतिमाधिकारादिवचनात् क्रियारुचित्वेनावश्यं शिवगामितया यथाप्रवृत्तकरणादुत्तीर्णोऽपूर्वकरण-

१ योऽक्रियावादी स भव्यो वा, नियमात्कृष्णपाक्षिकः। क्रियावादी नियमाद् भव्यो नियमाच्छुक्लपाक्षिकः, अन्तःपुद्गलपरावर्तस्य गियमात्सेत्स्यति, सम्यग्दृष्टिर्वा मिथ्यादृष्टिर्वा भवेदिति ॥

२ क्रियावादी नियमाद् भव्यः, नियमाच्छुक्लपाक्षिकः, अन्तः पुद्गल परावर्तस्य नियमात्सेत्स्यति, सम्यग्दृष्टिर्वा मिथ्यादृष्टिर्वा भवेदिति ॥

सूर्योदये स्वं भ्रान्तं मन्यमानोऽकामनिर्जरायोगादिना कथंचिन्मनुजभवं प्राप्य कर्मक्षयोपशमवशाज्जाततत्त्वान्वेषणश्रद्धो मिश्रादिगुणस्थानकयोगादपगतदिग्मोहसममिथ्यात्वहेतुकतत्त्वव्यामोहः कथमपि यक्षसमसद्गुरुं प्राप्य तदुपदेशबहुमानादवगतं ज्ञानादिमोक्षमार्गं तदनुगतसम्यगनुष्ठानादिना भजमान उत्कर्षतः पुद्गलपरावर्तमध्ये परेभ्यः पश्चेभ्योऽपि मित्रेभ्यः पश्चादनन्तेन कालेन स्वेष्टपुरसमं मोक्षमवाप्नोतीति ।

ननु यद्यप्येवं दशाश्रुतस्कन्धचूर्ण्यनुसारेण क्रियावादिनः सम्यग्दृष्टि-मिथ्यादृष्ट्यन्यतरत्वमुत्कर्षतोऽन्तःपुद्गलपरावर्तमानसंसारत्वेन शुक्लपाक्षिकत्वं च नियमतो लभ्यते, अक्रियावादिनश्च नियमान्मिथ्यादृष्टित्वं कृष्णपाक्षिकत्वं च तथापि नात्र निश्चयः कर्तुं पार्यते, अन्यत्रापार्द्धपुद्गलपरावर्ताधिकसंसारस्यैव कृष्णपाक्षिकत्वप्रतिपादनात् ।

तदुक्तम्—

"[1]जेसिमवड्ढो पुग्गलपरिअट्टो सेसओ उ संसारो ।
ते सुक्कपक्खिआ खलु अहिए पुण कण्हपक्खिया ॥"

" येषामपार्द्धपुद्गलपरावर्त एव शेषः संसारस्तत ऊर्ध्वं सेत्स्यते ते शुक्लपाक्षिकाः क्षीणप्रायसंसाराः । खलुशब्दो विशेषणार्थः । प्राप्तदर्शना अप्राप्तदर्शना वा सन्तीति विशेषयति । अधिके पुनरपार्द्धपुद्गलपरावर्तात्संसारे कृष्णपाक्षिकाः क्रूरकर्माण इत्यर्थः ॥" इत्यादिश्रावकप्रज्ञप्तिवृत्तौ योगबिन्दुवृत्तावप्युक्तम् । तत्रापि शुक्लपाक्षिकोऽपार्द्धपुद्गलपरावर्तान्तर्गतसंसारः । यत उक्तं "जेसिमवड्ढो पुग्गल०" इत्यादि । ततो हि क्रियावादिनः शुक्लपाक्षिकत्वं भजनीयमेव लभ्यते, अक्रियावादिनोऽपि नियमतः कृष्णपाक्षिकत्वमिति विघटते एव; अपार्धपुद्गलपरावर्ताभ्यन्तरीभूतसंसाराणामप्यक्रियावादिनां संभवात्, तस्याऽपि कृष्णपाक्षिकत्वभजनाया एव संभवात् । नास्तिकत्वपक्षो ह्यक्रियावादः "[2]अत्थित्ति किरियवाई वयन्ति णत्थित्ति अकिरियवाई"त्ति वचनात् ।

---

१ येमापपार्धः पुद्गलपरावर्तः शेषस्तु संसारः ।
ते शुक्लपाक्षिकाः खलु अधिके पुनः कृष्णपाक्षिकाः ॥

२ अस्तीति क्रियावादिनो वदन्ति, नास्तीति अक्रियावादिनः ॥

स च कर्मवैचित्र्यवशादल्पतरभवानामपि प्रदेशयादिवद् भवतीति। अत एव भगवत्यां "सुक्कपक्खिया जहा सलेस्स"त्ति सलेश्यातिदेशेन शुक्लपाक्षिकस्याप्यक्रियावादसंभव उपदर्शितः। तथा च सलेश्याधिकारप्रश्ननिर्वचनसूत्रम्—

"[2]सलेस्सा णं भंते जीवा किं किरियावादी ? पुच्छा।
गोयमा ! किरियावादीवि, जाव वेणइअवादीवि"त्ति॥

तत इमामनुपपत्तिं दृष्ट्वा भगवत्यर्थ एव मनो देयम्। भगवत्यां हि सम्यग्दृष्टय एव क्रियावादिनः प्रतिपादिताः, "मिच्छद्दिट्ठी जहा कण्हपक्खिया" इत्यतिदेशात्।

"[3]कण्हपक्खिआ णं भंते जीवा किं किरियावादी ? पुच्छा। गोयमा णो किरियावादी, अकिरियावादीवि अन्नाणियवादीवि वेणइअवादीवि"त्ति-वचनात्कृष्णपाक्षिकाणां च क्रियावादित्वप्रतिषेधादिति। युक्तं चैतत्, सूत्रकृताङ्गेऽपि समवसरणाध्ययननिर्युक्तावित्थं प्रतिपादितत्वात्। तथा हि तत्पाठः—

"[4]सम्मद्दिट्ठी किरियावादी मिच्छा य सेसगा वादी।
जहिऊण मिच्छवायं सेवह वादं इमं सच्चं॥"

इति चेत्।

मैवम्। एकशास्त्रावलम्बनेनापरशास्त्रदूषणस्य महाशातनारूपत्वाद् उभयशास्त्रसमाधानस्यैव न्याय्यत्वात्। तत्र भगवत्यां सूत्रकृतनिर्युक्तौ च क्रियावादिविशेषस्यैव ग्रहणाद् (अत्र) अक्रियावादिसामान्यस्य ग्रहणान्न ग्रन्थविरोधः। तदुक्तं भगवतीवृत्तौ-"एते च सर्वेऽप्यन्यत्र यद्यपि मिथ्यादृष्टय एवोक्तास्तथापीह क्रियावादिनः सम्यग्द-

---

१ शुक्लपाक्षिका यथा सलेश्या इति।

२ सलेश्या भगवन् ! जीवाः किं क्रियावादिनः ? प्रश्नः।
गौतम ! क्रियावादिनोऽपि यावत् वैनयिकवादिनोऽपीति॥

३ कृष्णपाक्षिका भगवन् जीवाः किं क्रियावादिनः ? प्रश्नः। गौतम ! नोक्रियावादिनः, अक्रियावादिनोऽपि, अज्ञानिकवादिनोऽपि वैनयिकवादिनोऽपीति।

४ सम्यग्दृष्टयः क्रियावादिनो मिथ्या च शेषका वादिनः।
हित्वा मिथ्यावादं सेवध्वं वादमिमं सत्यम्॥

ष्टयो ग्राह्याः, सम्यगस्तित्ववादिनामेव तेषां समाश्रयणात् " इति । सूत्रकृतवृत्तावप्युक्तम्-" ननु च क्रियावाद्यप्यशीत्युत्तरशतभेदोऽपि तत्र तत्र प्रदेशे कालादीनभ्युपगच्छन्नेव मिथ्यावादित्वेनोपन्यस्तस्तत्कथमिह सम्यग्दृष्टित्वेनोच्यते ? उच्यते-स तत्र ' अस्त्येव जीवः ' इत्येवं सावधारणतयाऽभ्युपगमं कुर्वस्तथा ' काल एवैकः सर्वस्यास्य जगतः कारणं ' तथा ' स्वभाव एव नियतिश्च पूर्वकृतमेव पुरुषाकार एव इत्येवमपरनिरपेक्षतयैकान्तेन कालादीनां कारणत्वेनाश्रयणान्मिथ्यात्वम् । तथाहि-' अस्त्येव जीवः ' इत्येवमस्तिना सह जीवस्य सामानाधिकरण्याद् यदस्ति तज्जीव इति प्राप्तम्, अतो निरवधारणपक्षसमाश्रयणादिह सम्यक्त्वमभिहितम् । तथा कालादीनामपि समुदितानां परस्परसत्यपेक्षाणां कारणत्वेनेहाश्रयणात्सम्यक्त्वमिति । ननु च कथं कालादीनां प्रत्येकं निरपेक्षाणां मिथ्यात्वस्वभावत्वे सति समुदितानां सम्यक्त्वसद्भावः ?, न हि यत्प्रत्येकं नास्ति तत्समुदाये भवितुमर्हति सिकतातैलवत् । नैतदस्ति, प्रत्येकं पद्मरागादिमणिष्वविद्यमानाऽपि रत्नावली समुदाये भवन्ती दृष्टा, न च दृष्टेऽनुपपन्नं नामेति यत्किंचिदेतदित्यादि ॥ " या च क्रियावादिसामान्यस्यान्तःपुद्गलपरावर्ताभ्यन्तरसंसारत्वेन नियमतः शुक्लपाक्षिकत्वानुपपत्तिः सा क्रियारुचिरूपेण शुक्लपक्षेण शुक्लपाक्षिकत्वमवलम्ब्य परिहर्तव्या । अत एवाक्रियावादिनो नियमात्कृष्णपाक्षिकत्वमपि संगच्छते, क्रियापक्ष एव शुक्लोऽक्रियापक्षस्तु कृष्ण इति । अन्यथा निरवधारणपक्षाश्रयणे क्रियावादिवदक्रियावाद्यपि सम्यग्दृष्टिः स्यात् । अथवोत्कृष्टतः पुद्गलपरावर्तसंसारिजातीयत्वमत्र शुक्लपाक्षिकत्वं तदधिकसंसारिजातीयत्वं च कृष्णपाक्षिकत्वं विवक्षितमित्यदोष इति प्रतिभाति । तत्त्वं तु बहुश्रुता विदन्ति ॥

यत्तूच्यते-केनचिदकामनिर्जराङ्गत्वान्न मिथ्यादृशां किमपि कृत्यमनुमोदनीयमिति । तदसत्, मिथ्यादृशामपि प्रकृतिभद्रकत्वादिगुणवतां 'कर्मक्षयो मे भूयाद्' इतीच्छया स्वयोग्यशीलतपःप्रभृतिसदनुष्ठानकारिणां सकामनिर्जराऽनपायात् । सह कामेन मोक्षाभिलाषेण वर्तते या सा सकामा, तद्विपरीता त्वकामेति हि सकामाकामयोर्निर्जरयोर्लक्षणम् ।

तदुक्तं योगशास्त्रवृत्तौ—" सा निर्जरा द्विधा। सह कामेन 'निर्जरा मे भूयाद्" इत्यभिलाषेण युक्ता सकामा, न त्विहलोकपरलोकफलादिकामेन युक्ता, तस्य प्रतिषिद्धत्वात्। यदाहुः—"नो इहलोगट्ठयाए तव महिट्ठिजा" इत्यादि इत्येका निर्जरा। द्वितीया त्वकामा कामेन पूर्वोक्तेन वर्जितेति।

न च वाच्यं "ज्ञेया सकामा यमिनामकामा त्वन्यदेहिनाम्" इत्यनेन योगशास्त्रस्यैव वचनान्तरेण यतीनामेव सकामा निर्जरा सिध्यति मिथ्यादृशां तु कर्मक्षयाद्यर्थं तपःकष्टं तन्वतामप्यकामैवेति। "ज्ञेया सकामा यमिनाम्"—इत्यादिना वचनस्योत्कृष्टसकामनिर्जरास्वामिकथनपरत्वाद् उत्कृष्टा हि सकामनिर्जरा तेषामेव भवेदिति। अन्यथा देशविरतसम्यग्दृशां चाकामनिर्जरैव प्राप्नोति, तेषामपि यमिशब्दाव्यपदेश्यत्वेन विशेषाभावाद्। न चैतदिष्टम्, तस्मादेतद्वचनमुत्कृष्टसकामनिर्जराधिकारिकथनपरमिति न दोषः। किं च—ज्ञेया सकामेत्यादिश्लोकव्याख्यानेऽप्यकामनिर्जरास्वामिनो निरभिलाषे निरभिप्रायं च कष्टं सहमाना एकेन्द्रियादय एवोक्ताः, न तु बालतपस्व्यादय मिथ्यादृशोऽपि। तथाहि—सकामा निर्जराऽभिलाषवतां यमिनां यतीनां विज्ञेया। ते हि कर्मक्षयार्थं तपस्तप्यन्ते। अकामा तु कर्मक्षयलक्षणफलनिरपेक्षा निर्जरा अन्यदेहिनां यतिव्यतिरिक्तानामेकेन्द्रियादीनां प्राणिनाम्। तथाहि—एकेन्द्रियाः पृथिव्यादयो वनस्पतिपर्यन्ताः शीतोष्णवर्षजलाग्निशस्त्राद्यभिघातच्छेदभेदादिनाऽसद्वेद्यं कर्मानुभूय नीरसं तत्स्वप्रदेशेभ्यः परिशाटयन्ति, विकेलेन्द्रियाश्च क्षुत्पिपासा शीतोष्णवातादिभिः, पञ्चेन्द्रियास्तिर्यञ्चश्च च्छेदभेददाहशस्त्रादिभिः, नारकाश्च त्रिविधया वेदनया, मनुष्याश्च क्षुत्पिपासाव्याधिदारिद्र्यादिना, देवाश्च पराभियोगकिल्बिषत्वादिनाऽसद्वेद्यं कर्मानुभूय स्वप्रदेशेभ्यः परिशाटयन्तीत्येषामकामनिर्जरेति॥

समयसारसूत्रवृत्त्योरप्येवमेवोक्तम्। तथाहि—" इदानीं निर्जरा तत्त्वं निगद्यते—" [२]अणुभूअरसाणं कम्मपुग्गलाणं परिसडणं णिज्जरा।"

---

१ न इहलोकार्थं तपोऽधितिष्ठेत्।

२ अनुभूतरसानां कर्मपुद्गलानां परिशटनं निर्जरा।

उपभुक्तविपाकानां परिशटनमात्मप्रदेशेभ्यः प्रच्यवनं निर्जरा। अथ तस्या भेदावाह–सा[1] दुविहा पण्णत्ता सकामा अकामा य। सह कामेन 'निर्जरा मे भूयाद्' इत्यभिलाषेण न त्विह परलोकादिकामेन युक्ता सकामा। अनन्तरोक्तकामवर्जिता त्वकामा। चशब्दः समुच्चये। उपायात्स्वतोऽपि वा फलानामिव कर्मणां पाकस्य भावान्निर्जराया इदं द्वैविध्यमिति भावः। तत्राकामा केषाम्? इत्याह–"तत्थ[2] अकामा सव्वजीवाणं" निर्जराभिलाषिणां तपस्तप्यमानानां सकामनिर्जरेति वक्ष्यमाणत्वाद् तद्व्यतिरिक्तानां सर्वेषां जीवानामकामा, कर्मक्षयलक्षणाभिलाषवर्जितत्वाद्। एतदेव चतुर्गतिगतजन्तुषु व्यक्तीकुर्वन्नाह। तथाहि–"एगिंदिआई[3] तिरिआ जहासंभवं छेअ-भेअ-सी-उण्ह-वास जल अग्गि-छुहा-पिवासा-कसंकुसाईएहिं, नारगा तिविहाए वेअणाए, मणुआ छुहा पिवासा-वाहि-दालिद्द-चारगणिरोहणाइणा, देवा पराभिओग-किब्बिसत्ताइणा असायावेअणिज्जं कम्ममणुभविउं पडिसाडिंति तेसिमकामणिज्जरा॥"

"तथाहीति पूर्वोक्तस्यैवोपक्षेपे। छेद–भेद–शीतोष्ण–वर्ष–जलाग्निक्षुधा–पिपासा–कशाङ्कुशादय एकेन्द्रियादिषु पञ्चेन्द्रियपर्यन्तातिर्यक्षु योज्या। नारकाणां त्रिविधा वेदना क्षेत्रजाऽन्यान्योदीरित–परमाधार्मिकजनितस्वरूपा। 'वाहि'त्ति व्याधिः, चारकनिरोधः कारागारग्रहः॥ शेषं सुबोधम्। सकामनिर्जरामाह–सेकामणिज्जराणुण णिज्जराभिलासीण अणसण–ऊणोयरिआ–रसच्चाय–कायकिलेस–पसंलिणआभेअं छव्विहं बाहिरं पायच्छित्त–विणअ–वेयावच्च–संसज्झाय–झाण–विउस्सग्गभेअं छव्विहमब्भितरं च तवं तवंताणं। निर्जराभिलाषिणामनशनादिभेदं षड्विधं बाह्यं प्रायश्चित्तादिभेदं षड्विधमाभ्यन्तरं च तपस्तप्यमानानां भवति सकामा निर्जरेति संटंक इत्यादि॥"

---

१ सा द्विविधा प्रज्ञप्ता सकामा अकामा च।

२ तत्राकामा सर्वजीवानाम्।

३ एकेन्द्रियादयस्तिर्यञ्चो यथासंभवं छेद-भेद-शीतोष्ण-वर्षा-जलाग्नि-क्षुधा-पिपासा-कशा-ऽङ्कुशादिभिः, नारकास्त्रिविधया वेदनया, मनुजाः क्षुधा-पिपासा-व्याधि-दारिद्र्य-चारकनिरोधनादिना, देवाः पराभियोग-किल्विषत्वादिना अशातावेदनीयं कर्मानुभूय प्रतिशाटयन्ति तेषामकामनिर्जरा।

४ सकामनिर्जरा पुनर्निर्जराभिलाषिणामनशनोदरिका-रसत्याग-कायक्लेश-प्रतिसंलीनताभेदं षड्विधं बाह्यं प्रायश्चित्त-विनय-वैयावृत्य-संस्वाध्याय-ध्यान-व्युत्सर्गभेदं षड्विधमाभ्यन्तरं तपस्तप्यमानानाम्॥

न चात्रापि तपसः सकामनिर्जरारूपत्वप्रतिपादनाद् मिथ्यादृशां च तदभावान्न सकामनिर्जरेति वाच्यम्, मिथ्यादृशामपि मार्गानुसारिणां 'तपश्चान्द्रायणं कृच्छ्रम्' इत्यादिना तपसः प्रतिपादनात्। किं च—मार्गानुसार्यनुष्ठानमात्रमेव सकामनिर्जरायां बीजम्, अविरतसम्यग्दृष्ट्यनुरोधात् न तु तपोमात्रमेवेति न काप्यनुपपत्तिः। अत एव स्फुट मोक्षाभिलाषसत्त्वेऽपि मिथ्यादृशां प्रबलासद्ग्रहदोषवतां तदभाववतामादिधार्मिकाणामिव फलतो न सकामनिर्जरा, मार्गानुसार्यनुष्ठानाभावात्, तदभावेऽपि च स्वाभाविकानुकम्पादिगुणवतां मेघकुमारजीवहस्त्यादीनां फलतः साऽबाधितेति विभावनीयम्। युक्तं चैतत् पञ्चस्वनुष्ठानेषु तद्धेत्वमृतानुष्ठानयोरिव सकामनिर्जराङ्गत्वव्यवस्थितेः। अत एवानुचितानुष्ठानमकामनिर्जराङ्गमुक्तम्। तथा च धर्मबिन्दुसूत्रवृत्तिवचनम्। "अननुष्ठानमन्यदकामनिर्जराङ्गमुक्तविपर्ययादिति"॥ अननुष्ठानमनुष्ठानमेव न भवति, 'अन्यद्' विलक्षणमुचितानुष्ठानाद्। तर्हि कीदृशं तत्? इत्याह—'अकामनिर्जराङ्गम्' अकामस्य निरभिलाषस्य तथाविधबलीवर्दादेरिव या निर्जरा कर्मक्षपणा तस्या अङ्गं निमित्तम्। ननु मुक्तिफलयोर्निर्जरयोः कुलः?

इत्याह—'उक्तविपर्ययाद्' उदग्रविवेकाभावेन रत्नत्रयाराधनाभावादिति॥ उचितानुष्ठानं च साध्वादीनां यथाशुद्धचारित्रपालनादीकं तथा मार्गानुसारिणां मिथ्यादृशामपि सामान्यतः सदाचारादिकम्, भूमिकाभेदेनौचित्यव्यवस्थानात्, ततोऽधिकारिभेदेन यद् यदौचितमनुष्ठानं तत्तदा साक्षात्पारम्पर्येण वा निर्वाणफलमिति सकामनिर्जराङ्गम्। यच्चानुचितं "तदनुचित प्रतिपत्तौ नियमादसद्भिनिवेशोऽन्यत्रानाभोगमात्रादिति॥"—वचनात् अभिनिवेशसहकृतत्वेन विपरीतफलमिति तत्त्वतोऽकामनिर्जराङ्गमिति मन्तव्यम्। इत्थं च "तओ भणियं नाइलेण, जहा मा वच्छ। तुमं एतेणं परिओसमुवयासु। जहा अहयं आमवारेण परिमुसिओ अकामणिज्जराएवि किंचि कम्मक्खओ हवइ किंपुण जं बालतवेणं। ता एते बालतवस्सिणो दट्ठव्वे, जओ णं किंचि उस्सुत्तुम्मग्गयारित्त-

१ ततो भणितं नागिलेण, यथा मा वत्स! त्वमेतेन परितोषमुपयाहि। यथाऽहमश्ववारेण परिमुषितोऽकामनिर्जरयाऽपि किंचित्कर्मक्षयो भवति किं पुनर्बालतपसा?। तस्मादेते बालतपस्विनो द्रष्टव्याः। यतः खलु किंचिदुत्सूत्रोन्मार्गचारित्व-

मेएसि य दीसइ"। इत्यादि महानिशीथचतुर्थाध्ययनवचनाद् अकाम-निर्जराजन्यात्कर्मक्षयाद् बालतपोजन्यस्य तस्य भूयस्त्वासिद्धेः। "अणु-कंपकामणिज्जरबालतवे दाणविणयविभंगे" इत्यादौ सम्यक्त्वप्राप्तिहेतुषु—

"महव्वयअणुव्वएहि य बालतवाकामणिज्जराए य।
देवाउअं णिबंधई सम्मद्दिट्ठी य जो जीवो॥"—

इत्यादौ देवायुः कारणेषु च भेदेनाभिधानादकामनिर्जरा-बाल-तपसो भेदो यः प्रोच्यते स स्वरूपभेदं निजनिजफलभेदं चापेक्ष्यबाल-तपः सर्वमेवाकामनिर्जराङ्गमिति परस्य भान्ति निरासाय। तत्त्वतस्तु यदुचितानुष्ठानं तन्नाकामनिर्जराङ्गम्, यच्चानुचितानुष्ठानं तन्निर्वाणान-ङ्गत्वात्फलतो बालतपो वोच्यतामकामनिर्जराङ्गं वा नात्र कश्चिद्विशेष इति युक्तं पश्यामः॥

किंच—मिथ्यादृष्टीनामपि मार्गसाधनयोगा गुणस्थानकत्वाभ्युपग-मादेव हरिभद्राचार्यैः प्रदर्शिताः, तथा च तेषामपि सकामनिर्जरायां न बाधकम्, गुणलक्षणायास्तस्याः कुशलमूलत्वात्। तदुक्तं तत्त्वार्थ-भाष्ये नवमाध्याये—"निर्जरा वेदना विपाक इत्यनर्थान्तरम्। सा द्विविधोऽ-बुद्धिपूर्वः कुशलमूलश्च। तत्र नरकादिषु कर्मफलविपाको योऽबुद्धिपूर्वकृतमवद्यतो ऽनुचिन्तयेद् अकुशलानुबन्ध इति। तप परिषहजयकृतः कुशलमूलस्तं गुणतोऽ-नुचिन्तयेत्-शुभानुबन्धो निरनुबन्धो वेति। एवमनुचिन्तयन् कर्मनिर्जरणायैव घटते॥" अत्र ह्यकुशलानुबन्धो विपाक इत्यकामनिर्जरायाः कुशल-मूलश्च सकामनिर्जरायाः संज्ञान्तरमेवेति। अथ मिथ्यादृष्टेर्बुद्धिरबुद्धि-रेवेति न बुद्धिपूर्विका निर्जरेति चेद्। न, मार्गानुसारिण्या बुद्धेरबुद्धि-त्वेनापह्नोतुमशक्यत्वाद्; अन्यथा माषतुषादीनामप्यकामनिर्जरा प्र-सङ्गात्, तेषां निर्जराया अबुद्धिपूर्वकत्वात्फलतो बुद्धिसद्भावस्य चोभ-यत्राविशेषाद्। उचितगुणस्थानपरिणतिसत्त्वे फलतो बुद्धिमत्त्वमबा-धितमेवेति।

मेतेषां च दृश्यते।

१ अनुकम्पाऽकामनिर्जराबालतपो दानविनयविभङ्गाः।

२ महाव्रताणुव्रतैश्च बालतपोऽकामनिर्जराभ्यां च।
देवायुर्निबध्नाति सम्यग्दृष्टिश्च यो जीवः॥

तदुक्तम्—

"गुणठाणगपरिणामे संते तह बुद्धिमंपि पाएण ।
जायइ जीवो तप्फलमवेक्खमन्ने उ णियमेत्ति ॥"

गुणविशेषस्य जीवदयादिरूपस्यात्मनि परिणामे सति, तथेति समुच्चये बुद्धिमानपि युक्तायुक्तविवेचनशेमुषीपरिगतोऽपि न केवलधर्मसारः सदा भवति प्रायेण बाहुल्येन जायते जीवः । महतामध्वनाभोगसंभवेन कदाचित्कृत्येष्वबुद्धिमत्त्वमपि कस्यचित्स्यादिति प्रायोग्रहणम् । अत्रैव मतान्तरमाह—तत्फलं बुद्धिमत्त्वफलं स्वर्गापवर्गादिप्राप्तिरूपमपेक्ष्यान्ये पुनराचार्या नियमोऽवश्यंभावो बुद्धिमत्त्वस्य अनाभोगेऽपि गुणस्थानपरिगतौ सत्यामिति ब्रुवते । अयमभिप्रायः—संपन्ननिर्व्रणव्रतपरिणामाः प्राणिनो जिनभणितमिदमिति श्रद्दधानाः क्वचिदर्थेऽनाभोगबहुलतया अज्ञानदोषाद् वितथश्रद्धानवन्तोऽपि न सम्यक्त्वादिगुणभाजो जायन्ते ।

यथोक्तम्—

"सम्मद्दट्ठी जीवो उवइट्ठं पवयणं तु सद्दहइ ।
सद्दइइ असब्भावं अयाणमाणो गुरुणिओगा ॥"

बुद्धिमत्त्वे सति व्रतपरिणामफलमविकलमुपलभन्त एवेति । यथा च सम्यग्दृष्ट्यादिगुणस्थानावान्तरपरिणतितारतम्येऽपि बुद्धिमत्त्वसामान्यफलाभेदस्तथा मार्गानुसारिणां मिथ्यादृशां मिथ्यात्वगुणस्थानावान्तरपरिणतितारतम्येऽपि । अत एवापुनर्बन्धकादीनामादित एवारभ्यानाभोगतोऽपि सदन्धन्यायेन मार्गगमनमेवेत्युपदिशन्त्यध्यात्मचिन्तकाः । यत्तु मिथ्यादृशां सकामनिर्जरासंभवे सम्यग्दृष्टिमिथ्यादृष्ट्योरविशेषप्रसङ्ग इति केनचिदुच्यते, तदसत् । एवं सति मिथ्यादृष्ट्यादीनां सयोगिकेवलिपर्यन्तानां शुक्ललेश्यावत्त्वेनाविशेषप्रसङ्गात् । अवान्तरविशेषान्न तदविशेष इति चेत् । सोऽयं प्रकृतेऽपि तुल्यः, सम्यग्दृष्टिनिर्जराऽपेक्षया मिथ्यादृष्टिनिर्जराया अल्पत्वस्याभ्युपगमादिति यथाशास्त्रं भावनीयम् ॥ ४१ ॥

---

१ गुणस्थानकपरिणामे सति तथा बुद्धिमानपि प्रायेण ।
जायत जीवस्तत्फलमपेक्ष्यान्ये तु नियम इति ॥

२ सम्यग्दृष्टिर्जीव उपदिष्टं प्रवचनं तु श्रद्दधाति ।
श्रद्दधात्यसद्भावमजानन् गुरुनियोगात् ॥

नन्वेव मिथ्यादृशां गुणानुमोदनेन परपाखण्डिप्रशंसालक्षणः सम्यक्त्वातिचारः स्यादित्याशङ्कां परिहर्त्तुमाह—

परपासंडपसंसा इहइं खलु कोवि णेवमइआरो ।
सो तम्मयगुणमोहा अणवत्थाओ व होज्जाहि ४२

पर पाखंडपसंसत्ति । एवमुक्तप्रकारेण इह मार्गानुसारिगुणानुमोदने परपाखण्डिप्रशंसाऽतिचारः कोऽपि न स्यात् । यतः स परपाखण्डिप्रशंसातिचारस्तन्मताः परपाखण्डिमात्रसंमता ये गुणा अग्निहोत्रपञ्चाग्निसाधनकष्टादयस्तेषु मोहोऽज्ञानं तत्त्वतो जिनप्रणीततुल्यत्वादिमिथ्याज्ञानलक्षणं ततो भवेत्, 'परपाखण्डिनः परदर्शिनः प्रशंसा' इत्यत्र व्युत्पत्तावर्थात् पाखण्डताऽवच्छेदकधर्मप्रशंसाया एवातिचारलाभाद् । यथा हि 'प्रमादिनो न प्रशंसनीयाः' इत्यत्र प्रमादिनां प्रमादितावच्छेदकधर्मेणाप्रशंसनीयत्वं लभ्यते न त्वविरतसम्यग्दृष्ट्यादीनां सम्यक्त्वादिनाऽपि, 'तथा पाखण्डिनो न प्रशंसनीयाः' इत्यत्रापि पाखण्डिनां पाखण्डतावच्छेदकधर्मेणैवाप्रशंसनीयत्वं लभ्यते न तु मार्गानुसारिणां क्षमादिगुणेनापि। अभिनिवेशविशिष्टक्षमादिगुणानामपि पाखण्डतावच्छेदकत्वमेवेति तद्रूपेण प्रशंसायामप्यतिचार एव। अत एवोग्रकष्टकारिणामप्याज्ञोल्लङ्घनप्रवृत्तीनां दोषावहत्त्वमुक्तं—

[1]तेसिं बहुमाणेणं उम्मग्गमोअणा अणिट्ठफला ।
तम्हा तित्थयराणाठिएसु जुत्तोत्थ बहुमाणो ॥—

इत्यादिना श्रीहरिभद्रसूरिभिः । वा अथवा, अनवस्थया मार्गभ्रंशलक्षणयाऽतिचारो भवेद् । मुग्धपर्षदि क्षमादिगुणमादायापि मिथ्यादृष्टिप्रशंसायां परदर्शनिभक्तत्वप्रसङ्गादेकैकासमञ्जसाचाराद्, एवं मार्गोच्छेदापत्तेः । अत एवाभिमुखमुग्धपर्षद्गतस्य परपाखण्ड-

---

परपाखण्डप्रशंसा इह खलु कोऽपि नैवमतिचारः ।
स तन्मतगुणमोहाद् अनवस्थया वा भवेद् ॥ ४२ ॥

---

१ तेषां बहुमानेनोन्मार्गमोदनाऽनिष्टफला ।
तस्मात्तीर्थकराज्ञास्थितेषु युक्तोऽत्र बहुमानः ॥

संबन्धिकष्टप्रशंसादिना महानिशीथे परमाधार्मिकमध्योत्पत्तिरुक्ता। तथा च तत्पाठः—

"[1]जे भिक्खू वा भिक्खुणी वा परपासंडीणं पसंसं करेज्जा, जेयावि णं णिण्हवाणं पसंसं करेज्जा, जे णं णिण्हवाणं आययणं पविसेज्जा, जे णं णिण्हवाणं गंथ-सत्थ-पय-क्खरं वा परूवेज्जा, जे णं णिण्हवाणं संतिए कायकिलेसाइए तवे इ वा संजमे इ वा नाणे इ वा विन्नाणे इ वा सुए इ वा पंडित्ते इ वा अभिमुहमुद्ध-परिसागए सिलाहेज्जा सेवि य णं परमाहम्मिएसु उववज्जेज्जा, जहा सुमतित्ति" ॥

तथा च यः स्वस्य परेषां च गुणानुरागवृद्धिकारणमवगम्यैव जिन-प्रणीतक्षमादिगुणगणमादाय मार्गानुसारिणां मिथ्यादृशां प्रशंसां करोति तस्य न दोषगन्धोऽपि, प्रत्युत 'अहो सकलगुणसारं जिनप्रवचनम्' इति धर्मोन्नतिरेव स्यादिति भावः ॥४२॥

अथ भवन्तु मिथ्यादृशामपि केऽपि गुणास्तथापि हीनत्वादेव ते नानुमोद्या इत्याशङ्काशेषं निराकर्तुमाह—

जइ हीणं तेसि गुणं सम्मत्तधरो ण मन्नइत्ति मई ।
ता कस्सवि सुहजोगं तित्थयरो णाणुमन्निज्जा ॥४३॥

जइ हीणंति । यदि हीनं तेषां मिथ्यादृशां गुणं क्षमादिकं न मन्यते नानुमन्यते सम्यक्त्वधरः, उत्कृष्टपदत्वादिति तव मतिः स्यात् तदा कस्यापि शुभयोगं तीर्थकरो नानुमन्येत, तीर्थकरापेक्षया सर्वेषामपि छद्मस्थानामधस्तनस्थानवर्तित्वात् । न चैतदिष्टम्, तत उपरितनगुणस्थानस्थानामपि सर्वं मार्गानुसारिकृत्यमनुमोदनीयमेव । यच्च

यदि हीनं तेषां गुणं सम्यक्त्वधरो न मन्यते मतिः ।
ततः कस्यापि शुभयोगं तीर्थकरो नानुमन्येत ॥ ४३ ॥

---

१ यो भिक्षुर्भिक्षुकी वा परपाखण्डिनां प्रशंसां कुर्यात्, योऽपि च निह्नवानां प्रशंसां कुर्यात्, यः खलु निह्नवानामायतनं प्रविशेत्, यः खलु निह्नवानां ग्रन्थ-शास्त्र-पदाक्षरं वा प्ररूपयेत्, यः खलु निह्नवानां सत्कं कायक्लेशादिन् तपो वा संयमं वा ज्ञानं वा विज्ञानं वा श्रुतं वा पाण्डित्यं वा अभिमुखमुग्धपर्षद्गतः श्लाघयेत् सोऽपि च परमाधार्मिकेषु उपपद्येत, यथा सुमतिरिति ॥

सम्यक्त्वगुणविशेषप्रदर्शनार्थं मिथ्यादृग्गुणमात्रस्य शास्त्रेऽकिंचिकरत्वप्रतिपादनं नैतावता सर्वथा तद्विलोप एव सिध्यति, चारित्रगुणविशेषप्रदर्शनार्थं—

"दसारसीहस्स य सेणियस्स पेढालपुत्तस्स य सच्चइस्स ।
अणुत्तरा दंसणसंपया सिया विणा चरित्तेण हरं गइं गया ॥"[1]—

इत्यादिना सम्यक्त्वस्यापि तत्प्रतिपादनादिति द्रष्टव्यम् ॥४३॥

तदेवमन्येषामपि मार्गानुसारिगुणानामनुमोद्यत्वसिद्धौ सम्यग्दृशाऽन्येषां गुणा नानुमोद्या एवेत्युत्सूत्रं त्यक्तव्यम्, स्तोकस्याप्युत्सूत्रस्य महानर्थहेतुत्वादित्युपदेशमाह—

ता उस्सुत्तं मुत्तुं अणुमोइज्जा गुणे उ सव्वेसिं ।
जं थोवावि तओ लहेज्ज दुक्खं मरीइव्व ॥४४॥

ता उस्सुत्तंति । तत् तस्मात्कारणादुत्सूत्रं मुक्त्वा, तुरेवकारार्थः स च 'सर्वेषाम्' इत्यनन्तरं योज्यः; सर्वेषामेव गुणाननुमोदेत; भव्य इति शेषः । यद् यस्मात्स्तोकादपि तत उत्सूत्रान्मरीचिरिव दुःखं लभते । मरीचिर्हि "कैविला[2] इत्थंपि इहयंपि" इति स्तोकादप्युत्सूत्रात्सागरोपमकोटाकोटीमानसंसारपरिभ्रमणजन्यदुःखं लब्धवान्, ततो यो मार्गानुसार्यनुमोदनां लुम्पन्नुत्सूत्रसहस्रवादी तस्य किं वाच्यमिति भावः ॥

अत्र केचिदाहुर्मरीचिरुत्सूकाद् दुःखं लब्धवानिति वयं न सहामहे, उत्सूत्रस्य नियमतोऽनन्तसंसारकारणत्वात्, तेन चासंख्येयसंसारार्जनात्, तत उत्सूत्रमिश्रितमेवेदं मरीचिवचनं नतूत्सूत्रमिति प्रतिपत्त-

---

तत उत्सूत्रं मुक्त्वाऽनुमोदेत गुणान् सर्वेषाम् तु ।
यत्स्तोकादपि ततो लभेत दुःखं मरीचिरिव ॥ ४४ ॥

---

१ दशारसिंहस्य च श्रेणिकस्य पेढालपुत्रस्य च सत्यकेः ।
अनुत्तरा दर्शनसम्पद् स्याद् विना चारित्रेणाधरां गतिं गता ॥

२ कपिल ! इत्थमप्यत्रापि ।

व्यम्। तथाहि–साधुधर्मे द्विरुक्तेऽपि साधुधर्मानभिमुखेन कपिलेन युष्मत्समीपे कश्चिद्धर्मोऽस्तीति पृष्टे, आवश्यकवृत्त्यभिप्रायेण तु भवदर्शने किंचिद्धर्मोस्तीति पृष्टे अहो ! अयं प्रचुरकर्मा द्विरुक्तोऽपि साधुधर्मानभिमुखो मदुचितः सहायः संवृत्त इति विचिन्त्य मम देशविरतिधर्मोस्तीत्यभिप्रायेण मनागिहाप्यस्तीति मरीचिरुक्तवान्। तत्र मरीचेर्यदि देशविरातिविमर्शना नाभविष्यत् तर्हि मनागीति नाभणिष्यत्। एतद्वचनं परिव्राजकवेषे सति परिव्राजकदर्शने किंचिद्धर्मव्यवस्थापकं संपन्नम्। इहशब्दस्यास्पष्टार्थवाचकत्वेन श्रोतुः कपिलस्य परिव्राजकदर्शनेऽपि किंचिद्धर्मोऽस्तीत्यवबोधात्, अन्यथा कपिलः परिव्राजकवेषं नाग्रहीष्यत्, तस्य धर्मचिकीर्षयैव तद्वेषोपादानात्, राजपुत्रत्वे नान्यत्कारणसंभवात्, ततश्च कापिलीयदर्शनप्रवृत्तिः। सा च कपिलस्य मरीचेरन्येषां च महानर्थकारणम्, कुप्रवचनरूपत्वात्। तदेवंभूतं वचनमुत्सूत्रमिश्रं, मरीच्यपेक्षया सूत्रत्वेऽपि कपिलापेक्षया (उत्) सूत्रत्वात्। मम पार्श्वे मनाग् धर्मोऽस्तीति देशविरतस्य मरीचेरभिप्रायान्मरीच्यपेक्षया हि सत्यमेवैतत्, परिव्राजकदर्शने धर्मोऽस्तीति कपिलस्य बुद्धिजनकत्वेन कपिलापेक्षया चासत्यरूपमेवेति।

तदसत्, उत्सूत्रकथनाभिप्रायेण प्रवृत्तस्यास्य वचनस्य मायानिश्रितासत्यरूपस्योत्सूत्रत्वाद्। आपेक्षिकसत्यासत्यभावाभ्यामुत्सूत्रमिश्रितत्वाभ्युपगमे च भगवद्वचनस्यापि तथात्वप्रसङ्गात्। तदपि हि भगवतस्तद्भक्तानां चापेक्षया सत्यं पाखण्डिनां चापेक्षयाऽसत्यमिति। अथ भगवता वचनं परस्यासत्यबोधाभिप्रायेण न प्रयुक्तमिति नोत्सूत्रम्, मरीचिना तु प्रकृतवचनं कपिलस्यासत्यबोधाभिप्रायेणैव प्रयुक्तम्। स ह्येवं ज्ञातवान्–एतन्मद्वचनं कपिलस्य परिव्राजकदर्शने धर्मबुद्धिजनकं भविष्यतीत्येवमेवायं बोधनीय इति, कथमन्यथाऽस्य परिव्राजकवेषमदास्यद् ? इति महद्वैषम्यमिति चेत्। हन्त तर्हि उत्सूत्रमेवेदं प्राप्तमिति गतमुत्सूत्रमिश्रेण। द्रव्यतोऽसत्यस्य किंशलयपाण्डुपत्रादिरूपसूत्रवचनस्यैव द्रव्यतः सत्यस्य प्रकृतवचनस्योत्सूत्ररूपस्यापि मिश्रत्वायोगात् शुद्धाशुद्धद्रव्यभावाभ्यां मिश्रत्वाभ्युपगमे जिनपूजादावपि मिश्रपक्षाभ्युपगमप्रसङ्गाच्च। अथ देशविरत्यभिप्रायेण मदपेक्षया

मया सत्यं वक्तव्यम्, परिव्राजकवेषाभिप्रायेण कपिलापेक्षया त्वसत्यमित्येवं भावभेदादेवेदमुत्सूत्रामिश्रमिति चेत्, न, एतादृशभावयोरेकदाऽसंभवात्, उपयोगद्वयस्यैकपद्याभ्युपगमस्यापसिद्धान्तत्वाद्। एक एवायं समूहालम्बनोपयोग इति चेत्, तर्हि केन कस्य मिश्रत्वम्?। नियमतः पदार्थद्वयापेक्षयैतादिति विषयभेदादेकत्रापि मिश्रत्वमिति चेत्। तर्हि गतं केवलेनोत्सूत्रेण, सर्वस्याप्यसत्याभिप्रायस्य धर्म्यंशे सत्यत्वात् "सर्वं ज्ञानं धर्मिण्यभ्रान्तं प्रकारे तु विपर्ययः" इति शास्त्रीयप्रवादप्रसिद्धेः। तर्हि प्रकारभेदादस्तु मिश्रत्वम्, एकत्रैव वचने सत्यासत्यबोधकत्वाबच्छिन्नप्रकारभेदोपरक्ताभिप्रायोपश्लेषादुत्सूत्रामिश्रत्वसंभवादिति चेत्। न, सूत्रकथनांशेऽभिप्रायस्य प्राबल्येऽनुत्सूत्रस्योत्सूत्रकथनांशे तत्प्राबल्ये चोत्सूत्रस्यैवं संभवान्मिथ्याव्यपदेशेन मिश्रस्यानवकाशाद्। अन्यथा 'क्रियमाणं न कृतम्' इत्यंशेऽसत्यं प्रतिपाद्यामि इतरांशे च सत्यमिति मिथ्याव्यपदेशेन वदतो जमाल्यनुसारिणोऽपि नोत्सूत्रं स्यात् किन्तूत्सूत्रामिश्रमिति महदसमञ्जसम्। अपि च-इदं मरीचिवचनमुत्सूत्रामिश्रमिति वदता मूलत एव जैनी प्रक्रीया न ज्ञाता। यतः सूत्रोत्सूत्रव्यवस्था तावच्छुभभावभाषामाश्रित्य क्रियते। सा च सत्यासत्यानुभयरूपत्वात् त्रिविधैव दशवैकालिकनिर्युक्त्यादिसिद्धान्तप्रतिपादिता। पराभिप्रायेण तु मिश्ररूपाया अपि तस्याः सिद्धौ भगवद्वद्रबाहूक्तविभागव्याघातप्रसङ्ग इति न किंचिदेतत्। इत्थं च मरीच्यपेक्षया मरीचेरनुत्सूत्रमेवेदं वचनं कपिलापेक्षया च विपर्यासबुद्धिजनकत्वज्ञानेऽपीत्थमुच्यमानमेतद्वचनं ममोत्सूत्रामिति परिज्ञानाभावात्कथंचिदनाभोगहेतुकमुत्सूत्रमिति वदतो माता च मे वन्ध्या चेति न्यायापात इति द्रष्टव्यम्। किंच-तस्योत्सूत्राभोगो नासीदित्यपि दुःश्रद्धानम्, व्युत्पन्नस्य तस्य तादृशास्पष्टवचनेऽप्युत्सूत्रत्वप्रत्ययावश्यकत्वाद्। न च साधुभक्तस्य तस्य तथोत्सूत्रभाषणमसंभाव्यमिति शङ्कनीयम्, कर्मपरिणतेर्विचित्रत्वाद्। अस्पष्टत्वं च तत्राभिमतानभिमतविधिनिषेधावधारणक्षमत्वलक्षणं न, उत्सूत्राभोगाभावात्; किन्त्वनभिमतनिषेधांशे देशविध्यारोपप्रयोजकतथाविधसंक्लेशात्। अत एव स्फुटाप्ररूपणमप्यस्यास्पष्टताख्यजातिविशेषशालिनु-

त्सूत्रप्ररूपण एव पर्यवस्यति। तदुक्तं पाक्षिकससतिकावृत्तौ–उत्सूत्रप्ररूपणायाः संसारहेतुत्वात्।

यथोक्तम्—

फुंडपागडमकहंतो जहट्ठियं बोहिलाभमुवहणइ।
जह भगवओ विसालो जरामरणमहो अहिआसि॥" त्ति।

किंच–इहत्ति देशविरत्यभिप्रायेण वोक्तमिति निर्णीतम्। उपदेशमालावृत्तौ "कपिल! इहान्यात्रापीति" मत्संबन्धिनि साधुसंबन्धिनि चानुष्ठाने धर्मोऽस्तीति भणनात्। न च तत्र 'साधुसंबन्धिनि' इति भणनेन 'मत्संबन्धिनि देशविरत्यनुष्ठाने धर्मोऽस्ति' इत्येवाभिप्राय इति वाच्यम्। जिनधर्मालसं ज्ञात्वा शिष्यमिच्छन् स तं जगौ–मार्गे जैनेऽपि धर्मोऽस्ति, मम मार्गेऽपि विद्यते इति हैमवीरचरित्रवचनात्स्वमार्गेऽपि तेन धर्माभिधानात्। स्वमार्गश्च तस्य स्वपरिगृहीतलिङ्गाचारदक्षणं कापिलदर्शनमेव। तत्र च मार्गे नियतकारणताविशेषसंबन्धेन धर्ममात्रमेव नास्ति कुतो देशविरत्यनुष्ठानम्? इत्युत्सूत्रमेवैतदिति। अनियमाभिप्रायेण त्वस्योत्सूत्रपरिहारेऽन्यलिङ्गादिसिद्धाभ्युपगमाचारित्रादेरपि तत्राभ्युपगमापत्तिरिति न किंचिदेतत्। एतेन कविला 'इत्थंपि'त्ति अपिशब्दस्यैवकारार्थत्वान्निरुपचरितः खल्वत्रैव साधुमार्गे, 'इहयंपि'त्ति स्वल्पस्त्वत्रापि विद्यते। स ह्येवमाकर्ण्य तत्सकाश एव प्रव्रजितः। मरीचिनाऽप्यनेन दुर्वचनेन संसारोऽभिनिर्वर्तित इति ज्ञानसागरसूरिवचनमपि व्याख्यातं तत्रापि मार्गभेदाभिप्रायेणैव धर्मभेदाभिधानाद्। नहि साधुश्रावकयोर्मार्गभेदेन धर्मभेदः संभवदुक्तिकोऽपीति विचारणीयम्।

यत्तु मरीचिवचनमिदमावश्यकनिर्युक्तौ दुर्भाषितं नतु सूत्रमिति नेदमुत्सूत्रं वक्तव्यमिति केनचिदुच्यते। तदसत्, दुर्भाषितपदस्यानागमिकार्थोपदेशे रूढत्वात्, तदुत्सूत्रताया व्यक्तत्वात्।

तदुक्तं पञ्चाशकसूत्रवृत्त्योः—

---

१ स्फुटप्रकटमकथयन् यथास्थितं बोधिलाभमुपहन्ति।
यथा भगवतो विशालो जरामरणमहो अधिकमासीत् (?)

" [1]संविग्गोणुवएसं ण देइ दुब्भासियं कडुविवागं ।
जाणंतो तंमि तहा अतहक्कारो उ मिच्छत्तं ॥ "

व्याख्या–संविग्नो भवभीरुरनुपदेशं नजः कुत्सितार्थत्वेन कुत्सितोपदेशमागमबाधितार्थानुशासनं न ददाति–परस्मै न करोति, तदाने संविग्नत्वहानिप्रसङ्गात् । किंभूतः सन् ? इत्याह–दुर्भाषितमनागमिकार्थोपदेशं कटुविपाकं दारुणफलं दुरन्तसंसारावहं मरीचिभवे महावीरस्येव, जानन्–अवबुध्यमानः । को हि पश्यन्नेवात्मानं कूपे क्षिपतीत्यादि ।

तथा श्रावकदिनकृत्यवृत्तावप्युक्तम्–" विपरीतप्ररूपणा उन्मार्गदेशना । इयं हि चतुरन्तादभ्रभवभ्रमणहेतुर्मरीच्यादेरिवेति ॥ "

धर्मरत्नप्रकरणसूत्रवृत्त्योरप्युक्तम्—

" [2]अइसाहसमेयं जं उस्सुत्तपरूवणा कडुविवागा ।
जाणंते हि वि दिज्जइ णिद्देसो सुत्तबज्झत्थे ॥ "

" ज्वलज्ज्वालानलप्रवेशकारिनरसाहसादप्यधिकमतिसाहसमेतद्वर्तते, यदुत्सूत्रप्ररूपणा–सूत्रनिरपेक्षदेशना कटुविपाका दारुणफला जानानोऽवबुध्यमानोऽपि दीयते–वितीर्यते निर्देशो निश्चयः सूत्रबाह्ये–जिनेन्द्रानुक्तेऽर्थे–वस्तुविचारे ।

" [3]दुब्भासिएण इक्केण मरीइ दुक्खसागरं पत्तो ।
भणिओ कोडाकोडी सागरसरिणामधिज्जाणं ॥
[4]उस्सुत्तमायरंतो बंधइ कम्मं सुचिक्कणं जीवो ।
संसारं च पवड्ढइ, मायामोसं च कुव्वइ य ॥ १ ॥
उम्मग्गदेसओ मग्गणासओ गूढहिययमाइल्लो ।
सढसीलो अ ससल्लो तिरिहउं (अगइं) बंधइ जीवो ॥ २ ॥

---

१ संविग्नोऽनुपदेशं न ददाति दुर्भाषितं कटुविपाकम् ।
जानन् तस्मिंस्तथा अतथाकारस्तु मिथ्यात्वम् ।
२ अतिसाहसमेतद् यदुत्सूत्रप्ररूपणा कटुविपाका ।
जानानो ह्यपि दीयते निर्देशः सूत्रबाह्येऽर्थे ॥
३ दुर्भाषितेनैकेन मरीचिर्दुःखसागरं प्राप्तः ।
भणितः कोटाकोटीसागरसदृग्नामधेयानाम् ॥
४ उत्सूत्रमाचरन् बध्नाति कर्म सुचिक्कणं जीवः ।
ससारं च प्रवर्धते मायामृषा च करोति च ॥ १ ॥

उम्मग्गदेसणाए चरणं णासंति जिणवरिंदाणं ।
वावण्णदंसणा खलु नहु लब्भा तारिसा दट्ठुं ॥ ३ ॥"

इत्यागमवचनानि श्रुत्वाऽपि स्वाग्रहग्रस्तचेतसो यदन्यथा (च)क्षते विदधति च तन्महासाहसमेव, अनवाप्तपारासारसंसारपारोदरविवरभाविभूरिदुःखभाराङ्गीकारादिति ॥

तथा श्राद्धविधिवृत्तावप्याशातनाधिकारे प्रोक्तम्—

"एतासु चोत्सूत्रभाषणार्हद्गुर्वाद्यवज्ञादिर्महत्याशातनाऽनन्तसंसारहेतुश्च साधद्याचार्य-मरीचि-जमालि-कूलवालकादेरिव । यतः—

[1]उस्सुत्तभासणाणं बोहीणासो अणंतसंसारो ।
पाणच्चएवि धीरा उस्सुत्तं ता ण भासंति ॥
तित्थयरपवयणसुअं आयरिअं गणहरं महिड्ढीयं ।" इत्यादि ॥

तथा योगशास्त्रवृत्तावप्युक्तम्—"भगवानपि हि भुवनगुरुरुन्मार्गदेशनात्सागरोपमकोटाकोटी यावद्भवे भ्रान्तस्तत्काऽन्येषां स्वपापप्रतीकारं कर्तुमशक्नुवतां गतिरिति। तथा तत्रैव—"अल्पादपि मृषावादाद्" इत्यस्य व्याख्या—"या त्वल्पस्यापि मृषावादस्य महानर्थहेतुत्वे संमतिवचनमिदमुपदर्शितम्—

[2]अहह सयलन्नपावा वितहपन्नवणमण्णमवि दुरंतं ।
जं मरीइभव उवज्जिय-दुक्कय-अवसेस-लेस-वसा ॥ १ ॥

उन्मार्गदेशको मार्गनाशको मूढहृदयमायावान् ।
शठशीलश्च सशल्यः तिर्यग्गतिं बध्नाति जीवः ॥ २ ॥
उन्मार्गदेशनया चरणं नाशयन्ति जिनवरेन्द्राणाम् ।
व्यापन्नदर्शनाः खलु नैव लब्धा तादृशा द्रष्टुम् ॥ ३ ॥

१ उत्सूत्रभाषकानां बोधिनाशोऽनन्तसंसारः ।
प्राणत्यागेऽपि धीरा उत्सूत्रं ततो न भाषन्ते ॥
तीर्थकरप्रवचनश्रुतमाचार्यं गणधरं महर्द्धिकञ्च ।

२ अहह सकलान्यपापाद् वितथप्रज्ञापनमप्यपि दुरन्तम् ।
यन्मरीचिभवे उपार्जितदुष्कृतावशेषलेशवशात् ॥ १ ॥
सुरस्तुतगुणोऽपि तीर्थकरोऽपि त्रिभुवने अतुल्यमल्लोऽपि ।
गोपादिभिरपि बहुशः कदर्थितस्त्रिजगत्प्रभु.....
गो-ब्राह्मण-भ्रूणान्तका अपि केचिदिह दृढप्रहारादयः ।
बहुपापा अपि च सिद्धा किल तस्मिन्नेव भवे ।

सुरेसुअगुणोवि तित्थंकरोवि तिहुअणअतुल्लमल्लोवि ।
गोवाईहिं वि बहुसो कयत्थिओ तिजयपहु तंसित्थी ॥ २ ॥
गोबंभणभूणंतगावि केइ इह दढपहाराई ।
बहुपावा वि य सिद्धा सिद्धा किर तंमि चेव भवे ॥३॥" त्ति ।

तथोपदेशरत्नाकरेऽपि प्रोक्तम्—

तथा केषांचिद्देशना पुनः प्रस्तावौचित्यादिसर्वगुणसुभगा परं केवलेनोत्सूत्रप्ररूपणदूषणेन कालिता, साऽपि पुरोनिर्द्धमनतुल्या, अमेध्यलेशेन निर्मलजलमिवोत्सूत्रलेशप्ररूपणेनापि सर्वेऽपि गुणा यतो दूषणतामिव भजन्ति, तस्य विषमविपाकत्वाद् । यदागमः—" दुब्भासिएण इक्केण " इत्यादि । तथा तत्रैव प्रदेशान्तरे प्रोक्तम्—" केचिद् गुरव आलंबनं विनैव सततं बहुतरप्रमादसेवितया कुचारित्रिणः देशनायामप्यचातुर्यभृतश्च, यथा तथाविधाः पार्श्वस्थादयः, यथा वा मरीचिः " कविला इत्थंपि इहयंपि " इत्यादिदेशनाकृद् । देशनाचातुर्यं चोत्सूत्रपरीहारेण सम्यक् सभाप्रस्तावौचित्यादिगुणवत्त्वेन च ज्ञेयम् " इत्यादि ।

यत्तु कश्चिदाह—उत्सूत्रलेशवचनसामर्थ्यादेव प्रतीयते मरीचेर्वचनं न केवलमुत्सूत्रं किन्तूत्सूत्रामिश्रामिति । तन्न, एवं सति "जो चेव भावलेसो सो चेव भगवओ बहुमओ"त्ति पञ्चाशकवचनाद् य एव भावलेशो भगवद्बहुमानरूपो द्रव्यस्तवाद् भवति स भगवतो मुख्यवृत्त्याऽनुमत इत्यर्थप्रतीतौ तत्र भावलेशस्याभावमिश्रितस्य भगवद्बहुमतत्वापत्तेः[1]; तस्माल्लेशपदमपकर्षाभिधायकं न तु मिश्रितत्वाभिधायकमिति मन्तव्यम् । स्यादयमभिप्रायः—धर्मस्यापि ह्यशुभानुबन्धादिति आह " धम्मोवि सबलओ होइ[2] " इत्यादिना शास्त्रे शबलत्वमुच्यते, शबलत्वं च मिश्रत्वमेव मरीचिवचनस्यापि कुदर्शनप्रवृत्त्याऽशुभानुबन्धान्मिश्रत्वमविरुद्धम्, कुदर्शनप्रवृत्तेरेव तस्य संसारवृद्धिहेतुत्वेनावश्यकचूर्णावुक्तत्वादिति । सोऽयं दुरभिप्रायः, यतः इत्थं सति फलत एवेदमुत्सूत्रं स्याद् न तु स्वरूपतः, उच्यते स्वरूपतोऽपीदमुत्सूत्रत्वादेव च संसारहेतुरिति

१ यश्चैव भावलेशः स एव भगवतो बहुमत इति ।
२ धर्मोऽपि शबलो भवति ।

यत्किञ्चिदेतत्। अत एव श्राद्धप्रतिक्रमणसूत्रचूर्णावपि "पडिसिद्धाणं करणे" इति व्याख्याने विपरीतप्ररूपणा विविच्य तत्कृताशुभफलभागित्वेन मरीचिरिव दृष्टान्ततयोपदर्शितः। तथाहि—"विवरीअपरूवणाए" त्ति च शब्दः पूर्वापेक्षया "विवरीअं वितहं उस्सुत्तं भण्णइ, परूवणा पन्नवणा देसनत्ति णे पज्जाया" विपरीता चासौ प्ररूपणा च विपरीतप्ररूपणा तस्यां सत्यां प्रतिक्रमणं भवति सा चैवंरूपा—

"[1]सिअवायमए समए परूवणेगंतवायमहिगिच्च।
उस्सग्ग-ववायाइसु कुग्गहरूवा मुणेयव्वा॥ १॥
पिंडं असोहयंतो अचरित्ती इत्थ संसओ णत्थि।
चारित्तंमि असंते सव्वा दिक्खा निरत्थिया॥ २॥

एवं उस्सग्गमेव केवलं पण्णवेइ।

अववायं च—

चेइअपूआकज्जा जइणा वि हु वयरसामिणव्व किल।
अज्जियसुअसूरीण व चीआवासे वि न हु दोसो॥ ३॥"

तथा—

"[2]लिंगावसेसमित्तेवि वंदणं साहुणा वि दायव्वं।
मुक्कधुरा संपागडसेवी इच्चाइ वयणाओ॥"

अहवा—

---

१ विपरीतं वितथं उत्सूत्रं भण्यते, प्ररुपणा प्रज्ञापना देशनेति एषां पर्यायाः।

२ स्याद्वादमये समये प्ररूपणैकान्तवादमधिकृत्य।
उत्सर्गापवादादिषु कुग्रहरूपा ज्ञातव्या॥ १॥
पिण्डमशोधयन्नचारित्री अत्र संशयो नास्ति।
चारित्रेऽसति सर्वा दीक्षा निरर्थका॥ २॥

एवमुत्सर्गमेव केवलं प्रज्ञापयति।

अपवादं च—

चैत्यपूजाकार्यादौ यतिनाऽपि खलु वज्रस्वामिनेव किल।
अजितसुतसूरिणेव चैत्यावासेऽपि नैव दोषः॥ ३॥

३ लिङ्गावशेषमात्रेऽपि वन्दनं साधुनाऽपि दातव्यम्।
मुक्तधूः संप्रकटसेवी इत्यादि वचनात्॥

अथवा—

पासत्थो-सन्न-हाछंदे कुसीले सबले तहा ।
दिट्ठीएवि इमे पंच गोयमा न निरिक्खए ॥
जो जहावायं न कुणइ मिच्छदिट्ठी तओ हु को अन्नो ।
वड्ढेइ य मिच्छत्तं परस्स संकं जणेमाणो ॥

इच्चाइ णिच्छयमेव पुरओ करेइ । किरियाकारणं न नाणं, नाणं वा न किरिया, कम्मं पहाणं न ववसाओ वा कम्मं, एगंतेण णिच्चमणिच्चं वा दव्वमयं पज्जायमयं सामन्नरूवं विसेसरूवं वा वत्थुं पयासेइ, एवंविहा एगंतवायप्पहाणा परूवणा विवरीयपरूवणा भवइ । अओ तेसिं पडिक्कमणंति चउत्थो हेऊ ।

इयमयुक्ततरा दुरन्तानन्तसंसारकारणम् ।

यदुक्तमागमे—

दुब्भासिएण इक्केण मरीइ दुक्खसागरं पत्तो ।
भमिओ कोडाकोडी सागरसरिणामधिज्जाणं ॥

अत्र कश्चिदाह—नन्वत्र दुरन्तानन्तशब्दौ दुःखलभ्यान्तत्वेनान्ताभावेन चासंख्यातानन्ताभिधायकौ विरुद्धार्थाविति कथमेतदुपपत्तिरिति सभ्रान्तः

" वणस्सइ कायमइगओ उक्कोसं जीवो उ संवसे काल– ।
मणंतदुरंतं समय गोअम ! मा पमाएह ॥ "

---

१ पार्श्वस्थोत्सन्न-यथाछन्दाः कुशीलः शबलस्तथा ।
दृष्ट्याऽपि इमान् पञ्च गौतम ! न निरीक्षते ॥

२ यो यथावादं न करोति मिथ्यादृष्टिस्ततः खलु कोऽन्यः ।
वर्द्धयति च मिथ्यात्वं परस्य शङ्कां जनयन् ॥

इत्यादि निश्चयमेव पुरतः करोति । क्रियाकारणं न ज्ञानं, ज्ञानं वा न क्रिया, कर्म प्रधानं न व्यवसायो वा कर्म्म, एकान्तेन नित्यमनित्यं वा द्रव्यमयं पर्यायमयं सामान्यरूपं विशेषरूपं वा वस्तु प्रकाशयति, एवंविधा एकान्तवादप्रधाना प्ररूपणा विपरीतप्ररूपणा भवति । अतस्तेषां प्रतिक्रमणमिति चतुर्थो हेतुः ।

३ दुर्भाषितेनैकेन मरीचिर्दुःखसागरं प्राप्तः ।
भ्रान्तः कोटाकोटी सागरसदृग्नामधेयानाम् ॥

४ वनस्पतिकायमतिगत उत्कृष्टं जीवस्तु संवसेत्कालम् ।
अनन्तं दुरन्तं समयं गौतम मा प्रमादय ॥

इत्यादावनन्तशब्दसमानाधिकरणस्य दुरन्तशब्दस्य दर्शनाद् दुरन्तानन्तवचनस्यातिशयितानन्तवाचकत्वेन विरोधाभावाद्। इत्थं सति विपरीतप्ररूपणाया दुरन्तानन्तसंसारकारणत्वे मरीचिदृष्टान्तोपन्यासस्य साक्षात्तस्यासंख्यातभवबाधकप्रमाणविरोधेनानुपपत्तिस्तु तस्या दुरन्तानन्तसंसारकारणत्वोपलक्षितायुक्ततरत्वोपनयनाभिप्रायेण निरसनीया।

यत्तु श्रावकस्य विपरीतप्ररूपणाया अत्र प्रकृतत्वात्तस्य स्थानाभोगाद् गुरुनियोगाद्वा तत्संभवात्तथाविधक्लिष्टपरिणामाभावान्नासावनन्तसंसारहेतुः, अत एव श्रावकप्रतिक्रमणसूत्रस्य वृत्तौ केवलं दुरन्तशब्दस्यैवाभिधानम्। या च विपरीतप्ररूपणा मार्गपतितानामनन्तसंसारहेतुः सा सभाप्रबन्धेन धर्मदेशनाधिकारिणां बहुश्रुतत्वेन लोकपूज्यानामाचार्यादीनां कुतश्चिन्निमित्तान्निजलब्ध्यादिहानिभयेन, सावद्याचार्यादीनामिव परविषयकमात्सर्येण, गोष्ठामाहिलादीनामिव तीर्थकृद्वचनस्याश्रद्धाने, जमालिप्रभृतीनामिवाभोगपूर्विकाऽवसातव्या। ते चेहाधिकाराभावेनानुक्ता अप्यनन्तसंसारित्वेन स्वत एव भाव्या। येन कारणेन कस्यचिदनाभोगमूलकमप्युत्सूत्रं बहुदर्शनप्रवृत्तिहेतुत्वेन दीर्घसंसारहेतुरपि भवति, तेन दुरन्तसंसारमधिकृत्य मरीचिरिव दृष्टान्ततया दर्शितः। तस्य च तथाभूतमप्युत्सूत्रं तथैव संजातम्, श्रीआवश्यकचूर्णावपि तथैवोक्तत्वात्; अन्यथा द्विभवादिभवभाविमुक्तीनामपि मुनिप्रभृतीनामनन्तसंसारित्ववक्तव्यताऽऽपत्तौ जैनप्रक्रियाया मूलत एवोच्छेदः स्यादित्यादि परेणोक्तं तदसत्। श्रावकस्यापि "जणस्स[1] धम्मं परिकहेइ" त्ति वचनाद् गुरूपदेशायत्ततया धर्मकथनाधिकारित्वश्रवणात्कर्मपरिणतिवैचित्र्येण तस्यापि गुरूपदेशायत्ततां परित्यज्य कथंचित्सावद्याचार्यादीनामिव विपरीतप्ररूपणासंभवात् तस्याश्च स्वरूपतोऽनन्तसंसारकारणत्वात् तत्प्रतिक्रमणार्थमिहेत्थमुपनिबन्धाद्।

न चान्यत्र दुरन्ताभिधानमनन्तत्वप्रतिक्षेपकम्, दुरन्तत्वस्यानन्तत्वाविरोधित्वाद्। अनन्तसंसाराधिकाराभावादिह दृष्टान्तानुक्तिरिति तु प्रकृतग्रन्थस्य खण्डनं न तु मण्डनम्। सा चायुक्ततरा, 'दुरन्ता-

१ जनस्य धर्मं परिकथयति।

नन्तसंसारहेतुः' इत्यवस्थितस्याऽत्यागेनैव तद्दृष्टान्ताध्याहारसंभवात् तस्मादुक्तोपलक्षणव्याख्यानरीत्यैव प्रकृतोपनयसमर्थनं न्याय्यम्। ईदृशोत्सूत्रवचने स्वरूपतोऽनन्तसंसारहेतुत्ववचने चरमशरीरिक्रियमाणारम्भेऽपि स्वरूपतो नरकहेतुत्ववचनवत् प्रक्रिया विरोधादिति सम्यग्विभावनीयम्। इत्थं च—

"आयरिअपरंपरएण आगयं जो उ आणुपुव्वीए।
कोवेइ छेयवाई जमालिणासं व णासीहि॥"[1]

"आचार्याः श्रीसुधर्मस्वामि-जंबूनाम-प्रभवार्यरक्षितास्तेषां परम्परा-प्रणालिका पारम्पर्यं तेनागतं यद्व्याख्यानं सूत्राभिप्रायस्तद्यथा-व्यवहारनयाभिप्रायेण क्रियमाणमपि कृतं भवति। यस्तु कुतर्कदर्पाध्मातमनसा मिथ्यात्वोपहतदृष्टितया छेकबुद्ध्या-निपुणबुद्ध्या 'कुशाग्रीयशेमुषीकोऽहम्' इति कृत्वा कोपयति दूषयति-अन्यथा तमर्थं सर्वज्ञप्रणीतमपि व्याचष्टे 'कृतम्' इत्येवं ब्रूयाद्-वक्ति वचनम्। नहि मृत्पिण्डक्रियाकाल एव घटो निष्पद्यते, कर्मगुणव्यपदेशानामनुपलब्धेः, स एवं छेकवादी-'निपुणोऽहम्' इत्येवंवादी पण्डिताभिमानी जमालिनाशं-जमालिनिह्नववत्सर्वज्ञमतविगोपको विनङ्क्ष्यति-अरघट्टघटीयन्त्रन्यायेन संसारचक्रवालं बंभ्रमिष्यति" इत्यादि सूत्रकृताङ्गयथातथ्याध्ययननिर्युक्तिवृत्तिवचनमात्रमवलम्ब्य ये जमालेररघट्टघटीयन्त्रन्यायेन संसारचक्रवालभ्रमणे साध्ये दृष्टान्ततयोपदर्शितत्वाद् दृष्टान्तस्य च निश्चितसाध्यधर्मवत्त्वात् तस्यानन्तसंसारित्वसिद्धिरिति वदन्ति ते पर्यनुयोज्याः। नन्वयमपि दृष्टान्तः प्रागुक्तमरीचिदृष्टान्तवदुपलक्षणपर एवेत्यरघट्टघटीयन्त्रन्यायोपलक्षितसंसारचक्रवालपरिभ्रमणसाध्येनायुक्त इति कथमस्माद्भवतामिष्टसिद्धिः? अन्यथाऽरघट्टघटीयन्त्रन्यायोऽत्र प्रकरणमहिम्ना पुनः पुनश्चतुर्गतिभ्रमणपर्यवसित इति चतुर्गतिभ्रमणमपि जमालेरनेन न्यायेन सिध्येत्।

यत्तु यस्यैकेन्द्रियादिषु पुनः पुनरुत्पादे द्राघीयसी संसारस्थितिस्तमुद्दिश्यैवायं न्यायः प्रवर्तते

---

१ आचार्यपारम्पर्येणागतं यस्तु आनुपूर्व्या।
कोपयति च्छेकवादी जमालिनाशमिव नङ्क्ष्यति॥

अनुत्तरम्—

"एय पुण एवं खलु अन्नाणपमायदोसओ णेयं।
जं दीहकालठिई भणिआ एगिंदियाईण ॥"—[1] इति

उपदेशपदे व्याख्यायां एकेन्द्रियादिषु दूरमनुजत्वलक्षणाश्चरघट्टघटीयन्त्रन्यायक्रमणे पुनः पुनरावर्तते। तदपि कुतः सिद्धम्? इत्याह यद् यस्मात्कारणाद्वाधीयसी कायस्थितिः पुनः पुनर्मृत्वा तत्रैव काये उत्पादलक्षणा भणिता प्रतिपादिता सिद्धान्ते एकेन्द्रियादीनां जातीनामिति॥ तत एकेन्द्रियादिजात्याश्रितस्यैवारघट्टघटीयन्त्रन्यायस्याश्रयणान्न दृष्टान्तदार्ष्टान्तिकयोर्वैषम्यमिति।

तदसत्। तत्र मनुजत्वगतिदौर्लभ्याधिकारादरघट्टघटीयन्त्रन्यायसामान्यस्यैकेन्द्रियादिजातिमात्रेण विशेषविवक्षायामप्यत्र सर्वज्ञमतविकोपकस्य चतुरशीतिलक्षजीवयोनिसंकुल संसारपरिभ्रमणाधिकारात्पुनः पुनर्गतिचतुष्टयभ्रमणाश्रितस्यैव विवक्षितत्वाद्। अत एव श्रुतविराधनातश्चातुर्गतिसंसारपरिभ्रमणं भवतीति स्फुटमेवान्यत्राभिहितम्, जमालिदृष्टान्तश्च तत्रोपन्यस्त इति। तथाहि—

"इच्चेयं दुवालसंगं गणिपिडगं तीते काले अणंता जीवा आणाए विराहेत्ता चाउरंतसंसारकंतारं अणुपरिअट्टिंसु १। इच्चेयं दुवालसंगं गणिपिडगं पडुप्पन्ने काले परिता जीवा आणाए विराहित्ता चाउरंतसंसारकंतारं अणुपरिअट्टंति २। इच्चेयं दुवालसंगं गणिपिडगं अणागए काले अणंता जीवा आणाए विराहित्ता चाउरंतसंसारकंतारं अणुपरिअट्टि (हि)तित्ति" नान्दिसूत्रे।

एतद्वृत्तिर्मलयगिरिकृता, यथा-इच्चेयमित्यादि इत्येतद्द्वादशाङ्गं गणिपिटकमतीतकालेऽनन्ता जीवा आज्ञाया यथोक्तपरिपालनाभावेन विराध्य चातुरन्त-

---

१ एतत्पुनरेवं खलु अज्ञानप्रमाददोषतो ज्ञेयम्।
यद्दीर्घकालस्थितिर्भणिता एकेन्द्रियादीनाम्॥ इति

२ इत्येवं द्वादशाङ्गं गणिपिटकमतीते काले अनन्ता जीवा आज्ञाया विराध्य चातुरन्तसंसारकान्तारमनुपर्यटन् १। इत्येवं द्वादशाङ्गं गणिपिटकं प्रत्युत्पन्ने काले परित्ता जीवा आज्ञाया विराध्य चातुरन्तसंसारकान्तारमनुपर्यटन्ति २। इत्येवं द्वादशाङ्गं गणिपिटकमनागते काले अनन्ता जीवा आज्ञाया विराध्य चातुरन्तसंसारकान्तारमनुपर्यटिष्यन्तीति॥

संसारकान्तारं विविधशारीरमानसानेकदुःखविटपिशतसहस्रदुस्तरं भवगहनं अणुपरिअट्टिंसुत्ति अनुपरावृत्तवन्त आसन्। इह द्वादशाङ्गं सूत्रार्थोभयभेदेन त्रिविधं, द्वादशाङ्गमेवाज्ञा आज्ञाप्यते जन्तुगणो हितप्रवृत्तौ यया साऽऽज्ञेति व्युत्पत्तेः, ततः सा त्रिधा, तद्यथा—सूत्राज्ञा अर्थाज्ञा तदुभयाज्ञा। संप्रत्यमूषामाज्ञानां विराधनाश्चिन्त्यते—यदाऽभिनिवेशतोऽन्यथा सूत्रं पठति तदा सूत्राज्ञाविराधना। सा च यथा जमालिप्रभृतिना यदाऽभिनिवेशवशतोऽन्यथा द्वादशाङ्गार्थं प्ररूपयति तदाऽर्थाज्ञाविराधना; सा च गोष्ठामाहिलादीनामिवावसातव्या। यदा पुनरभिनिवेशवशतः श्रद्धाविहीनतया हास्यादितो वा द्वादशाङ्गस्य सूत्रमर्थं च विकुट्टयति तदोभयाज्ञाविराधना; सा च दीर्घसंसारिणामभव्यादीनामनेकधा विज्ञेयेति। तथाऽभिनिवेशतोऽन्यथा पाठादिलक्षणया विराधनया वि(रा)ध्यातीते काले ऽनन्ता जीवाश्चातुरन्तसंसारं नारकतिर्यग्नरामरविविधवृक्षजालदुस्तरं भवाटवीगहनमित्यर्थं अनुपरावृत्तवन्त आसन् जमालिवद्। अर्थाज्ञायाः पुनरभिनिवेशतोऽन्यथा प्ररूपणादिलक्षणया विराधनया गोष्ठामाहिलवदिति तु हारिभद्रीयामेतद्वृत्तावुक्तमिति॥" तस्मादुपलक्षणव्याख्यान एव यथोक्तदृष्टान्तोपपत्तिरिति ज्ञातव्यम्।

यत्तु आशातनाबहुलानां नियमेनानन्तसंसारो भवतीति ज्ञापनार्थमेवेदं जमालिदृष्टान्तोपदर्शनं, चातुरन्तशब्दस्तु संसारविशेषणत्वेन संसारस्वरूपाभिधायको न पुनः सर्वेषामप्याशातनाकारिणां गतिचतुष्टयाभिधायकः; नहि गतिचतुष्टयगमनमेवानन्तसंसारित्वाभिव्यञ्जकं, अन्वयव्यतिरेकाभ्यां व्यभिचारात्, तस्माद् गत्यादीनां प्रति प्राणिनं भिन्नत्वान्न तौल्यमिति परेणात्र समाधानं क्रियते, तदसंबद्धवाग्वादमात्रम्। चतुरन्तशब्दार्थस्य संसारविशेषणत्वे चतुरन्तसंसारपरिभ्रमणस्य विशिष्टसाध्यस्य पर्यवसानात् चतुरन्तान्वितसंसारस्य भ्रमणेऽन्वयात्, तथा च दृष्टान्ते जमालौ साध्यवैकल्पदोषानुद्धारात्। नहि विशिष्टे साध्ये विशेष्यांशसद्भावमात्रेण दृष्टान्ते साध्यवैकल्यदोष उद्धर्तुं शक्यते। अनभिज्ञस्यार्हत्त्वैत्यानगारशब्दाभ्यामेकस्यैवार्थस्य बोधनमित्यभ्युपगमे च प्रेक्षावतामुपहासपात्रत्वापत्तिः। गत्यादीनां च यथा प्रति प्राणिनं भिन्नत्वं तथा संसारस्याप्यध्यवसायविशेषाद् भिन्नत्वं किं नेष्यते? "उम्मग्गमग्गसंपट्ठियाणं" इत्यादिनोत्सूत्रभाषिणां नियमादनन्तससारसिद्धौ च

सीअलविहारओ खलु भगवंतासायणाणिओगेण ।
तत्तो भवो अणंतो किलेस बहुलो जओ भणिअं ॥

"तित्थयरपवयणसुअं" इत्याद्युपदेशपदवचनाच्छीतलविहारिणां पार्श्वस्थादीनां नियमादनन्तसंसारापत्तिरिष्यते च, तत्र परिणामभेदाद्भेद इत्यप्यध्यवसायप्रत्ययः संसारविशेषो महानिशीथोक्तरीत्या श्रद्धेयः। किंच-अरघट्टघटीयन्त्रन्यायेन यत्र संसारपरिभ्रमणप्रदर्शनं तत्र नियमादनन्तसंसार इत्यभ्युपगमे उत्सूत्रभाषिणामिव कामासक्तानामपि नियमतोऽनन्तसंसाराभ्युपगमप्रसङ्गः, तेषामपि संसारभ्रमणे तन्न्यायप्रदर्शनात्। तदुक्तमाचाराङ्गशीतोष्णीयाध्ययनवृत्तौ-"संचिचमाणा पुणरिति गर्भं" इत्यवयवव्याख्याने "तेन-कामोपादानजनितेन कर्मणा संसिच्यमाना आपूर्यमाणा गर्भाद्गर्भान्तरमुपयान्ति-संसारचक्रवालेऽरघट्टघटीयन्त्रन्यायेन पर्यटन्त आसते" इत्युक्तं भवतीति एवमनेकेषु प्रदेशेष्वित्थमभिधानमस्तीति न किंचिदेतत्।

यच्च "जमाली णं भंते देवताओ देवलोगाओ आउक्खएणं जाव कहिं उववज्जिहि ? गोयमा ! चत्तारि पंच तिरिक्खजोणिय-मणुअ-देवभवगहणाइं संसारं अणुपरिअहिता तओ पच्छा सिज्झिहिति।" "इत्यत्र चत्वारो द्वीन्द्रियादयः पञ्च चैकेन्द्रियाः पृथिव्यादयस्ते च ते तिर्यग्योनिकाश्च तेषु देवमनुष्येषु भवग्रहणानि भ्रान्त्वा" इति व्याख्यानादत्र च तीर्थकराशातनाकृतोऽधिकृतत्वाद् भवानन्त्यलक्षणबहुत्वस्य स्पष्टत्वाद् भगवत्यपेक्षयैव जमालेरनन्तभवसिद्धिरिति परस्य मतं तदपूर्वबुद्धिपाटवमूलम्,। एतादृशस्य गम्भीरार्थस्य वृत्तिकृताऽस्पष्टीकृतस्य स्वयमेव स्पष्टीकरणात् कथं चायं तपस्वी नाकलयत्येतावदपि यदमू चतुःपञ्चशब्दौ भवग्रहणसमानाधिकरणौ भिन्नविभक्त्यन्तौ व्यस्तौ समासान्तःपतिततिर्यग्योनिकशब्दस्य विशेषणतामापद्यते इति। न चेमौ न विभक्त्यन्ताविति

---

१ शीतलविहारतः खलु भगवदाशातनानियोगेन ।
ततो भवोऽनन्तः क्लेशबहुलो यतो भणितम् ॥
तीर्थकरप्रवचनश्रुतं × × × ×॥

२ जमाली भगवन् ! देवताया देवलोकादायुःक्षयेण यावत्क्व उत्पत्स्यते ? गौतम ! चत्वारि पञ्च तिर्यग्योनिक-मनुज-देवभवग्रहणानि संसारमनुपर्यट्य ततः पश्चात्सेत्स्यतीति ॥

वाच्यम्, विभक्त्यन्तमन्तरेण शसन्तचतुःशब्दनिष्पन्नस्य 'चत्तारि' इति शब्दस्य सर्वथाऽसिद्धेः। नाप्यत्रालुप्समोसोऽस्तीति, एतेन चतसृषु पञ्चसु च जातिषु तिर्यग्मनुजदेवभवग्रहणानीति भणनादनन्तभवसिद्धिरित्यप्यपास्तम्, 'चत्तारि' इत्यत्र द्वितीयाबहुवचने सप्तमीबहुवचनार्थत्वस्य 'पञ्च' इत्यमन्तरसप्तमीबहुवचनलोपस्य समुच्चयार्थकचकाराध्याहारस्य च प्रसङ्गात्। किञ्च—चतुःपञ्चशब्दयोः संख्यायाश्चकयोर्व्यक्तिवचनत्वेन कुतस्ताभ्यां जातिरुपस्थितिरिति विभावनीयम्। यदि च जमालेरनन्तः संसारः सूत्रे वक्तव्योऽभविष्यत् तदा "तिरिय-मणुस्सदेवेसु अणंताइं भवग्गहणाइं संसारमणुपरिअट्टित्ता तओ पच्छी सिज्झिस्सइ" इत्यादि। अथवा "जेहा गोसाले मंखलिपुत्ते तहेव णेरइअवज्जं संसारमणुपरिअट्टिता तओ पच्छा सिज्झिस्सइ" इत्यादि भणनीयमभविष्यत्। अन्यथा नवसु जातिषु भवग्रहणेन भ्रमणादपि कुत आनन्त्यलाभः? नवभिरपि चारैः तत्पूर्तिसंभवात्, प्रतिव्यक्तिभ्रमणं नाक्षरबलाल्लभ्यते बाधितं च। सर्वतिर्यग्देवमनुजेषु स्वेच्छामात्रेण नियतानन्ततिर्यग्योनिकभवग्रहणाश्रयणे च किं सूत्रावलम्बनव्यपदेशेन? स्वकल्पनाया महत्त्वाध्यारोपस्य महदाशातनारूपत्वात्। एतेन

"च्युत्वा ततः पञ्चकृत्वो भ्रान्त्वा तिर्यग्नृनाकिषु।
अवाप्तबोधिर्निर्वाणं जमालिः समवाप्स्यति॥"—

इति हैमवीरचरित्रीयश्लोके पञ्चकृत्वशब्दः पञ्चवाराभिधायकः, स च तिर्यक्शब्देन योजितः सन् जमालिस्तिर्यग्योनौ पञ्चवारान् यास्यतीत्यर्थाभिधायकः संपन्नः, तथा च तिर्यग्योनौ वारपूर्तिर्मनुजादि गत्यन्तरभवान्तरप्राप्तिमन्तरेण न भवति, सा च प्राप्तिराशातनाबहुलस्य जमालेरनन्तकालान्तरितैव स्यात्, एवं पञ्चवारगमनेऽनन्तभवग्रहणमनन्तगुणमपि संभवति। मनुजगतिवारपूर्तिस्तूत्कर्षतोऽपि सप्ताष्टभवैरैव स्यात्। देवनारकयोस्त्वनन्तरं पुनरुत्पादाभावेनैकैकमेव भवेन वार-

---

१ तिर्यग्मनुष्यदेवेषु अनन्तानि भवग्रहणानि संसारमनुपर्यट्य ततः पश्चात्सेत्स्यति॥

२ यथा गोशालो मंखलिपुत्रस्तथैव नैरयिकवर्जं संसारमनुपर्यट्य ततः पश्चात्सेत्स्यति॥

पूर्तिः स्याद् इत्यादि कापि परकल्पना दूरमपास्ता वेदितव्या। 'पञ्चकृत्वः' इत्यस्य तिर्यक्शब्देनैव योजनाया असंभवात्, द्वन्द्वसमासमर्यादया प्रत्येकमेव तदन्वयाद् भवग्रहणव्यक्त्यपेक्षस्यं पञ्चवारत्वस्यानन्तवारग्रहणेषु जात्यपेक्षसंकोचेन समर्थयितुमशक्यत्वात्, तादृशशाब्दबोधस्याकाङ्क्षां विनाऽनुपपत्तेः। नह्येकत्रानन्तवारभवग्रहणाभ्युपगमेऽप्येकवारभ्रमणमेव वक्तुं युक्तम्, स्थानभेदेन तत्स्थानावच्छिन्नाधिकृतक्रियाजन्यव्यापारोपहितकाललक्षणवारभेदाद्; विजातीयस्थानगमनान्तरिततज्जातीयस्थानावच्छिन्नभ्रमणक्रियाजन्यभवग्रहणव्यापारोपहितो यावान् कालस्तावत एकवारत्वाभ्युपगमे च "तिर्यक्ष्वनन्तवारं भ्रान्तः" इति वदत एव व्याघातः। किंच एवं "बहवो जीवा नित्यनिगोदेष्वनन्तवारं जन्ममरणानि कुर्वन्ति" इत्याद्यखिलप्रवचनविलोपप्रसङ्ग इति न किंचिदेतत्।

किंच-'च्युत्वा ततः पञ्चकृत्वः' इत्यादिश्लोकैकवाक्यतया हि 'चत्तारि पंच' इत्यादिभगवतीसूत्रं त्वया व्याख्यातुमिष्टम्, तथा च तत्र विजातीयभवान्तरिततया तिर्यक्षु पञ्चवारमेवानन्तभवग्रहणसिद्धिरिति सर्वेषामपि प्रत्यनीकामीदृशमेव संसारपरिभ्रमणं सिध्येत् नत्वनन्तान्यान्यभवान्तरितभवबहुलम्; यतो "देवाकिब्बिसिया णं ते ताओ देवलोगाओ आउक्खएणं भवक्खएणं ठिइक्खएणं अणंतरं चयं चत्ता कहिं गच्छिति? कहिं उववज्जिति? गोयमा! जाव चत्तारि पंच णेरइय-तिरिक्खजोणिय-मणुस्स-देवभवग्गहणाइं संसारं अणुपरिअट्टित्ता तओ पच्छा सिज्झंति, जाव अंतं करंति"त्ति त्वया सामान्यसूत्रमङ्गीक्रियते ततश्चोक्तस्य 'चत्तारि पंच' इत्यादिविशेषसूत्रस्य नारकगतिप्रतिषेधमात्रेणैव विशेषोऽभ्युपगम्यते नत्वधिकः कश्चिदपीति।

अथास्त्वन्यत्र यथा तथा भगवत्यपेक्षया तु जमालेरनन्ता एव भवा लभ्यन्ते, यतो यावच्छब्दः सामान्यसूत्रेऽस्ति, तस्य च प्रयोगः

१ देवाकिल्बिषिकास्ते तस्माद्देवलोकादायुःक्षयेण भवक्षयेण स्थितिक्षयेण अनन्तरं चयं च्युत्वा क्व गमिष्यति? क्व उत्पत्स्यते? गौतम! यावच्चत्वारि पञ्च नैरयिक-तिर्यग्योनिक-मनुष्य-देवभवग्रहणानि संसारमनुपर्यट्य ततः पश्चात्सेत्स्यति, यावदन्तं करिष्यतीति।

क्वचिद्विशेष्यत्वेन क्वचिच्च विशेषणत्वेन स्यात्, तत्र विशेष्यत्वेन प्रयुक्तो यावच्छब्द उक्तगणसंबन्धिभ्यामाद्यन्तपदाभ्यां विशिष्टः सन्नेव गणमध्यवर्तिनां पदार्थानां संग्राहको भवति। यथा–जमाली णं अणगारे अरसाहारे विरसाहारे अन्ताहारे पंताहारे लूहाहारे तुच्छाहारे अरसजीवी विरसजीवी जाव तुच्छजीवी उवसंतजीवी पसंतजीवी विचित्तजीवी? हंता–" इत्यादिसामान्यसूत्रोक्तस्य गणस्याद्यन्तशब्दाभ्यां विशिष्टो 'गोअमा! जमाली णं अणगारे अरसाहारे जाव विचित्तजीवीति सूत्रोक्तवाक्यगतो यावच्छब्दस्तस्य च सर्वादित्वेन बुद्धिस्थवाचकत्वान्मध्यवर्तिनामपि पदार्थानां नानारूपाणां नानासंख्याकानां संग्राहकत्वम्, एवमाद्यन्तशब्दयोरपि गणानुरोधेन भिन्नत्वमेव बोध्यं न पुनर्यावच्छब्दोऽपि घटपटादिनियतपदार्थवाचक इति। विशेषणभूतस्तु यावच्छब्द उक्तपदवाच्यानामर्थानां देशकालादिनियामको भवति। तत्र देशनियामकत्वं–यावत्पञ्चविंशतियोजनानि पतनं तावद्गन्तव्यमित्यादौ। कालनियामकत्वं च–" जाव णं से जीवे सया समियं तं तं भावं परिणमइ ताव च णं से जीवे आरभइ सारभइ समारभइ " इत्यादौ प्रसिद्धम्। विशेषणविशेष्यत्वस्वरूपविकलस्तु यावच्छब्दो डित्थडवित्थादिवदर्थशून्य एव स्यात्; नादिह यावच्छब्दो नानर्थको नवा विशेष्यभूतः, आद्यन्तशब्दाभ्यामविशिष्टत्वाद्; विशेष्यभूतस्य च तस्य त्याभ्यां विशिष्टस्यैव प्रयोगात् किन्तु विशेषणभूतः; 'प्राक् पतितं विशेषणम्' इति वचनात् स चात्राधिकारात्कालनियामक इति। यावत्कालं चतुःपंचमसूत्रे स्थावरजातिषु नारकतिर्यग्योनिकमनुजदेवानां भवग्रहणानि यत्तदोर्नित्याभिसंबंधात् तावत्कालं संसारमनुपरावृत्य ततः पश्चात्सेत्स्यन्ति, यावत्सर्वदुःखानामन्तः करिष्यन्तीति सामान्यसूत्रार्थः पर्यवस्यति। एवं सामान्यसूत्रोक्तानुसारेण विशेषसूत्रेऽपि कालनियमार्थं तावच्छब्दवद् यावच्छब्दोऽप्यध्याहारार्थः, तावदन्तरेण वाक्यद्वयानुपपत्त्या

---

२ जमालिरनगारोऽरसाहारो विरसाहारो अन्ताहारः प्रान्ताहारो रूक्षाहारस्तुच्छाहारोऽरसजीवो विरसजीवो यावत्तुच्छजीवो उपशान्तजीवो प्रशान्तजीवो विचित्रजीवो, अहमिति।

१ यावत्तं जीव सदा सामितं तं तं भावं परिणमते, तावच्च स जीव आरभते समारभते।

कालनियमानुपपत्तिरिति व्यक्तैव सामान्यसूत्रादिव विशेषसूत्रादप्यनन्तभवसिद्धिरिति–चेत्, तदिदमसिद्धमसिद्धेन साधयतो महातार्किकत्वमायुष्मतः। यतो 'जाव चत्तारि' इत्यादावपि शसन्तचतुःपञ्चपदसमानाधिकरणभवग्रहणपदोत्तरद्वितीयाविभक्तेरेव "कालाध्वनोर्व्याप्तौ" [सिद्ध ०-२-२-४२] इत्यनुशासनात्कालनियमसिद्धौ न पुनस्तदभिधानाय यावच्छब्दप्रयोगः, अर्थपुनरुक्ततयोः प्रसङ्गात्, तस्मात्तदनुरोधेन तावच्छब्दस्य विशेषसूत्रे यावत्तावच्छब्दयोश्चाध्याहारकल्पनाऽतिजघन्यैवेति।

नन्वेवं "स्थितेर्गतिश्चिन्तनीया" इति यावच्छब्दस्य सूत्रस्थस्य कोऽर्थः? इति चेत्, ततो देवलोकादायुःक्षयादिना च्युत्वेति पूर्वप्रक्रान्तपदसमुदायार्थ एवेत्यवेहि। अथैवं गणसंबन्ध्याद्यन्तपदविशिष्टस्यैव यावच्छब्दस्य पूर्वप्रक्रान्तगणवाक्यार्थवाचकत्वमिति व्युत्पत्तिभङ्ग इति चेत्, न। तादृशनियमे प्रमाणाभावात्, पूर्वप्रक्रान्तवाक्यार्थवाचकत्वे यावच्छब्दस्य स्वसंबन्धिपदोपसंदानमात्रस्य ग्राहकत्वेनापेक्षितत्वाद्। अत एव क्वचिद्गणसंबन्ध्याद्यन्तपदविशिष्टादिव क्वचिदन्त्यपदविशिष्टादपि यावच्छब्दात्तदुपस्थितिः। तथाहि—

एगंतपंडिए णं मणुस्से किं णेरइआउं पकरेइ ४? पुच्छा। गोअमा! एगंतपंडिए णं मणुस्से आउअं सिअ पकरेइ, सिअ णो पकरेइ। जइ पकरेइ णो णेरइआउअं पकरेइ, णो तिरिणो मणु (स्से), देवाउअं पकरेइ। णो णेरइआउअं किच्चा णेरइएसु उववज्जइ णो तिरिणो मणुस्से, देवाउअं किच्चा देवेसु उववज्जइ। से केणट्ठेणं जाव देवाउअं किच्चा देवेसु उववज्जइ?। गोअमा। एगंतपंडिअस्स णं मणुस्सस्स केवलमेव दो गतीओ पण्णत्ताओ, अंतकिरिया चेव कप्पोववत्तिया चेव, से तेणट्ठेणं गोअमा! जाव देवाउअं किच्चा देवेसु उववज्जइत्ति॥"

अत्र हि यावच्छब्दस्य न गणसंबन्ध्याद्यन्त्यपदविशिष्टतयैव पूर्वप्रक्रान्तवाक्यार्थवाचकत्वं किन्तु स्वसंबन्ध्यन्त्यपदोपसंदानादेव, तद्वदिहापि चत्वारि पंचेत्यादिस्वसंबन्धिपदोपसंदानाद् यावच्छब्दस्य पूर्वप्रक्रान्तवाक्यार्थवाचकत्वे न किंचिद् बाधकमिति युक्तं पश्यामः।

किंच–सूत्रे द्योतकरचनारूपमति यावत्पदं दृश्यते। यथा स्कन्दकाधिकारे–" भावओ णं सिद्धे अणंता नाणपज्जवा अणंता दंसणपज्जवा जाव अणंता अगुरुअलहुअपज्जवा०" इत्यत्र नह्यत्र गणमध्यस्थस्यान्यस्यार्थपरामर्शो यावच्छब्देन कर्त्तुं शक्यते, यतो स गणस्तावदित्थमुपदर्शितः " भावओ णं जीवे अणंता नाणपज्जवा अणंता दंसणपज्जवा अणंता चरित्तपज्जवा अणंता गरुअलहुअपज्जवा अणंता अगरुअलहुअपज्जव त्ति "। तत्र ज्ञानदर्शनपर्यायाः सिद्धस्य साक्षादेवोक्ताः, चारित्रपर्यायाश्च तस्य न संभवन्ति " णो परभविए चरिते " इत्यत्र सिद्धानां चारित्रस्य व्यक्तमेव निषिद्धत्वाद्। गुरुलघुपर्यायाश्चौदारिकशरीराण्याश्रित्य व्याख्याता इति तेऽपि सिद्धस्य न संभवन्ति। अगुरुलघुपर्यायाश्च कार्मणादिद्रव्याणि जीवस्वरूपं चाश्रित्य व्याख्याताः, तत्र कार्मणादिद्रव्याश्रितास्ते सिद्धस्य न संभवन्ति, जीवस्वरूपं त्वाश्रित्य सर्वांशशुद्धास्ते संभवन्ति परं तेऽपि साक्षाच्छब्देनोक्ता इति यावच्छब्दवाच्यं नावशिष्यते इति ततो यथा तत्र वाक्यार्थद्योतक एव यावच्छब्दस्तद्वदिहापि स्यादिति किमनुपपन्नमिति निपुणधिया निभालनीयं प्रेक्षावद्भिः।

किं च–'जाव चत्तारि पंच' इत्यादिसूत्रमपि नरकोपपातातिरिक्तविशेषाभावमादाय परिमितभवजमालिजातीयदेवकिल्बिषिकविषयं जमालिसादृश्यप्रदर्शनायोपन्यस्तं न तु देवकिल्बिषिकसामान्यविषयमिति संभाव्यते, अन्यथा " अत्थेगइआ अणादीयं अणवदग्गं दीहमद्धं चाउरंतं संसारकतारं अणुपरिअट्टंति " इत्यग्रिमसूत्राभिधानानुपपत्तेः, ततो 'अत्थेगइआ' इत्यादिकमपरिमितभवाभिधायकं 'जा चत्तारि' इत्यादिकं च परिमितभवाभिधायकमिति युक्तम्, भवति हि सामान्याभिधानस्याप्येकविशेषप्रदर्शने तदितरविशेषपरत्वम्। यथा 'ब्राह्मणा भोजयितव्याः' इति वचनस्य कौण्डिन्येतरब्राह्मणभोजनविधिपरत्वमिति। यत्तु 'अत्थेगइआ' इत्यादिसूत्रमभव्यविशेषमधिकृत्यावसातव्यं, तद्ह्यश्रकं तु अन्ते निर्वाणाभणनमेवेति परेणोच्यते। तदसत्, अन्ते निर्वाणाभणनादीदृशसूत्राणामभव्यविशेषविषयत्वे–" असंबुज्झे णं अणगारे आउअवज्जाओ सत्तकम्मपगडीओ सिढिलबंधणबद्धाओ घणियबंधणबद्धाओ पकरेइ, ह्रस्तकालठितिआओ दीहकालठितिआओ पकरेइ, मंदाणुभागाओ तिव्वा-

णुभागाओ पकरेइ, (बहुप्पदेसगाओ) अप्पपदेसगाओ पकरेइ। जाउयं च णं कम्मं सिअ बंधइ, सिअ णो बंधइ, असायावेअणिज्जं च णं कम्मं भुज्जो भुज्जो उवचिणइ, अणाइयं च णं अणवदग्गं दीहमद्धं चाउरंतसंसारकंतारमणुपरिअट्टइ। कोहवसट्टे णं भंते जीवे किं बंधइ? किं पकरेइ? किं चिणइ? किं उवचिणइ? संखा। कोहवसट्टे णं जीवे आउअवज्जाओ सत्तकम्मपगडीओ सिढिलबंधणबद्धाओ, एवं जहा पढमस्स णं असंवुडस्स अणगारस्स जाव अणु परिअट्टइ। माणवसट्टे णं जीवे एवं चेव, एवं मायावसट्टेवि, एवं लोभवसट्टेवि, जाव अणुपरिअट्टइ" इत्यादिसूत्राणामपि तथात्वापत्तेरिति।

ननु यद्येवं 'चत्तारि पंच' इत्यादिसूत्रे जमालेर्नानन्तभवविषयता तदा निर्विषयता स्यात्, चतुःपञ्चशब्देभ्योऽत्रैकार्थानाभिधानादिति चेद्, । न, "सिअ भंते! जाव चत्तारि पंच पुढवीकाइआ एगतओ साहारणसरीरं बंधंति, एगतओ पच्छाहारेंति परिणामंति वा सरीरं बंधंति? णो इणट्ठे समट्ठे। इसिअ भंते चत्तारि पंच आउक्काइआ, एवं सिअ भंते जाव चत्तारि पंच तेउक्काइआ" इत्यादिषु सूत्रेषु भगवत्यां "जया णं भंते! तेसिं देवाणं इंदे चयइ से कहमिआणिं पकरेइ? गोयमा! जावचत्तारि पंच सामाणिआ तं ठाणं उवसंपज्जित्ता णं विहरंति" इत्यादिजीवाभिगमसूत्रेऽन्येषु च बहुषु स्थानेषु तयोः "सत्तट्ठ भवग्गहणाइं सत्तट्ठपयाइं" इत्यत्र सप्ताष्टपदयोरिव संकेतविशेषादेकसंख्यावाचकत्वसिद्धेः। 'पंच तिरिक्खजोणिय-मणुस्स-देवभवग्गहणाइं' इत्यादिकोऽप्यादर्शान्तरे पाठोऽस्ति, तत्र च शङ्कालेशस्याप्यभाव एव।

नन्वेवमपि 'पञ्चशब्दो गतित्रयानुरोधेन त्रिगुणितः किं पञ्चदशतयाऽभिधायकः? उत तिर्यग्योनिकदेवसंबन्धिनौ द्वौ भवौ एकश्च मनुजसंबन्धी, अथवा त्रयो भवास्तिर्यक्संबन्धिन एको देवसंबन्धी एकश्च मनुष्यसंबन्धीत्येवं पञ्चभवाभिधायकः?' इत्येवं संदेहानिवृत्तिरेवेति चेद्। न, शास्त्रव्युत्पन्नस्यैतादृशसंदेहानुदयाद्, द्वन्द्वसमासस्य सर्वपदप्रधानत्वेन प्रत्येकमेव पञ्चसंख्याऽन्वयाद्, अनेनैव वाऽभिप्रायेण च्युत्वा ततः पञ्चकृत्वः ततः पञ्चकृत्व इत्याद्यभिधानात्

"जिणणाहेण भणियं सुरतिरियनरेसु पंचवेलाओ।
भमिऊण पत्तबोही लहिही निव्वाणसुक्खाइं॥"

इति श्रीअभयदेवसूरिसंतानीयगुणचन्द्रगणिकृते प्राकृतवीरचरित्रेऽपीत्थमेवोक्तम्। " तिर्यग्मनुष्यदेवेषु भ्रान्त्वा स कतिचिद् भवान् भूत्वा महाविदेहेषु दूरान्निर्वृत्तिमेष्यति। " इत्युपदेशमालाकर्णिकायामपीत्थमेव निगदितम्।

अत्र यत्परेणोच्यते–' कतिचिद् भवान् ' इति यद् भणितं तत्किल्बिषिकदेवभवाच्च्युतो जमालिरनन्तरं सर्वलोकगर्हणीयान् मनुष्यादिदुर्गतिसंबन्धिनः कतिचिद् भवानवाप्य पश्चात्सूक्ष्मैकेन्द्रियादिषु यास्यतीति ज्ञापनार्थमेव। तथा चागमोऽपि—

" लध्धूणवि देवत्तं उववन्नो देवकिब्बिसे।
तत्थवि से न याणेइ किं मे किच्चा इमं फलं " ॥ १ ॥
तत्तोवि से चइत्ता णं लब्भि ही एलमूअगं।
णारगं तिरिक्खजोणिं वा बोही जत्थ सुदुल्लहा ॥ २ ॥—इति

तदतिकदाग्रहविजृम्भितम्, अत्र तिर्यगादिषु प्रत्येकं परिमितभवभ्रमणस्य व्यक्तमेवाभिधानात्, इच्छामात्रेणावशिष्टानन्तभवकल्पनस्याप्रामाणिकत्वात्, स्थूलभवाभिधानमात्रमेतदित्यत्र प्रमाणाभावात्। न च दूरान्निर्वृत्तिमेष्यतीति वचनानुपपत्तिरेवात्र प्रमाणम्, आसन्नतादूरतयोरापेक्षिकत्वात्। किंच—दूरपदं विनाऽप्येवंविधोऽर्थोऽन्यत्र दृश्यते। तदुक्तं सर्वानन्दसूरिविरचितोपदेशमालावृत्तौ—

" तिर्यक्षु कानपि भवानतिवाह्य कांश्चिद्देवेषु चोपचितसंचितकर्मवश्यः।
लब्ध्वा ततः सुकृतजन्मगृहे विदेहे जन्मायमेष्यति सुखैकखनिर्विमुक्तिम् ॥"–इति

यत्तु जमालेः साक्षात्तीर्थकरदूषकस्यापि पञ्चदश भवाः, सुबाहुकुमारस्य च जिनाज्ञाराधकस्यापि षोडश भवा इति जिनाज्ञाराधनापेक्षया तद्विराधनमेव सम्यगिति परस्याभिधानं तदविवेकमूलम्। एवं हि दृढप्रहारिप्रभृतीनां घोरपापकारिणां तद्भवमुक्तिगामित्वम्, आनंदादीनां च देवमनुजभवप्राप्तिक्रमेणेति सुकृतापेक्षया दुष्कृतमेव सम्यगिति वदतोऽपि मुखं कः पिदध्यादिति।

यदपि साधुभक्तस्य द्रव्यतस्तीर्थकृतोऽपि मरीचेः कापिलीयदर्शनप्रवृत्तिहेतुसंदिग्धोत्सूत्रभाषणनिमित्तदुर्वचनमात्रेणाप्येकेन्द्रियादिष्व-

संख्येयभवभ्रमणं जमालेश्च साक्षात्तीर्थकरदूषकस्यापि पञ्चदश भवा इति महदसमञ्जसमिति परेणोद्घुष्यते तदपि तथाभव्यताविशेषादेव न पर्यनुयोगार्हम्, अन्यथा संदिग्धोत्सूत्रभाषणोऽपि मरीचेर्नरकदुःखप्राप्तिः, निश्चितोत्सूत्रभाषिणश्च जमालेर्नेयमित्यत्र भवतोऽपि किमुत्तरं वाच्यमिति रागद्वेषरहितेन चेतसा चिन्तनीयम्।

दीपिकासंज्ञकायां वृत्तौ तु "ततश्च्युतश्चत्वारि पंच तिर्यग्मनुष्यदेवभवग्रहणानि संसारमनुपर्यट्य महाविदेहे सेत्स्यति"–इति शब्दसंदर्भेण भगवतीसूत्रालापकानुवाद्येव दृश्यते। सिद्धर्षीयोपदेशमालाटीकायास्त्वादर्शभेदात्पाठभेदो दृश्यते। तथाहि–"आजीवन्ति द्रव्यलिङ्गेन लोकमित्याजीवका निह्नवास्तेषां गणो गच्छस्तेषां नेता नायको गुरुरित्यर्थः, राज्यश्रियं प्रहाय–परित्यज्य प्रव्रज्यां गृहीत्वा चशब्दादागमं चाधीत्य जमालिर्भगवज्ज्ञामाता हितमात्मनोऽकरिष्यद् 'यदि' इत्यध्याहारः, ततो न-नैव वचनीये निन्द्यत्वे इह–लोके प्रवचने वाऽपनिष्य[illegible]। तथाहि–मिथ्यात्वाभिनिवेशादसौ भगवद्वचनं क्रियमाणं कृतम् इत्यश्रद्धानः 'कृतमेव कृतम्'–इति विपरीतप्ररूपणालक्षणादहिताचरणादेव लोकमध्ये वचनीये पतितोऽति दुष्करतपोविधानेऽपि किल्बिषदेवत्वं भवं चानन्तं निर्वर्तितवान्"–इत्यं केषुचिदादर्शेषु पाठो दृश्यते, "विपरीतप्ररूपणादहिताचरणादेव 'निह्नवोऽयम्'–इति लोकमध्ये वचनीये पतितोऽतिदुष्करतपोविधानेऽपि किल्बिषदेवत्वं निर्वर्तितवान्।"–इत्ययमपि क्वचिदादर्शे पाठो दृश्यते, क्वचिच्च "तथामिथ्यात्वाभिनिवेशादसौ भगवद्वचनं 'क्रियमाणं कृतम्'–इत्यश्रद्धानः कृतमेव कृतम्'–इति विपरीतप्ररूपणलक्षणादहिताचरणादेव 'निह्नवोऽयम्'–इति लोकमध्ये वचनीये पतितोऽतिदुष्करतपोविधानेऽपि किल्बिषदेवत्वं भवं चानन्तं निर्वर्तितवान्। उक्तं च प्रज्ञप्तौ–"जइ णं भंते जमाली अणगारे अरहासारे जाव कम्हा णं लंतए कप्पे तेरससागरोवम ठिइएसु किब्बिसिएसु देवत्ताए उववन्ने? गोयमा! जमाली णं आयरिअपडिणीए इत्यादि यावत्। जमाली णं भंते! ताओ देवलोगाओ आउक्खएणं जाव कहिं उववज्जिहिति? गोयमा! पंचतिरिक्खजोणियमणुस्सदेवभवग्गहणाइं संसारमणुपरिआट्टित्ता तओ पच्छा सिज्झिहिति।"–इत्येवंभूतः पाठोऽस्ति। हेयोपादे-

यवृत्तावपि केषुचिदादर्शेष्वयमेव पाठोऽस्ति। आदर्शान्तरे च–"अति-दुष्करतपोविधानेऽपि किल्बिषदेवत्वं निर्वर्तितवान्"–इति। उक्तं च प्रज्ञप्तौ–"जइ णं भंते०" इत्यादि रचनया पाठोऽस्ति। एवंस्थिते मध्यस्था गीतार्था इत्थं प्रतिपादयन्ति–यदुत भगवत्यादिबहुग्रन्थानुसारेण परिमितभवत्वं जमालेर्ज्ञायते, सिद्धर्षीयवृत्तिपाठविशेषाद्यनुसारेण चानन्तभवत्वमिति, तत्त्वं तु तत्त्वविद्वेद्यमिति; परं भगवतीसूत्रं प्रकृतार्थेन विवृतमस्ति, तत्सांमुख्यं च वीरचरित्रादिग्रन्थं तेषु दृश्यते, संमतिप्रदर्शनं त्वर्थद्वयाभिधानप्रक्रमेऽप्येकार्थापुरस्कारेणापि संभवति। यथा नानाकारं कायेन्द्रियम्, असंख्येयभेदत्वात्, अस्य चान्तर्बहिर्भेदो न कश्चित्। प्रायः प्रदीर्घसंस्थितं कर्णाटकायुधं क्षुरप्रस्तदाकारं रसनेन्द्रियम्, अतिमुक्तकपुष्पदलचन्द्रकाकारं किंचित्सकेसरवृत्ताकारमध्यविनतं घ्राणेन्द्रियम्, किंचित्समुन्नतमध्यपरिमण्डलाकारं धान्यमसूचक्षुरिन्द्रियम्, पाथेयभाण्डकयवनालिकाकारं श्रोत्रेन्द्रियं नालिकाकुसुमाकृति चावसेयम्, तत्रायं स्वकायपरिमाणं द्रव्यमनश्च, शेषाण्यङ्गुलासंख्येयभागप्रमाणानि सर्वजीवानाम्। तथा चागमः–"फासिंदिए णं भंते किंसंठिए पण्णत्ते? गोयमा! णाणासंठाणसंठिए। जिब्भेंदिए णं भंते किं संठिए पण्णते? गोयमा! खुरप्पसंठिए। घाणेंदिए णं भंते किंसंठिए पण्णत्ते? गोयमा! अतिमुत्तयचंदगसंठिए पण्णत्ते। चक्खुरिंदिए णं भते किंसंठिए पण्णत्ते? गोयमा! मसूरय चंदसंठिए। सोइंदिए णं भंते किंसंठिए पण्णत्ते? गोयमा! कलंबुआपुप्फसंठिए पण्णत्ते"–इति। अत्र हीन्द्रियसंस्थानं तत्परिमाणं चेति द्वयमुपक्रान्तं, संमतिप्रदर्शनं तु पूर्वार्ध एवेत्येवं सिद्धर्षीयवृत्त्यादर्शविशेषेऽपि जमालेरनन्तभवस्वामित्वप्रदर्शनं चतुरन्तसंसारकान्तारदृष्टान्तत्वप्रदर्शनसदृशम्, सूत्रसंमतिस्तु, देवकिल्बिषिकत्वांश एव–इत्ययमर्थो न्याय्योऽन्यो वा तत्र कश्चित्सुंदरोऽभिप्राय इति यथा बहुश्रुताः प्रतिपादयन्ति तथा प्रमाणीकर्तव्यं न तु कुविकल्पचक्रेण ग्रन्थकदर्थना कर्तव्या।

यत्तु वस्तुगत्या समयभाषया तिर्यग्योनिकशब्द एवानन्तभवाभिधायको भवति। यदुक्तं "तिर्यग्योनीनां च" –इति तत्त्वार्थसूत्रभाष्यवृत्तौ–"तिर्यग्योनयः पृथिव्यप्तेजोवायुवनस्पति द्वि-

त्रिचतुःपञ्चेन्द्रियास्तेषां परापरस्थिती इत्यादियावत्साधारणवनस्पतेरनन्ता अप्युत्सर्पिण्यवसर्पिण्यः"—इत्यादीनि परेणोक्तं ते त्वनाकलितग्रन्थानां विभ्रमोपादकं प्रेक्षावतां तूपहासपात्रम्। परापरभवस्थितिकायस्थितिविवेकस्य तत्र प्रतिपादितत्वात्, उत्कृष्टकायस्थितेरेव तिर्यग्योनीनामनन्तपर्यवसानात् प्रकृते च भवग्रहणाधिकारात् न तत्कायस्थितिग्रहणं कथमपि सम्भवतीति किं पल्लवग्राहिणा समधिकविचारणयेति कृतं प्रसक्तानुप्रसक्त्या ॥ ४४ ॥

तदेवं मरीचेरिव स्तोकस्याप्युत्सूत्रस्य दुःखदायित्वादन्येषां गुणानुमोदनं न कर्त्तव्यम्'—इत्युत्सूत्रं त्याज्यम्, कर्त्तव्या च गुणानुमोदना सर्वेषामपीति व्यवस्थापितम्, अथ सूत्रभाषकाणां गुणमाह—

सुत्तं भासंताणं णिच्चं हिययट्ठिओ हवइ भयवं।
हिययट्ठिअंमि तंमि य णियमा कल्लाणसंपत्ती ॥४५॥

'सुत्तं भासंताणं'ति। सूत्रं भाषमाणानां नित्यं निरन्तरं भगवांस्तीर्थङ्करो हृदयस्थितो भवति, भगवदाज्ञाप्रणिधाने भगवत्प्रणिधानस्यावश्यकत्वात्, आज्ञयोः ससम्बन्धिकत्वात्। हृदयस्थिते च तस्मिन् भगवति सति नियमान्निश्चयात् कल्याणसम्पत्तिः, सम्प्राप्त्यादिभेदेन तीर्थकृद्दर्शनस्य महाकल्याणावहतायाः पूर्वाचार्यैः प्रदर्शितत्वादिति ॥४५॥

कल्याणप्रापकत्वं च हृदयस्थितस्य भगवतोऽनर्थनिराकरणद्वारा स्यादित्यन्वयव्यतिरेकाभ्यां तस्यानर्थनिराकरणहेतुत्वगुणमभिष्टुवन्नाह

हिययट्ठिओ अ भयवं, छिंदइ कुविगप्पमत्तभत्तस्स।
तयभत्तस्स उ तंमिवि भत्तिमिमा होइ कुविगप्पो॥

'हिययट्ठिओअ'त्ति। हृदयस्थितश्च भगवानात्मभक्तस्य स्वसेवकस्य कुविकल्पं कुतर्काभिनिवेशरूपं छिनत्ति। दुर्निवारो हि प्राणिनामना-

---

सूत्रं भाषमाणानां नित्यं हृदयस्थितो भवति भगवान्।
हृदयस्थिते तस्मिंश्च नियमात्कल्याणसंपत्तिः ॥ ४५ ॥
हृदयस्थितश्च भगवान् छिनत्ति कुविकल्पमात्मभक्तस्य।
तदभक्तस्य तु तस्मिन्नपि भक्तिमिषाद् भवति कुविकल्पः ॥४६॥

दिभवपरम्परापरिचयान्मोहमाहात्म्यजनितः कुविकल्पः, केवलं भगवद्भक्तिरेव तमुच्छिद्य तदुत्पादं निरुद्ध्य वा तत्कृताशुभविपाकान्निस्तारयतीति । तदुक्तमन्यैरपि—

"पुण्ये मनः कस्य मुनेरपि स्यात् प्रमाणमेतस्य हि दृश्यवृत्ति ।
तच्चिन्तिचित्तं परमेश्वरस्तु भक्तस्य हृष्यत्करुणो रुणद्धि ॥" इति ।

अन्वयप्रदर्शनमेतद् । व्यतिरेकमाह—तदभक्तस्य तु कुतर्काध्मातत्तया भगवद्भक्तिरहितस्य तु तस्मिन्नपि सकलदोषरहिते जगज्जीवहिते भगवत्यपि भक्तिमिषाल्लोकसाक्षिककृत्रिमभक्तिव्यपदेशात्कुविकल्पोऽसद्दोषाध्यारोपलक्षणो भवतीति भगवतो हृदयेऽवस्थानाभावादिति भावः ॥ ४६ ॥

कथं भगवत्यपि भक्तिमिषात् कुविकल्पो भवतीत्याह—

जेणं भणंति केइ जोगाउ कयावि जस्स जीववहो ।
सो केवली ण अम्हं सो खलु सक्खं मुसावाई ॥४७॥

'जेणं'ति । येन कारणेन भणंति केचिद् यदुत यस्य योगात्कदाचिदपि जीववधो भवति सोऽस्माकं केवली न भवति । स खलु साक्षान्मृषावादी, जीववधं प्रत्याख्यायापि तत्करणात् । इदं हि भक्तिवचनं मुग्धैर्ज्ञायते, परमार्थतस्तु भगवत्यसद्दोषाध्यारोपात् कुविकल्प एवेति भावः ॥ ४७ ॥

एतन्निराकरणार्थमुपक्रमते—

ते इय पज्जणुजुज्जा कह सिद्धो हंदि एस णियमो भे ।
जोगवओ दुव्वारा हिंसा जमसक्कपरिहारा ॥ ४८ ॥

येन भणन्ति केचिद् योगाद् कदापि यस्य जीववधः ।
स केवली नास्माकं, स खलु साक्षान्मृषावादी ॥ ४७ ॥
ते इति पर्यनुयोज्या कथं सिद्धो हंदि एष नियमो भवताम् ।
योगवतो दुर्वारा हिंसा यदशक्यपरिहारा ॥ ४८ ॥

'ते इय'त्ति । ते एवं वादिनः पर्यनुयोज्याः प्रतिप्रष्टव्या इत्यमुना प्रकारेण, यदुत एष नियमो-यस्य योगात् कदाचिदपि जीववधो भवति स न केवलीत्येवंलक्षणः कथं ते भवतां सिद्धः ? यद्यस्मात्कारणाद् योगवतः प्राणिन आत्रयोदशगुणस्थानमशक्यपरिहारा हिंसा दुर्वारा, योगनिरोधं विना तस्याः परिहर्त्तुमशक्यत्वात्, तदीययोगनिमित्तक-हिंसानुकूलहिंस्यकर्मविपाकप्रयुक्ता हि हिंसा तदीययोगाद् भवन्तौ केन वार्यतामिति । अथैवं सर्वेषामपि हिंसाऽशक्यपरिहारा स्यादिति चेत्, न । अनाभोगप्रमादादिकारणघटितसामग्रीजन्यायास्तस्या आ-भोगाप्रमत्ततादिना कारणविघटनेन शक्यपरिहारत्वाद्, योगमात्रज-न्यायास्त्वनिरुद्धयोगस्याशक्यपरिहारत्वादिति विभावनीयम् ।

नन्वीदृश्यां जीवविराधनायां जायमानायां केवलिना जीवरक्षा प्रयत्नः क्रियते न वा ? आद्ये न क्रियते चेत्, तदाऽसंयतत्वापत्तिः । क्रियते चेत् तदा चिकीर्षितजीवरक्षणाभावात्प्रयत्नवैफल्यापत्तिः; सा च केवलिनो न सम्भवति, तत्कारणस्य वीर्यान्तरायस्य क्षीणत्वाद्, अत एव देशनाविषयकप्रयत्नविफलतायां केवलिनः केवलित्वं न स-म्भवतीति परेषां सम्यक्त्वाद्यलाभे धर्मदेशनामप्यसौ न करोतीत्य-भ्युपगम्यते । तदुक्तमावश्यकनिर्युक्तौ—

"सव्वं च देसविरइं सम्मं पिच्छइ य होइ कहणाउ ।
इहराअमूललक्खो ण कहेइ भविस्सइ ण तं वत्ति ॥ १ ॥"[1]

ततः क्षीणवीर्यान्तरायत्वादशक्यपरिहारापि जीवविराधना केव-लिनो न सम्भवतीति चेत् ॥ न, यथाहि—भगवतः सामान्यतः सर्व-जीवहितोद्देशविषयोऽपि वाक्प्रयत्नः स्वल्पसंसारिष्वेव सफलो भवति, न तु बहुलसंसारिषु, प्रत्युत तेषु कर्णशूलायते । यत उक्तं सिद्धसेन-दिवाकरैः—

"सद्धर्मबीजवपनानघकौशलस्य यल्लोकबान्धव ! तवापि खिलान्यभूवन् ।
तन्नाद्भुतं खगकुलेष्विह तामसेषु सूर्यांशवो मधुकरीचरणावदाताः ॥१॥" इति ।

---

१ सर्वं च देशविरतिं सम्यक् पश्यति च भवति कथनात् ।
इतरथा अमूललक्ष्यो न कथयति.....

अत एव च लोकनाथत्वमपि भगवतो बीजाधानादिसंविभक्त-भव्यलोकापेक्षया व्याख्यातं ललितविस्तरायाम्, अनीदृशि नाथत्वानुपपत्तेरिति। न चैतावता भगवतो वाक् प्रयत्नस्य विफलत्वं, शक्यविषय एव विशेषतः साध्यत्वाख्यविषयतया तत्प्रवृत्तेस्तत्फलवत्त्यव्यवस्थितेः। सामान्यतः सर्वजीवरक्षाविषयोऽपि भगवतः कायप्रयत्नो विशेषतः शक्यजीवरक्षाविषयत्वेन सफलः सन् नाशक्यविषये वैफल्यमात्रेण प्रतिक्षेप्तुं शक्यत इति।

न चाधिकृतविषये वाक्प्रयत्नो न विफलः, स्वल्पसंसार्यपेक्षया साफल्याद्, इतरापेक्षया वैफलस्य तत्रावास्तवत्वाद्; अशक्यपरिहारजीवविराधनायां तु तद्रक्षाप्रयत्नः सर्वथैव विफल इति वैषम्यमिति तत्र वीर्यान्तरायक्षयवैफल्यापत्तिरिति तत्साफल्यार्थं भगवद्योगानां हिंसायां स्वरूपायोग्यत्वमेवाभ्युपेयमिति शङ्कनीयम्। एवं सति हि भगवतः क्षुत्पिपासापरीषहविजयप्रयत्नः क्षुत्पिपासानिरोधं विना विफल इति वीर्यान्तराय क्षयवैफल्यापत्तिनिरासार्थं भगवतः क्षुत्पिपासयोरपि स्वरूपायोग्यत्वं कल्पनीयमिति दिगम्बरस्य वदतो दूषणं न दातव्यं स्यादिति। यदि च क्षुत्पिपासयोर्निरोद्धुमशक्यत्वात् तत्परीषहविजयप्रयत्नो भगवतो मार्गाच्यवनादिस्वरूपेणैव फलवानिति विभाव्यते तदाऽशक्यपरिहारजीवविराधनाया अपि त्यक्तुमशक्यत्वात्, तत्र जीवरक्षाप्रयत्नस्यापि भगवतस्तथा स्वरूपेणैव फलवत्त्वमिति किं वैषम्यम्? इत्थं च–"तस्स असं चेययओ संचेययओ अ जाइं सत्ताइं जोगं पप्प विणस्संति। णत्थि हिंसाफलं तस्स॥"[1] तस्यैवंप्रकारस्य ज्ञानिनः कर्मक्षयार्थमुद्यतस्यासञ्चेतयतोऽजानानस्य, किं? सत्त्वानि, कथं? प्रयत्नं कुर्वताऽपि, कथमपि न दृष्टो व्यापादितश्च। तथा सञ्चेतयतो जानानस्य कथम्? अस्त्यत्र प्राणी ज्ञातो दृष्टश्च, न च प्रयत्नं कुर्वताऽपि रक्षितुं पारितः, ततश्च तस्यैवंविधस्य यानि सत्त्वानि योगं कायादिव्यापारं प्राप्य विनश्यन्ति। न च नास्ति तस्य साधोर्हिंसाफलं साम्परायिकं संसारजननमित्यर्थः। यदि परमीर्याप्रत्ययं कर्म भवति,

---

१ तस्यासंचेतयतः संचेतयतश्च यानि सत्त्वानि योगं प्राप्य विनश्यन्ति, नास्ति हिंसाफलं तस्य॥

तच्चैकस्मिन् समये क्षिपतीत्योघनिर्युक्तिसूत्रवृत्तिवचने " न च प्रयत्नं कुर्वतापि रक्षितुं पारितः " इति प्रतीकस्य दर्शनाज्जीवरक्षोपायानाभोगादेव तदर्थोपपत्तेः केवलिभिन्नस्यैव ज्ञानिनो योगानामीर्यापथप्रत्ययकर्मबन्धानुकूलसत्त्वहिंसाहेतुत्वं सिद्ध्यति, नतु केवलिन इति निरस्तम्। न च प्रयत्नं कुर्वतापीत्यनेन प्रयत्नवैफल्यासिद्धिः, निजकायव्यापारसाध्ययतनाविषयत्वेन तत्साफल्याद्, अन्यथा तेन केवलिनो वीर्याविशुद्धिमापादयतो निर्ग्रन्थस्य चारित्राविशुद्ध्यापत्तेः, तस्याप्याचाररूपप्रयत्नघटितत्वाद् यतनात्वेन चोभयत्र शुद्ध्यविशेषाद्। न चाशक्यजीवरक्षास्थलीययतनायां तद्रक्षोपाहितत्वाभावो रक्षोपायानाभोगस्यैव दोषो नतु निर्ग्रन्थस्य चारित्रदोषः, स्नातकस्य तु केवलित्वान्न तदनाभोगः सम्भवतीति तद्योगा रक्षोपहिता एव स्वीकर्त्तव्या इति वाच्यम्। तथाविधप्रयत्नस्यैव जीवरक्षोपायत्वात्, केवलिनापि तदर्थमुल्लङ्घनप्रलङ्घनादिकरणात्

तदुक्तं प्रज्ञापनायां समुद्घातान्निवृत्तस्य केवलिनः काययोगव्यापाराधिकारे—

" कायजोगं जुंजमाणे आगच्छिज्ज वा, गच्छेज्ज वा, चिट्ठेज्जवा, णिसीएज्जवा, तुअट्टिज्ज वा, उल्लंघेज्ज वा; पलंघेज्ज वा, पाडिहारियपीढफलगसेज्जासंथारं पच्चप्पिणिज्जत्ति॥ " अत्र उल्लङ्घेज्ज वा पलंघेज्जवे'त्येतत् पदव्याख्यानं यथा— अथवा विवक्षितस्थाने तथाविधसम्पातिमसत्त्वाकुलां भूमिमवलोक्य तत्परिहाराय जन्तुरक्षानिमित्तमुल्लङ्घनं प्रलङ्घनं वा कुर्यात्। तत्र सहजात्पादविक्षेपान्मनागधिकतरः पादविक्षेप उल्लङ्घनं, स एवातिविकटः प्रलङ्घनमिति। स च जीवरक्षोपायः प्रयत्नो निर्ग्रन्थेन ज्ञात एवेति तस्याशक्यपरिहारजीवहिंसायां तद्रक्षाविघटको नानाभोगः, किं त्वशक्तिः, सा च योगापकर्षरूपा निर्ग्रथस्नातकयोः स्थानौचित्येनाविरुद्धेति प्रतिपत्तव्यम्॥ यदि च तादृशरक्षोपायाः केवलियोगा एव, तदनाभोगश्च निर्ग्रन्थस्य तद्विघटक इति वक्रः पन्थाः समाश्रीयते तदा प्रेक्षावतामुपहासपात्रता युष्मतः, यत एवमनुपायादेव तस्य तद्रक्षाभाव इति वक्तव्यं स्यान्नतूपायानाभोगादिति कारणवैकल्यमेव हि कार्यविघटने तन्त्रं न तु कारणज्ञानवैकल्यमपि। न च केवलियोगानां

स्वरूपत एव जीवरक्षाहेतुत्वमित्यपि युक्तिमद्, उल्लङ्घनप्रलङ्घनादिवैफल्यापत्तेः, केवलियोगेभ्यः स्वत एव जीवरक्षासिद्धौ तत्र तदन्यथासिद्धेः, अनुपायविषयेऽपि क्रियाव्यापाराभ्युपगमे च कोशादिस्थितिसाधनार्थमपि तदभ्युपगमप्रसङ्गात्। यदि च साध्वाचारविशेषपरिपालनार्थ एव केवलिनोऽसौ व्यापारो न तु जन्तुरक्षानिमित्तः, तस्याः स्वतः सिद्धत्वेन तत्साधनोद्देशवैयर्थ्यात्, जन्तुरक्षानिमित्तत्वं तूपचारादुच्यते, मुख्यप्रयोजनसिद्धेश्च न तद्वैफल्यमिति च वक्रकल्पना त्वयाऽऽश्रीयते, तदा 'स्वशस्त्रं स्वोपघातायें'ति न्यायप्रसङ्गः। एवं ह्यशक्यपरिहारजीवहिंसास्थलेऽपि साध्वाचारविशेषपरिपालनार्थस्य भगवत्प्रयत्नस्य सार्थक्यसिद्धौ 'संचेययओ अ जाइं सत्ताइं जोगं पप्प विणस्संती'त्यत्र छद्मस्थ एवाधिकृत इति स्वप्रक्रियाभङ्गप्रसङ्गात्। तस्मादाभोगादनाभोगाद्वा जायमानायां हिंसायां प्राणातिपातप्रत्ययकर्मबन्धजनकयोगशक्तिविघटनं यतनापरिणामेन क्रियत इत्येतदर्थप्रतिपादनार्थं "न च प्रयत्नं कुर्वतोऽपि रक्षितुं पारितः" इत्युक्तम्। अत एव सूत्रेऽपीत्थमेव व्यवस्थितम्। तथाहि—

"वज्जेमित्तिपरिणओ संपत्तीएवि मुच्चई वैरा।
अवहंतो वि ण मुच्चइ किलिट्ठभावोऽतिवायस्स॥" इति॥

एतद्वृत्तिर्यथा—वर्जयाम्यहं प्राणातिपातादीत्येवं परिणतः सन् सम्प्राप्तावपि, कस्य? अतिप्राप्तस्य प्राणिप्राणविनाशस्थित्युपरिष्टात् सम्बन्धः, तथा विमुच्यते वैरात् कर्मबन्धाद्। यः पुनः क्लिष्टपरिणामः सोऽव्यापादयन्नपि न मुच्यते वैरादिति ज्ञात्वा जीवघातस्येर्यापथप्रत्ययकर्मबन्धजनने यतनापरिणामस्य सहकारित्वप्रतिपादनार्थं 'न च प्रयत्नं कुर्वतापि रक्षितुं पारितः' इत्युक्तमित्यपरे॥ यत्तु वर्जनाभिप्राये सत्यनाभोगवशेन जायमानो जीवघातो द्रव्यहिंसात्मको न कर्मबन्धहेतुः, वर्जनाभिप्रायस्य कारणं तु जीवघाते नियमेन दुर्गतिहेतुकर्मबन्धो भवतीत्यभिप्राय एव, अन्यथा सुगतिहेतुषु ज्ञानादिष्वपि वर्जनाभिप्रायः प्रसज्यते। केवलिनस्तु वर्जनाभिप्रायो न भवत्येव, सर्वकालं सामायिकसातवेदनीयकर्मबन्धकत्वेन दुर्गतिहेतुकर्मबन्धाभावस्य निर्णीतत्वात् तस्माज्जीवघातस्तज्जानितकर्मबन्धभावश्चेत्युभयम-

प्यनाभोगवन्तं तं संयतलोकमासाद्यैव सिद्ध्यतीति परस्य मतं तदसद्। वर्जनाभिप्रायस्य भगवतः प्रज्ञापनावृत्तावेवोक्तत्वात्, स्वकीयदुर्गतिहेतुकर्मबन्धहेतुत्वाज्ज्ञानेऽपि स्वरूपेण वर्जनीये वर्जनाभिप्रायस्य भगवत उचितप्रवृत्तिप्रधानसामायिकफलमहिम्नैव सम्भवाद्; अन्यथाऽनेषणीयपरिहाराभिप्रायोऽपि भगवतो न स्याद् अनेषणीयस्यापि स्वापेक्षया क्लिष्टकर्मबन्धहेतुत्वनिश्चयात्, तथा च 'तत्थणं रेवत्तए गाहा वइणीए मम अट्ठाए दुवेकवो असरीरा उवक्खाया तेहिं णो अट्ठोत्ति।" अनेषणीयपरिहाराभिप्रायाभिव्यञ्जकं प्रज्ञप्तिसूत्रं व्याहन्येत, तस्माद्यथोचितकेवलिव्यवहारानुसारेण वर्जनाद्यभिप्रायस्तस्य सम्भवत्येव; प्रयत्नसाफल्यं तु शक्यविषयापेक्षया नान्वितरापेक्षयेति मन्तव्यम्। एतेन केवलज्ञानोत्पत्तिसमय एव केवलिना सर्वकालीनं सर्वमपि कार्यं नियतकारणसामग्रीसहितमेव दृष्टं, तत्र केवलिना निजप्रयत्नोऽपि विवक्षितजीवरक्षाया नियतकारणसामग्र्यामन्तर्भूतो दृष्टोऽनन्तर्भूतो वा आद्ये केवलिप्रयत्नस्य वैफल्यं न स्यात्, तस्य तस्या नियतकारणसामग्र्यन्तर्भूतत्वेन दृष्टत्वाद् द्वितीये विवक्षितजीवरक्षार्थं केवलिनः प्रयत्न एव न भवेत्, केवलिना तत्सामग्र्यनन्तर्भूतत्वेन दृष्टत्वादिति न च प्रयत्नं कुर्वतापि रक्षितुं न पारित इति वचनं छद्मस्थसंयतमधिकृत्यैवेति कल्पनाऽप्यपास्ता स्वव्यवहारविषयनियतत्वेनैव केवलिना स्वप्रयत्नस्य दृष्टत्वादिति दिग्॥ ४८॥

ननु जीवहिंसा गर्हणीयाऽगर्हणीया वा?, अन्त्ये लोकलोकोत्तरव्यवहारबाधः। आद्ये च गर्हणीयं कृत्यं भगवतो न भवतीति भगवतस्तदभावासिद्धिरित्याशङ्कायामाह—

खीणे मोहे णियमा गरहाविसओ ण होइ किव्वंति।
साण जिणाणंति मई दव्ववहे होइ णिव्विसया॥४९॥

क्षीणे मोहे नियमाद्गर्हाविषयो न भवति कस्यापि।
सा न जीनानामिति मतिर्द्रव्यवधे भवति निर्विषया॥ ४९॥

१ तत्र च क्षेत्रे गाथापतनोते मदर्थं द्वौ कपोतशरीरौ उपस्थातौ, ताभ्यां नार्थ इति॥

खीणे मोहे'त्ति क्षीणे मोहे निस्सत्ताकीभूते मोहनीयकर्मणि नियमान्निश्चयेन गर्हविषयः। कृत्यं गर्हणीयं प्राणातिपातादिकर्म न भवति, कस्यापि प्राणिनः। तदुक्तमुपदेशपदे—

" इत्तो अवीयरागो ण किंचि वि करेइ गरहणिज्जंतु"त्ति।

एतद्वृत्त्येकदेशो यथा-इतस्त्वित एवाकरणनियमात्कृतरूपाद्वीतरागः क्षीणमोहादिगुणस्थानवर्त्ती मुनिर्न नैव किञ्चिदपि करोति जीवघातादिकं सर्वं गर्हणीयं त्ववद्यं देशोनपूर्वकोटीकालं जीवन्नपीति इति हेतोः।" सा हिंसा जिनानां विगलितसकलगर्हणीयकर्मणां क्षीणमोहवीतरागाणां न भवतीति तव मतिः केवलं भावप्राणातिपातनिषेधापेक्षया सविषया स्याद्, द्रव्यवधे तु निर्विषया भवति, तस्याशक्यपरिहारत्वेनागर्हणीयत्वात्; द्रव्यभावोभयरूपस्य केवलभावरूपस्य च प्राणातिपातादेर्व्रतभङ्गरूपत्वेन शिष्टलोकगर्हणीयत्वादशिष्टगर्हायाश्चाप्रयोजकत्वात्। क्रूरकर्माणो हि न स्वयंभूरयं किन्तु मनुष्य इति, कथमस्य देवत्वम्? कवलाहारवतो वा कथं केवलित्वम्? इत्यादिकां भगवतोऽपि गर्हां कुर्वन्त्येवेति। न चेदेवं तदोपशान्तमोहगुणस्थानवर्तिनो गर्हणीयप्राणातिपाताद्यभ्युपगमे यथाख्यातचारित्रविलोपप्रसङ्गः।

अथोपशान्तमोहवीतरागस्य मोहनीयसत्ताहेतु कः कदाचिदनाभोगसहकारिकारणवशेन गर्हापरायणजनस्य प्रत्यक्षत्वाद् गर्हणीयो जीवघातो भवत्येव, नतु यथाख्यातचारित्रलोपस्तेन भवति, उत्सूत्रप्रवृत्तेरेव तल्लोपहेतुत्वात्। न च प्रतिषिद्धप्रतिषेवणमात्रेणोत्सूत्रप्रवृत्तिः, किन्तु साम्परायिकक्रियाहेतुमोहनीयोदयसहकृतेन प्रतिषिद्धप्रतिषेवणेन,। सा चोपशान्तवीतरागस्य न भवति, तस्या मोहनीयानुदयजन्येर्यापथिकीक्रियया बाधितत्वात्; उत्सूत्रप्रवृत्तीर्यापथिकीक्रिययोः सहानवस्थानाद्। यदागमः—

" [१]जस्स णं कोहमाणमायालोभा वुच्छिण्णा भवन्ति तस्स णं इरियावहिया किरिया कज्जति। तहेव जाव उस्सुत्तं रीयमाणस्स संपराइआ किरिया कज्जति, से णं अहा सुत्तमेव रीय(य)इत्ति॥"

---

१ यस्य खलु क्रोधमानमायालोभा व्युच्छिन्ना भवन्ति, तस्य खलु ईर्यापथिकी क्रिया कार्या, तथैव यावत् उत्सूत्रं रीयमानस्य साम्परायिका क्रिया कार्या। स खलु यथासूत्रं रीयते॥

तथाऽस्मादुत्सूत्रप्रवृत्तिप्रतिबन्धिका भावत ईर्यापथिकी क्रियैव, यथाख्यातचारित्रप्रतिबन्धिका च मोहनीयोदयजन्या साम्परायिकी क्रिया भवतीति सम्यक्पर्यालोचनायामुपशान्तवीतरागस्य नोत्सूत्रप्रवृत्तिर्नैवा यथाख्यातचारित्रहानिरिति चेत्। न, द्रव्यवधस्य गर्हणीयत्वे प्रतिषिद्धप्रतिषेवणरूपत्वे च तेनोपशान्तमोहस्यापि यथाख्यातचारित्रस्य निर्ग्रन्थत्वस्य च विलोपप्रसङ्गस्य वज्रलेपत्वात्। "[२]परिहारविसुद्धियसंजए पुच्छा, गो० णो पडिसेवए होज्जा, अपडिसेवए होज्जा। एवं जाव अहक्खायसंजए कसायकुसीले पुच्छा, गो० णो पडिसेवए होज्जा, अपडिसेवए हुज्जा, एवं णियंठेवि, एवं सिणाए वि।" इत्याद्यागमेन प्रतिषिद्धप्रतिषेवणस्योपरितनचारित्रनिर्ग्रन्थत्रयविरोधितायाः प्रतिपादनात् संयमप्रतिकूलार्थस्य सञ्ज्वलनकषायोदयात् सेवकः—प्रतिषेवक इति प्रतिषेवणाद्वारे व्याख्यानात् प्रतिषेवणाविशेषेणैव यथाख्यातचारित्रादिविरोधव्यवस्थितेः॥ अनाभोगजद्रव्यहिंसायाः प्रतिषिद्धप्रतिषेवणरूपत्वे उपशान्तमोहवृत्तित्वे च न बाधकमिति चेत्। न, प्रतिषेवापदविषयविभागेऽनाभोगजप्रतिषेवाया अपि परिगणनाद्। यदागमः—"[२]दसविहा पडिसेवणा पण्णत्ता। तं०—दप्प—प्पमाय—ऽणाभोग—आउरे आवईइ य संकिए सहसक्का(र)-भय—प्पदोसा य वीमंसत्ति।" तस्माद्द्रव्यहिंसायाः प्रतिषेवणारूपत्वाभ्युपगमे तवाप्युपशान्तमोहस्य प्रतिषेवित्वं स्यादित्यप्रतिषेवित्वव्याप्ययथाख्यातचारित्रनिर्ग्रन्थत्वयोस्तत्र का प्रत्याशा? मोहोदयविशिष्टप्रतिषेवणत्वेनोत्सूत्रप्रवृत्तिहेतुमभ्युपगम्य वीतरागे मोहसत्ताजन्यप्रतिषेवणाश्रयणेऽपसिद्धान्तादिदोषा दुर्द्धरा एव प्रसज्येरन्, मोहोदयसत्ताजन्योत्सूत्रप्रवृत्तिहेतुप्रतिषेवणाभेदस्य क्वापि प्रवचनेऽश्रुतत्वात्, प्रत्युत कषायकुशीलादिपरिहारविशुद्धिकाद्युपरितननिर्ग्रन्थसंयमत्रयस्याप्रतिषेवित्वाभिधानाद्। मोहोदयमात्रमपि न प्रतिषेवणाजनकमिति तत्सत्ताजन्यप्रतिषेवणवार्त्तापि दूरोत्सारितैवेति तस्या उत्सूत्रप्रवृत्तिहेतुत्वे मोहोदयविशिष्टत्वं तन्त्रमित्यत्र सूत्रसम्मतिप्रदर्शनमत्यसमञ्जसम्, ततः पुलाकबकुशप्रतिसेवाकुशीलत्रयवृत्त्यपकृष्टसंयमस्थाननियतसंज्वलनोदयव्याप्य एव व्यापारविशेषः प्रतिषेवणारूपः स्वीकर्त्तव्यः, स एव च साधूनां गर्हणीय

१ परिहारविशुद्धिकसंयते पृच्छा, गौतम! न प्रतिषेवको भवेत्, अप्रतिषेवको भवेद्, एवं यावत् यथाख्यातसंयते कषायकुशीले पृच्छा, नो प्रतिषेवको भवेद् अप्रतिषेवको भवेत्। एवं निर्ग्रन्थेऽपि, एवं स्नातकेऽपि॥

२ दशविधा प्रतिषेवणा प्रज्ञप्ता, तद् यथा—दर्प-प्रमादा-नाभोगा-ऽऽतुरापदञ्च शङ्कित-सहसात्कार-भय-प्रद्वेषाश्च-विमर्श इति।

इति। "इत्तो अ वीयरागो ण किंचि वि करेइ गरहणिज्जं तु।"–इत्यनेन तदत्यन्ताभाव एव वीतरागस्य प्रतिपाद्यते, न तु द्रव्यहिंसाभावोऽपीति प्रतिपत्तव्यम् ॥४९॥

एतदेव स्फुटीकुर्वन्नाह–

[1]अकरणणियमावेक्खं एयं भणिअंति अप्पमिसेवाए।
इत्तो जिणाण सिद्धी ण उ दव्ववहस्स पमिसेहो ॥५०॥

'अकरणणियमावेक्खं' ति। 'एतद्वीतरागो न किञ्चिद् गर्हणीयं करोति'इत्यकरणनियमापेक्षं भणितमुपदेशपदे, तत्र तस्यैवाधिकाराद्, अकरणनियमश्च पापशरीरकार्श्यहेतुराजयक्ष्मरोगस्थानीयः क्षयोपशमविशेषः, स च ग्रन्थिभेदादारभ्याक्षीणमोहं प्रवर्द्धते, यथा यथा च तत्प्रवृद्धिस्तथा तथा पापप्रवृत्त्यपकर्ष इति क्षीणमोहे मोहक्षयरूपस्याकरणनियमस्यात्यन्तोत्कर्षस्य सिद्धौ पापप्रवृत्तेरत्यन्तापकर्ष इति तत्र पापप्रवृत्त्यत्यन्ताभावः सिद्ध्यतीति सूत्रसन्दर्भेणैव तत्र स्फुटं प्रतीयते। तथाहि—

"[2]पावे अकरणणियमो पायं परतन्निवित्तिकरणाओ।
णेओ य गंठिभेओ भुज्जो तयकरणरूवो उ ॥ १ ॥"

कियदन्तरे च–

"[3]देसविरइगुणठाणे अकरणणियमस्स एव सब्भावो।
सव्वविरइगुणठाणे विसिट्ठतरओ इमो होइ ॥ १ ॥
जं सो पहाणतरओ आसयभेओ तओ एसो ॥
एत्तो चिय सेढीए णेओ सव्वत्थवि एसो ॥ २ ॥
एत्तो अवीयरागो ण किंचि वि करेइ गरहणिज्जं तु।
ता तग्गइखवणाइकप्पमो एस विण्णेओ ॥ ३ ॥" त्ति

तथा चेतो वचनादप्रतिषेवाया जिनानां सिद्धिः, प्रतिषेवारूपपापस्यैवाप्रवृत्तेः, पूर्वगुणस्थानेष्वपकर्षतारतम्याज्जिनानां तदत्यन्तापकर्षसम्भवाद् नतु द्रव्यवधस्य प्रतिषेधः, तस्यापकर्षतारतम्यादर्शनाद्; नहि सम्यग्दृष्टिदेशविरत्यादियोगाज्जायमानायां द्रव्यहिंसायामपकर्षभेदो दृश्यते, येन जिनेषु तदत्यन्ताभावः सि-

---

१ अकरणनियमापेक्षमेतद् भणितमिति अप्रतिषेवायाः।
इतो जिनानां सिद्धिर्नतु द्रव्यवधस्य प्रतिषेधः ॥ ५० ॥

२ पापे अकरणनियमः प्रायः परतन्निवृत्तिकरणात्।
ज्ञेयश्च ग्रन्थिभेदो भूयस्तदकरणरूपस्तु ॥

३ देशविरतिगुणस्थाने अकरणनियमस्य एव सद्भावः।

द्धयेद् अभ्यन्तरपापप्रतिषेवणे तु प्रतिगुणस्थानं महानेव भेदो दृश्यत इति केवलिनि तदत्यन्ताभावसिद्धिरनाबाधैवेति ॥ ५० ॥

नन्वेवं वीतरागपदेनोपशान्तमोहोऽपि वृत्तिकृता कथं न गृहीतः ? तस्याप्यप्रतिषेवित्वाद्–इत्याशङ्कायामाह—

[1]परिणिट्ठियवयणमिणं, जं एसो होइ खीणमोहंमि।
उवसममेढीए पुण, एसो परिणिट्ठिओ ण हवे ॥५१॥

'परिणिट्ठियवयणमिणं'ति। परिनिष्ठितवचनं सम्पूर्णफलवचनमेतद्, यदेषोऽकरणनियमः क्षीणमोहे भवतीति। उपशमश्रेण्यां त्वयमकरणनियमः परिनिष्ठितो न भवेत्, तस्याः प्रतिपातस्य नियमात्, तत्राकरणनियमवैशिष्ट्यासिद्धेः, परिनिष्ठितविशिष्टाकरणनियमाधिकारादेव क्षीणमोहादिर्वीतरागो वृत्तिकृता विवक्षित इति न कोऽपि दोष इति भावः। परिनिष्ठिताप्रतिषेवित्वफलभागित्वादेव च क्षीणमोहस्य कषायकुशीलादेर्विशेषोऽप्रतिषेवित्वं वा भगवतोऽभिधीयमानमपकृष्यमाणसकलपापाभावोपलक्षणमिति स्मर्त्तव्यम् ॥ ५१ ॥

ननु वीतरागो गर्हणीयं पापं न करोतीति वचनाद् गर्हणीयपापाभावः क्षीणमोहस्य सिद्ध्यति, गर्हणीयं च पापं द्रव्याश्रव एव, तस्य गर्हापरायणजनस्य प्रत्यक्षत्वादिति द्रव्याश्रवाभावस्तत्र सिद्ध एव, अत एव क्षीणमोहस्य कदाचिदनाभोगमात्रजन्यसम्भावनारूढाश्रवच्छायारूपदोषसम्भवेऽपि न क्षतिः, तस्याध्यवसायरूपस्य छद्मस्थज्ञानगोचरत्वेनागर्हणीयत्वाद्, गर्हणीयद्रव्याश्रवाभावादेव तत्र वीतरागत्वाहानेः–इत्याशङ्कायामाह—

[2]दव्वासवस्स विगमो गरहाविसयस्स जइ तहिं इट्ठो।
ता भावगयं पावं पडिवन्नं अत्थओ होइ ॥ ५२ ॥

सर्वविरतिगुणस्थाने विशिष्टतरश्चायं भवति ॥ १ ॥
यत्स प्रधानतर आशयभेदश्च तत एषः।
इत एव श्रेण्यां ज्ञेयः सर्वत्राप्येष ॥ २ ॥
इतश्च वीतरागो न किंचिदपि करोति गर्हणीयं तु।
ततस्तद्गतिक्षपणादिकल्प एव विज्ञेयः ॥

१ परिनिष्ठितवचनमिदं यदेषो भवति क्षीणमोहे।
उपशमश्रेण्यां पुनः–एष परिनिष्ठितो न भवेद् ॥

२ द्रव्यास्रवस्य विगमो गर्हाविषयस्य यदि तत्रेष्टः।
ततो भावगतं पापं प्रतिपन्नमर्थतो भवति ॥ ५२ ॥

'दव्वासवस्स'त्ति। गर्हाविषयस्य द्रव्याश्रवस्य विगमो यदि'तर्हि'ति तत्र क्षीणमोहे इष्टोऽभिमतो भवतस्तर्हि अर्थतोऽर्थापत्त्या भावगतं पापं तत्र प्रतिपन्नं भवति, गर्हणीयपापत्वावच्छिन्नं प्रति त्वन्मते मोहनीयकर्मणो हेतुत्वात्, तन्निवृत्तौ गर्हणीयपापनिवृत्तावप्यगर्हणीयभावरूपपापानिवृत्तेः, अगर्हणीयपापेऽप्यनाभोगस्य हेतुत्वात् तन्निवृत्तौ केवलिनस्तन्निवृत्तिः। क्षीणमोहस्य त्वाश्रवच्छायारूपमगर्हणीयपापमभ्युपगम्यत एवेति न दोष इति चेत्, न। अभ्यन्तरपापमात्रस्य गर्हापरायणजनाप्रत्यक्षत्वेन त्वन्मतेऽगर्हणीयत्वात् तत्सामान्येनाभोगस्य हेतुत्वात्। मोहाजन्यागर्हणीयपापेऽनाभोगस्यान्यत्र च तत्र मोहस्य हेतुत्वान्न दोष इति चेत्,न। गर्हणीयपापहेतोर्मोहस्यागर्हणीयपापहेतुत्वाभावाद्, अन्यथा तज्जन्यगर्हणीयागर्हणीयोभयस्वभावैकपापप्रसङ्गादिति न किञ्चिदेतत् ॥ ५२ ॥

द्रव्याश्रवस्य मोहजन्यत्वमेव व्यक्त्या निराकुर्वन्नाह—

'णियणियकारणपभवा दव्वासवपरिणई ण मोहाओ।
इहरा दव्वपरिग्गहजुओ जिणो मोहवं हुज्जा॥ ५३॥

व्याख्या—द्रव्याश्रवाणां प्राणातिपात–मृषावादादीनां परिणतिर्निजनिजकारणानि यानि नोदनाभिघाताद्रियोगव्यापारमृषाभाषावर्गणाप्रयोगादीनि तत्प्रभवा सती न मोहान्मोहनीयकर्मणो भवति–मोहजन्या नेत्यर्थः। क्वचित्प्रवृत्त्यर्थं मोहोदयापेक्षायामपि द्रव्याश्रवत्वावच्छिन्ने मोहनीयस्याहेतुत्वाद्, अन्यथाऽऽहारसंज्ञावतां केवलाहारप्रवृत्तौ बुभुक्षारूपमोहोदयापेक्षणात्कवलाहारत्वावच्छिन्नेऽपि मोहस्य हेतुत्वात् केवली कवलभोज्यपि न स्यादिति दिगम्बरसगोत्रत्वापत्तिरायुष्मतः।

अथ कवलाहारस्य वेदनीयकर्मप्रभवत्वान्न तत्र मोहनीयस्य हेतुत्वम्, आश्रवस्य तु मोहप्रभवत्वप्रसिद्धेर्द्रव्याश्रवपरिणतिरपि मोहजन्यैव, तत्रोदितं चारित्रमोहनीयं भावाश्रवहेतुरसंयतानां सम्पद्यते, संयतानां तु प्रमत्तानामपि सत्तावर्त्ति-चारित्रमोहनीयं द्रव्याश्रवमेव सम्पादयति, सुमङ्गलसाधोरिवाऽऽभोगेनापि जायमानस्य तस्य ज्ञानाद्यर्थमत्यापवादिकत्वेन तज्जन्यकर्मबन्धाभावात्संयमपरिणामस्यानपायेनाविरतिपरिणामस्याभावात्तदुपपत्तेः। या तु तेषामारम्भिकी क्रिया सा न

---

१ निजनिजकारणप्रभवा द्रव्यास्रवपरिणतिर्न मोहात्।
इतरथा द्रव्यपरिग्रहयुतो जिनो मोहवान् भवेत् ॥ ५३ ॥

जीवघातजन्या, किन्तु प्रमत्तयोगजन्या; "[1]सव्वो पमत्तजोगो आरंभोत्ति" वचनात्; अन्यथाऽऽरम्भिकी क्रिया कस्यचित्प्रमत्तस्य कादाचित्क्येव स्यात्, तत्कारणस्य जीवघातस्य (कस्य)चित्कादाचित्कत्वात्, अस्ति चारम्भिकी क्रिया प्रमत्तगुणस्थानं यावदनवरतमेव। किञ्च—यदि जीवघातेनारम्भिकी क्रिया भवेत्। तदाऽपरोऽप्रमत्तो दूरे, उपशान्तवीतरागस्याप्यारम्भिकी क्रिया वक्तव्या स्याद्; अस्ति च तस्य सत्यपि जीवघाते ईर्यापथिक्येव क्रियेति न जीवघातात्संयतस्यारम्भिको क्रिया, किन्तु प्रमत्तयोगादिति स्थितम्। स च प्रमत्तो योगः प्रमादैर्भवति। ते च प्रमादा अष्टधा शास्त्रे प्रोक्ताः—१ अज्ञान-२ संशय-३ विपर्यय-४ राग-५ द्वेष-६ मतिभ्रंश-७ योगदुष्प्रणिधान-८ धर्मानादरभेदात्। ते चाज्ञानवर्जिताः सम्यग्दृष्टेरपि सम्भवन्तोऽतः प्रमत्तसंयतपर्यन्तानामेव भवन्ति न पुनरप्रमत्तानामपि, प्रमादाप्रमादयोः सहानवस्थानात्। तेनेहाष्टासु प्रमादेषु यौ रागद्वेषौ प्रमादत्वेनोयातौ (तौ) योगानां दुष्प्रणिधानजननद्वाराऽऽरम्भिकीक्रियाहेतू ग्राह्यौ; तयोश्च तथाभूतयोः फलोपहितयोग्यतया जीवघातं प्रति कारणत्वस्य कादाचित्कत्वेऽपि स्वरूपयोग्यतया तथात्वं सार्वदिकमेव। यद्यपि सामान्यतो रागद्वेषावप्रमत्तसंयतानामपि कदाचित्फलोपहितयोग्यतयापि जीवघातहेतू भवतस्तथापि तेषां तौ न प्रमादौ; यतनाविशिष्टया प्रवृत्त्या सहकृतयोस्तयोरारम्भिकीक्रियाया अहेतुत्वात्; तदप्यनाभोगसहकृतयतनाविशिष्टयो रागद्वेषयोर्योगानां दुष्प्रणिधानजनने सामर्थ्याभावात्, सम्यगोर्यया प्रवृत्त्या तयोस्तथाभूतसामर्थ्यस्यापहरणात्,। न चैवं प्रमत्तानां सम्भवति, तेषामयतनया विशिष्टयोस्तयोर्योगानामशुभताजनकत्वेनारम्भिकीक्रियाहेतुत्वाद्, अत एव प्रमत्तानां विनाऽपवादं जीवघातादिकं प्रमादसहकृतानाभोगजन्यम्। तदुक्तं दशवैकालिकवृत्तौ—"अयतनया चरन् प्रमादानाभोगाभ्यां प्राणिभूतानि हिनस्तीति"। ततः संयतानां सर्वेषां द्रव्याश्रव एव भवति। तत्र प्रमत्तसंयतानामपवादपदप्रतिषेवणावस्थायामाभोगेऽपि ज्ञानादिरक्षाभिप्रायेण संयमपरिणामानपायाद्भव्यत्वम्, अन्यावस्थायां त्वनाभोगाद्। अप्रमत्तसंयतानां त्वपवादानधिकारिणां घात्यजीवविषयकाभोगप्रमादयोरभाव एवेत्यर्थादनाभोगसहकृतमविशेषितं मोहनीयं कर्मैव जीवघातादिकारणं सम्पन्नम्, तयोरेकतरस्याभावेऽप्यप्रमत्तसंयतानां द्रव्याश्रवो न भवत्येवेति ततः प्रमत्तान्तानां प्रमादाद् अप्रमत्तानां तु मोहनीयानाभोगाभ्यां द्रव्याश्रवपरिणतिरिति सिद्धमिति॥

---

१ सर्वः प्रमत्तयोग आरम्भ इति.

मोहं विना द्रव्याश्रवपरिणतिर्न स्वकारणप्रभवा केवलिनः सम्भवतीति चेत्तत्राह—इतरथा द्रव्याश्रवपरिणतेर्मोहजन्यत्वनियमे द्रव्यपरिग्रहेण वस्त्रपात्ररजोहरणादिलक्षणेन युतो जिनो मोहवान् भवेत्, द्रव्यहिंसाया इव द्रव्यपरिग्रहपरिणतेरपि तन्मते मोहजन्यत्वात्। न च धर्मोपकरणस्य द्रव्यपरिग्रहत्वमशास्त्रीयमिति शङ्कनीयम्; । "[1]दव्वओ णाम एगे परिग्गहे णो भावओ १; भावओ णामेगे णो दव्वओ २, एगे दव्वओवि भावओवि ३, एगे णो दव्वओवि णो भावओवि ४। तत्थ अरत्तदुट्ठस्स धम्मोवगरणं दव्वओ परिग्गहो णो भावओ १। मुच्छियस्स तदसंपत्तीए भावओ णो दव्वओ २, एवं चेव संपत्तीए दव्वओवि भावओवि ३, चरिमभंगो पुण सुन्नोत्ति ४॥ चतुर्भङ्ग्या दशवैकालिक–पाक्षिकसूत्रवृत्तिचूर्ण्यादौ प्रसिद्धत्वात्। नच द्रव्यपरिग्रहयुतस्यापि भगवतो मोहवत्त्वमिष्यते, अतो न द्रव्याश्रवपरिणतिर्मोहजन्येति भावः ॥ ५३ ॥

अनयैव प्रतिबन्ध्या केवलिनो द्रव्यहिंसायां सत्यां रौद्रध्यानप्रसङ्गं परापादितं परिहरन्नाह—

[1]एएणं दव्ववहे जिणस्स हिंसाणुबंधसंपत्ती।
इय वयणं पक्खित्तं, सारक्खणभावसारिच्छा ॥५४॥

'एएणं'ति। एतेन द्रव्यपरिग्रहयुतस्यापि भगवतो मोहाभावेन द्रव्यवधेऽभ्युपगम्यमाने जिनस्य हिंसानुबन्धसम्प्राप्तिर्हिंसानुबन्धिरौद्रध्यानप्रसङ्गः; छद्मस्थसंयतानां हि घात्यजीवविषयकानाभोगसहकृतमोहनीयलक्षणसहकारिकारणवशेन कायादिव्यापारा जीवघातहेतवो भवन्ति, त एव च योगा घात्यजीवविषयकाभोगसहकृततथाविधमोहनीयक्षयोपशमादिसहकारिकारणविशिष्टा जीवरक्षाहेतव

---

१ द्रव्यतो नाम एकः परिग्रहः, नो भावतः। भावतो नाम एकः परिग्रहः, नो द्रव्यतः। एको द्रव्यतोऽपि भावतोऽपि। एको नो द्रव्यतोऽपि नो भावतोऽपि। १ तत्र अरक्तद्विष्टस्य धर्मोपकरणं द्रव्यतो परिग्रहः, नो भावतः। २ मूर्छितस्य तदसंप्राप्त्या भावतो नो द्रव्यतः। ३ एवं चैव संप्राप्त्या द्रव्यतोऽपि भावतोऽपि। ४ चरमभङ्गः पुनः शून्य इति।

१ एतेन द्रव्यवधे जिनस्य हिंसानुबंधसंप्राप्तिः।
इति वचनं प्रक्षिप्तं संरक्षणभावसादृश्यात् ॥ ५४ ॥

इत्यनुभवसिद्धम् । केवलिनस्तु योगाः पराभिप्रायेणानाभोगमोहनीयाद्यभावेन परिशेषात् केवलज्ञानसहकृता एव जीवघातहेतवो भवन्ति, केवलज्ञानेन 'एतावन्तो जीवा अमुकक्षेत्रादौ ममावश्यं हन्तव्याः' इति ज्ञात्वैव केवलिना तद्घातात्, तथा च तस्य जीवरक्षादिकं कदापि न भवेत्, केवलज्ञानसहकृततद्योगानां सदा घातकत्वात्, जीवघातस्येव जीवरक्षाया म(अ)प्यवश्यभावित्वेन परिज्ञानाद्, उभयत्र केवलज्ञानस्य सहकारिकारणत्वकल्पने च केवलिनो योगानां जीवघातजीवरक्षाहेतू शुभाशुभत्वे सर्वकालं युगपद् भवतः; एतच्चानुपपन्नम्, परस्परं प्रतिबन्धकत्वादित्येकतरस्याभ्युपगमे पराभिप्रायेण सर्वकालमशुभत्वमेव सिद्ध्यतीति हन्तव्यचरमजीवहननं यावद्धिंसानुबन्धिरौद्रध्यानप्रसङ्ग इति—एतद्वचनं परस्य प्रक्षिप्तम्, संरक्षणभावस्य संरक्षणानुबन्धिरौद्रध्यानस्य सादृश्याद् द्रव्यपरिग्रहाभ्युपगमे भगवतस्तुल्ययोगक्षेमत्वात् । शक्यं ह्यत्रापि भवादृशेन वक्तुम्, छद्मस्थसंयतानां परिग्राह्यवस्तुविषयकानाभोगसहकृतमोहनीयलक्षणसहकारिकारणवशेन कायादिव्यापाराः परिग्रहग्रहणहेतवतः, अत एव च परिग्राह्यवस्तुविषयकाभोगसहकृततथाविधमोहनीयक्षयोपशमादिसहकारिकारणविशिष्टाः परिग्रहत्यागहेतव इत्यनाभोगमोहनीयाभावे केवलियोगानां परिग्रहग्रहणे केवलज्ञानमेव सहकारिकारणमिति यावत्केवलिनो धर्मोपकरणधरणं तावत् संरक्षणानुबन्धिरौद्रध्यानमक्षतमेवेति । द्रव्यपरिग्रहेऽभिलाषमूलसंरक्षणीयत्वज्ञानाभावान्न रौद्रध्यानमिति यदि विभाव्यते, तदा द्रव्यहिंसायामपि स्वयोगनिमित्तकहिंसाप्रतियोगिनि जीवे स्वेष्टहिंसाप्रतियोगित्वरूपघात्यत्वज्ञानाभावादेव न तदिति प्रगुणमेव पन्थानं किमिति न वीक्षसे ? ॥ ५१ ॥

अथ वस्त्रादिधरणं साधोरुत्सर्गतो नास्त्येव, कारणिकत्वात्; " [1]तिहिं ठाणेहिं वत्थं धरेज्जा, हिरिवत्तियं परीसहवत्तियं दुगंछावत्तियं ' इत्यागमेऽभिधानात्, किन्त्वापवादिकम् । तद्धरणकारणं च जिनकल्पायोग्यानां स्थविरकल्पिकानां सार्वदिकमेव, निरतिशयत्वादिति तद्धरणमपि सार्वदिकं प्राप्तम् । तदुक्तं विशेषावश्यके—

" विहियं सुए च्चिय जओ धरेज्ज तिहि कारणेहिं वत्थं ति ।
तेणं चिय तदवस्सं णिरतिसएणं धरेयव्वं ॥

---

१ त्रिभिः स्थानैः वस्त्रं धारयेत्—ह्रीप्रत्ययं परिषहप्रत्ययं जुगुप्साप्रत्ययम् ॥
२ विहितं श्रुत एव यतो धारयेत् त्रिभिः कारणैः वस्त्रमिति ।
तेनैव तदवश्यं धारयितव्यं निरतिशयेन ॥
जिनकल्पायोग्यानां ह्रीकुत्सापरिषहा यतोऽवश्यम् ।
ह्री लज्जेति वा स संयमस्तदर्थं विशेषेण ॥ इति,

जिणकप्पाजोग्गाणं हीकुच्छ–परिसहा जओ वस्सं ।
ही लज्जंति व सो संजमो तयत्थं विसेसेणं' ॥ ति (पृ.१०३८.गा.२६०२-३)

भगवतश्च यद्यपि वस्त्रादिधरणं ह्री-कुत्सा-परिषहप्रत्ययं न सम्भवति, तस्य तद्भावात्, तथापि शीतोष्णादिपरीषहप्रत्ययं तत्, आहारनिमित्तक्षुत्पिपासापरीषहवद्वस्त्रधरणनिमित्तशीतोष्णादिपरिषहसत्ताया अपि भगवत्यविरोधात्, तथा प्रकारेण तथाविधं कर्म क्षपणीयमित्यभिप्रायाच्च न रागादिविकल्पः, तथाविधसाध्वाचारस्थितिपरिपालनाभिप्रायेणैव वा तदिति धर्मार्थमत्युपगृहीतत्वाद् द्रव्यपरिग्रहे भगवतो न दोषः । यज्जातीयद्रव्याश्रवे संयतानामनाभोगेनैव प्रवृत्तिस्तज्जातीयद्रव्याश्रवस्यैव मोहजन्यत्वाभ्युपगमादनर्थदण्डभूतद्रव्यहिंसादेरेवं तथात्वाद्, धर्मोपकरणरूपे द्रव्याश्रवे तु संयतानां नानाभोगेनैव प्रवृत्तिः, किन्तु धर्माधर्मार्थमत्याऽपरिग्रहत्वाभोगेनैवेति स्वकारणलब्धजन्मनस्तस्य भगवत्यविरोधः–इत्याशङ्कायामाह—

अववाओवगमे पुण इत्थं नूणं पइण्णहाणी ते ।
पावंति असुहजोगा एवं च जिणस्स तुज्झ मए ॥५५॥

'अववाओवगमे पुण'त्ति । अत्र भगवतो द्रव्यपरिग्रहेऽपवादोपगमेऽपवादाङ्गीकारे पुनस्ते तव प्रतिज्ञाहानिः, अपवादप्रतिषेवणं च संयतेष्वपि प्रमत्तस्यैव भवतीति तव प्रतिज्ञेति । च पुनरेवं धर्मोपकरणसद्भावेनापवादतो द्रव्याश्रवाभ्युपगमे तव मते जिनस्याशुभयोगाः प्राप्नुवन्ति । इदं हि तव मतम्–योगानामशुभत्वं तावन्न जीवघातहेतुत्वमात्रेण, उपशान्तगुणस्थानं यावदप्रमत्तसंयतानां कदाचित्सद्भूतजीवघातसम्भवेन "तत्थ णं जे ते अपमत्तसंजया ते णं णो आयारंभा, णो परारंभा, णो तदुभयारंभा, अणारंभा"—इत्यागमप्रतिपादितानारम्भकत्वानुपपत्तिप्रसक्तेरशुभयोगानामारम्भकत्वव्यवस्थितेः, किन्तु फलोपहितयोग्यतया घात्यजीवविषयकाभोगपूर्वकजीवघातहेतुत्वेन; अत्र फलोपहितयोग्यतेति पदं केवलि-

---

१ अपवादोपगमे पुनरित्थं नूनं प्रतिज्ञाहानिस्ते ।
प्राप्नुवति अशुभयोगा एवं च जिनस्य तव मते ॥

२ तत्र ये ते अप्रमत्तसंयतास्ते शुभयोगं प्रतीत्य नो आत्मारंभा नो परारम्भा नो तदुभयारम्भा अनारम्भाः ॥

योगानामशुभत्वनिवारणार्थमेव, तेषां स्वरूपयोग्यतयैव यथोक्तजीवघातहेतुत्वाद्,न पुनः फलोपहितयोग्यतयापि, कारणानामभावात्। तथाऽशुभत्वं प्रमत्तयोगानामेव, तदभिव्यञ्जकं तु प्रमत्तयोगानां फलवच्छुभाशुभत्वाभ्यां द्वैविध्याभिधायकमागमवचनमेव। तथाहि–"[1]तत्थ णं जे ते पमत्तसंजया ते णं सुहं जोगं पडुच्च णो आयारंभा, जाव अणारंभा। असुहं जोगं पडुच्च आयारंभावि; जाव णो अणारंभत्ति।" अत्रापि प्रमत्तसंयतानां सामान्यतः प्रमत्ततासिद्ध्यर्थं तदीययोगानां स्वरूपयोग्यतयाऽऽभोगपूर्वकजीवघातहेतुत्वं वक्तव्यम्, कादाचित्काशुभयोगजन्यारम्भकत्वसिद्ध्यर्थं चाभोगोपि घात्यजीवविषयत्वेन व्यक्तो वक्तव्यः, तद्वत एव कस्यचित्प्रमत्तस्य सुमङ्गलसाधोरिवापवादावस्थां प्राप्तस्यात्माद्यारम्भकत्वात्, संयतत्वं च तस्य तदानीमपवादपदोपाधिकविरतिपरिणामस्यानपायाद्, न चैवमप्रमत्तसंयतस्य भवति, तस्यापवादपदाधिकारित्वाभावेनाभोगपूर्वकजीवघातहेतूनां योगानामभावात्। यस्त्वपवादप्रतिषेवणाराहित्यावस्थायामप्यप्रमत्तानामिव सद्भूतजीवघातः स चानाभोगजन्य एव, तदानीमनाभोगस्यापि तस्य विद्यमानत्वाद्, अत एव एवाप्रमत्तानामिव योगानां शुभत्वेन नात्माद्यारम्भकत्वमिति। फलोपहितयोग्यतास्वरूपयोग्यतयोश्चायं भेदः–यस्य यदन्तर्गतत्वेन विवक्षितकार्यं प्रति कारणता तस्य तदन्तर्गतत्वेनैव फलवत्तया फलोपहितयोग्यता, अन्यथा तु स्वरूपयोग्यता, सत्यपि तस्य कारणत्वे तदितरसकलकारणराहित्येन विवक्षितकार्याजनकत्वात्; परं स्वरूपयोग्यता एकस्मिन्नपि कारणे सजातीयविजातीयानेकशुभाशुभकार्याणां नानाप्रकारा आधाराधेयभावसम्बन्धेन सह जाताः कारणसमानकालीनाः, फलोपहितयोग्यतास्तु स्वरूपयोग्यताजनिता अपि कादाचित्का एव, तदितरसकलकारणसाहित्यस्य कादाचित्कत्वात्, यच्च कादाचित्कं तत्केषाञ्चित्कारणानां कदाचिदपि न भवत्येव, तेन फलोपहितयोग्यताः केषाञ्चित्कारणानां सम्भवन्त्योऽपि कादाचित्क्य एव मन्तव्याः; अत एव केवलिनां योगा अशुभकार्यमात्रं प्रति सर्वकालं स्वरूपयोग्यताभाज एव भवन्ति, न पुनः कदाचिदपि फलोपहितयोग्यताभाजोऽपि, अशुभकार्यमात्रस्य कारणानां ज्ञानावरणोदयादिघातिकर्मणामभावेन तदितरसकलकारणसाहित्याभावात्। शुभकार्याणां तु यथासम्भवं कदाचित्फलोपहितयोग्यतापि स्यात्, तथैव तदितरसकलकारणसाहित्यस्य स-

१ तत्र ये ते प्रमत्तसंयतास्ते शुभं योगं प्रतीत्य नो आत्मारम्भाः, यावदनारम्भाः। अशुभं योगं प्रतीत्य आत्मारम्भा अपि यावद् नो अनारम्भा इति.

म्भवादिति न कश्चिद्विरोधः। इत्थं चापवाददशायां प्रमत्तसंयतानां योगानां फलोपहितयोग्यतयाऽऽभोगपूर्वकजीवघातहेतुत्वेन यथाऽशुभत्वं तथा केवलिन आपवादिकस्य धर्मार्थमत्या धर्मोपकरणस्य धरणेऽपि स्वन्मतनीत्याऽऽभोगपूर्वकपरिग्रहग्रहणस्य फलोपहितयोग्यतया हेतूनां योगानामशुभत्वापत्तिः स्फुटैवेति।

अथ यद्यपवादेन धर्मोपकरणग्रहणं भगवतोऽभ्युपगम्येत तदा स्यादयं दोषः, अपवादं च केवलिनः कदापि नाभ्युपगच्छामः, तस्य प्रतिषिद्धप्रतिषेवणात्मकत्वेन स्वरूपतः सावद्यत्वात्; निरवद्यत्वं चास्य पुष्टालम्बनप्रतिषेवितस्य रोगविशेषविनाशकस्य परिकर्मितवत्सनागस्येव प्रायश्चित्तप्रतिपत्त्यादिना सोपाधिकमेव। यापि "[1]गंगाए णाविओ णंदो" इत्यादिव्यतिकरोपलक्षितस्य धर्मरुचेरनगारस्य नाविकादिव्यापादनप्रवृत्तिः सापि परमार्थपर्यालोचनायां पुष्टालम्बनैव, तत्कृतोपसर्गस्य ज्ञानादिहानिहेतुत्वाद्, ज्ञानादिहानिजन्यपरलोकानाराधनाभयेन प्रतिषिद्धप्रवृत्तेः पुष्टालम्बनमूलत्वात्; केवलं शक्त्यभावाभावाभ्यां पुष्टालम्बनतदितरापवादयोः प्रशस्ताप्रशस्तसञ्ज्वलनकषायोदयकृतो विशेषो द्रष्टव्यः; ज्ञानादिहानिभयं च केवलिनो न भवतीति तस्य नापवादवार्त्तापि।

यच्च धर्मोपकरणधरणं तद्व्यवहारनयप्रामाण्यार्थम्, व्यवहारनयस्यापि भगवतः प्रमाणीकर्त्तव्यत्वाद्। इत्थं च 'श्रुतोदितरूपेण धर्मोपकरणधरणेन केवलिलक्षणहानिः, 'इदं सावद्यम्' इति प्रज्ञाप्य तत्प्रतिषेवणाद्, अत एव—

"[2]ववहारो वि हु बलवं जं वंदइ केवली वि छउमत्थं।
आहाकम्मं भुंजइ सुअववहारं पमाणंतो" ॥ १ ॥

न केवलं निश्चयोऽपि तु स्वविषये व्यवहारोऽपि बलवान्। यद्यस्मात्कारणात् समुत्पन्नकेवलज्ञानोऽपि शिष्यो यद्यपि निश्चयतो विनयसाध्यस्य कार्यस्य सिद्धत्वात्केवली न कस्यचिद्वन्दनादिविनयं करोति, तथापि व्यवहारनयमनुवर्त्तमानः पूर्वविहितविनयो गुरुं वन्दते—आसनदानादिकं च विनयं तस्य तथैव करोति, यावदद्यापि न ज्ञायते, ज्ञाते पुनर्गुरुरपि निवारयत्येवेति भावः। अपरं च—"अतीवगूढाचारेण केनचिद् गृहिणा विहितमाधाकर्म तच्च श्रुतोक्तपरीक्षया परीक्षमाणे नाप्यशठेन छद्मस्थसाधुनाऽविज्ञातं गृहीत्वा केवलिनिमित्तमानीतं यथावस्थितं

---

१ 'गंगायां नाविको नन्दः' इत्यादि आवश्यककथानके द्रष्टव्यम्।

२ व्यवहारोऽपि खलु बलवान् यद् वन्दते केवल्यपि छद्मस्थम्।
आधाकर्म भुङ्क्ते श्रुतव्यवहारं प्रमाणयन् ॥

च केवलिनस्तज्ज्ञानतो निश्चयनयमतेनाभोक्तव्यमपि श्रुतरूपं व्यवहारनयं प्रमाणीकुर्वन्नसौ भुङ्क्त एव, अन्यथा श्रुतमप्रमाणं कृतं स्यात्, एतच्च किल न कर्त्तव्यम्, व्यवहारस्य सर्वस्य प्रायः श्रुतेनैव प्रवर्तमानत्वात्, तस्माद् व्यवहारनयोऽपि बलवानेव केवलिना समर्थितत्वाद्।" इति पुष्पमालासूत्रवृत्त्यादिवचनात् केवलिनोऽनेषणीयाहारस्य प्रवृत्तिसिद्धावपि नापवादसिद्धिः, ज्ञानादिहानिभयेन तत्राप्रवृत्तेः, श्रुतव्यवहारशुद्ध्यर्थमेव तत्र प्रवृत्तेः, तत्र 'इदं सावद्यम्' इति भणितेरभावान्न वचनविरोधः। 'यदि च तदनेषणीयं कथञ्चित् कदाचिदपि केवलिना भुक्तम्' इति छद्मस्थज्ञानगोचरीभवेत् तर्हि केवली न भुङ्क्त एव, केवल्यपेक्षया श्रुतव्यवहारशुद्धेरेवाभावाद्, 'अशुद्धमिति ज्ञात्वापि केवलिना भुक्तम्' इति छद्मस्थेन ज्ञातत्वात्। अत एव रक्तातिसारोपशमनार्थं रेवतीकृतकूष्माण्डपाको भगवता श्रीमहावीरेण प्रतिषिद्धः कदाचित्साधुना श्रुतव्यवहारशुद्ध्यानीतोऽपि; रेवतो तु जानात्येव—यद् भगवता श्रीमहावीरेण ज्ञात्वैव भुक्त इति छद्मस्थज्ञानगोचरत्वेन श्रुतव्यवहारभङ्ग एवेति रहस्यम्। एतेन केवलिनोऽभिप्रायाभावाज्जीवघातादौ सत्यपि न दोष इति पराशङ्कापि परास्ता, रेवतीकृताकूष्माण्डपाकपरित्यागानुपपत्तिप्रसक्तेः।

किञ्च—स्वतन्त्रक्रियावतो ज्ञानपूर्वकप्रवृत्तावभिप्रायाभावं वक्तुं कः समर्थः? न च श्रुतव्यवहारशुद्धमनेषणीयं भुञ्जानः केवली सावद्यप्रतिषेविता भविष्यतीति शङ्कनीयम्, सर्वेषामपि व्यवहाराणां जिनाज्ञारूपत्वेन श्रुतव्यवहारस्य सावद्यत्वाभावात्, तच्छुद्ध्यानीतस्य निरवद्यत्वाद्। अयं भावः—यथाऽप्रमत्तसंयतो जीववधेऽप्यवधकः, [१]'अवहगो सो उ'त्ति ओघनिर्युक्तिवचनात्, अनाभोगे सत्यप्यप्रमत्ततायास्तथामाहात्म्यात्, यथा चोपशान्तमोहवीतरागो मोहसत्तामात्रहेतुके सत्यपि जीवघाते केवलिवद्वीतरागो नोत्सूत्रचारी च, मोहनीयानुदयस्य तथामाहात्म्यात्; तथा श्रुतव्यवहारशुद्धेर्माहात्म्यादनेषणीयमपीतरैषणीयमेवेति कुतः सावद्यप्रतिषेवित्वगन्धोऽपीति चेत्, तदिदमखिलं गूढशब्दमात्रेणैव मुग्धप्रतारणम्। यतो यदि भगवत्स्वीकृतद्रव्यपरिग्रहानेषणीयाहारयोः स्वरूपतः सावद्यत्वेऽपि श्रुतव्यवहारशुद्धस्योपादेयत्वधिया दोषानावहत्वं तदाऽपवादस्थानीयत्वमेव तयोः प्राप्तम्, औपाधिकशुद्धताशालित्वात्। न चापवादः स्थविरकल्पनियत इति कल्पातीतस्य भगवतस्तदभावः, एवं सत्युपसर्गस्याप्यभावापत्तेः, तस्यापि जिनकल्पस्थविरकल्पनियतत्वाद्। यदि चोत्सर्गविशेष एव कल्पनियत इति तत्सा-

१ अवधकः स तु।

मान्यस्य भगवति नासम्भवस्तदाऽपवादविशेषस्यैव तथात्वे तत्सामान्यस्यापि भगवत्यनपायत्वमेव। युक्तं चैतत्, तीर्थकृतोऽप्यतिशयाद्युपजीवनरूपस्वजीतकल्पादन्यत्र साधुसामान्यधर्मताप्रतिपादनात्। तदुक्तं बृहत्कल्पभाष्यवृत्त्योः—"परः प्राह—यदि यद्यत्प्राचीनगुरुभिराचीर्णं तत्तत्पाश्चात्यैरप्याचरितव्यम्, तर्हि तीर्थकरैः प्राकारछत्रत्रयादिका प्राभृतिका तेषामेवार्थाय सुरैर्विरचिता समुपजीविता, तथा वयमप्यस्मन्निमित्तकृतं किं नोपजीवामः। सूरिराह—

[1]कामं खलु अणुगुरुणो धम्मा तह वि हु ण सव्वसाहम्मा।
गुरुणो जं तु अइसए पाहुडिआई समुवजीवे॥ १॥

काममनुमतं खल्वस्माकं यदनुगुरवो धर्मास्तथापि न सर्वसाधर्म्याच्चिन्त्यते, किन्तु देशसाधर्म्यादेव। तथाहि—गुरवस्तीर्थकराः, यत्तु यत्पुनरतिशयान् प्राभृतिका सुरेन्द्रादिकृता समवसरणरचना तदादीन् आदिशब्दादवस्थितनखरोमाधोमुखकण्टकादिसुरकृतातिशयपरिग्रहः; समुपजीवन्ति स तीर्थकृज्जीतकल्प इति कृत्वा न तत्रानुधर्मता चिन्तनीया। यत्र पुनस्तीर्थकृतामितरेषां च साधूनां सामान्यधर्मत्वं तत्रैवानुधर्मता चिन्त्यते। सा चेयमाचीर्णेति दर्श्यते,

[2]सगडद्दहसमभोमे अविअ विसेसेण विरहिअतरागं।
तहवि खलु अणाइन्नं एस णुधम्मो पवयणस्स॥ १॥

यदा भगवान् श्रीमन्महावीरस्वामी राजगृहनगरादुदायननरेन्द्रप्रव्राजनार्थं सिन्धुसौवीरदेशवर्तिनं वीतभयं नगरं प्रस्थितस्तदा किलापान्तराले बहवः साधवः क्षुधार्त्तास्तृषार्त्ताः संज्ञाबाधिताश्च बभूवुः। यत्र भगवन्नावासितस्तत्र तिलभृतानि शकटानि पानीयपूर्णश्च ह्रदः समभौमं च गर्त्ताबिलादिवर्जितं स्थण्डिलमभवद्, अपि च तत्तिलोदकस्थण्डिलजातं विरहिततरमतिशयेनागन्तुकैस्तदुत्थैश्च जीवैर्वर्जितमित्यर्थः। तथापि खलु भगवता नाचीर्णं नानुज्ञातम्—एषोऽनुधर्मः प्रवचनस्य सर्वैरपि प्रवचनमध्यमध्यासीनैरशस्त्रोपहतपरिहारलक्षण एव धर्मोऽनुगन्तव्य इति भावः। एतदेव विवृणोति—

---

१ कामं खलु अनुगुरवो धर्मास्तथापि खलु न सर्वसाधर्म्यात्।
गुरवो यत्त्वतिशयान् प्राभृतिकादीन् समुपजीवन्ति॥

२ शकट-ह्रद-समभौममपि च विशेषेण विरहिततरम्।
तथापि खल्वनाचीर्णमेषोऽनुधर्मः प्रवचनस्य॥

[1]वुक्कंतजोणि–थंडिल–अत्तसा दिन्ना विई (पीडि) अवि छुहाइ।
तहवि ण गिण्हिसुं जिणो मा हु पसंगो असत्थहए" ॥

यत्र भगवानावासितस्तत्र बहूनि तिलशकटान्यावासितान्यासन् । तेषु च तिला व्युत्क्रान्तयोनिका अशस्त्रोपहता अप्यायुःक्षयेणाचित्तिभूताः। ते च यद्यस्थण्डिले स्थिताः स्युस्ततो न कल्पेरन्, अत आह–स्थण्डिले स्थिताः, एवंविधा अपि त्रसैः संसक्ता भविष्यन्ति, अत आइ–अत्रसाः–तदुद्भवागन्तुकत्रसविरहिताः, तिलशकटस्वामिभिर्गृहस्थैश्च दत्ताः; एतेनादत्तादानदोषोऽपि तेषु नास्तीत्युक्तं भवति। अपि च ते साधवः क्षुधा पीडिता आयुषः स्थितिक्षयमकार्षुः, तथापि श्रीजिनो वर्द्धमानस्वामी नाग्रहीत्, मा भूदशस्त्रहते प्रसङ्गः, 'तीर्थङ्करेणापि गृहितम्' इति मदीयमालम्बनं कृत्वा मत्सन्तानवर्त्तिनः शिष्या अशस्त्रोपहतं मा ग्राहिषुरिति भावः। युक्तियुक्तं चैतत् प्रमाणस्थपुरुषाणाम् । यत उक्तम्–"विषीदंति प्रमाणानि प्रमाणस्थैर्विसंस्थुलैः' इत्यादि। अत्र हि स्वजीतकल्पातिरिक्तस्थले तीर्थकृतः साधुसमानधर्मता प्रोक्ता, सा चाशस्त्रोपहतसचित्तवस्तुनोऽग्रहणेनोपपादिता, तच्चातिप्रसङ्गनिराकरणाभिप्रायेण, स च श्रुताप्रामाण्यबुद्धयैव स्यात् न तु भगवता प्रतिषेवितमिति छद्मस्थबुद्धिमात्रेण, छद्मस्थैरुत्सर्गतः प्रतिषिद्धत्वेन ज्ञायमानयोरपि भगवतो निशाहिण्डन-भेषजग्रहणादिप्रवृत्तेः श्रवणाद्, अपवादतोऽप्रतिषिद्धत्वज्ञानात्, तदर्शनेन छद्मस्थानामतिप्रसङ्ग इत्युक्तौ च सिद्धाऽनायासेनैव भगवतोऽपवादप्रवृत्तिः, तस्मादुन्नतनिम्नदृष्टान्तप्रदर्शितपरस्परप्रतियोगिकप्रकर्षापकर्षशालिगुणोपहितक्रियारूपोत्सर्गापवादाभावेऽपि साधुसमानधर्मतावचनाद् भगवति सूत्रोदितक्रियाविशेषरूपयोस्तयोर्यथोचिततया सम्भवोऽविरुद्ध इति युक्तं पश्यामः, तथा च धर्मोपकरणानेषणीयादिविषयप्रवृत्तेर्भगवतः स्वरूपत आपवादिकत्वेन तव मते आभोगेन प्रतिषिद्धविषयप्रवृत्त्युपधानस्य योगाशुभतानियामकत्वात् तया भगवद्योगानामशुभत्वापत्तिर्वज्रलेपायितैव। यदि च यत्तु श्रुतव्यवहारशुद्धस्याप्यनेषणीयत्वेनाभिधानं तत् श्रुतव्यवस्थामधिकृत्यैवावसातव्यम्, 'यथाऽयं साधुरुदयनो राजा' इत्यत्र राजत्वमगृहीतश्रामण्यावस्थामपेक्ष्यैवेति स्ववचनाश्रयणाद् भगवत्स्वीकृताना(नां) श्रुतव्यवहारसिद्धाना (नां) प्रतिषिद्धत्वाभिमतविषयप्रवृति(ती)नां वस्तुतो न प्रतिषिद्धविषयत्वम्, न

---

१ व्युत्क्रान्तयोनि–स्थण्डिल–अत्रसा दत्ताः अपि पीडिता क्षुधा ।
तथापि ना ग्रहीत् जिनो मा खलु प्रसङ्गोऽशस्त्रहते ॥

वा ताभिः 'इदं सावद्यम्' इति प्रज्ञाप्य प्रतिषेवित्वम्, इदमित्यनेन प्रत्यक्षव्यक्तिग्रहणात् तस्याश्चानवद्यत्वादिति विभाव्यते, तदा 'अनेषणीयं न ग्राह्यम्' इत्यादिसामान्यप्रतिषेधवाक्ये श्रुतव्यवहारश्रुद्धानेषणीयातिरिक्तानेषणीयादेर्निषेध्यत्वं वक्तव्यम्; तथा चापवादिकमन्यदपि कृत्यं श्रुतव्यवहारसिद्धमित्यप्रतिषिद्धमेवेत्याभोगेन प्रतिषिद्धविषयप्रवृत्तिः साधूनां क्वापि न स्यादिति त्वदपेक्षया यतीनाम शुभयोगत्वमुच्छिद्येतैवेति प्रमत्तानां शुभाशुभयोगत्वेन द्वैविध्यप्रतिपादकागमविरोधः, तस्मादाभोगेन जीवघातोपहितत्वं न योगानामशुभत्वम्, अशुभयोगजन्यजीवघातो जीवारम्भकत्वव्यवहारविषयः, अशुभयोगारम्भकपदयोः पर्यायत्वप्रसङ्गाद्, एकेन्द्रियादिष्वारम्भकत्वव्यवहाराभावप्रसङ्गाच्च; नहि ते आभोगेन जीवं घ्नन्तीति। अस्ति च तेष्वप्यारम्भकव्यवहारः। तदुक्तं भगवतीवृत्तौ—" [1]तत्थ णं जे ते असंजया ते अविरइं पडुच्च आयारंभा वि जाव णो अणारंभा" इत्यस्य व्याख्याने इहायं भावः—यद्यसंयतानां सूक्ष्मैकेन्द्रियादीनां नात्मारम्भकादित्वं साक्षादस्ति, तथाप्यविरतिं प्रतीत्य तदस्ति तेषाम्, न हि ते ततो निवृत्ताः; अतोऽसंयतानामविरतिस्तत्र कारणमिति। निवृत्तानां तु कथञ्चिदात्माद्यारम्भकत्वेऽप्यनारम्भकत्वम्। यदाह- ' जा जयमाणस्स ' इत्यादि; किन्तु सूत्रोदितेतिकर्त्तव्यतोपयोगपूर्वकव्यापारत्वं शुभयोगत्वं तदनुपयोगपूर्वकव्यापारत्वं चाशुभयोगत्वम्, तदुक्तं भगवतीवृत्तौ—" शुभयोग उपयुक्ततया प्रत्युपेक्षणादिकरणम्, अशुभयोगस्तु तदेवानुपयुक्ततयेति। तत्र शुभयोगः संयतानां षष्ठेऽपि गुणस्थाने संयमस्वभावादेव, अशुभयोगश्च प्रमादोपाधिकः। तदुक्तं तत्रैव—" प्रमत्तसंयतस्य हि शुभोऽशुभश्च योगः स्यात्, संयतत्वात्प्रमादपरत्वाच्चेति "। तत्र प्रमत्तसंयतानामनुपयोगेन प्रत्युपेक्षणादिकरणादशुभयोगदशायामारम्भिकीक्रियाहेतुव्यापारवत्त्वेन सामान्यत आरम्भकत्वादात्मारम्भकादित्वम्, शुभयोगदशायां तु सम्यक्क्रियोपयोगस्यारम्भिकीक्रियाप्रतिबन्धकत्वात्, तदुपहितव्यापाराभावेनानारम्भकत्वम्, प्रमत्तगुणस्थाने सर्वदाऽऽरम्भिकीक्रियाभ्युपगमस्त्वयुक्तः, अनियमेन तत्र तत्प्रतिपादनात्। तदुक्तं प्रज्ञापनायां क्रियापदे—[2]आरंभियाणं भंते! किरिया कस्स कज्जइ, गो०, अण्णयरस्सावि पमत्तसंजयस्स " इति। अत्रा

---

१ तत्र ये ते असंयतास्ते अविरतिं प्रतीत्य आत्मारम्भा अपि यावद् नो अनारम्भाः।

२ आरम्भिकानां भदन्त! क्रिया कस्य क्रियते? गौतम! अन्यतरस्यापि प्रमत्तसंयतस्य।

पिशब्दो भिन्नक्रमः, प्रमत्तसंयतस्याप्यन्यतरस्यैकतरस्य कस्यचित्प्रमादे सति कायदुष्प्रयोगभावतः पृथिव्यादेरुपमर्दसम्भवाद् अपिशब्दोऽन्येषामधस्तनगुणस्थानवर्त्तिनां नियमप्रदर्शनार्थः। प्रमत्तसंयतस्याप्यारम्भिकी क्रिया भवति किं पुनः शेषाणां देशविरतप्रभृतीनामिति—अस्यां व्यवस्थायां सिद्धायां जानतोऽपि भगवतो धर्मोपकरणधरणेऽवर्जनीयस्य द्रव्यपरिग्रहस्येव गमनागमनादिधर्म्यव्यापारेऽवर्जनीयद्रव्यहिंसायामप्यप्रमत्तत्वादेव नाशुभयोगत्वमिति प्रतिपत्तव्यम्। तत्र भगवतो धर्मोपकरणसत्त्वेऽपि मूर्च्छाऽभावेन परिग्रहत्वत्यागान्न परिग्रहदोषः, द्रव्यहिंसायां तु सत्यां प्राणवियोगरूपतल्लक्षणसत्त्वात्तद्दोषः स्यादेवेति व्यामूढधिया शङ्कनीयम्; 'प्रमादयोगेन प्राणव्यपरोपणं हिंसा'—इति तत्त्वार्थे तल्लक्षणकरणाद् भगवति तदभावादेव, अत एव 'हिंसा नियतो दोषः, परिग्रहस्त्वनियतो दोषः' इत्यप्यपास्तम्, मैथुनादन्यत्राश्रवेऽनियतदोषत्वप्रतिपादनात्। तदुक्तं तत्त्वार्थवृत्तौ—"प्रमत्तयोगादभिधानमनृतम्, प्रमत्तयोगाददत्तादानं स्तेयम्, प्रमत्तयोगान्मूर्च्छा परिग्रहः, मैथुने प्रमत्तयोगादिति पदं न, यत्राप्रमत्तस्य तथाभावे सति तत्र प्रमत्तयोगग्रहणमर्थवद् भवति, प्रमत्तस्य कर्मबन्धो नाप्रमत्तस्येति प्राणातिपातवन्मैथुने तु रागाद्वेषान्वयाविच्छेदात् सर्वावस्थास्तु मैथुनासेविनः कर्मबन्ध इत्यादि।" एतेन द्रव्यहिंसया भगवतः प्राणातिपातकत्वप्रसङ्गोऽपि निरस्तः, द्रव्यपरिग्रहेण परिग्रहित्वप्रसङ्गतुल्ययोगक्षेमत्वात्। किञ्च वीतरागाणामप्रमत्तानां च जीवविराधनायां सत्यामप्यारम्भिकीप्राणातिपातिकीक्रियाऽभाव एव भणितः। तदुक्तं भगवत्यां,—"[1]तत्थणं जे ते संजया ते दुविहा पण्णत्ता। तं०—सरागसंजया य वीयरायसंजयाय। तत्थणं जे ते वीयरागसंजया ते णं अकिरिया। तत्थ णं जे ते सरागसंजया, ते दुविहा पण्णत्ता। तं०—पमत्तसंजया य अपमत्तसंजया य। तत्थ णं जे ते अपमत्तसंजया, तेसिणं एगा मायावत्तिया किरिया कज्जइ, तत्थ णं जे ते पमत्तसंजया तेसिणं दो किरियाओ कज्जति। तं०—आरंभिया य मायावत्तिआ य इत्यादि"। एतद्वृत्तिर्यथा—"सरागसंजय'त्ति अक्षीणानुपशान्तकषायाः, 'वीयरागसंजय'त्ति उपशान्तकषायाः क्षीणकषायाश्च। 'अकिरिय'

१ तत्र च ये ते संयतास्ते द्विविधाः प्रज्ञप्ताः। तद्यथा—सरागसंयताश्च वीतरागसंयताश्च। तत्र च ये ते वीतरागसंयता ते चाक्रियाः। तत्र ये ते सरागसंयतास्ते द्विविधाः प्रज्ञप्ताः। तद्यथा—प्रमतसंयताश्च अप्रमत्तसंयताश्च। तत्र ये ते अप्रमत्तसंयतास्तेषामेका मायाप्रत्ययिका क्रिया क्रियते। तत्र ये ते अप्रमत्तसंयतास्तेषां द्वे क्रिये क्रियेते, आरम्भिका मायाप्रत्ययिका च॥

त्ति वीतरागत्वेनारम्भादीनामभावादक्रियाः। 'एगा मायावत्तिय' त्ति अप्रमत्तसंयतानामेकैव मायाप्रत्यया क्रिया 'कज्जइ'ति क्रियते भवति; कदाचिदुड्डाहरक्षणप्रवृत्तानामक्षीणकषायत्वादिति। 'आरंभिय'त्ति प्रमत्तसंयतानां सर्वः प्रमत्तयोग आरंभ इति कृत्वाऽऽरम्भिकी स्यात्, अक्षीणकषायत्वाच्च मायाप्रत्ययेति। तथा तत्रैवाष्टशते षष्ठोद्देशके प्रोक्तं—" [1]जीवेणं भंते! ओरालियसरीराओ कइ किरिए? गो० सिय तिकिरिए, सिय चउकिरिए, सियपंच किरिए, सिय अकिरिएत्ति" ॥ एतद्वृत्तिर्यथा—" परशरीरमौदारिकाद्याश्रित्य जीवस्य नारकादेश्च क्रिया अभिधातुमाह—'जीवेणमि'त्यादि। 'ओरालियसरीराओ'त्ति औदारिकशरीरमाश्रित्य कतिक्रियो जीव इति प्रश्नः। उत्तरं तु 'सिय तिकिरिय'त्ति। यदेकजीवोऽन्यस्य पृथिव्यादेः सम्बन्ध्यौदारिकशरीरमाश्रित्य कायं व्यापारयति तदा त्रिक्रियः, कायिक्यधिकरणिकीप्राद्वेषिकीनां भावाद्, एतासां च परस्परेणाविनाभूतत्वात् स्यात् 'त्रिक्रियः' इत्युक्तम्, न पुनः स्याद् 'एकक्रियः' स्याद् 'द्विक्रिय' इति। अविनाभावश्च तासामेवमधिकृतधिया ह्यवीतरागस्यैव नेतरस्य, तथाविधकर्मबन्धाहेतुत्वाद्, अवीतरागकायस्य चाधिकरणत्वेन प्रद्वेषान्वितत्वेन च कायक्रियासद्भावे इतरयोरवश्यंभावः, इतरभावे कायिकीसद्भावः। उक्तं च प्रज्ञापनायामिहार्थे—" [2]जस्स णं जीवस्स काइआ किरिया कज्जइ तस्स अहिगरणिया णियमा कज्जइ, जस्स अहिगरणिया किरिया कज्जइ तस्स वि काइया किरिया णियमा कज्जइ" इत्यादि,। तथाऽऽद्यक्रियात्रयसद्भावे उत्तरक्रियाद्वयं भजनया भवति। यदाह—'[3]जस्स णं जीवस्स काइया कज्जइ, तस्स पारियावणिया सिय कज्जइ, सिय णो कज्जइ" इत्यादि। ततश्च यदीयकायव्यापारद्वारेणाद्यक्रियात्रय एव वर्त्तते, न तु परितापयति न चातिपातयति, तदा त्रिक्रिय एवेति, अतोऽपि स्यात् 'त्रिक्रिय' इत्युक्तम्। यदा तु परितापयति तदा चतुष्क्रियः, आद्यक्रियात्रयस्य तत्रावश्यंभावाद्। यदा त्वतिपातयति तदा पञ्चक्रिया, चतुष्कस्य तत्रावश्यंभावाद्। उक्तं च—" [4]जस्स पारिआवणिया किरिया कज्जइ तस्स काइया णियमा कज्ज-

---

१ जीवो भदन्त! औदारिकशरीरात् कतिक्रियः? गौतम! स्यात् त्रिक्रियः, स्यात् चतुष्क्रिय. स्यात् पञ्चक्रियः, स्यादक्रिय इति।

२ यस्य जीवस्य कायिकी क्रिया क्रियते, तस्याधिकरणिकी नियमात्क्रियते। यस्याधिकरणिकी क्रिया क्रियते तस्यापि कायिकी क्रिया नियमात्क्रियते।

३ यस्य जीवस्य कायिकी क्रियते तस्य पारितापनिकी स्यात् क्रियते, स्यात् नो क्रियते। ४ यस्य पारितापनिकी क्रिया क्रियते तस्य कायिकी नियमात् क्रियते।

इ " इत्यादि । अत एवाह–"सिय चउकिरिए,' सिय पंचकिरिएत्ति तथा सिअ-अकिरिए" त्ति। वीतरागावस्थामाश्रित्य, तस्यां हि वीतरागत्वादेव न सन्त्यधिकृतक्रिया इति । एतद्वचनानुसारेण ह्येतत्प्रतीयते–यदारम्भिकी क्रिया प्रमादपर्यन्तमेव, न तु जीवविराधनायां सत्यामप्युपरिष्टादपि । प्राणातिपातक्रिया च प्रद्वेषेण प्राणातिपातकाल एव, न च पृथिव्यादीनां तदसम्भवः, तत्कृताकुशलपरिणामानिवृत्त्यैव तत्प्रतिपादनादिति । साप्यप्रमत्तस्य न सम्भवति । न चावीतरागकायस्याधिकरणत्वेन प्रद्वेषान्वितत्वेन च कायिकीक्रियासद्भावे त्रिक्रियत्वस्य नियमप्रतिपादनाद् एवंभूतस्याप्रमत्तस्यापि प्राणातिपातव्यापारकाले प्राणातिपातिकीक्रियासम्भव इति वाच्यम्, कायिकीक्रियाया अपि प्राणातिपातजनकप्रद्वेषविशिष्टाया एव ग्रहणाद्, इत्थमेवाद्यक्रियात्रयनियमसम्भवात् । तदुक्तं 'प्रज्ञापनावृत्तौ'–" इह कायिकीक्रिया औदारिकादिकायाश्रिता प्राणातिपातनिर्वर्तनसमर्था प्रतिविशिष्टा परिगृह्यते, तथा काचन कार्मणकायाश्रिता वा, तत आद्यानां तिसृणां क्रियाणां परस्परं नियामकभावः। कथमिति चेत् ; उच्यते–कायोऽधिकरणमपि भवतीत्युक्तं प्राक्, ततः कायस्याधिकरणत्वात् कायिक्यां सत्यामवश्यमाधिकरणिकी, आधिकरणिक्यामवश्यं कायिकी, सा च प्रतिविशिष्टा कायिकी क्रिया प्रद्वेषमन्तरेण(न) भवति,ततः प्राद्वेषिक्यापि सह परस्परमविनाभावः। प्रद्वेषोऽपि च कायेन स्फुटलिङ्ग एव, वक्त्ररूक्षत्वादेस्तदविनाभाविनः प्रत्यक्षत एवोपलम्भाद् । उक्तं च–"रूक्षयति रूक्षतो ननु वक्त्रं स्निह्यति च रज्यतः पुंसः। औदारिकोऽपि देहो भाववशात् परिणमत्येवम ॥" इति । यदि च प्रद्वेषान्वयाविच्छेदमात्रादवीतरागमात्रस्य कायिक्यादिक्रियात्रयनियमः स्यात्, तदा सूक्ष्मसम्पराये प्राणातिपातसम्पत्तौ प्राणातिपातक्रियया षड्विधबन्धकत्वस्याप्युपपत्तौ " [१]जीवेणं भंते ! पाणाइवाएणं कइ कम्मपगडीओ बंधइ ? गोअमा ! सत्तविहबंधए वा अट्ठविहबंधए वा । " इत्युक्तव्यवस्थानुपपत्तिः। नन्वेवं–" [२]जीवेणं भंते ! नाणावरणिज्जं कम्मं बंधमाणे कइकिरिए ? गोअमा ! सिय तिकिरिए सिय चउकिरिए सिय पंचकिरिए ।– " इति प्रज्ञापनासूत्रस्य का गतिः? भवदुक्तरीत्या ज्ञानावरणीयं कर्म बध्नतो दशमगुणस्थानवर्त्तिनोऽक्रिय-

---

१ जीवो भदन्त ! प्राणातिपातेन कति कर्मप्रकृतीर्बध्नाति ? गौतम ! सप्तविधबन्धको वाऽष्टविधबन्धको वा ।

२ जीवो भदन्त ! ज्ञानावरणीयं कर्म बध्नन् कतिक्रियः ? गौतम ! स्यात् त्रिक्रियः, स्यात् चतुष्क्रियः स्यात् पञ्चक्रियः ।

त्स्यायि सम्भवेन 'स्यादक्रियः' इति भङ्गन्यूनत्वादिति चेत्, स्वसहचरिते स्वकार्ये वा ज्ञानावरणीये प्राणातिपातस्य परिसमाप्तिनिर्वृत्तिभेदप्रकारोपदर्शनपरमेतत् सूत्रम्, न तु तद्बन्धे क्रियाविभागनियमप्रदर्शनपरम्–इत्येषा गतिरिति गृहाण। तदुक्तं तद्वृत्तौ–"जीवः प्राणातिपातेन सप्तविधमष्टविधं वा कर्म बध्नाति, स तु तमेव प्राणातिपातं ज्ञानावरणीयादि कर्म बध्नन् कतिभिः क्रियाभिः समापयतीति प्रतिपाद्यन्ते। अपि च कार्येण ज्ञानावरणीयाख्येन कर्मणा कारणस्य प्राणातिपातास्यस्य निर्वृत्तिभेद उपदर्श्यते, तद्भेदाच्च बंधविशेषोऽपीति। उक्तं च–"तिसृभिश्चतसृभिरथ पञ्चभिश्च क्रियाभिर्हिंसा समाप्यते क्रमशः। बन्धोऽस्य विशिष्टः स्याद् योगप्रद्वेषसाम्यं चेद्। इति तमेव प्राणातिपातस्य निर्वृत्तिभेदं दर्शयति–'सिय तिकिरिए' इत्यादीति॥ अथैवमप्रमत्तस्यैवाक्रियत्वस्वामिनः सुलभत्वाद् भगवतीवृत्तौ अक्रियत्वं वीतरागावस्थामाश्रित्यैव कथमुपपादितम्? इति चेत्, स्पष्टत्वार्थम्। बादरसम्परायं यावत् प्रद्वेषान्वयेन त्रिक्रियत्वाभ्युपगमेऽपि सूक्ष्मसम्परायस्याक्रियत्वस्थानस्य परिशिष्टत्वेनैतदुपपादनार्थम्, एतत्प्रकारस्यावश्याश्रयणीयत्वात्। प्रद्वेषाभावेन तत्र कायिक्यधिकरणिकीक्रियाभ्युपगमे च कायिक्यादिक्रियात्रयस्य परस्परं नियमानुपपत्तिरिति। कायिकी क्रिया द्विविधा–अनुपरतकायिकी क्रिया दुष्प्रयुक्तकायिकी क्रिया चेति सिद्धान्तेऽभिधानात् कायिकी क्रियाऽऽरम्भिक्या समनियता, प्राणातिपातिकी च प्राणातिपातव्यापारफलोपहित्वात् तद्वत्याप्यैवेति प्रतिपत्तव्यम्, तत आरम्भकत्वं प्राणातिपातकत्वं च सत्यामपि द्रव्यहिंसायां प्रमत्तस्यैव नाप्रमत्तस्येति भगवतस्तया तदापादनमयुक्तमेवेति दिक्॥ ५५॥

अथावश्यंभाविन्यां जीवविराधनायामाभोगवतो भगवतो यद् घातकत्वमापद्यते तत्किं लोकोत्तरव्यवहाराद्, उत लौकिकव्यवहाराद्, उताहो स्वमतिविकल्पितव्यवहाराद्? नाद्यः, लोकोत्तरघातकत्वव्यवहारे आभोगेन जीवविराधनामात्रस्यातन्त्रत्वाद्, आभोगेनापि जायमानायां तस्यामपवादपदप्रतिषेविणोऽघातकत्वस्य, अनाभोगेनापि जायमानायां तस्यां प्रमादिनो घातकत्वस्य च तद्व्यवहारेणेष्टत्वाद्। नापि द्वितीयः, यतो लोका अपि नाभोगेन जीवघातमात्रादेव घातकत्वं व्यवहरन्ति, कूपनष्टायां गवि तत्कर्तुर्गोवधकर्तृत्वप्रसङ्गाद्, गोराभोगस्यापि तदा स्फुटत्वाद्, आभोगजन्यत्वस्य च हिंसायामसिद्धत्वाद्। हिंसायां हि जिघांसाहेतुराभोगस्त्वन्यथासिद्ध इत्येतद्दोषवारणार्थं मरणोद्देश्यकमरणानुकूलव्यापारत्वं हिंसा वक्तव्या, तथापि काशीमरणोद्देशपूर्वकानुष्ठाने आत्महिंसात्वापत्तिवारणार्थमदृष्टा-

द्वारकत्वं विशेषणं देयम्, इत्यदृष्टाद्वारकमरणोद्देश्यकमरणानुकूलव्यापारत्वमेव हि हिंसा न्यायशास्त्रसिद्धेति तृतीयपक्षोऽवशिष्यते। स तु स्वमतिविकल्पितत्वादेव स्वशास्त्रप्रतिज्ञाबाधया महादोषावह इत्यभिप्रायेणाह—

[1]अणुसंगयहिंसाए जिणस्स दोसं तुहं भणंतस्स।
साहूण वि आभोगा णइउत्तारा३ विहम्मिजा॥ ५६॥

'अणुसंगयहिंसाए'त्ति अनुषङ्गजया—धर्मदेशनामात्रोद्देशकप्रवृत्त्युपजायमानकुनयमतखेदादिवत्स्वानुद्देश्यकप्रवृत्तिजनितया हिंसया जिनस्य दोषं भणतस्तव साधूनामप्याभोगान्नद्युत्तारादि विघटेत, तेषामपि नद्युत्तारादौ जलजीवादि विराधनाया अध्यक्षसिद्धत्वादिति। नन्वेतदसिद्धम्, नहि जलजीवानामप्रत्यक्षत्वेन तद्विराधनायाः प्रत्यक्षत्वं सम्भवति, प्रतियोगिनोऽप्रत्यक्षत्वे तदनुयोगिनोऽप्यप्रत्यक्षत्वात्। न च जलस्य प्रत्यक्षत्वेन तज्जीवानामपि प्रत्यक्षत्वमिति वाच्यम्, इदं जलमिति ज्ञानमात्रेणेदंजलं सचित्तमिति विवेकेन परिज्ञानोदयप्रसक्तेः। तस्मात् "[2]दुविहा पुढविकाइआ प०, तं० परिणया चेव अपरिणया चेव, जाव वणप्फइकाइअ"त्ति श्रीस्थानाङ्गे। "तत्र परिणताः स्वकायपरकायशस्त्रादिना परिणामान्तरमापादिता अचित्तीभूता इत्यर्थः"—इत्यादिप्रवचनवचनेन नद्यादिजले सचित्ताचित्तयोरन्यतरत्वेन परिज्ञाने सत्यपि इदं जलं सचित्तम्, इदं वा अचित्तम्—इति व्यक्त्या विवेकमधिकृत्य परिज्ञानाभावेन छद्मस्थसंयतानामनाभोग एव, तेन सिद्धा नद्युत्तारादौ जीवविराधनाऽनाभोगजन्याशक्यपरिहारेण—इत्याशङ्कायामाह—

[3]वज्जंतो अ अणिट्ठं, जलजीवविराहणं तहिं सक्खं।
जलजीवाणाभोगं जंपंतो किं ण लज्जेसि॥ ५७॥

---

१ अनुषङ्गजहिंसया जिनस्य दोषं तव भणतः।
साधूनामप्याभोगाद् नद्युत्तारादि विघटेत॥ ५६॥

२ द्विविधाः पृथ्वीकायिकाः प्रज्ञप्ताः, तद्यथा—परिणताश्चैव अपरिणताश्चैव, यावद् वनस्पतिकायिका इति॥

३ वर्जयँश्चानिष्टां जलजीवविराधनां तत्र साक्षात्।
जलजीवानाभोगं जल्पयन् किं न लज्जसे॥ ५७॥

'वज्जंतोय'त्ति। तत्र नद्युत्तारे जलजीवविराधनामनिष्टां साक्षाद्वर्जयन् वर्जनोयामभ्युपगच्छंश्च जलजीवानाभोगं जल्पयन् किं न लज्जसे? अयं भावः—नद्युत्तारे बहुजलप्रदेशपरित्यागेनालपजलप्रदेशप्रवेशरूपा यतना तावत्त्वयापि स्वीक्रियते, सा च जलजीवानाभोगाभ्युपगमे दुर्घटा, स्वल्पजलं सचित्तं भविष्यति बहु जलं चाचित्तमिति विपरीतप्रवृत्तिहेतुशङ्कापिशाचीप्रचारस्यापि दुर्वारत्वाद्। भगवदुक्तयतनाक्रमप्रामाण्यान्नेयं शङ्केति चेत्, तर्हि यतनाया अपि बहुतरासत्प्रवृत्तिनिवृत्तिरूपाया विवेकेन परिज्ञानं न्यूनाधिकजलजीवविराधनाभोगाधीनमिति व्यवहारसचित्ततया जलजीवाभोगाभ्युपगमावश्यकत्वात् तव वदद्(तो)व्याघात एव महात्रपाकारणमिति। किञ्च—नद्यादिजलजीवानां निश्चयतश्छद्मस्थानां सचित्तत्वापरिज्ञानेऽपि तत्र स्थितपनकसेवालादीनां निश्चयतोऽपि सचित्तत्वं परिज्ञायते एव। तदुक्तमोघनिर्युक्तौ—

[1]सव्वो अणंतकाओ सचित्तो होइ णिच्छयणयस्स।
ववहारओ अ सेसो मीसो पम्हाणरोट्टाइ॥ १॥"

"एतद्वृत्तिर्यथा—सर्व एवानन्तवनस्पतिकायो निश्चयनयेन सचित्तः, शेषः परीतवनस्पतिर्व्यवहारनयमतेन सचित्तो मिश्रश्च प्रम्लानानि कुसुमानि पर्णानि च, 'रोट्टो लोट्टो तत्थ तंदुलमुहाइं अत्थंति, तेण कारणेन मीसो भन्नइत्ति।" ते च पनकशेवालादयो जलेऽवश्यं भाविन इति तद्विषयविराधना निश्चयतोऽप्याभोगेन सिद्धेति। तत्रानाभोगेनैव जीवविराधनेति दुर्वचनम्। न च ते तत्रास्माभिः प्रत्यक्षतो न दृश्यन्ते, अतस्तद्विराधनाऽनाभोगजैवेति वक्तव्यम्; स्वच्छस्तोकजलनद्यादिषु पनकादीनामस्माभिरप्युपलभ्यमानत्वेन 'नास्माभिस्ते तत्र दृश्यन्त'—इत्यस्यासिद्धत्वात्। किंच आगमवचनादपि तत्र तदवश्यंभावी निश्चीयते। तदुक्तं—प्रज्ञापनातृतीयपदवृत्तौ—"बादरतेजस्कायिकेभ्योऽसङ्ख्येयगुणाः प्रत्येकशरीरबादरवनस्पतिकायिकाः, तेभ्यो बादरनिगोदा असङ्ख्येयगुणाः, तेषामत्यन्तसूक्ष्मावगाहनत्वाद्, जलेषु सर्वत्रापि च भावात्। पनकसेवालादयो हि जलेऽवश्यंभाविनः, ते च बादरानन्तकायिका इति। तथा बादरेष्वपि मध्ये सर्वबहवो वनस्पतिकायिकाः, अनन्तसङ्ख्याततया तेषां प्राप्यमाणत्वात्। ततो यत्र ते बहवस्तत्र ब-

---

१ सर्वोऽनन्तकायः सचित्तो भवति निश्चयनयस्य।
व्यवहारतश्च शेषो मिश्रः प्रम्लानरोट्टादिः॥

हुत्वं जीवानाम्, यत्रत्वल्पे तत्रालपत्वम् । वनस्पतयश्च तत्र बहवो यत्र प्रभूता आपः, 'जत्थ जलं तत्थ वणं' इति वचनात्, तत्रावश्यं पनकसेवालादीनां भावात्, ते च पनकसेवालादयो बादरनामकर्मोदये वर्त्तमाना अपि अत्यन्तसूक्ष्मावगाहनत्वाद् अतिप्रभूतपिण्डीभावाच्च सर्वत्र सन्तोऽपि न चक्षुषा ग्राह्याः । तथा चोक्तमनुयोगद्वारेषु—" [१]ते णं वालग्गा सुहुमपणगजीवस्स सरीरोगाहणाहिंतो असंखेज्जगुणा" इति । ततो यत्रापि नैते दृश्यन्ते, तत्रापि सन्तीति प्रतिपत्तव्याः। आह च मूलटीकाकारः—इह " सर्ववहवो वनस्पतयः " इति कृत्वा यत्र ते सन्ति तत्र बहुत्वं जीवानाम्, तेषां बहुत्वम्, " [२]जत्थ आऊकाओ तत्थ णियमा वणस्सइकाइआ" इति। पणगसेवालहढाई बायरा वि होंति, सुहुमा आणागेज्झा ण चक्खुण'त्ति ॥ किञ्च—नद्युत्तारादौ मण्डूकादित्रसविराधना "तसा य पच्चक्खया चेव"त्ति वचनात् अवश्यं जायमानाभोगपूर्विकैव, इत्येवं च सति जीवोऽयमिति साक्षात्कृत्वा यो जीवघातं करोति तस्य विरतिपरिणामो दूरे, निश्चयतः सम्यक्त्वमपि न स्यात्, अनुकम्पाया अभावेन सम्यक्त्वलक्षणाभावाद्—इत्यादि परोक्तं यत्किञ्चिदेव, आप्तवचनाज्जीवत्वेन निश्चितस्य विराधनायाः स्वादर्शनमात्रेणाभोगपूर्वपूर्वकत्वाभावे अपोक्तवस्त्राद्यन्तरितत्रसादिविराधनायामपि तदापत्तेः, दृष्ट्वा स्थूलत्रसविराधनायामाभोगविशेषाद्विषयविशेषाच्च पातकविशेषस्तु स्याद्; न चैतावताऽन्यत्रानाभोग एव व्यवस्थापयितुं शक्यते । न खलु राजदारगमने महापातकाभिधानादन्यत्र परदारगमने परदारगमनत्वमेव नेति वक्तुं युक्तम् । एतेनाभोगमूलाऽऽभोगपूर्विका च जीवविराधना विनापराधं मिथ्यादृशोऽपि प्रायोऽनार्यजनस्यैव भवति, सा च नावश्यं भाविनी, प्रायः सम्भविसम्भवात् । संयतानां त्वनाभोगमूलैव सा, नत्वाभोगमूला, अत एव नद्युत्तारादौ सत्यामपि जलजीवविराधनायां संयमो दुराराधो न भणितः, भणितश्च कुन्थूत्पत्तिमात्रेणापि, तत्र निदानं तावदाभोगोऽनाभोगावेव । तत्र यद्यपि संयतानामुभयत्रापि जीवविराधनाऽनाभोगादेव, तथापि स्थावरसूक्ष्मत्रसजीवविषयकोऽनाभोगः सर्वैरेव सर्वकालीनो न पुनः क्वाचित्कः कादाचित्कश्च, तस्य चापगमः प्रयत्नशतैरप्यशक्यः, केवलज्ञानसाध्यत्वात्, शक्यश्च कुन्थ्वादिस्थूलत्रसजीवविषयकस्यानाभोगस्य भूयो निरीक्षणादिनेति, तथाभूतं च निरीक्षणं दुःसा

---

१ ते च वालाग्राणि सूक्ष्मपनकजीवस्य शरीरावगाहनाभ्योऽसंख्येयगुणानि ॥

२ यत्राप्कायस्तत्र नियमाद् वनस्पतिकायिका इति । पनकसेवालहढादयो बादरा अपि भवन्ति सूक्ष्मा आज्ञाग्राह्या न चक्षुषेति ॥

धमिति संयमो दुराराधो भणितः। एवं सम्यक् प्रयत्नपरायणानामपि कदाचित् कुन्थ्वादिस्थूलत्रसजीवविराधना स्यात्। सा च प्रायोऽसम्भविसम्भवेनावश्यभाविनीति वक्तव्यम्। शक्यपरिहारजीवविषयकप्रयत्नवतोऽपि तत्परिहरणोपायस्यापरिज्ञानात्साऽप्यवश्यंभाविनी, विराधना द्वेधा—अनाभोगमूला अनाभोगपूर्विका, अनाभोगमूला आभोगपूर्विका चेति। तत्राद्या(द्य) जीवघाते जाते सत्येव तत्परिज्ञानाद्। द्वितीया तु निम्नप्रदेशादौ पिपीलिकादिकमदृष्ट्वैवोत्पाटिते पादे दृष्ट्वाऽपि पादं प्रत्यादातुमशक्तस्य जीवघातावसरे जीवविषयकाभोगस्य विद्यमानत्वात्, परमनाभोगमूलिकापि स्थूलत्रसजीवविराधना संयतानां तज्जन्यकर्मबन्धाभावेऽपि लोकनिन्द्या भवत्येव, तत्कर्तुर्हिंसाव्यपदेशहेतुत्वात्, तथाव्यपदेशः स्थूलत्रसजीवसम्बन्धित्वेन निजसाक्षात्कारविषयत्वात्। न चैवं केवलिवचसा निश्चिताऽपि सूक्ष्मत्रसजीवविराधना, तस्याश्छद्मस्थसाक्षात्कारविषयत्वाभावेन हिंसकव्यपदेशहेतुत्वाभावात्। अत एवाब्रह्मसेवायामनेकशतसहस्रपञ्चेन्द्रियजीवविराधकोऽपि देशविरतिश्रावको 'जीवविराधकः' इति व्यपदेशविषयो न भवति, (भवति) चैकस्या अपि पिपीलिकाया विराधनेनाभोगेनापि; आभोगे च स्वज्ञातिज्ञातेऽपांक्तेयोऽपि स्यात्, तेन निजसाक्षात्कारविषयीभूताविषयीभूतयोर्जीवघातयोर्महान् भेदः, अन्यथाऽब्रह्मसेवी श्रावको व्याधादिभ्योऽपि जीवघातकत्वेनाधिको वक्तव्यः स्यात्—इत्यादि परस्य कल्पनाजालमपास्तम्, संयतानां नद्युत्तारे जलजीवविराधनाया आभोगमूलत्वेऽप्याज्ञाशुद्धत्वेनैवादुष्टत्वात्। यच्च तया न संयमस्य दुराराधत्वम्, तस्याः कादाचित्कत्वादालम्बनशुद्धत्वाच्च। यथा च कुन्थूत्पत्तिमात्रेण सार्वदिकयतनाहेत्वाभोगदौर्लभ्यात् संयमस्य दुराराधत्वम्, तथा तथाविधक्षेत्रकालादिवशात् सूक्ष्मबीजहरितादिप्रादुर्भावेऽपि सार्वदिकतद्यतनाहेत्वाभोगदौर्लभ्यात् संयमस्य दुराराधत्वमेवेति तु 'दशवैकालिका'द्यध्ययनवतामपि सूक्ष्माष्टकविदां परिणतलोकोत्तरदयास्वरूपाणां प्रतीतमेव। स्थावरसूक्ष्मत्रस विषयकोऽनाभोगः केवलज्ञानं विना दुरत्यय इति तु सूक्ष्माष्टकयतनाविधानान्यथानुपपत्त्यैव बाधितं परिणामशुद्ध्यर्थं तद् नतु तदाभोगार्थम्—इत्येवं तदाभोगापलापे च स्थूलत्रसाभोगाभ्युपगमोऽप्युच्छिद्येत, तत्रापीत्थं वक्तुं शक्यत्वात्, चेष्टालिङ्गाभिव्यक्तेः स्थूलत्रसाभोगोऽभिव्यक्त एवेति चेत्, पृथिव्यादिजीवाभोगोऽपि जिनवचनाभिहितलिङ्गादाज्ञाप्रामाण्याद्वा किं नाभिव्यक्तः? व्यक्तीयत्तयाऽनाभोगस्तु मनाक्स्पन्दत्कुन्थुतदनुकारिरजस्त्रुटिपुञ्जेऽपि वक्तुं शक्यत इति न किञ्चिदेतत्। ततो यतनां

कुर्वतामशक्यपरिहारा ।हसा सूक्ष्मस्थूलजीवविषयकभेदेऽप्यशक्यपरिहारत्वेन समानैव, विषयभेदात् तद्भेदं तु व्यवहारेण न वारयामः । अत एवाब्रह्मसेवायामपि देशविरतस्य कृतसङ्कल्पमूलस्थूलजीवहिंसाप्रत्याख्यानाभङ्गान्न व्याधादिवद्दुष्टत्वम् । न चैवं देशविरतस्येव साधोरप्याभोगेन पृथिव्यादिवधे न दुष्टत्वमिति साधोः प्रत्याख्यानभङ्गदोषसमर्थनार्थं पृथिव्यादिजीवाभोगोऽप्यवश्यमभ्युपेयः । यदि च स्थूलत्रसविषयक एवाभोगोऽभ्युपगम्येत, तदा तद्विषयैव हिंसैकान्ततो दुष्टा स्यात्, न चैवं जैनप्रक्रियाविदो वदन्ति, तैः क्षुद्रमहत्सत्त्ववधसादृश्यवैसदृश्ययोरनेकान्तस्यैवाभ्युपगमात् । तदुक्तं सूत्रकृताङ्गे—

[1]जे केइ खुद्दगा पाणा अदुवा संति महालया ।
सरिसं तेहि वेरंति असरिसं ति य णो वए ॥
एतेहिं दोहिं ठाणेहिं ववहारो ण विज्जई ।
एतेहिं दोहिं ठाणेहिं अणायारं तु जाणए ॥" त्ति

एतद्वृत्तिर्यथा—"ये केचन क्षुद्रकाः सत्त्वाः प्राणिन एकेन्द्रियद्वीन्द्रियादयोऽल्पकाया वा पञ्चेन्द्रिया अथवा महालया महाकायाः सन्ति विद्यन्ते, तेषां क्षुद्रकाणामल्पकायानां कुन्थ्वादीनां महान् वाऽऽलयः शरीरं येषां ते महालया हस्त्यश्वादयस्तेषां च व्यापादने सदृशं वैरमिति वक्तव्यं—कर्म विरोधलक्षणं वा वैरं सदृशं समानम्, तुल्यप्रदेशत्वात् सर्वजन्तूनामित्येवमेकान्तेन नो वदेत् । तथा विसदृशमसदृशम्, तद्व्यापत्तौ वैरं कर्मबन्धो विरोधो वा, इन्द्रियविज्ञानकायानां विसदृशत्वात्, सत्यपि प्रदेशतुल्यत्वे न सदृशं वैरमित्येवमपि नो वदेत् । यदि हि वध्यापेक्षयैव कर्मबन्धः स्यात् ततस्तद्वशात् कर्मणोऽपि सादृश्यमसादृश्यं वा वक्तुं युज्यते; न च तद्वशादेव बन्धः, अपि त्वध्यवसायवशादपि; ततश्च तीव्राध्यवसायिनोऽल्पकायसत्त्वव्यापादनेऽपि महद्वैरम्, अकामस्य तु महाकायसत्त्वव्यापादनेऽपि स्वल्पमिति । एतदेव सूत्रेणैव दर्शयितुमाह—' एतेही 'त्यादि । आभ्यामनन्तरोक्ताभ्यां स्थानाभ्यामनयोर्वा स्थानयोरल्पमहाकायव्यापादनकर्मबन्धसदृशत्व (विसदृशत्व) योर्व्यवहरणं व्यवहारो निर्युक्तिकत्वान्न युज्यते। तथाहि—न वध्यस्य सदृशत्वमसदृशत्वं वैकमेव

---

१ येऽपि क्षुद्रकाः प्राणा अथवा सन्ति महालयाः ।
सदृशं तैर्वैरमिति असदृशमिति च नो वदेत् ॥
एताभ्यां द्वाभ्यां स्थानाभ्यां व्यवहारो न विद्यते ।
एताभ्यां द्वाभ्यां स्थानाभ्यामनाचारं तु जानीयात् ॥

कर्मबन्धस्य कारणम्, अपि तु वधकस्य तीव्रभावो मन्दभावो ज्ञातभावोऽज्ञातभावो महावीर्यत्वमल्पवीर्यत्वं चेत्येतदपि; तदेवं वध्यवधकयोर्विशेषात् कर्मबन्धविशेष इत्येवं व्यवस्थिते वध्यमेवाश्रित्य सदृशत्वासदृशत्वव्यवहारो न विद्यत इति। तथाऽनयोरेव स्थानयोः प्रवृत्तस्यानाचारं विजानीयादिति ॥" तथाहि–यज्जीवसाम्यात् कर्मबन्धसदृशत्वमुच्यते, तदयुक्तम्, यतो नहि जीवव्यापत्त्या हिंसोच्यते, तस्य शाश्वतत्वेन व्यापादयितुमशक्यत्वाद्, अपि त्विन्द्रियादिव्यापत्त्या। तथा चोक्तम्–

पञ्चेन्द्रियाणि त्रिविधं बलं च उच्छ्वासनिःश्वासमथान्यदायुः।
प्राणा दशैते भगवद्भिरुक्तास्तेषां वियोजीकरणं तु हिंसा॥" इत्यादि।

अपि च भावसव्यपेक्षस्यैव कर्मबन्धोऽभ्युपेतुं युक्तः। तथा हि–वैद्यस्यागमसव्यपेक्षस्य सम्यक् क्रियां कुर्वतो यद्यातुरविपत्तिर्भवति, तथापि न वैरानुषङ्गो भवेद्, दोषाभावात्। अपरस्य तु सर्पबुद्ध्या रज्जुमपि व्रतो भावदोषात् कर्मबन्धः, तद्रहितस्य तु न बन्ध इति। उक्तं चागमे–[1] 'ऊच्चालिअंमि पाए' इत्यादि। तन्दुलमत्स्याख्यानकं तु सुप्रसिद्धमेव। तदेवं वध्यवधकभावापेक्षया स्यात् सदृशत्वम्, स्यादसदृशत्वमिति, अन्यथाऽनाचार इति। एतेन लौकिकघातकत्वव्यवहारविषयीभूतैव हिंसा महाऽनर्थहेतुरिति परस्य यत्र तत्र प्रलपनमपास्तम्। अपि चैवमापवादिकोऽपि वधो महानर्थाय सम्पद्यते, ज्ञानादिहानिनिवारणमात्राभिप्रायस्य संयमपरिणतेऽ(रन)पायहेतुत्वेऽपि तत्कृतवधे लौकिकपातकत्वव्यवहारविषयत्वेनाशुद्धत्वानिवृत्तेः। पठ्यते च यतनादिनाऽपवादस्य शुद्धत्वमेव। तदुक्तं बृहत्कल्पभाष्ये–

"[2]गीयत्थो जयणाए कडजोगी कारणंमि णिद्दोसो।
एगेसिं गीयकडो अरत्तदुट्ठो य जयणाए॥ १॥ त्ति।

तस्मादागमोदितयतनयाऽध्यात्मशुद्धिरेव संयमरक्षाहेतुर्नत्वनाभोग इति स्थितम्। अत एव विरताविरतयोर्जानतोरजानतोश्च विराधनायां यतनानिमित्ताऽध्यात्मशुद्धि–तदशुद्धिविशेषात् कर्म्मनिर्जराबन्धविशेषो व्यवस्थितः। तदुक्तं बृहत्कल्पभाष्यवृत्त्योर्द्वितीयखण्डे–अथ ज्ञाताज्ञातद्वारमाह–

---

१ उच्चालिते पादे।

२ गीतार्थो यतनया कृतयोगी कारणे निर्दोषः।
एकेषां गीतकृतोऽरक्तद्विष्टश्च यतनया॥

" [१]जाणं करेइ इक्को हिंसमजाणमपरो अविरओ अ ।
तत्थवि बंधविसेसो महंतरं देसिओ समए ॥ १ ॥

इह द्वावविरतौ, तत्रैकस्तयोर्जानन् हिंसां करोति विचिन्त्येत्यर्थः, अपरः पुनरजानन्, तत्रापि तयोरपि बन्धविशेषः 'महंतरं'ति महताऽन्तरेण देशितः समये-सिद्धान्ते । तथाहि-यो जानन् हिंसां करोति, (स) तीव्रानुभाववहुतरं पापकर्मोपचिनोति; इतरस्तु मन्दतरविपाकमल्पतरं तदेवोपादत्ते ।

" [२]विरतो पुण जो जाणं कुणति अजाणं च अप्पमत्तो य ।
तत्थवि अज्झत्थसमा संजायति णिज्जरा ण चओ ॥ १ ॥ "

यः पुनर्विरतः प्राणातिपातादिनिवृत्तः स जानानोऽपि ' सदोषमिदम्' इत्यवबुध्यमानोऽपि गीतार्थतया द्रव्यक्षेत्राद्यागाढेषु प्रलम्बादिग्रहणेन हिंसां करोति, यद्वा न जानाति परमप्रमतो विकथादिप्रमादरहित उपयुक्तः सन् यत्कदाचित् प्राण्युपघातं करोति तत्राप्यध्यात्मसमा चित्तप्रणिधानतुल्या निर्जरा सञ्जायते । यस्य यादृशस्तीव्रो मन्दो मध्यमो वा शुभाध्यवसायस्तस्य तादृश्येव कर्मनिर्जरा भवतीति भावः । ' न चओ 'त्ति न पुनश्चयः-कर्मबन्धः सूक्ष्मो भवति, प्रथमस्य भगवदाज्ञया यतनया प्रवर्त्तमानत्वाद्, द्वितीयस्य तु प्रमादरहितस्याजानतः कथं प्राण्युपघातनं भावि ? अदुष्टत्वादिति । यत्तु जीवघातवर्जनाभिप्रायवतां यतनया प्रवर्त्तमानानां छद्मस्थसंयतानामनाभोगजन्याशक्यपरिहारेण जायमानं जीवघातानृतभाषणादकं (स)संयमपरिणामानपायहेतुः, संयमपरिणामानपायहेतुत्वं हि वर्जनाभिप्रायोपाधिकमेव, जीवविराधनायाः संयमपरिणामापगमहेतोर्जीवघातपरिणामजन्यत्वलक्षणस्य निजस्वरूपस्य वर्जनाभिप्रायेण परित्याजनात् । अयं भावः-यद्धर्मविशिष्टं यद्वस्तु निजस्वरूपं जहाति स धर्मः तत्रोपाधिरिति नियमाद्, वर्जनाभिप्रायविशिष्टा हि जीवविराधना जीवघातपरिणामजन्यत्वं संयमनाशहेतुं परित्यजति, तेन संयमपरिणामानपायद्वारा वर्जनाभिप्रायजन्यां निर्जरां प्रति जीवविराधनाया अपि प्रतिबन्धकाभावत्वेन कारणतापि । यदागमः-

" [३]जा जयमाणस्स भवे विराहणा सुत्तविहिसमग्गस्स ।

---

१ जानन् करोत्येको हिंसामजानन्नपरोऽविरतश्च ।
तत्रापि बन्धविशेषो महाऽन्तरो देशितः समये ॥

२ विरतः पुनर्यो जानन् करोत्यजानँश्चाप्रमत्तश्च ।
तत्रापि अध्यात्मसमा संजायते निर्जरा न चयः ॥

३ या यतमानस्य भवेद्विराधना सूत्रविधिसमग्रस्य ।
सा भवति निर्जराफला अध्यात्मविशोधियुक्तस्य ॥

सा होइ णिज्जरफला अज्झविसोहिजुत्तस्स ॥ १ ॥ " त्ति ।

अत्र हि ' सुत्तविहिसमग्गस्स' त्ति कृतसर्वसावद्यप्रत्याख्यानस्य वर्जनाभिप्रायवतः साधोरित्यर्थः । तत्र जायमानाया निर्जराया जीवविराधना प्रतिबन्धिका न भवति, जीवघातपरिणामजन्यत्वाभावेन वर्जनाभिप्रायोपाध्यपेक्षया दुर्बलत्वाद्, एतेन जीवविराधनापि यदि निर्जरां प्रति कारणं भवेत्, तर्हि तथाभूतापि विराधना तपःसंयमादिवद्भूयस्येव श्रेयस्करी, भूयो निर्ज्जराहेतुत्वादिति पराशङ्कापि परास्ता, स्वरूपतः कारणभूतस्य तथा वक्तुं शक्यत्वात् । न चैवं जीवविराधना तथा, तस्याः संयमपरिणामापगमद्वारा स्वरूपतो निर्ज्जरायाः प्रतिबन्धकत्वात् । प्रतिबन्धकं च यथा यथाऽल्पसमर्थं च तथा तथा श्रेयः,तेन तस्याःकारणत्वं, प्रतिबन्धकाभावत्वेन प्रतिबन्धकाभावस्य भूयस्त्वं प्रतिबन्धकानामल्पत्वेनैव स्याद्, अन्यथा तदभावस्य कारणता न स्यादित्यादिकूटकल्पनार सिकेणोच्यते । तदसत्, निश्चयतः सर्वत्र संयमप्रत्ययनिर्जरायामध्यात्मशुद्धिरूपस्य भावस्यैव हेतुत्वात्, तदङ्गभूतव्यवहारेण चापवादपदादिप्रत्ययाया हिंसाया अपि निमित्तत्वे बाधकाभावात्; " जे[1] आसवा ते परिस्सवा "–इत्यादि वचनप्रामाण्यात् । निमित्तकारणोत्क (र्षाप)र्षौ च न कार्योत्कर्षापकर्षप्रयोजकाविति न निर्ज्जरोत्कर्षार्थं तादृशहिंसोत्कर्षाश्रयणापत्तिः, यच्च 'जा जयमाणस्से'त्यादि वचनपुरस्कारेण वर्जनाभिप्रायेणानाभोगजन्याशक्यपरिहारहिंसायाः प्रतिबन्धकाभावत्वेन कारणत्वाभिधानं तत्तु तद्वृत्त्यर्थानाभोगविजृम्भितम्, तत्रापवादप्रत्ययाया एव हिंसाया व्याख्यानात् । तथाहि–यतमानस्य–सूत्रोक्तविधिपरिपालनपूर्णस्याध्यात्मविशोधियुक्तस्य रागद्वेषाभ्यां रहितस्येति भावः, या भवेद्विराधनाऽपवादपदप्रत्यया सा भवति निर्ज्जराफला । इदमुक्तं भवति–कृतयोगिनो गीतार्थस्य कारणवशेन यतनयाऽपवादपदमासेवमानस्य विराधना सा सिद्धिफला भवतीति पिण्डनिर्युक्तिवृत्तौ । न चेयमनाभोगजन्या वर्जनाभिप्रायवती वा, किन्तु ज्ञानपूर्वकत्वेनर्जुसूत्रनयमतेन विलक्षणैव सती व्यवहारनयमतेन च विलक्षणाकारणसहकृता सती बन्धहेतुरपि निर्ज्जराहेतुर्घटकारणमिव दण्डो घटभङ्गाभिप्रायेण गृहीतो घटभङ्गे, अत एवेयमनुबन्धतो हिंसारूपा सत्यैदंपर्यार्थापेक्षया ' न हिंस्यात् सर्वाणि भूतानि ' इति निषेधार्थलेशमपि न स्पृशति, अविधिहिंसाया एवात्र निषेधाद् । विधिपूर्वकस्वरूपहिंसायास्तु सदनुष्ठानान्तर्भूतत्वेन परमार्थतो मोक्षफलत्वात् । तदुक्तमुपदेशपदसूत्रवृत्त्योः-अथ साक्षादेव कतिचित्सूत्राण्याश्रित्य पदार्थादीनि व्याख्याङ्गानि दर्शयन्नाह–

१ ये आस्रवास्ते परिस्रवाः

" [१]हिंसिज्ज ण भूयाइं इत्थ पयत्थो पसिद्धगो चेव ।
मणमाईहिं पीडा सव्वेसिं चेव ण करिज्जा " ॥ १ ॥

" हिंस्याद् व्यापादयेद् न नैव भूतानि पृथिव्यादीन् प्राणिनः, अत्र सूत्रे पदार्थः प्रसिद्धकश्चैव प्रख्यातरूप एव, तमेव दर्शयति—मनआदिभिर्मनोवाक्कायैः पीडां सर्वेषां चैव समस्तानामपि न कुर्याद् न विदध्यादिति । तथा

" [२]आरंभिपमत्ताणं, इत्तो चेइहरलोचकरणाई ।
तक्करणमेय अणुबंधओ तहा एस वक्कत्थो " ॥ ६८ ॥

व्याख्या—आरम्भः—पृथिव्याद्युपमर्दैः स विद्यते येषां ते आरम्भिणो गृहस्थाः, प्रमाद्यन्ति निद्राविकथादिभिः प्रमादैः सर्वसावद्ययोगविरतावपि सत्यां ये ते प्रमत्ता यतिविशेषाः, आरम्भिणश्च प्रमत्ताश्च तेषाम्, इतः—पदार्थाच्चैत्यगृहलोचकरणादि, चैत्यगृहमर्हतो भगवतो बिम्बाश्रयः, लोचकरणं केशोत्पाटनरूपम्, आदिशब्दात् तत्तदपवादाश्रयणेन तथा तथा प्रवचनदुष्टनिग्रहादिपरपीडाग्रहस्तेषां करणात्; तत्करणमेव प्राग्निषिद्धहिंसादिकरणमेव प्राप्तम् । कुतः ? इत्याह—अनुबन्धतोऽनुगमात् तथा तत्प्रकारायाः परपीडाया इत्येष चालनारूपो वाक्यार्थ इत्यर्थः ॥

" [३]अविहिकरणंमि आणाविराहणा दुट्ठमेव एएसिं ।
तो विहिणा जइअव्वं ति महावक्कत्थरूवं तु ॥ ६९ ॥

व्याख्या—अविधिकरणेऽऽनीतिविधाने चैत्यलोचादेरर्थस्याज्ञाविराधना भगवद्वचनविलोपना दुष्टमेव, एतेषां चैत्यगृहादीनां करणम्, तत्रेयमाज्ञा—

जिनभवनकारणं विधिः शुद्धा भूमिर्दलं च काष्ठादि ।
भृतकानतिसन्धानं स्वाशयवृद्धिः समासेन ॥ "

लोचकर्मविधिस्तु—

" [४]धुवलोओ अ जिणाणं वासावासेसु होइ थेराणं ।

---

१ हिंस्याद् न भूतानि अत्र पदार्थः प्रसिद्धकश्चैव ।
मनआदिभिर्न पीडां सर्वेषामेव न कुर्यात् ॥
२ आरम्भिप्रमत्तानामितश्चैत्यगृहलोचकरणादि ।
तत्करणमेवानुबन्धतस्तथा एष वाक्यार्थः ॥
३ अविधिकरणे आज्ञाविराधना दुष्टमेव एतेषाम् ।
ततो विधिना यतितव्यमितिमहावाक्यार्थरूपस्तु ॥
४ ध्रुवलोचश्च जिनानां वर्षावासेषु भवति स्थविराणाम् ।
तरुणानां चतुर्मास्यां वृद्धानां भवति षण्मास्याम् ॥

तरुणाणं चउमासे वुड्ढाणं होइ छम्मासे ॥ १ ॥ " इत्यादि ॥

तत्तस्माद्विधिना जिनोपदेशेन यतितव्यम्—इत्येवं महावाक्यार्थस्य प्राक्चालि(त)तत्प्रत्यवस्थानरूपस्य रूपं तु स्वभावः पुनः। महावाक्यार्थमेव गाथापूर्वार्द्धेनोपसंहरन्नैदंपर्यमाह—

" एवं एसा अणुबंधभावओ तत्तओ कया होइ ।
अइदंपज्जं एयं आणाधम्मंमि सारोत्ति ॥ १ ॥ "

एवं विधिना यत्नेन क्रियमाणेनैषा हिंसाऽनुबन्धत उत्तरोत्तरानुबन्धभावान्मोक्षप्राप्तिपर्यवसानानुगमात् तत्त्वतः परमार्थतः कृता भवति, मोक्षमसंपाद्य जिनाज्ञाया उपरमाभावादिति ऐदंपर्यमेतदत्र यदुताज्ञाधर्मे सारः । इति परिसमाप्ताविति । प्रतिबन्धकाभावत्वेनोक्तहिंसाया निर्जराहेतुत्वे चाभ्युपगम्यमाने केवलायास्तस्याः प्रतिबन्धकत्वाभावाज्जीवघातपरिणामविशिष्टत्वेन प्रतिबन्धकत्वे विशेषणाभावप्रयुक्तस्य विशिष्टाभावस्य शुद्धविशेष्यस्वरूपत्वे विशेष्याभावप्रयुक्तस्य तस्य शुद्धविशेषणरूपस्यापि सम्भवाज्जीवघातपरिणामोऽपि देवानांप्रियस्य निर्जराहेतुः प्रसज्येतेत्यहो ! काचनापूर्वेयं तर्कागमचातुरी । वर्जनाभिप्रायेण जीवघातपरिणामजन्यत्वलक्षणं स्वरूपमेव विराधनायास्त्याज्यतेऽतो नेयमसती प्रतिबन्धिकेति चेत् , किमेतद्विराधनापदप्रवृत्तिनिमित्तमुत विशेषणं विराधनापदार्थस्य । आद्ये पदप्रवृत्तिनिमित्तं नास्तं(स्ति), पदार्थश्च प्रतिपाद्यते इत्ययमुन्मत्तप्रलापः । अन्त्ये च विशिष्टप्रतिबन्धकत्वपर्यवसाने उक्तदोषतादवस्थ्यमिति मुग्धशिष्यप्रतारणमात्रमेतत् । न च ' यद्धर्म्मविशिष्टं यद्वस्तु निजस्वरूपं जहाति स धर्म्मस्तत्रोपाधिः ' इति नियमाद् वर्जनाभिप्रायविशिष्टा हि जीवविराधना जीवघातपरिणामजन्यत्वं संयमनाशहेतुं परित्यजतीति भावार्थपर्यालोचनादनुपहितविराधनात्वेन प्रतिबन्धकत्वं लभ्यत इत्युपहितायास्तस्याः प्रतिबन्धकाभावत्वं स्वरूपेणैवाक्षतमित्यपि युक्तम्, प्रकृतविराधनाव्यक्तौ जीवघातपरिणामजन्यत्वस्यासत्त्वेन त्याजयितुमशक्यत्वाद्, अत एव तत्प्रकारकप्रमितिप्रतिबन्धरूपस्यापि तद्ज्ञानस्यानुपपत्तेः । अथ वर्जनाभिप्रायाभावविशिष्टविराधनात्वेन प्रतिबन्धकत्वे न कोऽपि दोषः, प्रत्युत वर्जनाभिप्रायस्य पृथक्कारणत्वाकल्पनाल्लाघवमेवेति चेत् , न । वर्जनाभिप्रायमात्रस्याज्ञाबाह्यानुष्ठानेऽपि सत्त्वान्नोत्तेजकत्वमित्याज्ञाशुद्धभावस्येहोत्तेजकत्वं वाच्यम्, स च विशिष्टनिर्जरामात्रे स्वतन्त्रकाणघमिति न तत्रास्येहोत्तेजकत्वं युज्यते; अन्यथा दण्डाभावविशिष्टचक्रत्वादिनापि घटादौ प्रतिबन्धकता कल्पनीया स्यादिति न किञ्चिदेतत् । तस्मादाज्ञाशुद्धभाव

एव सर्वत्र संयमरक्षाहेतुर्न त्वनाभोगमात्रमिति । नद्युत्तारेऽपि यतीनां तत एवादुष्टत्वम्, न तु जलजीवानाभोगादिति स्थितम् ॥ ६७ ॥

अथ तत्र जलजीवानाभोगे व्यक्तं दूषणमाह—

जलजीवाणाभोगा णइउत्तारंमि जइ ण तुह दोसो ।
पाणेवि तस्स तासो मूलच्छेज्जो ण हुज्जाहि ॥५८॥

व्याख्या—'जलजीवाणाभोग'त्ति नद्युत्तारे जलजीवानाभोगाद् यदि तव न दोषः, तर्हि तस्य जलस्य पानेऽपि स दोषो मूलच्छेद्यो मूलप्रायश्चित्तविशोध्यो न भवेत्; नहि नदीमुत्तरतो जलजीवानाभोगस्तत्पाने च तदाभोग इति त्वया वक्तुं शक्यते, तदनाभोगस्य त्वया केवलज्ञाननिवर्त्तनीयत्वाभ्युपगमात्, तथा चोभयत्रैव मिथ्यादुष्कृतप्रायश्चित्तशोध्यमेव पापं स्यात् । ननु ज्ञात्वा जलपानेऽपि मूलच्छेद्यम्, तच्च श्रुतपरम्पराविरुद्धमित्याभोगविषयतापि जलजीवानामवश्यं वक्तव्या, प्रायश्चित्तभेदस्तु यतनायतनाविशेषादिति । यदि च ज्ञात्वा जलपाने न जलजीवाभोगात्प्रायश्चित्तविशेषः, किन्तु निःशूकत्वादित्युच्यते, तर्हि स्थूलत्रसाभोगोऽप्युच्छिद्येत, तद्वधेऽपि निःशूकताविशेषादेव पातकविशेषोपपत्तेः । शास्त्रे त्वाभोगानाभोगावकर्त्तव्यत्वज्ञानतदभावरूपावेवोक्तौ । तदुक्तं पञ्चाशकवृत्तौ—"तत्राभोगोऽकर्त्तव्यमिदमिति ज्ञानम्, अनाभोगस्त्वज्ञानमिति । तौ चोभयविराधनायामपि सम्भवत एव ।" प्रतिपादितं च प्रायश्चित्तमाभोगानाभोगभेदात् पृथिव्यादिविराधनायामपि पृथगेवेति न किञ्चिदेतत् । एतेन यदुच्यते विनापवादं ज्ञात्वा जीवघातको यद्यसंयतो न भवेत्, तर्हि असंयतत्वमुच्छिन्नसंकथं भवेद्—इत्यादि परेण तदपास्तम् । अपवादमन्तरेणापि सामान्यसाधूनामपवादपदानधिकारिणां चोत्कृष्टचारित्रवतां प्रतिमाप्रतिपन्नजिनकल्पिकादीनां नद्युत्तारादावाभोगपूर्वकजीवविराधनायाः साधितत्वात् । नद्युत्तारश्च जिनकल्पिकादीनामपि, [२]'जत्थत्थमे' इत्यादि प्रवचनेषु दिवसतृतीयपौरुष्यतिक्रमे नद्याद्युत्तरतस्ते जलात्पदमात्रमपि बहिर्न निक्षिपन्ति, किन्तु तत्रैव तिष्ठन्ति—इत्यादिभणनेन प्रतीत एव । सोऽप्यापवादिकश्चेत्, तर्हि विहाराहारादिक्रियास्वौत्सर्गिकीषु जीवविराधनया योगसमु-

---

१ जलजीवानाभोगाद् नद्युत्तारे यदि न तव दोषः ।
पानेऽपि तस्य त्रासो मूलच्छेद्यो न भवेद् ॥

२ यत्रास्तमियाद्

स्थया जिनकल्पिकादीनामसंयतत्वप्रसक्तेर्वज्रलेपत्वमेव, तस्या योगावश्यंभावित्वस्य प्रवचनादेव निश्चयाद् अङ्गीकृतं चैतत्परेणापि। यदुक्तं तेन—"यत्रानुष्ठाने आरम्भस्तज्जिनैः प्रतिषिद्धमेव, उत जिनोपदिष्टक्रियायामारम्भो न भवत्येव' इति लुम्पकीयपक्षद्वयदूषणार्थं ग्रन्थान्तरे। आद्यपक्षे साधूनां विहारा—हार—नीहार—नद्युत्तार—प्रतिक्रमण—प्रतिलेखनो—पाश्रयप्रमार्जनादिक्रियाणां प्रवचनप्रसिद्धानामारम्भाविनाभाविनीनां प्रतिषेधे सम्पन्ने तवैव गलपादुका। द्वितीयेऽध्यक्षबाधा, नद्युत्तारादिषु षण्णामपि जीवानां विराधनासम्भवात्, '[१]जत्थ जलं तत्थ वणं'—इत्यागम वचनात् प्रतिक्रमणप्रतिलेखनादिषु च वायुजीवादीनामारम्भस्यागमप्रसिद्धत्वात्, एजनादिक्रियायुक्तस्यारम्भाद्यवश्यंभावात्। यदागमः—"[२]जाव णं एस जीवे एअइ वेयइ चलइ फंदइ' इत्यादि यावदारंभे वट्टइ" इत्यादि। किंच—अपवादे आभागपूर्विकायामपि जीवविराधनायां सम्यक्त्वनाशादिदूषणं यत् त्वया नोच्यते, तत्र किं म्रियमाणानां जीवानां प्राणत्यागाभावः, सद्गतिर्वा कारणं, द्वयमप्यागमबाधितमित्याशयशुद्धत्वमेव तत्र कारणं वाच्यमित्यशक्यपरिहारजीवविराधनायामप्याशयशुद्धत्वादेव दोषाभावोऽस्तु, किमनाभोगप्रपञ्चेन, अत एव जीवघातेऽपि लोके द्रव्यहिंसाया भावहिंसायां शब्दादीनां रताविवानैकान्तिककारणत्वात्, जीवरक्षाविषयकप्रयत्नेनैव साधोरन्तस्तत्त्वशुद्धेरदुष्टत्वं विशेषावश्यके उपपादितं नत्वनाभोगेनैव, तथा च तद्ग्रन्थः—

" एवमहिंसाऽभावो जीवघणंति ण य तं जउ भिहियं।
सत्थोवहयमजीवं ण य जीवघणंति तो हिंसा॥ १ ॥"

नन्वेवं सति लोकस्यातीव पृथिव्यादिजीवघनत्वादहिंसाभावः, संयतैरप्यहिंसाव्रतमित्थं निर्वाहयितुमशक्यमिति भावः, तदेतद् न, यतोऽनन्तरमेवाभिहितमस्माभिः—शस्त्रोपहतं पृथिव्यादिकमजीवं भवति। तदजीवत्वे चाकृताकारितादिपरिभोगेन निर्वहत्येव यतीनां संयमः। न च 'जीवघनो लोकः' इत्येतावन्मात्रेणैव हिंसा सम्भवतीति॥ आह ननु जीवाकुले लोकेऽवश्यमेव जीवघातः सम्भवी, जीवाँश्च घ्नन् कथं हिंसको न स्याद्? इति भावः।

---

१ यत्र जलं तत्र वनम्।
२ यावदेष जीव एजते वेदयति चलति स्पन्दते इत्यादि यावदारम्भे वर्तते।
१ एवमहिंसाऽभावो जीवघनमिति न च तद् यतोऽभिहितम्।
शस्त्रोपहतमजीवं न च जीवघनमिति ततः हिंसा॥

" [1]ण य घायउत्ति हिंसो णाघायंतोत्ति णिच्छियमहिंसो ।
ण विरलजीवमहिंसो ण य जीवघणंति तो हिंसो ॥ १ ॥
अहणंतोवि हु हिंसो दुट्ठत्तणओ मओ अहिमरोव्व ।
बाहिंतो ण वि हिंसो सुद्धत्तणओ जहा विज्जो ॥ २ ॥ "

नहि 'घातकः' इत्येतावता हिंस्रः, नचाघ्नन्नपि निश्चयनयमतेनाहिंस्रः, नापि 'विरलजीवम्' इत्येतावन्मात्रेणाहिंस्रः, न चापि 'जीवघनम्' इत्येतावता च हिंस्र इति; किं तर्हि ? अभिमरो गजादिघातकः स इव दुष्टाध्यवसायोऽघ्नन्नपि हिंस्रो मतः । बाधमानोऽपि च शुद्धपरिणामो न हिंस्रः, यथा वैद्य इति घ्नन्नप्यहिंस्रोऽघ्नन्नपि च हिंस्र उक्तः । स इह कथंभूतो ग्राह्यः ? इत्याह—

" [2]पंचसमिओ तिगुत्तो नाणी अविहिंसओ ण विवरीओ ।
होउ व संपत्ती से मा वा जीवोवरोहेणं ॥ १ ॥

पञ्चभिः समितिभिः समितः तिसृभिश्च गुप्तिभिर्गुप्तो ज्ञानी जीवस्वरूपतद्रक्षाक्रियाभिज्ञः सर्वथा जीवरक्षापरिणामपरिणतस्तत्प्रयतश्च कथमपि हिंसन्नप्यविहिंसको मतः । एतद्विपरीतलक्षणस्तु नाहिंसकः, किन्तु हिंस्र एवायम्, अशुभपरिणामत्वाद्, (भावबाह्य)जीवहिंसाया जीवोपरोधेन जीवस्य कीटादेरुपरोधेनोपघातेन सम्पत्तिर्भवतु मा भूद्वा, 'से' तस्य साध्वादेः हिंसकत्वे तस्या अनैकान्तिकत्वादिति ॥ कुतस्तस्या अनैकान्तिकत्वम् ? इत्याह—

" [3]असुहो जो परिणामो सा हिंसा सो उ बाहिरणिमित्तं ।
कोवि अवेक्खेज्ज ण वा जम्हा णेगंतियं बज्झं ॥ १ ॥ "

यस्मादिह निश्चयनयतो योऽशुभपरिणामः स एव हिंसेत्याख्यायते । स च बाह्यसत्त्वातिपातक्रियालक्षणं निमित्तं कोऽप्यपेक्षते, कोऽपि पुनस्तन्निरपेक्षो भवेत्,

---

१ च घातक इति हिंस्रो नाघातयन्निति निश्चितमहिंस्रः
न विरलजीवमहिंस्रो न च जीवघनमिति ततो हिंस्रः ॥
अघ्नन्नपि खलु हिंस्रो दुष्टत्वान्मतोऽभिमर इव ।
बाधमानो नापि हिंस्रः शुद्धत्वाद् यथा वैद्यः ॥

२ पञ्चसमितस्त्रिगुप्तो ज्ञानी अविहिंसको न विपरीतः ।
भवतु वा संपत्तिस्तस्य मा वा जीवोपरोधेन ॥

३ अशुभो यः परिणामः सा हिंसा स तु बाह्यनिमित्तम् ।
कोऽपि अपेक्षते न वा यस्मादनैकान्तिकं बाह्यम् ॥

यथा तन्दुलमत्स्यादीनाम्, यस्मादनैकान्तिकमेवं बाह्यनिमित्तम्, तत्सद्भावेऽप्यहिंसकत्वात्, तदभावे च हिंसकत्वादिति। नन्वेवं तर्हि बाह्यो जीवघातः किं सर्वथैव हिंसा न भवति? उच्यते–कश्चिद् भवति, कश्चित्तु न। कथम्? इत्याह—

" [१]असुहपरिणामहेऊ जीवाबाहोत्ति तो मयं हिंसा।
जस्स उ ण सो णिमित्तं, संतोवि ण तस्स सा हिंसा" ॥ १ ॥

ततस्तस्माद् यो जीवाबाधोऽशुभपरिणामस्य हेतुरथवाऽशुभपरिणामो हेतुर्यस्यासावशुभपरिणामहेतुर्जीवाबाधो जीवघातः स एव हिंसेति मतं तीर्थंकरगणधराणाम्। यस्य तु जीवाबाधस्य सोऽशुभपरिणामो न निमित्तं स जीवाबाधः सन्नपि तस्य साधोर्न हिंसेति। अमुमेवार्थं दृष्टान्तेन द्रढयन्नाह—

" [२]सद्दादओ रइफला ण वीयमोहस्स भावसुद्धीओ।
जह तह जीवाबाहो ण सुद्धमणसो वि हिंसाए ॥ १ ॥"

यथेह वीतरागद्वषमोहस्य भगवत इष्टाः शब्दरूपादयो भावविशुद्धितो न कदाचिद्रतिफला रतिजनकाः सम्पद्यते, यथा वेह शुद्धात्मनो रूपवत्यामपि मातरि न विषयाभिलाषः संजायते, तथा शुद्धपरिणामस्य यत्नवतः साधोः सत्त्वोपघातोऽपि न हिंसायै सम्पद्यते, ततोऽशुभपरिणामजनकत्वे बाह्यं निमित्तमनैकान्तिकमेवेति॥"
(पृ. ७४७. गा. १७६२–६८)

यदि चाशक्यपरिहारविराधनाभोगः साधूनां सम्यक्त्वक्षतिकरः स्यात् तदौत्सर्गिकविहारादिक्रियापरित्याग एव स्यात्, तत्रापि योगजन्यविराधनानिश्चयाद्, न च प्रमाणान्तरेण निश्चितेऽपि स्वादर्शनमात्रेणानाभोगः शक्यो वक्तुमित्युक्तमेव, न चेदेवं तदा निरन्तरजीवाकुलभूमिं निर्णीयापि रात्रौ तत्रैव स्वैरंगमने जीवाप्रत्यक्षत्वेन तत्र तज्जीवविराधनाऽनाभोगजा वक्तव्या स्यात्। तथा च लोकशास्त्रविरोधः। किंचैवमब्रह्मसेवायामपि केवलिवचसा निश्चीयमानाया अपि त्रसविराधनाया अनाभोगपूर्वकत्वे साधोः प्रथममहाव्रतभङ्गो न स्यात्, स्याच्च प्रकृष्टावधिमतां प्रत्यक्षयोगजन्यविराधनानामिति न किञ्चिदेतत् ॥ ५८ ॥

एवं व्यवस्थिते सत्यत्र विश्रान्तस्य परस्याक्षेपं समाधत्ते—

---

१ अशुभपरिणामहेतुर्जीवाबाध इति ततो मतं हिंसा।
यस्य पुनः सोऽनिमित्तं सन्नपि न तस्य सा हिंसा ॥
२ शब्दादयो रतिफला न वीतमोहस्य भावशुद्धितः।
यथा तथा जीवाबाधो न शुद्धमनसोपि हिंसायै ॥

[1]णणु आभोगा इत्थं, विरयाणं हुज्ज देसविरयत्तं ।
णेवं, जं पडिपुन्ना पडिवत्ती सुत्तआणा य ॥ ५९ ॥

व्याख्या—णणुत्ति । नन्वत्र नद्युत्तारे जलजीवविराधनायामाभोगाद्विरतानां सर्वसंयमवतां देशविरतत्वं भवेत्, निश्चितेऽपि जलजीवघातेऽवस्थितस्य विरतिपरिणामस्याभ्युपगमे तस्य देशविरतिरूपस्यैव पर्यवसानाद्, निश्चितेऽपि जलजीवघाते तज्जीवविषयकविरतिपरिणामस्यानपायेन चारित्राखण्डताभ्युपगमे च सर्वेषामपि सम्यग्दृशां सर्वविरतिप्रतिपत्तौ न किञ्चिद्बाधकमिति देशविरत्युच्छेद एव स्यादिति भावः । नैवम्, यद्—यस्मात् कारणाद्विरतानां प्रतिपूर्णा प्रतिपत्तिः—अष्टादशशीलाङ्गसहस्रग्रहणलक्षणा सूत्राज्ञा च; तेन न निश्चितायामपि जलजीवविराधनायां नद्युत्तारादौ देशविरतत्वम्, प्रतिपन्नसर्वविरतेः सूत्राज्ञयाऽखण्डनात् । न च प्रतिदिनकर्त्तव्यविचित्रोत्सर्गापवादगहनाष्टादशशीलाङ्गसहस्रप्रतिपत्तियोग्यतां स्वात्मन्यनिश्चित्यादित एव तत्प्रतिपत्तिर्युक्तेति तदधस्तनगुणस्थानयोग्यतया देशविरतिप्रतिपत्तिसम्भवान्न तदुच्छेद इति भावः । इदं तु ध्येयम्—निश्चयनयमतेनाष्टादशापि शीलाङ्गसहस्राण्यखङ्ख्येयात्मप्रदेशवत्परस्परनियतान्येवेत्येकस्यापि सुपरिशुद्धस्य शीलाङ्गस्य सत्त्वं शेषसद्भाव एव स्यादिति समुदितैरेव तैः सर्वविरतिसम्भवः । तदुक्तं हरिभद्राचार्यैः-

"[2]एत्थ इमं विण्णेयं, अइदंपज्जं तु बुद्धिमंतेहिं ।
इक्कंपि परिसुद्धं, सीलंगं सेससब्भावे ॥ १ ॥
एक्को वाऽऽयपएसोऽसंखेज्जपएससंगओ जहओ ।
एयंपि तहा णेयं सतत्तचाओ इहरहा उ ॥ २ ॥
जम्हा समग्गमेयंपि सव्वसावज्जजोगविरईओ ।
तत्तेणेगसरूवं णाखंडरूवत्तणमुवेइ ॥ ३ ॥

---

१ नन्वाभोगादित्थं विरतानां भवेद् देशविरतत्वम् ।
नैवं, यत्प्रतिपूर्णा प्रतिपत्तिः सूत्राज्ञा च ॥ ५९ ॥

२ अत्रेदं विज्ञेयमेदंपर्यं तु बुद्धिमद्भिः ।
एकमपि सुपरिशुद्धं शीलाङ्गं शेषसद्भावे ॥
एको वाऽऽत्मप्रदेशोऽसंख्येयप्रदेशसंगतो यथा च ।
एतदपि तथा ज्ञेयं स्वतत्त्वत्याग इतरथा तु ॥
यस्मात्समग्रमेतदपि सर्वसावद्ययोगविरतितः ।
तत्तेनैकस्वरूपं नाखण्डरूपत्वमुपैति ॥

व्यवहारनयमते त्वेकाद्यङ्गभङ्गेऽपि सञ्ज्वलनोदयस्य चरणैकदेशभङ्गहेतुत्वादपरशीलाङ्गसद्भावादवशिष्टप्रतिपन्नचारित्रसद्भावान्न देशविरतत्वम्; नहि पर्वतैकदेशलोष्ट्वाद्यपगमेऽपि पर्वतस्य लोष्टुत्वमापद्यते, मूलभङ्गे तु चारित्रभङ्ग एव, अत एव यो मन्यते 'लवणं भक्षयामि' इति तेन मनसा करोति आहारसंज्ञाविहितो (हीनो) रसनेन्द्रियसंवृतः पृथिवीकायसमारम्भं मुक्तिसम्पन्न इत्येकतद्भङ्गः कृतः। ततस्तद्भङ्गेन च प्रतिक्रमणप्रायश्चित्तेन शुद्धिः स्यात्, अन्यथा मूलेनैव स्यादिति। न च तद्भक्षणेऽपि शेषाङ्गसत्त्वान्न मूलापत्तिरिति शङ्कनीयम्; मण्डपशिलादृष्टान्तेनैकस्यापि गुरुदोषस्य मूलनाशकत्वाभ्युपगमात्। इदं च शीलाङ्गान्यूनत्वं भावविरतिमपेक्ष्य द्रष्टव्यम्, न तु बाह्यामपि प्रवृत्तिमपेक्ष्य, यतः सा परतन्त्रस्य स्वतन्त्रस्य वा पुष्टालम्बनदशायां स्वतन्त्रभङ्गेच्छारूपाविरतिभावं विना द्रव्यहिंसादिकारिण्यपि स्यादेव, न च तया सर्वार्थानभिष्वङ्गस्य भावविरतिबाधनम्, उत्सूत्रा तु प्रवृत्तिर्बाधत एव विरतिभावम्, केवलं सा गीतार्थप्रज्ञापनायोग्या निरनुबन्धा, अभिनिवेशवती तु न मूलच्छेद्यातिचारजातमन्तरेण स्यादिति गीतार्थस्य तन्निश्रितस्य वाऽऽज्ञापरतन्त्रस्योत्सूत्रप्रवृत्तिरहितस्याष्टादशशीलाङ्गसहस्रमयो सर्वविरतिपरिणामः पूर्णो भवति, बाह्यप्रवृत्तिपूर्णतामात्रं त्वत्रातन्त्रमिति। तदुक्तं—

"[1]एयं च एत्थ एवं विरईभावं पडुच्च दट्ठव्वं।
णउ बज्झंपि पवित्तिं जं सा भावं विणा वि भवे॥ १॥
जह उस्सग्गंमि ठिओ खित्तो उदगंमि केण उ तवस्सी।
तव्वहपवित्तकाओ अचलियभावोऽपवित्तो उ॥ १४॥
एवं चिय मज्झत्थो, आणाओ कत्थई पयट्टंतो।
सेहगिलाणा दट्ठा अपवत्तो चेव णायव्वो॥ १५॥
आणापरतंतो सो सा पुण सव्वन्नुवयणओ चेव।
एगंतहिया वेज्जगणाएणं सव्वजीवाणं॥ १६॥

---

१ एतच्च अत्रैवं विरतिभावं प्रतीत्य द्रष्टव्यम्।
न तु बाह्यामपि प्रवृत्तिं यत्सा भावं विनाऽपि भवेद्॥
यथोत्सर्गे स्थितः क्षिप्त उदके केन तु तपस्वी।
तद्वधप्रवृत्तकायोऽचलितभावोऽप्रवृत्तस्तु॥
एवमेव मध्यस्थ आज्ञया क्वचित्प्रवर्तमानः।
शैक्षग्लानाद् दृष्टादप्रवृत्त एव ज्ञातव्यः॥
आज्ञापरतन्त्रः स सा पुनः सर्वज्ञवचनतश्चैव।
एकान्तहिता वैद्यकज्ञातेन सर्वजीवानाम्॥

भावं विणावि एवं होइ पवित्ती ण बाहए एसा ।
सव्वत्थ अणभिसंगा विरईभावं सुसाहुस्स ॥ १७ ॥
उस्सुत्ता पुण बाहइ, समइविअप्पसुद्धा वि णियमेण ।
गीयणिसिद्धपवज्जणरूवा णवरं णिरणुबंधा ॥ १८ ॥
इहरा उ अभिणिवेसा इयरा नय मूलछेज्जविरहेण ।
होए सा एत्तो च्चिय, पुव्वायरिआ इमं बाहु ॥ १९ ॥
गीयत्थो अ विहारो बीओ गीयत्थमीसिओ चेव ।
इत्तो तइअविहारो णाणुन्नाओ जिणवरेहिं ॥ २० ॥
गीयस्स ण उस्सुत्ता तज्जुत्तस्सेयरस्स य तहेव ।
णियमेणं चरणवंजं (वज्जं) ण जाउ आणं वि लंघेइ ॥ २१ ॥
ण य तज्जुत्तो अण्णं णिवारए जोग्गयं मुणेऊणं ।
एवं दोण्हवि चरणं परिसुद्धं अण्णहा णेव ॥ २२ ॥
ता एव विरतिभावो संपुन्नो एत्थ होइ णायव्वो ।
णियमेणं अट्ठारससीलंगसहस्सरूवो उ ॥ २३ ॥ त्ति

ततो नद्युत्तारादावुत्सूत्रप्रवृत्त्यभावादाज्ञाशुद्धस्य साधोर्न सातिचारत्वमपीति कुतस्तरां देशविरतत्वम् ? तदेवं नद्युत्तारेऽन्यत्र वाऽपवादपदे भगवदाज्ञया द्रव्याश्रवप्रवृत्तावपि न दोषत्वमिति स्थितम् । एवं चात्र विहितानुष्ठानेऽनुबन्धतोऽहिंसा-

---

भावं विनाऽप्येवं भवति प्रवृत्तिर्न बाधते एषा ।
सर्वत्रानभिष्वङ्गाद् विरतिभावं सुसाधोः ॥
उत्सूत्रा पुनर्बाधते स्वमतिविकल्पशुद्धाऽपि नियमेन ।
गीतनिषिद्धप्रपदनरूपा नवरं निरनुबन्धा ॥
इतरथा त्वभिनिवेशादितरात् न च मूलच्छेद्यविरहेण ।
भवेत्सा इत एव पूर्वाचार्या इदमाहुः ॥
गीतार्थश्च विहारो द्वितीयो गीतार्थमिश्रितश्चैव ।
इतस्तृतीयो विहारो नानुज्ञातो जिनवरैः ॥
गीतस्य नोत्सूत्रा तद्युक्तस्येतरस्य च तथैव ।
नियमेन चरणवर्जं न जात्वाज्ञामपि लङ्घयति ॥
न च तद्युक्तोऽन्यं निवारयति योग्यतां ज्ञात्वा ।
एवं द्वयोरपि चरणं परिशुद्धमन्यथा नैव ॥
तत एव विरतिभावः संपूर्णोऽत्र भवति ज्ञातव्यः ।
नियमेनाष्टादशशीलांगसहस्ररूपस्तु ॥" इति

त्वेन परिणतायां द्रव्यहिंसायामपीति भगवदाज्ञैव प्रवृत्तिहेतुरिति सम्पन्नम्, आज्ञातः क्वचिद् द्रव्यहिंसादौ प्रवर्त्तमानोऽप्यप्रवृत्त इति 'पञ्चाशकवृत्ति' वचनात्। यत्तूच्यते परेण नद्युत्तारादौ जलजीवविराधनाऽनुज्ञा किं साक्षादादेशरूपा, उत कल्पनाभिव्यञ्जिता ? नाद्यः, 'स साधुर्जीवविराधनां करोतु' इत्यादिरूपेण केवलिनो वाक्प्रयोगासम्भवात्। यदुक्तं–'अरिहंता भगवंतो' इत्यादि। अत एव दीक्षां जिघृक्षताऽपि विज्ञप्तो भगवान् 'जहासुहं' इत्येवोक्तवान् न पुनस्त्वं गृहाणेत्यादि। यत्तु क्रियाकालेऽभ्यर्थितो भगवानादेशमुखेनाप्यनुज्ञां ददाति, तत्रानुज्ञायाः फलवत्त्वेन भाषाया निरवद्यत्वात्। नापि द्वितीयः, यतः कल्प्यता नद्युत्तारस्येष्टफलहेतुत्वेनैव स्यात्, इष्टफलं सहेतुत्वं च नद्युत्तारस्य यतनाविशिष्टस्यैव भणितम्, अयतनाविशिष्टस्य तु तस्य प्रतिषेध एवेत्ययतनाजन्यजीवविराधनयैव नद्युत्तारोऽप्यनिष्टफलहेतुत्वेनाकल्प्यो भणित इति जलजीवविराधनाविशिष्टो नद्युत्तारः केवलिनाऽनुज्ञात इति वक्तुमकल्प्यम्। न च यतनया नदीमुत्तरतः साधोरनाभोगजन्याशक्यपरिहारेण या जलजीवविराधना साऽनुज्ञातेत्युच्यत इति वाच्यम्, तस्या-मनुज्ञाया अनपेक्षणान्निष्फलत्वाद्, ज्ञातेऽपि प्रायश्चित्तानुपपत्तिप्रसक्तेश्च, जिनाज्ञया कृतत्वात्। एवमन्यत्रापि कल्प्यताऽकल्प्यता च फलद्वारा साक्षाद्वोक्ताऽवसातव्या; परं सर्वत्रापि वस्तुस्वरूपनिरूपणोपदेशेन न पुनः क्वाप्यादेशेनापि। अयं भावः–जिनोपदेशो हि सम्यग्दृशां वस्तुस्वरूपपरिज्ञानार्थमेव भवति। तत्र वस्तुनः स्वरूपं हेयत्वज्ञेयत्वोपादेयत्वभेदेन त्रिधा। तत्र किञ्चिद्वस्तु जीवघाताद्याश्रवभूतं हेयम्, दुर्गतिहेतुत्वात्। किञ्चिच्च जीवरक्षादि संवररूपमुपादेयम्, सुगतिहेतुत्वात्। किञ्चिच्च स्वर्गनरकादिकं ज्ञेयमेव, उभस्वभावविकलत्वात्। यत्तु ज्ञातं सर्वमपि वस्तु सुगतिहेतुस्तत्र "सविशेषणे०" इत्यादिन्यायेन ज्ञानस्येव प्राधान्यम्, तच्चोपादेयान्तर्भूतमवसातव्यम्। एवं च किञ्चिदेकमेव वस्तु विशेषणाद्यपेक्षया त्रिप्रकारमपि भवति। यथा एकैव गमनक्रिया जीवघातादिहेतुत्वेनायतनाविशिष्टा साधूनां हेयैव, हेयत्वेन चाकल्प्यैव; तथा सैव क्रिया जीवरक्षादिहेतुत्वेन यतनाविशिष्टा साधूनामुपादेया, उपादेयत्वेन च कल्प्या; उभयविशेषणरहिता तु ज्ञेयैव। एवं धार्मिकानुष्ठानमात्रे वक्तव्ये "सविशेषणे०"–इत्यादिन्यायेन विधिनिषेधमुखेन यतनाऽयतनाविषयक एव जिनोपदेशः सम्पन्नः; तथा च जीवरक्षार्थं यतनोपादेयत्वेन कल्प्या, अयतना च जीवघातहेतुत्वेन हेयत्वेनाकल्प्येत्येवंविधिनिषेधमुखेन वस्तुस्वरूपावबोधको जिनोपदेशो मन्तव्यः। एवं छद्मस्थसंयतानां ज्ञानाद्यर्थमपवादप-

दप्रतिषेवणेऽप्यनादिसिद्धकल्प्यत्वादिलक्षणवस्तुस्वरूपावबोधको जिनोपदेशो भवति। तथा साध्व्या उपसर्गकर्त्तारमधिकृत्य " [१]पंचिंदियववरोवणा कप्पिअ " त्ति निशीथचूर्णावुक्तं न पुनः स हन्तव्य इति विधिमुखेन जिनोपदेशो भवति; ' [२]सव्वे पाणा सव्वे भूआ सव्वे जीवा सव्वे सत्ता ण हन्तव्वा " इत्याद्यागमेन विरोधप्रसङ्गात्। यच्च दशाश्रुतस्कन्धचूर्णौ—" [३]अवण्णवाइं पडिहणेज्ज'त्ति भणितं तदाचार्यशिष्याणां परवादनिराकरणे सामर्थ्यं दर्शितम्। यथा—" [४]मिच्छदिट्ठीसु पडिहएसु सम्मत्तं थिरं होइ " त्ति श्रीसूत्रकृदङ्गचूर्णौ भणितम्। अत एव " [५]साहूणं चेइआण य' इत्यादौ सर्वबलेनेति स्वप्राणव्यपरोपणं यावदित्येवं भणितम्, न पुनर्जिनप्रवचनाहितकर्त्ता ' हन्तव्य ' इति, जैनानां तथाभाषाया वक्तुमप्यनुचितत्वात्। यद्यपि सर्वबलेन निवारणे पञ्चेन्द्रियव्यापादनं कादाचित्कं भवत्यपि, तथापि ' स व्यापादनीयो व्यापाद्यतां च ' इत्यादिरूपेण मनोव्यापारवानपि केवली न भवति, तथाभूतस्यापि मनोव्यापारस्य सावद्यत्वेन प्रत्याख्यातत्वाद्। न चापवादिकस्तथाव्यापारः सावद्यो न भविष्यतीति शङ्कनीयम्, यतोऽपवादप्रतिषेवणं च संयतेष्वपि प्रमत्तस्यैव भवति, कथं तर्हि सर्वोत्कृष्टनियताप्रमत्तस्य केवलिनोऽपीति ? परं पञ्चेन्द्रियव्यापादनभयेन यदि सति सामर्थ्ये प्रवचनाहितं न निवारयति, तर्हि संसारवृद्धिर्दुर्लभबोधिता चेत्यादि श्रीकालिकाचार्यकथादौ भणितम्। अहितनिवारणे च क्रियमाणे कदाचित्पञ्चेन्द्रियव्यापत्तौ प्रायश्चित्तप्रतिपत्त्याशयस्य शुद्धत्वाज्जिनाज्ञाऽऽराधकः सुलभबोधिश्चेत्यादिरूपेण वस्तुस्वरूपावबोधको जिनोपदेशो भवतीति तात्पर्यम्। एवं जिनोपदेशेन वस्तुस्वरूपमवगम्य स्वत एव यथौचित्येन प्रवृत्तिनिवृत्तिभ्यां जिनाज्ञाराधको भवतीति जिनोपदेशस्य कल्प्याकल्प्यतावबोध एव चरितार्थत्वाज्जलजीवविराधनानुज्ञा केवलिनः कलङ्क एव। न च नद्युत्तारस्य कारणत्वेन जलजीवविराधनाऽऽप्यापवादिकीति तत्र जिनोपदेशो भविष्यतीति शङ्कनीयम्, अचित्तजलनद्युत्तारस्य भावापत्त्या तस्या नद्युत्तारे कारणत्वाभावात्। तस्मान्नद्युत्तारस्य कारणं न जलजीवविराधना, किन्तु पादादिक्रियैवेति। एतेन ' जलं वस्त्रगलितमेव पेयम् नागलितम् ' इत्युपदिशता केवलिना जले जीवविराधना सचित्तजलपानं चोपदिष्टं भविष्यतीति शङ्काऽपि परास्ता। यतः " सविशेषणे० " इत्यादिना न्यायेन तत्र जलगलनमेवोपदिष्टम्,

---

१. पञ्चेन्द्रिय व्यपरोपणा कल्प्या इति ॥ २. सर्वे प्राणाः सर्वे भूताः सर्वे जीवाः सर्वे सत्त्वा न हन्तव्याः ॥ ३. अवर्णवादिनं प्रतिहन्यात्। ४. मिथ्यादृष्टिषु प्रतिहतेषु सम्यक्त्वं स्थिरं भवति। ५. साधूनां चैत्यानां च।

तच्च त्रसजीवरक्षार्थमिति । न च केवलिना जीवघातादिकं साक्षादनुज्ञातमिति न ब्रूमः, किन्तु विहारादिकमनुजानता तदविनाभावेन जायमानमनुज्ञातमित्यस्यापि वचनस्यावकाशः, एवं सति गजसुकुमालश्मशानकायोत्सर्गमनुजानतः श्रीनेमिनाथस्य तदविनाभावितदीयशिरःप्रज्वालनस्याप्यनुज्ञापत्तेः । न च नद्युत्तारे जलजीवविराधना यतनया कर्त्तव्येति जिनोपदेशो भविष्यतीत्यपि सम्भावनीयम्, यतनाविराधनयोः परस्परं विरोधाद्, यतना हि जीवरक्षाहेतुरयतना च जीवघातहेतुरिति । तस्माज्जीवविराधना नियमादयतनाजन्यैव, अयतना चान्ततो जीवघातवदनाभोगजन्याशक्यपरिहारेणैव,जीवरक्षा च यतनाजन्यैवेत्यनादिसिद्धो नियमो मन्तव्यः।अत एव छद्मस्थसंयतानामुपशान्तवीतरागपर्यन्तानां यतनया प्रवर्त्तमानानामपि या विराधना सा नियमादनाभोगवशेनायतनाजन्यैव,परमपमत्तसंयतानां नातिचारहेतुरपि,आशयस्य शुद्धत्वात्। एतच्च सम्भावनयाप्यात्मकृतत्वेनाज्ञातायां छद्मस्थसाक्षात्कारगम्यजीवविराधनायामवसातव्यम्, ज्ञातायां च प्रायश्चित्तप्रतिपित्सोरेव, अन्यथा तु निःशूकतया संयमापगमः प्रतीत एव। न चाप्रमत्तानामयतना न भविष्यतीति शङ्कनीयम्, अनाभोगजन्यायतनायाश्छद्मस्थमात्रस्य सत्त्वेनाप्रमत्तताया अनाबाधकत्वात्, तेन संयतानां सर्वत्राप्यनाभोगजन्याशक्यपरिहारेण जायमाने जीवघातमृषाभाषणाद्यंशे जिनोपदेशो न भवत्येव, तथाभूताया अपि विराधनाया अयतनाजन्यत्वेन निषिद्धत्वाद्, अत एव संयतानां द्रव्यतोऽपि हिंसा कर्मबन्धकारणम्, असत्यपि कृतप्रत्याख्यानभङ्गेनालोचनाविषयः । यदागमः—"[१] से अ पाणाइवाए चउव्विहे पण्णत्ते, तं०—दव्वओ खित्तओ कालओ भावओ" इत्यादि प्रत्याख्यानं च सर्वविरतिसिद्ध्यर्थमेव, तस्या अपि द्रव्यत आश्रवरूपत्वात्, सूक्ष्मपृथिव्यादीनामिवाविरतिप्रत्ययकर्मबन्धहेतुत्वात्, भावहिंसायाः कारणत्वाच्च; एतेन यत्र क्वापि धार्मिकानुष्ठाने सम्भावनयाप्यवद्यं भवति तदनुष्ठानविषयको जिनोपदेशो न भवति, तावन्मात्रस्याप्याश्रवस्योपदेशविषयत्वापत्त्या कृतसर्वसावद्यप्रत्याख्यानवतः प्रत्याख्यानभङ्गेन 'केवली यथा वादी तथा कर्त्ता न भवेद्' इत्येवं प्ररूपणात्मकं पाशचन्द्रमतमप्युपेक्षितं द्रष्टव्यम्, जैनप्रवचने प्रागुक्तप्रकारेण तदंशे जिनोपदेशापत्तेरेवानङ्गीकारात्; तस्मादयं भावः—यद्वस्तुजातं चिकीर्षितकार्यस्य प्रतिकूलमननुकूलं वा भवेत्तदविनाभावसम्बन्धेन जायमानमप्यनुकूलकारणवदुपदेशविषयो न भवति । यथा नद्युत्तारादुपदेशे जीवघातो यथा वा क्षुद्वेदनाद्युपशमनार्थाहारविधौ तिक्तम-

१ स प्राणातिपातश्चतुर्विधः प्रज्ञप्तः, तद्यथा—द्रव्यतः क्षेत्रतः कालतो भावतश्च ॥

धुरादिरसास्वादः, परं यत्र चिकीर्षितकार्यस्यानुकुलकारणान्यपि व्यवहारतः सावद्यानि भवन्ति तद्विषया जिनानुज्ञा क्रियाकालेऽप्यादेशमुखेन न स्याद्, एवं व्यवहारतो भाषायाः सावद्यत्वप्रसक्तेः; किं त्विष्टफलोपदर्शनेन कल्प्यत्वाभिव्यञ्जितोपदेशमुखेनैवावसातव्या। सा चानुज्ञा निश्चयतो निरवद्यैव, संसारप्रतनुकरणपूर्वकसानुबन्धिपुण्यप्रकृतिबन्धहेतुत्वात्। एतेन कुसुमादिभिर्जिनेन्द्रपूजामुपदिशता कुसुमादिजीवविराधनाप्युपदिष्टैव, पूजाविनाभावित्वेन ज्ञात्वैव पूजायामुपदिष्टत्वादिति वचनमपास्तम्, कुसुमादिजीवविराधनायाः पूजायाः कर्त्तुर्द्रष्टुश्चाप्रत्यक्षत्वेन पूजाविषयकपरिणामव्यवहाराहेतुत्वेन कल्पितकुसुमादीनामिव द्रव्यपूजासामग्र्यनन्तर्भूतत्वात्, उपदेशमन्तरेणापि जायमानत्वात्, पूजां कुर्वता त्यक्तुमशक्यत्वाच्च, अन्यथा कुसुमादीनामिव तस्या अपि भूयस्त्वमेव विशिष्टपूजाङ्गं वाच्यम्, न च कुसुमादिभूयस्त्वे तद्भूयस्त्वमावश्यकम्, कुसुमादीनां सचित्ताचित्ततया द्वैविध्यव्यवस्थानात्। तस्मात्तीर्थकृतामाज्ञोपदेशः कर्मक्षयनिमित्तं प्रत्युपेक्षणेर्यासमित्यादिषु संयता यतनया प्रवर्त्तेरन् नान्यथा, संसारवृद्धिहेतुत्वादित्येवंविधिनिषेधमुखाभ्यामेवावसातव्यो न पुनस्त्वमित्थं कुरु इत्यादिसाक्षादादेशमुखेनापि। न च यतनया नद्युत्तारवत्तया द्रव्यपूजापि संयतानां भवत्विति शङ्कनीयम्, साधूनां त्रसस्थावरजीवरक्षार्थयतनाधिकाराद्, नद्युत्तारे '[1]एगं पायं जले किच्चा' इत्यादिविधिना तन्निर्वाहाद्, द्रव्यस्तवे च त्रसजीवरक्षार्थयतनावतां श्राद्धानामेवाधिकारात्, सर्वारम्भपरिजिहीर्षापूर्वकपृथिव्यादियतनापरिणामे च तेषामपि चारित्र एवाधिकार इति तत्कारापणं च साधूनामुपदेशमुखेन युक्तम्, निश्चयतोऽनुज्ञाविषयत्वाद्, न त्वादेशमुखेन; पृथिवीदलादीनां तत्कारणानां व्यवहारतः सावद्यत्वात्, सोऽप्युपदेशो जिनपूजायतनाविषय एवेति सर्वत्र यतनायामेव भगवदाज्ञा, नतु क्वचिद् द्रव्यहिंसायामपीति॥ तत्र ब्रूमः—अनुज्ञा तावद्भगवतो विधिवचनरूपा नद्युत्ताराद्यविनाभाविन्यां जलजीवप्राणवियोगरूपायां जलजीवविराधनायां न कथञ्चिदेव, तस्या उदासीनत्वात्। तदनुकूलव्यापाररूपायां तु तस्यां नद्युतारादिव्यापाररूपायां साऽवर्जनीयैव, उभयस्वभावस्यानैकान्तिकस्य निमित्तकारणस्य बुद्धिभेदेन पृथक्कर्त्तुमशक्यत्वाद्, यत एव च यतनाविशिष्टस्य नद्युत्तारस्येष्टफलहेतुत्वं भणितम्। अत एव नैमित्तिकविधिरूपाया भगवदाज्ञाया बहुलाभाल्पव्ययद्रव्यहिंसायां व्यवहारतः पर्यवसानमुत्सर्गतः, प्रतिषिद्धं हि केनचिन्निमित्तेनैव विधीयत

---

१ एकं पादं जले कृत्वा ॥

इति तत इदमुच्यते " [१] अप्पेण बहु इच्छइ विसुद्धआलंबणो समणो । " इति। निश्चयतस्तु नैकान्ततो बाह्यं वस्तु विधीयते निषिध्यते वा, केवलं शुभभावो विधीयतेऽशुभभावस्तु निषिध्यते, अत एव भावानुरोधेन बाह्ये वस्तुनि विधिनिषेधकामचारः । तदुक्तं सङ्घदासगणिक्षमाश्रमणपूज्यपादैः—" [२] णय किंचि अणुण्णायं पडिसिद्धं वावि जिणवरिंदेहिं । एसा तेसिं आणा कज्जे सच्चेण होअव्वं ॥ १ ॥ " ति । तथा च ' यदेव निश्चयाङ्गव्यवहारेण नद्युत्तारादेरनुज्ञातत्वं तदेव द्रव्यहिंसाया अपि ' इत्यवशिष्टकल्पना जालमनुत्थानोपहतम् । इदं तु ध्येयम्—अनुज्ञाविषयतावच्छेदकं हिंसात्वं नद्युत्तारत्वादिकं वा, किन्तु सामान्यविशेषविधिविधेयतावच्छेदकविधिशुद्धव्यापारत्वयतनाविशिष्टनद्युत्तारत्वादिकम्, फलतस्तु विधिशुद्धहिंसाया अप्यनुज्ञाविषयत्वं व्यवहाराबाधितमेव, अत एव विधिना क्रियमाणाया जिनपूजादिविषयहिंसाया अनुबन्धभावतो मोक्षप्राप्तिपर्यवसानत्वमुपदेशपदपञ्चवस्तुकादावुक्तम् । यत्तु ' अरिहंता भगवंतो ' इत्यादि सम्मतिप्रदर्शनेन भगवतो विराधनाविषयकवाक्प्रयोगासम्भव उपपादितस्तदत्यन्तमसमञ्जसम्, सम्मतिवचनस्य कायव्यापारेणैव प्रवर्त्तकत्वनिवर्त्तकत्वाभावाभिधानतात्पर्याद्वाक्प्रयोगस्याप्यप्रवर्त्तकनिवर्त्तकत्वविधिनिषेधव्यापारवैयर्थ्याद् । यदपि " सविशेषणे० " इत्यादिन्यायेन यतनाऽयतनाविषयत्वमेव सर्वत्र जिनोपदेशस्योपदर्शितं तदपि विशेष्यभागस्याकिञ्चित्करत्वप्रदर्शनार्थं महावाक्यार्थपर्यवसानार्थमेदं पर्यायपर्यवसानार्थं वा ? नाद्यः, नद्युत्तारजन्यस्य भिक्षाचर्याविहारादिफलस्य यतनामात्रादसिद्धेर्विशेष्यभागस्याकिञ्चित्करत्वासम्भवाद् । न द्वितीयः, महावाक्यार्थस्य सर्वैरेव पदार्थैः पर्यवसानाद् । नापि तृतीयः, ' आज्ञा धर्मे सार ' इति सार्वत्रिकैदंपर्यार्थस्य प्रकृतवाक्यार्थे योजनायामपि विशेष्यस्य त्यागायोगात् । किञ्चैवं ' [३] जयं चरे ' इत्यादौ यतनांश एवोपदेशो न तु चरणाद्यंश इत्येकत्र वाक्ये कथं पदपदार्थयोजना ? यदपि ज्ञानाद्यर्थमपवादप्रतिषेवणेऽप्यनादिसिद्धकल्प्यत्वादिलक्षणवस्तुस्वरूपावबोधक एव जिनोपदेशः, प्रवृत्तिस्त्वौचित्यज्ञानेन स्वत एवेत्युक्तं तदप्यगाधभ्रमसमुद्रमज्जनविजृम्भितम्, जिनोपदेशात् कल्प्यत्वादिबोधे स्वत एव प्रवृत्तिवचनस्याविचारितरमणीयत्वात्, कल्प्यताबोधकस्योपदेशस्यैव प्रवृत्तिजनकेच्छाजनकज्ञानविषयेष्टसाधनतादिबोधकत्वेन प्रवर्त्तकत्वाद्, एतदेव हि

---

१ आत्मना बहु इच्छति विशुद्धालम्बनः श्रमण इति ॥ २ न किञ्चिदनुज्ञातं प्रतिषिद्धं वाऽपि जिनवरेन्द्रैः । एषा तेषामाज्ञा कार्ये सत्येन भवितव्यम् ॥
३ यतं चरेत् ।

सर्वत्र विधेः प्रवर्त्तकत्वमभ्युपयन्ति शास्त्रविदः। विधेः प्रवर्त्तकत्वादेव च कल्प्यतादिबोधकादर्थवादादपि विधिकल्पनमाद्रियते, इत्थं च "[१]पञ्चेन्द्रियववरोवणा वि कप्पिय'त्ति निशीथचूर्णावुक्तं न पुनः 'स हन्तव्य' इतीति यदुक्तं तद् ध्वनिभेदेनार्थपरावर्त्तमात्रम्। यच्च 'सव्वे पाणा' इत्यादिना विरोधोद्भावनं कृतं तद् 'न हन्तव्य' इत्यादिशब्दसादृश्यमात्रेणैव, किन्तु हिंसाविषयकोपदेशार्थमात्रेण स्यात्, तन्निराकरणं चैतत्सूत्रस्याविधिकृतहिंसाविषयत्वेनैव हरिभद्रसूरिभिः कृतमिति नात्र पर्यनुयोगावकाशः। किञ्च सामान्यतः सर्वजीवपरितापनानिषेधेऽपि क्वचिदपवादतस्तदुपदेशो विधिमुखेनापि दृश्यते, यथा भगवत्याम्—"[२]तं छंदेण अज्जो तुब्भे गोसालं मंखलिपुत्तं धम्मियाए पडिचोअणाए पडिचोएण्ह, धम्मिआए पडिसारणाए पडिसारेह, धम्मिएणं पडोआरेणं पडोआरेह; धम्मिएहिं अट्ठेहिं हेऊहिं पसिणेहि य णिप्पिट्ठपसिणवागरणं करेह"। त्ति एतद्धि गोशालस्य परितापजनकं वचनं भगवतैव लाभं दृष्ट्वाऽऽज्ञप्तम्, न चोत्सर्गतः परपरितापजनकं वचनं साधूनां वक्तुं युज्यत इत्यवश्यमपवादविधिरुत्सर्गविधिवदङ्गीकर्त्तव्यः। इत्थं च '[३]अवण्णवाइं पडिहणेज्ज' त्ति दशाश्रुतस्कन्धचूर्णिवचनस्य यदन्यार्थपरिकल्पनं तदयुक्तमेव, मिथोविरुद्धं चेदं यदुतापवादविधिप्रतिषेधः, पञ्चेन्द्रियव्यापादनभयेन सति सामर्थ्ये प्रवचनाहितानिवारणे संसारवृद्धिर्दुर्लभबोधिता चेति। इत्थं हि प्रवचनाहितनिवारणे निमित्ते पञ्चेन्द्रियव्यापादनस्य बलवदनिष्टाननुबन्धित्वबोधार्थमपवादविधिरवश्यं कल्पनीयः, अन्यथा सामान्यनिषेधजनितभयानिवृत्तेरिति। यच्चाहितनिवारणे क्रियमाणे कदाचित्पञ्चेन्द्रियव्यापत्तौ प्रायश्चित्तप्रतिपत्त्याशयस्य शुद्धत्वाज्जिनाराधकत्वं सुलभबोधिकत्वं चोक्तं तदविचारितरमणीयम्, यतनावतोऽपवादेऽपि प्रायश्चित्तानुपदेशात्। तदुक्तं बृहत्कल्पवृत्तौ तृतीयखण्डे—"तथा मूलगुणप्रतिसेव्यप्यालम्बनसहितः पूज्यः, पुलाकवत्; स हि कुलादिकार्ये चक्रवर्त्तिस्कन्धावारमपि गृह्णीयाद्, विनाशयेद्वा, न च प्रायश्चित्तमाप्नुयाद्।" इत्यादि। यत्तु तस्य "[४]हिट्ठट्ठाणट्ठिओ वि"—इत्यादिनाऽधस्तनस्थानस्थायि-

---

१. पञ्चेन्द्रियव्यपरोपणाऽपि कल्प्यते इति। २. तत् छन्देन आर्य! यूयं गोशालं मंखलिपुत्रं धार्मिकया प्रतिचोदनया प्रतिचोदयत, धार्मिकया प्रतिसारणया प्रतिसारयत, धार्मिकेण प्रत्यवतारेण प्रत्यवतारयत, धार्मिकैरर्थैर्हेतुभिः प्रश्नैश्च निष्पिष्टप्रश्नव्याकरणं कुरुतेति! ३. अवर्णवादिनं प्रतिहन्यात्। ४. अधस्तनस्थानस्थितोऽपि।

त्वमुक्तं तत्स्वाभाविकम्, न तु प्रतिषेवणाकृतमिति बोध्यम् । किञ्च तस्य प्रायश्चित्तं स्यात् तदा पुनर्व्रतारोपणादि स्याद्, आकुट्या पञ्चेन्द्रियघाते मूलादिमहाप्रायश्चित्ताभिधानाद् । उक्तं च–" तस्य हस्तशताद्बहिर्गमन इव निरतिचारताभिव्यञ्जकं सूक्ष्माश्रवविशोधकमालोचनाप्रायश्चित्तमेव । तथा च द्वितीयखण्डे बृहत्कल्पभाष्यवृत्तिग्रन्थः–" [१]आयरिए गच्छम्मि य कुलगणसंघे अ चेइअविणासे । आलोइअपडिक्कंतो सुद्धो जं णिज्जरा विउला ॥ " षष्ठीसप्तम्योरर्थे प्रत्यभेदः । आचार्यस्य वा गच्छस्य वा कुलस्य वा गणस्य वा सङ्घस्य वा चैत्यस्य वा विनाशे उपस्थिते सति सहस्रयोधिप्रभृतिना स्ववीर्यमहापयता तथा पराक्रमणीयं (णीयं) यथा तेषामाचार्यादीनां विनाशो नोपजायते, स च तथा पराक्रममाणो यद्यपराधमापन्नस्तथाऽप्यालोचितप्रतिक्रान्तः शुद्धः–गुरुसमक्षमालोच्य मिथ्यादुष्कृतप्रदानमात्रेणैवासौ शुद्ध इति भावः । कुतः ? इत्याह–यद्यस्मात्कारणाद्विपुला महती निर्जरा कर्मक्षयलक्षणा तस्य भवति, पुष्टालम्बनमवगम्य भगवदाज्ञया प्रवर्त्तमानत्वादिति ॥ " इत्थं च सर्वत्र वस्तुस्वरूपावबोधक एवापवादोपदेशो नतु विधिमुख इति यत्किञ्चिदेव, बहूनां छेदग्रन्थस्थापवादसूत्राणां विधिमुखेन स्पष्टमुपलम्भात् । तथा आचाराङ्गेऽपि " [२]से से तत्थ पयलमाणे वा पवडमाणे वा रुक्खाणि वा गुच्छाणि वा लयाओ वा वल्लीओ वा तणाणि वा तणग्गहणाणि वा हरिआणि वा अवलंबिया उत्तरिज्जा, से तत्थ पाडिपहिआ उवागच्छंति ते पाणी जाएज्जा, तओ संजयामेव अवलंबिय २ उत्तरेज्जा, तओ संजयामेव गामाणुगामं दूइजिज्जा । " इत्यत्र गच्छगतस्य साधोर्वैय्याद्यालम्बनस्य विधिमुखेनैवोपदेशात् । न च " [३]से भिक्खू वा २ गामाणुगामं दूइज्जमाणे अंतरा से वप्पाणि वा फलिहाणि वा पागारागि वा तोरणाणि वा

---

१ आचार्ये गच्छे च कुलगणसंघे च चैत्यविनाशे ।
आलोचितप्रतिक्रान्तः शुद्धो यन्निर्जरा विपुला ॥

२ अथ स तत्र प्रचलन् प्रपतन् वृक्षान् गुच्छान् वा लता वा वल्लीर्वा तृणानि वा तृणग्रहणानि वा हरितानि वा अवलम्ब्य उत्तरेत्, अथ तत्र प्रातिपथिका उपागच्छन्ति तेषां पाणिं याचेत, ततः संयत एव अवलम्ब्य २. उत्तरेत्, ततः संयत एव ग्रामानुग्रामं गच्छेत ॥ ३. अथ भिक्षुर्वा भिक्षुकीर्वा ग्रामानुग्रामं गच्छन् अन्तरा तस्य वप्रा वा परिखा वा प्राकारा वा तोरणानि वा अर्गला वा अर्गलपाशका वा सति पराक्रमे संयत एव पराक्रमेत, नो ऋजुकं गच्छेत् । केवली ब्रूयाद् आदानमेतत् ॥

अग्गलाणि वा अग्गलपासगाणि वा [उत्ताओ वा दरीओ] वा सति परक्कमे संजयामेव परक्कामिज्जा णो उज्जुअं गच्छिज्जा । केवली बूआ, आयाणमेयंति"॥ [आचारांग. पा. ३३७] प्रागुक्तनिषेधकारणानिष्टसम्भावनावचनमेतद्, नतु विधिवचनमिति वाच्यम्; विधिवचनत्वेनापि वृत्तिकृता वृत्त्या(त्त्यां)व्याख्यानात् । तथाहि 'से' इत्यादि । स भिक्षुर्ग्रामान्तराले यदि वप्रादिकं पश्येत्, ततः सत्यन्यस्मिन् सङ्क्रमे तेन ऋजुना पथा न गच्छेद्, यतस्तत्र गर्त्तादौ निपतन् सचित्तं वृक्षादिकमवलम्बेत, तच्चायुक्तम् । अथ कारणिकस्तेनैवं गच्छेत्, कथञ्चित्पतितश्च गच्छगतो वल्यादिकमवलम्ब्य प्रातिपथिकं हस्तं वा याचित्वा संयत एव गच्छेदिति । तथा सामान्यतः प्रतिषिद्धं लवणभक्षणमप्यपवादतो विधिमुखेन तत्रैवानुज्ञातं दृश्यते । तथाहि "[1]से भिक्खू वा २ [जाव समाणे सिया] से परो अव(भि)हट्टु अंतो पडिग्गहे बिडं वा लोणं वा उद्भियं वा लोणं परिभाइत्ता णीहट्टु दलइज्जा, तहप्पगारं पडिग्गहं परहत्थंसि वा परपायंसि वा अफासुअं जाव णो पडिग्गहिज्जा, से आहच्च पडिग्गाहिए सिया, तं च णाइदूरगयं जाणेज्जा, से तमादाए तत्थ गच्छेज्जा, पुव्वामेव आलोइज्जा, आउसोत्ति वा भगिणीति वा इमं ते किं जाणया दिन्नं, उदाहु अजाणया ? से य भाणेज्जा, नो खलु मे जाणया दिन्नं, अजाणया दिन्नं, कामं खलु आउसो इदाणिं णिसिरामि तं भुंजह वा णं परिभाएह वा णं तं परेहिं समणुन्नायं समणुसिट्ठं तओ संजयामेव भुंजेज्ज वा पिबेज्ज वा, जं च णो संचाएति भोत्तए वा पायएवा साहम्मिया तत्थ वसंति, संभोइआ समणुण्णा अपरिहारिआ अदूरगया तेसिं अणुप्पदायव्वं सिया, णो जत्थ साहम्मिआ [सिआ], जहेव बहुपरिआवन्ने (न्नं)

---

१ अथ भिक्षुर्वा यावत्समानः स्यात् परः प्रविश्यान्तः पतद्ग्रहे बिडं वा लवणं वा उद्भिज्जं वा लवणं परिभज्य निःसृत्य दद्यात्, तथाप्रकारं प्रतिग्रहं परहस्ते वा परपात्रे वा अप्रासुकं यावद् नो प्रतिगृह्णीयात्; स आहृत्य (सहसा) प्रतिगृहीतं स्यात्, तं च नातिदूरं ज्ञात्वा स तमादाय तत्र गच्छेत्, पूर्वमेव आलोकयेद्, आयुष्मन् ! भागिनीति वा इदं त्वया जानता दत्तमुताजानता ? स च भणेत्-नो खलु मया जानता दत्तम्, कामं खलु आयुष्मन् ! इदानीं निःसरामि तं भुञ्जीत वा परिभाजयेत् वा तं परैः समनुज्ञातं समनुसृष्टं ततः संयत एव भुञ्जीत वा पिबेद् वा । यच्च न शक्नोति भोक्तुं पातुं वा, साधर्मिका यत्र वसन्ति साधर्मिकाः समनोज्ञा अपरिहारिका अदूरगतास्तेषामनुप्रदातव्यं स्यात्, नो यत्र साधर्मिकाः स्युः यथैव बहुपर्यापन्नः क्रियते तथैव कर्तव्यं स्यात्, एवं खलु तस्य भिक्षोर्भिक्षुक्ष्या वा सामग्र्यमिति ॥

कीरइ तहेव कायव्वं सिया, एवं खलु तस्स भिक्खुस्स भिक्खुणीए वा सामग्गि अंति।" एतद्वृत्तिर्यथा—स भिक्षुर्गृहादौ प्रविष्टः, तस्य च स्यात् कदाचित्परो गृहस्थः 'अभिहट्टु अंतो' इति अंतः प्रविश्य पतद्ग्रहे काष्ठच्छब्बकादौ ग्लानाद्यर्थं खण्डादियाचने सति बिडं वा लवणं खनिविशेषोत्पन्नं उद्भिज्जं वा लवणाकराद्युत्पन्नं 'परिभाइ' त्ति दातव्यं विभज्य दातव्यद्रव्यात् कञ्चिदंशं गृहीत्वेत्यर्थः। ततो निःसृत्य दद्यात्, तथाप्रकारं परहस्तादिगतमेव प्रतिषेधयेत्, 'तच्चाहच्चे'ति सहसा प्रतिगृहीतं भवेत्। तं च दातारमदूरगतं ज्ञात्वा स भिक्षुस्तल्लवणादिकमादाय तत्समीपं गच्छेद्, गत्वा च पूर्वमेव तल्लवणादिकमालोकयेद्दर्शयेद्, एतच्च ब्रूयाद् 'अमुक' इति वा, भगीनीति वा! एतच्च लवणादिकं किं त्वया जानता दत्तमुताजानता? एवमुक्तः सन् पर एवं वदेद् यथा पूर्वं मयाऽजानता दत्तम्, साम्प्रतं तु यदि भवतोऽनेन प्रयोजनं ततो दत्तमेतत् परिभोगं कुरुध्वम्। तदेवं परैः समनुज्ञातं समनुसृष्टं सत्प्रासुकं कारणवशादप्रासुकं वा भुञ्जीत पिबेद्वा, यच्च न शक्नोति भोक्तुं पातुं वा तत् साधर्मिकादिभ्यो दद्यात्, तदभावे बहुपर्यापन्नविधिं प्राक्तनं विदध्याद्, एतत्तस्य भिक्षोः सामग्र्यमिति।"

न चापवादविषयोऽपि मनोव्यापारः सावद्यत्वात् केवलिनो न सम्भवतीति शङ्कनीयम्, अधिकृतपुरुषविशेषेऽधिकनिवृत्तितात्पर्यावगाहित्वेनास्य निरवद्यत्वाद्, अन्यथा देशविरत्युपदेशोऽपि न स्यात्, तस्य चरणाशक्तपुरुषविषयत्वेनापवादिकत्वात्, अत एव चारित्रमार्गमनुपदिश्य देशविरत्युपदेशे स्थावरहिंसाऽप्रतिषेधानुमतेः क्रमभङ्गादपसिद्धान्त उपदर्शितः। यत्तु 'जलं वस्त्रगलितमेव पेयम्'इत्यत्र "सविशेषणे०" इत्यादिन्यायाज्जलगलनमेवोपदिष्टं न तु विधिमुखेन निषिद्धोपदेशः कारणतोऽपीति, तदसद्, यतो जलगालनमपि जलशस्त्रमेव, तदुक्तमाचाराङ्गनिर्युक्तौ—"[1]उस्सिचण—गालण—धोअणे य उवगरण—कोस भंडे अ। बायरआउक्काए एयं तु समासओ सत्थं" ॥ ति ॥ अत्र गालनं 'घनमसृणवस्त्रार्द्धान्तेन' इति वृत्तौ सम्पूर्य व्याख्यातम्। तच्च त्रिविधं त्रिविधेन निषिद्धमिति विधिमुखेन तदुपदेशे निषिद्धस्यापवादतस्तथोपदेशाविरोधाद्, निषिद्धमपि हि क्वचित्कदाचित्कथञ्चिद्विहितमपि भवतीति। यत्तूक्तं द्रव्यहिंसाया अप्यनाभोगवशादयतनाजन्यत्वेन निषिद्धत्वमेवेति। तत्रायतनाजन्यहिंसायाः कटुकफ-

१. उत्सेचन—गालन—धावनं चोपकरण—कोशभाण्डं च।
बादराप्काये एतत्तु समासतः शस्त्रम्॥

लहेतुत्वात्, तत्राशयशुद्धेः प्रतिबन्धिकाया यतनातिरिक्ताया असिद्धेः, तस्याश्चायतनया सह विरोधात्, स्थूलयतनायां स्थूलायतनायाः प्रतिबन्धकत्वेन सूक्ष्मा यतनाकल्पने प्रमाणाभावाद्, अयतनासत्त्वेऽप्रमत्तानामप्रमत्ततासिद्धेः । या च सूक्ष्मा विराधना द्वादशगुणस्थानपर्यन्तमालोचनाप्रायश्चित्तबीजमिष्यते सा न सूक्ष्मायतनारूपा, सूक्ष्माया अप्ययतनायाश्चारित्रदोषत्वेनोपशान्तक्षीणमोहयोर्यथाख्यात चारित्रिणोस्तदनुपपत्तेः; किन्त्वनाभोगलक्षणसूक्ष्मप्रमादजनितचेष्टाश्रवरूपा,अत एव द्वादशगुणस्थानपर्यन्तम्, तन्निमित्तालोचनाप्रायश्चित्तसम्भवः। तदुक्तं प्रवचनसारोद्धारवृत्तौ--" इयं चालोचना गमनागमनादिष्ववश्यंकर्त्तव्येषु सम्यगुपयुक्तस्यादुष्टभावतया निरतिचारस्य छद्मस्थस्याप्रमत्तयतेर्द्रष्टव्या, सातिचारस्य तूपरितनप्रायश्चित्तसम्भवात्, केवलज्ञानिनश्च कृतकृत्यत्वेनालोचनाया अयोगात्। आह–यतीनामवश्यकर्त्तव्यानि गमनागमनादीनि तेषु सम्यगुपयुक्तस्यादुष्टभावतया निरतिचारस्याप्रमत्तस्य किमालोचनया ? तामन्तरेणापि तस्य शुद्धत्वाद्, यथासूत्रं प्रवृत्तेः। सत्यमेतत्, केवलं याश्चेष्टानिमित्ताः सूक्ष्मप्रमादनिमित्ता वा सूक्ष्मा आश्रवक्रियास्ता आलोचनामात्रेण शुद्ध्यन्तीति तच्छुद्धिनिमित्तमालोचनेति। तथा व्यवहारदशमोद्देशकवृत्तावप्युक्तं–निर्ग्रन्थस्यालोचना–विवेकरूपे द्वे प्रायश्चित्ते, स्नातकस्यैको विवेक इति। तथाऽऽलोचना गुरोः पुरतः स्वापराधस्य प्रकटनम्, क्वचित्तावन्मात्रेणैव शुद्धिः, यथाऽवश्यकृत्ये हस्तशतात् परतो गमनागमनादौ सम्यगुपयुक्तस्य निरतिचारस्य यतेः, सातिचारस्य तूपरितनप्रायश्चित्तसम्भवात्। यतेरवश्यकृत्ये गमनागमनादौ निरतिचारस्यालोचनां विनाऽपि कथं न शुद्धिः, यथासूत्रं प्रवृत्तेः। सत्यम्; परं याश्चेष्टानिमित्ताः सूक्ष्मा आश्रवक्रियास्तासां शुद्ध्यर्थमालोचनेति। तथा ' यतिजीतकल्पवृत्तावप्युक्तम्--" अत्राह शिष्यः--निरतिचारो यतिः करणीयान् योगान् करोति, ततः किमालोचनया विशोध्यम् ? गुरुराह–सूक्ष्मा आश्रवक्रियाः सूक्ष्मप्रमादनिमित्तका अविज्ञातास्तासामालोचनमात्रेणशुद्धिरित्यादि। तथा पञ्चाशकसूत्रवृत्त्योरप्युक्तम्—

" [१]ता एवं चिय एयं विहियाणुट्ठाणमेत्थ हवइत्ति।
कम्माणुबंधछेअणमणहं आलोअणाइजुअं ॥ "

---

१ तत एवमेवैतद् विहितानुष्ठानमत्र भवतीति।
कर्मानुबन्धच्छेदनमनघमालोचनादियुतम् ॥

" यस्मात्सर्वावस्थासु कर्मबन्धोऽस्ति, कर्मबन्धानुमेया च विराधना, इष्यते चासौ द्रव्यतो वीतरागस्यापि छद्मस्थस्य, चतुर्णामपि मनोयोगादीनामभिधानात्, ' ता ' तस्माद् ' एवंचिय 'त्ति एवमेव विराधनायाः शोधनीयत्वेन ' एतद् ' क्षालनादिकं ' विहितानुष्ठानं ' विधेयक्रिया ' अत्र ' कर्मानयनप्रक्रमे ' भवति ' स्याद् । इतिशब्दः समाप्त्यर्थो गाथान्ते योज्यः । किंविधं भवति ? इत्याह--'कर्मानुबन्धच्छेदनं' कर्मसन्तानछेदकं ' अनघं '--अदोषम्, परोक्तदूषणाभावात् । किंभूतं सद् ? इत्याह--' आलोचनादियुतं ' आलोचनप्रतिक्रमणादिप्रायश्चित्तसमन्वितमिति गाथार्थ इति ॥ "

वस्तुतः कर्मबन्धानुमेया द्रव्यविराधना निर्ग्रन्थस्य स्नातकस्य च तुल्या, द्वयोरपि सामयिककर्मबन्धहेतुत्वात्; परं छद्मस्थानां विहितानुष्ठानमालोचनादियुतमिष्टसाधनम्, तथैव विधानात्, छद्मस्थयोगानां शोध्यत्वेन प्रायश्चित्तस्य च शोधकत्वेन व्यवस्थितेरित्यकषायस्य योगा ऐर्यापथिककर्मबन्धहेतुत्वेन, नायतनयाऽशुद्धा । अकषायश्च वीतरागः सरागश्च सञ्ज्वलनकषायवानप्यविद्यमानतदुदयो मन्दानुभावत्वात् तत्त्वार्थवृत्तौ निर्दिष्टः, अनुदरा कन्यानिर्देशवद् इत्यकषायस्य नायतना, न वा तस्यावश्यंभाविद्रव्यहिंसादिकमप्ययतनाजन्यमिति प्रतिपत्तव्यम् । यत्तूक्तं द्रव्यतोऽपि हिंसायाः कृतप्रत्याख्यानभङ्गेनालोचनाविषयत्वमिति तज्जैनसिद्धान्तपरिभाषाज्ञानाभावविजृम्भितम्, द्रव्याद्याश्रयेण हिंसादिभावस्यैव प्रत्याख्यातत्वाद्, द्रव्यहिंसादिना हिंसादिप्रत्याख्यानभङ्गाभावाद् अनेनैवाभिप्रायेण धर्मोपकरणाङ्गीकरणे " [1]से अपरिग्गहे चउविहे पण्णत्ते, दव्वओ खित्तओ० " इत्यादिक्रमेण प्रत्याख्यातस्य परिग्रहस्य न भङ्गदोष इति विशेषावश्यके दिगम्बरनिराकरणस्थलेऽभिहितम् । तथा च तद्ग्रन्थः—

" [2]अपरिग्गहयासुत्तेत्ति जा य मुच्छापरिग्गहोऽभिमओ ।
सव्वदव्वेसु न सा कायव्वा सुत्तसब्भावो ॥ "

[3]या च " सव्वाओ परिग्गहाओ वेरमणम् " इत्यादिनाऽपरिग्रहतासूत्रे प्रोक्तेति त्वया गीयते, तत्रापि मूर्च्छैव परिग्रहस्तीर्थकृतामभिमतो नान्यः । सा च मूर्च्छा यथा वस्त्रे तथा सर्वेष्वपि शरीराहारादिद्रव्येषु न कर्त्तव्येति सूत्रस-

---

१ स च परिग्रहश्चतुर्विधः प्रज्ञप्तः, द्रव्यतः क्षेत्रतः२ ।
२ अपरिग्रहतासूत्र इति या च मूर्च्छा परिग्रहोऽभिमतः ।
सर्वद्रव्येषु न सा कर्तव्या सूत्रसद्भावः ॥
३ सर्वात्प्राणातिपाताद् विरमणम् ॥

द्भावः सूत्रपरमार्थः, न पुनस्त्वदभिमतः सर्वथा वस्त्रपरित्यागोऽपरिग्रहतेति सूत्राभिप्रायः, तस्मादपरिज्ञातसूत्रभावार्थो मिथ्यैव खिद्यसे त्वमिति ॥ "

किञ्च यदि द्रव्यहिंसया कृतप्रत्याख्यानभङ्गः स्यात् तदा तवाप्युपशान्तमोहस्य यथाख्यातचारित्रं न स्यात्, अंशतो भङ्गावश्यंभावादिति । यच्च सर्वविरतिसिद्ध्यर्थं द्रव्यहिंसाया अपि प्रत्याख्यानमुपपादितम्, तदयुक्तम्, एवं योगानामपि प्रत्याख्यानापत्तेः ' अयोगिकेवलिष्वेव सर्वतः संवरो मतः ' इति वचनादयोगिन्येव सर्वसंवरसिद्धेः । यच्च द्रव्याश्रवस्य सूक्ष्मपृथिव्यादीनामिवाविरतिप्रत्ययकर्मबन्धहेतुत्वमुक्तं तद्वृथैव, तेषामविरतिभावं प्रतीत्यैव कर्मबन्धाभिधानात्, तद्योगानां द्रव्यहिंसाऽहेतुत्वाद्, भावहिंसाकारणत्वं च योगानामिव द्रव्यहिंसाया अपि न बाधकमिति । ' यत्त्वेतेनेत्यादिना पाशचन्द्रमतमुपेक्ष्य तस्मादयं भावः ' इत्यादिना किञ्चित् सम्प्रदायानुसारि भणितं तदर्द्धजरतीयन्यायानुकारि, हिंसांशे जिनोपदेशाभावेन तन्मताश्रयणे ' पूजाद्युपदेशाभावापत्तेः, तदविनाभाविहिंसांशे उपदेशाभावेन प्रकृतोपदेशसमर्थनसम्भवेऽपि तदङ्गकुसुमार्चनाद्यंशे तस्य कुसुमादि जीववधानुकूलव्यापाररूपहिंसावगाहित्वस्य निराकर्तुमशक्यत्वाद्, एवमनिष्टबीजरूपमनपोद्येष्टफलहेतुत्वेन कल्प्यत्वाभिव्यक्तेरप्यनुपपत्तेः, कुसुमादिहिंसायाः सन्दिग्धत्वेन तथाविधपातकाहेतुत्वे मिथ्यादृशामपि तस्यास्तथात्वापत्तेः, तस्माद् द्रव्यस्तवस्थलीयहिंसायामनुबन्धशुद्धत्वेनैव भगवदाज्ञा सम्यक्त्वादिभावहेतुत्वादिति॥५९॥

तदेवमाभोगेऽपि द्रव्यहिंसाया दोषानावहत्वं यत्सिद्धं तदाह—

[१]तम्हा दव्वपरिग्गह–दव्ववहाणं समंमि आभोगे ।
णहु दोसो केवलिणो केवलनाणे व चरणे वा ॥ ६० ॥

' तम्ह 'त्ति । तस्माद् द्रव्यपरिग्रह–द्रव्यवधयोः समेऽप्याभोगे साक्षात्कारे केवलिनो नैव दोषः, केवलज्ञाने चारित्रे वा ज्ञानावरण–चारित्रमोहनीयक्षयजन्ययोः केवलज्ञान–चारित्रयोर्द्रव्याश्रवमात्रेणानपवादात् । यत्तु क्षीणमोहस्यापि स्नातकचारित्राभावात्संभावनारूढातिचाररूपस्यापि द्रव्याश्रवस्य यदि तत्प्रतिबन्धकत्वं तदा साक्षाज्जीवघातस्य द्रव्यरूपस्यापि तत्र्यायप्राप्तमेवेति केवलिनोऽपि द्रव्यहिंसा चारित्रदोष एवेति परेण प्रोच्यते तदसत्, स्नातकस्य निर्ग्रन्थभेदत्वाद् यथाख्यातस्यैव चारित्रभेदत्वात् तत्प्रतिबन्धकत्वस्य च द्रव्यहिंसायां त्वयाऽप्यनभ्युपग-

---

१ तस्माद् द्रव्यपरिग्रह–द्रव्यवधपोः समेऽप्याभोगे ।
नैव दोषः केवलिनः केवलज्ञाने च चरणे वा ॥

मात्। यदि च स्नातकचारित्रस्य द्रव्यहिंसा दोषः स्यात् तदा निर्ग्रन्थचारित्रस्यापि दोषः स्यादेव, निर्ग्रन्थ-स्नातकयोरेकसंयमस्थानाभ्युपगमात्। "णिग्गंथ-सिणायाणं तुल्लं इक्कं च संजमट्ठाणं" इति पञ्चनिर्ग्रन्थीवचनादिति द्रष्टव्यम् ॥६०॥

हिंसाचतुर्भङ्गयनुसारेणैव द्रव्यहिंसया भगवतो दोषाभावमाह—

[१]णोदव्वा णोभावा जह तह हिंसा ण दव्वमित्तेणं।
तेणं तीए दोसं जिणस्स को भासए सण्णी ॥ ६१ ॥

व्याख्या—'णोदव्व' त्ति। नोद्रव्याद् नोभावाद् यथा न हिंसा, तथा द्रव्यमात्रेणापि हिंसा तत्त्वतो न हिंसा। तेन तया द्रव्यहिंसया दोषं जिनस्य कः संज्ञी भाषेत—अपि तु न कोऽपीत्यर्थः। इदमुक्तं भवति—हिंसामधिकृत्यद्रव्यभावाभ्यां चतुर्भंगी तावदियं श्रावकप्रतिक्रमणसूत्रवृत्तावुक्ताः—१ द्रव्यतो भावतश्च हिंसा—'हन्मि' इति परिणतस्य व्याधादेर्मृगवधे। २ द्रव्यतो न भावतः—ईर्यासमितस्य साधोः सत्त्ववधे। यदागमः—

"[२]वज्जेमित्ति परिणओ संपत्तीए विमुच्चई वेरा।
अवहंतो वि ण मुच्चइ किलिट्ठभावा इवायस्य ॥" त्ति।

३ भावतो न द्रव्यतः—ऽङ्गारमर्दकस्य कीटबुद्ध्याऽङ्गारमर्दने, मन्द्रप्रकाशे रज्जुमहिबुद्ध्या घ्नतो वा। ४ न द्रव्यतो न भावतः—मनोवाक्कायशुद्धस्य साधोरिति ॥

अत्र परश्चतुर्थभङ्गस्वामिनं सयोगिकेवलिनमेवाह। यत्तु चूर्णिकारेण "चउत्थो सुण्णो' त्ति भणितम्, तत्र स्वामिनमधिकृत्य, केवलिनस्तत्स्वामिनो विद्यमानत्वात्, तस्य सर्वोत्कृष्टचारित्रान्यथानुपपत्त्या मनोवाक्कायैः शुद्धत्वाद्, अन्यथा स्नातकः केवली न स्यात्, किन्तु हिंसास्वरूपमधिकृत्यैवोक्तम्, तच्चैवम्—यदि हिंसा तर्हि न द्रव्यतो न भावत इति वक्तुमप्यशक्यम्, द्रव्यभावयोरन्यतरत्वेनावश्यम्भावात्, तेन चतुर्थो भङ्गः शून्यो भणितः, विरोधाद्। न च शैलेश्यवस्थायां केवली स्वामी भविष्यतीति शङ्कनीयम्, तस्य सिद्धस्येव योगाभावेन मनोवाक्कायैः शुद्धत्वाभावाद्, नह्यविद्यमाने वस्त्रे 'वस्त्रेण शुद्ध' इति व्यवहियत इत्याद्यसौ समर्थयामास। तच्चायुक्तम्, हिंसाव्यवहाराभावमधिकृत्यैव चतुर्थभङ्गशून्यत्वा-

---

१ नोद्रव्याद् नोभावाद् वथा, तथा हिंसा न द्रव्यमात्रेण।
तेन तया दोषं जिनस्य को भाषते संज्ञी ? ॥ ६१ ॥

२ वर्जयामीति परिणतः संपत्त्या विमुच्यते वैरात्।
अघ्नन्नपि न मुच्यते क्लिष्टभावादिवात्मनः ॥

भिधानाद् विरुद्धधर्माभ्यां तदभावस्येव तद्भेदस्यापि सम्भवेन तच्छून्यत्वव्यवहारोपपत्तेः। हिंसास्वरूपमधिकृत्य तु द्रव्यमात्रहिंसायामप्यहिंसात्वं प्रवचने प्रतीतमिति कदाचिद् द्वितीयभङ्गस्वामित्वेऽपि भगवतः स्नातकस्य निर्ग्रन्थस्येव चतुर्थभङ्गस्वामित्वाऽविरोध एव, अहिंसापरिणत्यभेदाश्रयणेन तद्भङ्गस्यापि सम्भवदुक्तिकत्वात्। न चैवं द्वितीयभङ्गकालेऽपि चतुर्थभङ्गापत्तिर्द्रव्यहिंसाकालेऽप्यप्रमत्तयतीनां मनोवाक्कायशुद्धत्वानपायादिति वा वाच्यम्, चतुर्थभङ्गोपपादकमनोवाक्कायशुद्धताया गुप्तिरूपाया एव ग्रहणाद् अत एव नियतचतुर्थभङ्गस्वामित्वमयोगिकेवलिनोऽपि नानुपपन्नम्, शुद्धप्रवृत्तिव्यापारेणैव विरोधव्यापारेणापि मनोवाक्कायशुद्धताऽनपायाद्, अन्यथा तदविनाभाविध्यानानुपपत्तेः। उक्तं हि—ध्यानं करणानां सत्प्रवृत्ति–निरोधान्यतरनियतम्—

" [१]सुदढप्पयत्तवावारणं णिरोहो व विज्जमाणाणं।
ज्झाणं करणाणमयं ण उ चित्तणिरोहमेत्तागं॥

इत्यादिग्रन्थेन विशेषावश्यके शोधकेन च व्यापारमुपसम्पद्योपरतेनापि शुद्धत्वव्यवहारो भवत्येव, यथा जलेन शुद्धं वस्त्रमिति। सर्वोत्कृष्टमनोवाक्कायशुद्धतयाऽयोगिकेवली नियमेनैव चतुर्थभङ्गस्वामी युज्यत इति। न च शैलेश्यवस्थायामपि शारीरस्पर्शमागतानां मशकादीनां व्यापत्तौ चतुर्थभङ्गस्वामित्वनियमानुपपत्तिः, द्रव्यहिंसायास्तदनुकूलनोदनाख्ययोगव्यापारनियतत्वात्, तत्र तदभावात्तत्सम्बन्धमात्रस्यातिप्रसञ्जकत्वादिति दिक्॥ ६१॥

यदि च 'न द्रव्यतो न भावतो मनोवाक्कायशुद्धस्य साधोः' इति वचनानुरोधेन सयोगिकेवलिनश्चतुर्थभङ्गस्वामित्वमेवाभिमतं भवेत् तदाऽप्रमत्तादीनां सयोगिकेवलिपर्यन्तानां द्रव्यहिंसया दोषाभावतौल्यं प्रवचनाभिहितं न घटेतेत्याह—

[२]पयडं चिय वयणमिणं दट्ठव्वं होइ कप्पभासस्स।
जं अपमत्ताईणं सजोगिचरमाण णो हिंसा॥ ६२॥

व्याख्या—'पयडं चिय' त्ति। प्रकटमेवैतद्वचनं कल्पभाष्यस्य द्रष्टव्यं

---

१ सुदृढप्रयत्नव्यापारणं निरोध इव विद्यमानानाम्।
ध्यानं करणानामयं न तु चित्तनिरोधमात्रकम्॥

२ प्रकटमेव वचनमिदं द्रष्टव्यं भवति कल्पभाष्यस्य।
यदप्रमत्तादीनां सयोगिचरमाणां नो हिंसा॥ ६२॥

भवति रागद्वेषरहितेन परीक्षकेण, यदप्रमत्तादीनां सयोगिकेवलिचरमाणां नो नैव हिंसा, व्याप्रियमाणयोगानामपीति शेषः। तथा च तद्ग्रन्थः—

" [1]अप्येव सिद्धंतमजाणमाणो तं हिंसगं भासिस जोगवंतं।
दवेण भावेण य संविभत्ता चत्तारि भंगा खलु हिंसगत्ते " ॥

अपीत्यभ्युच्चये, अस्त्यन्यदपि वक्तव्यमिति भावः। यदेवं योगवन्तं छेदनादिव्यापारवन्तं जीवं हिंसकं त्वं भाषसे, तन्निश्चीयते सम्यक् सिद्धान्तमजानत एवं प्रलापः। सिद्धान्ते योगमात्रप्रत्ययादेव न हिंसोपवर्ण्यते, अप्रमत्तसंयतादीनां सयोगिकेवलिपर्यन्तानां योगवतामपि तदभावात्। कथं तर्हि सा प्रवचने प्ररूप्यते? इत्याह—द्रव्येण भावेन च संविभक्ताश्चत्वारो भङ्गा खलु हिंसकत्वे भवन्ति। तथाहि—१. द्रव्यतो नामैका हिंसा न भावतः, २. भावतो नामैका हिंसा न द्रव्यतः, ३. एका द्रव्यतोऽपि भावतोऽपि, ४. एका न द्रव्यतो नापि भावतः। अथैषामेव यथाक्रमं भावनां कुर्वन्नाह—

[2]आहच्च हिंसा समिअस्स जा उ, सा दव्वओ होइ ण भावओ।
भावेण हिंसा उ असंजयस्स, जे वा वि सत्ते ण सदा वहेइ ॥
[3]संपत्ति तस्सेव जदा भविज्जा, सा दव्वहिंसा खलु भावओ अ।
अज्झत्थसुद्धस्स जदा ण होज्जा वधेण जोगो दुहओ वि हिंसा ॥

समितस्येर्यासमितावुपयुक्तस्य याऽऽहत्य कदाचिदपि हिंसा भवेत् सा द्रव्यतो हिंसा। इयं च प्रमादयोगाभावात् तत्त्वतो अहिंसैव मन्तव्या, " प्रमत्तयोगात् प्राणव्यपरोपणं हिंसा " इति वचनात्। भावेन भावतो या हिंसा न तु द्रव्यतः साऽसंयतस्य प्राणातिपातादेरनिवृत्तस्योपलक्षणत्वात् संयतस्य वाऽनुपयुक्तगमनागमनादि कुर्वतो यानपि सत्त्वानसौ सदैव न हन्ति तानप्याश्रित्य मन्तव्या, [4]" जे वि न वाविज्जंती णियमा तेसिंपि हिंसओ सो उ " त्ति वचनाद्। यदा तु तस्यैव प्राणिव्यपरोपणसम्प्राप्तिर्भवति, तदा सा द्रव्यतो भावतश्च हिंसा प्रति-

---

१ अप्येव सिद्धान्तमजानन् त्वं हिंसकं भाषसे योगवन्तम्।
द्रव्येण भावेण च संविभक्ताश्चत्वारो भङ्गाः खलु हिंसकत्वे ॥
२ आहत्य हिंसा समितस्य या तु सा द्रव्यतो भवति न भावतस्तु।
भावेन हिंसा त्वसंयतस्य यश्चापि सत्त्वान् न सदा हन्ति।
३ संप्राप्तिस्तस्यैव यदा भवेत् सा द्रव्यहिंसा खलु भावतश्च।
अध्यात्मशुद्धस्य यदा न भवेत् वधेन योगो द्विधापि हिंसा ॥
४ येपि न व्यापाद्यन्ते नियमात्तेषामपि हिंसकः स त्विति ॥

पत्तव्या । यः पुनरात्मना चेतःप्रणिधानेन शुद्ध उपयुक्तगमनादिक्रियाकारीत्यर्थः, तस्य यदा वधेन प्राणिव्यपरोपणेन सह योगः सम्बन्धो न भवति तदा द्विधापि द्रव्यतो भावतोऽपि च हिंसा न भवतीति भावः । तदेवं भगवत्प्रणीते प्रवचने हिंसाविषयाश्चत्वारो भङ्गा उपवर्ण्यन्ते। अत्र चाद्यभङ्गे हिंसायां व्याप्रियमाणकाययोगेऽपि भावत उपयुक्ततया भगवद्भिरहिंसक एवोक्तः, ततो यदुक्तं 'भवता वस्त्रच्छेदनव्यापारं कुर्वतो हिंसा भवति' इति तत्प्रवचनरहस्यानभिज्ञतासूचकमिति ॥ ६२ ॥

नन्वत्र 'अप्रमत्तादीनामधिकृतवस्त्रच्छेदनव्यापारवान् हिंसकः, योगवत्वाद्'–इति परोपन्यस्तानुमानदूषणव्यभिचारस्फोरणाय व्यभिचारस्थानत्वं प्रदर्शितम् । व्यभिचारश्च हेतुसत्त्वे साध्यासत्त्वमिति केवलिनोऽप्रमत्तादिसाधारण्येन योगवत्त्वम्, अहिंसकत्वं च सिद्ध्यति, नतु कथमपि द्रव्यहिंसेति चेत्, न । अत्र च 'आद्यभङ्गः' इत्यादिनिगमनवचनविचारणयाऽधिकृतवस्त्रच्छेदनव्यापारवानहिंसकः, हिंसाव्याप्रियमाणकाययोगवत्त्वेऽपि भावत उपयुक्तत्वात्, अप्रमत्तादिवद्–इति स्वतन्त्रसाधनदृष्टान्त एव भगवति तत्सिद्धेः। किञ्च पूर्वपक्षिणा वस्त्रछेदनादिव्यापारे हिंसान्वितयोगत्वं तावद् 'भगवती' वचनेनैव प्रदर्शितम् । तथाहि—

" [1]सद्दो तहिं मुच्छइ च्छेअणा वा धावंति ते दो वि उ जाव लोगो ।
वत्थस्स देहस्स य जो विकम्पो ततोवि वाता वितरन्ति लोगं " ॥

भो आचार्य ! तत्र वस्त्रे छिद्यमाने शब्द सम्मूर्च्छति, छेदनका वा सूक्ष्मावयवा उड्डीयन्ते, एते च द्वयेऽपि विनिर्गता लोकान्तं यावत् प्राप्नुवन्ति । तथा वस्त्रस्य देहस्य च यो विकम्पश्चलनं ततोऽपि विनिर्गता वातादयः प्रसरन्तः सकलमपि लोकमापूरयन्ति ।

[2] " अहिच्छसो जंति ण ते उ दूरं संखोभिया ते अवरे वयंती ।
उड्ढं अहेया वि चउद्दिसं पि पूरिंति लोगं तु खणेण सव्वं ॥ "

अथाचार्य! त्वमिच्छसि–मन्यसे वस्त्रच्छेदनसमुत्थाः शब्दपक्ष्मवातादिपुद्गला न दूरं लोकान्तं यान्ति, तर्हि तैः संक्षोभिताश्चालिताः सन्तोऽपरे व्रजन्ति; एवमपरापरपुद्गलप्रेरिताः पुद्गलाः प्रसरन्तः क्षणेनोर्ध्वमधश्चतसृष्वपि दिक्षु सर्वमपि लोकमापूरयन्ति " ॥ यत एवमतः—

---

१ शब्दस्तत्र मूर्च्छति, छेदनका वा धावन्ति ते द्वयेऽपि तु यावल्लोकम् ।
वस्त्रस्य देहस्य च यो विकम्पस्ततोऽपि वाता वितरन्ति लोकम् ॥

२ अथेच्छसि यान्ति न ते तु दूरं संक्षोभिताः तैरपरे व्रजन्ति ।
ऊर्ध्वमधो वाऽपि चतसृषु दिक्ष्वपि पूरयन्ति लोकं तु क्षणेन सर्वम् ॥

" विन्नाय आरंभमिणं सदोसं तम्हा जहालद्धमहिट्ठएज्जा ।
वुत्तं सएउ खलु जाव देही ण होइ सो अंतकरी तु ताव ॥ "

इदमनन्तरोक्तं सर्वलोकपूरणात्मकमारम्भं सदोषं सूक्ष्मजीवविराधनया सावद्यं विज्ञाय तस्मात् कारणाद् यथालब्धं वस्त्रमधितिष्ठेत्—न च्छेदनादि कुर्यात् । यत उक्तं भणितं व्याख्याप्रज्ञप्तौ—यावदयं देही जीवः सैजः सकम्पश्चेष्टावानित्यर्थः, तावदसौ कर्मणो भवस्य वाऽन्तकरी न भवति । तथा च तदालापकः—" जाव णं एस जीवे सया समिअं एअइ वेअइ चलइ फंदइ घट्टइ खुब्भइ उदीरइ तं तं भावं परिणमइ ताव णं तस्स जीवस्स अंते अंतकिरिया ण भवइ " त्ति । तथा च हिंसान्वितयोगत्वेन वस्त्रच्छेदनव्यापारवतो हिंसकत्वमापादयन्तं पूर्वपक्षिणं प्रत्यप्रमत्तादिष्वापादकसत्त्वेप्यापाद्याभावात् तर्कमूलव्याप्त्यसिद्धेस्तस्य मूलशैथिल्यरूपदोषप्रदर्शनार्थमित्थमुक्तम्, तथा चापादकसत्त्वादेवाप्रमत्तादिवत्केवलिनोऽपि द्रव्यहिंसासम्भवेऽपि न दोष इत्येतदेवाह—

हिंसगभावो हुज्जा हिंसाणियजोगजुत्ति तक्कस्स ।
दाएउं इय भणिअं पसिढिलमूलत्तणं दोसं ॥ ६३ ॥

" हिंसगभावो " त्ति । हिंसकभावो भवेद्धिंसान्वितयोगतोऽधिकृतवस्त्रच्छेदनव्यापारवत इति शेषः, इत्येतस्य तर्कस्य प्रशिथिलमूलमापाद्यापादकव्याप्त्यसिद्धिरूपं दोषं दर्शयितुमिति भणितं—यदुताप्रमत्तादीनां सयोगिकेवलिपर्यन्तानां हिंसाव्याप्रियमाणकाययोगे सत्यपि भावत उपयुक्तत्वान्न हिंसकत्वमिति योगवत्त्वमात्रं च नापादकमिति तत्रापाद्यव्याप्त्यसिद्धिप्रदर्शनमकिञ्चित्करमेवेति भावः ॥ ६३ ॥

नन्वप्रमत्तादीनामुपयुक्तानां योगवतामप्यहिंसकत्वप्रदर्शनेन हिंसान्वितयोगाभाव एव प्रदर्शितो भवति; तथा च प्रकृते आपादकाप्रसिद्धिप्रदर्शनपर एवायं ग्रन्थोऽस्तु इत्यत आह—

[1]आपायगापसिद्धी ण य भणिया वत्थछेय अहिगारे ।
ता तस्संमइवयणं पण्णत्तीए ण असुद्धं ॥ ६४ ॥

' आपायगापसिद्धि ' त्ति । आपादकस्य हिंसान्वितयोगस्याप्रसिद्धिः,

---

१ आपादकाप्रसिद्धिर्न च भणिता वस्त्रच्छेदाधिकारे ।
ततः तत्संमतिवचनं प्रज्ञप्तेर्नान्यार्थम् ॥ ६४ ॥

न च भणिता वस्त्रच्छेदाधिकारे; किं भगवतीवचनादारम्भस्स क्रियाविनाभावित्व-मङ्गीकृत्यापि प्रतिबन्ध्यैव पूर्वपक्षी (क्षिणा) दूषणं दत्तम् । तथाहि—

" [१]आरंभमिट्ठो जह आसवाय, गुत्ती य सेआय तहा तु साहू ।
णो फंद वारेहि व छिज्जमाणं, पइण्णहाणी व अतोऽण्णहा ते " ॥

' आरम्भमिट्ठो ' त्ति । मकारोऽलाक्षणिकः । हे नोदक ! यथाऽऽरम्भस्तवाश्रवाय कर्मोपादानायेष्टोऽभिमतः, गुप्तिश्च तत्परिहाररूपा श्रेयसे कर्मानुपादानायाभिप्रेता, तथा च सति हे साधो ! मा स्पन्द, मा वा वस्त्रं छिद्यमानं वारय । किमुक्तं भवति—यदि वस्त्रच्छेदनमारम्भतया भवता कर्मबन्धनमभ्युपगम्यते ततो येयं वस्त्रच्छेदनप्रतिषेधाय हस्तस्पन्दनात्मिका चेष्टा क्रियते, यो वा तत्प्रतिषेधको ध्वनिरुच्चार्यते तावप्यारम्भतया भवता न कर्त्तव्यौ, अतो मदुक्तोपदेशादन्यथा चेत् करोषि, ततस्ते प्रतिज्ञाहानिः—स्ववचनविरोधलक्षणं दूषणमापद्यत इत्यर्थः ॥ अथ ब्रुवीथाः—योऽयं मया वस्त्रच्छेदनप्रतिषेधको ध्वनिरुच्चार्यते स आरम्भप्रतिषेधकत्वान्निर्दोष इति । अत्रोच्यते—

" [२]अदोसवं ते जइ एस सद्दो अण्णोवि कम्हा ण भवे अदोसो ।
अहिच्छया तुज्झ सदोस एक्को एवं सती कस्से भवे ण सिद्धी ॥ "

यद्येष त्वदीयः शब्दोऽदोषवान्, ततोऽन्योऽपि वस्त्रच्छेदनादिसमुत्थः शब्दः कस्माददोषो न भवेत्; तस्यापि प्रमाणातिरिक्तपरिभोगविरूपादिदोषपरिहारहेतुत्वात् । अथेच्छया स्वाभिप्रायेण तवैको वस्त्रछेदनशब्दः सदोषोऽपरस्तु निर्दोषः, एवं सति कस्य न स्वपक्षसिद्धिर्भवेत्—सर्वस्यापि वा गाढवचनमात्रेण भवत इव स्वाभिप्रेतार्थसिद्धिर्भवेदिति भावः । ततश्चास्माभिरप्येवं वक्तुं शक्यम्, योऽयं वस्त्रच्छेदनसमुत्थः शब्दः स निर्दोषः, शब्दत्वाद्, भवत्परिकल्पितशब्दवदित्यादिः; तत्तस्मात्कारणात्तत्र वस्त्रच्छेदाधिकारे सम्मतिवचनं प्रज्ञप्तेः " जीवे णं एस जीवे "—इत्यादि नान्यार्थं किं त्वेजनादिक्रियाणामारम्भाविनाभावित्वप्रतिपादकमेव, अन्यथैतदर्थसमर्थनार्थमेतत्सूत्रमुपन्यस्तवन्तं तं पूर्वपक्षिणमन्यार्थप्रदर्शनेनैतदभिप्रायानभिज्ञमवक्ष्यत् कल्पभाष्यकृदिति । अस्मादेव भगवतीसूत्रादबाधितयथाश्रुतार्था-

---

१ आरम्भ इष्टो यथाऽऽस्रवाय गुप्तिश्च श्रेयसे तथा च साधो ! ।
नो स्पन्द वारय वा छिद्यमानं प्रतिज्ञाहानिर्वाऽतोऽन्यथा ते ॥

२ अदोषवान् ते यदि एष शब्दः, अन्योपि कस्मान्न भवेददोषः ।
अथा सदोष एक एवं सति कस्य भवेन्न सिद्धिः ॥

द्यावदेजनादिक्रिया तावदारम्भादिसम्भव इति केवलिनो द्रव्यहिंसायां न सन्देह इति भावः ॥ ६४ ॥

एतदेव स्पष्टयति–

[1]किरिआउ अंतकिरियाविरोहिणीउ जिणेण भणिआउ।
आरंभाइजुआउ मंडियपुत्तेण पुट्ठेण ॥ ६६ ॥

व्याख्या—'किरिआउ' त्ति। मण्डितपुत्रेण पृष्टेन जिनेन श्रीवर्द्धमानस्वामिना क्रिया एजनाद्या आरम्भादियुता–आरम्भादिनियता अन्तक्रियाविरोधिन्यो भणिताः। तथा च भगवतीसूत्रम्–" [2]जीवे णं भंते ! सया समियं एअइ वेयइ चलइ फंदइ घट्टइ खुब्भइ उदीरइ तं तं भावं परिणमइ ? हंता मण्डियपुत्ता ! जीवेणं सया समियं एअइ, जाव तं तं परिणमइ। जावं च णं भंते ! से जीवे सया समियं जाव तं तं भावं परिणमइ, तावं च णं तस्स जीवस्स अंते अंतकिरिया भवइ ? णो इणट्ठे समट्ठे। से केणट्ठेणं भंते ! एवं वुच्चइ–जावं च णं से जीवे सया समिअं जाव अंतकिरिया णो भवइ ? मंडियपुत्ता ! जावं च णं से जीवे सया समिअं जाव परिणमइ, तावं च णं से जीवे आरंभइ सारंभइ समारंभइ, आरंभे वट्टइ सारंभे वट्टइ समारंभे वट्टइ, आरंभमाणे सारंभमाणे समारंभमाणे, आरंभे वट्टमाणे सारंभे वट्टमाणे समारंभे वट्टमाणे, बहूणं पाणाणं भूआणं जीवाणं सत्ताणं

---

१ क्रिया अन्तक्रियाविरोधिन्यो जिनेन भणिताः
आरम्भादियुता मण्डितपुत्रेण पृष्टेन ॥ ६५ ॥

२ जीवो भदन्त ! सदा समितमेजते व्येजते चलति, स्पन्दते घट्टते क्षुभ्यति उदीरयति तं तं भावं परिणमते ? हन्त (ओम्) मण्डितपुत्र ! जीवः सदा समितमेजते, यावत् तं तं परिणमते। यावच्च भदन्त ! स जीवः सदा समितं यावच्च तं तं भावं परिणमते तावच्च तस्य जीवस्य अन्ते अन्तक्रिया भवति ? नायमर्थः समर्थः। स केनार्थेन भदन्त ! एवमुच्यते–यावच्च स जीवः सदा समितं यावदन्तक्रिया नो भवति। मण्डितपुत्र ! यावच्च स जीवः सदा समितं यावत्परिणमते तावच्च स जीव आरभते संरभते समारभते, आरम्भे वर्तते, संरम्भे वर्तते, समारम्भे वर्तते, आरभमाणः संरभमाणः समारभमाणः, आरम्भे वर्तमानः, संरम्भे वर्तमानः, समारम्भे वर्तमानः बहूनां प्राणानां भूतानां जीवानां सत्त्वानां दुःखापनायां शोकापनायां जीर्णतापनायां (खेदापनायां) तेपापनायां पिट्टनापनायां विद्रापनायां परितापनायां वर्तते स तेनार्थेन मण्डितपुत्र ! एवमुच्यते यावच्च स जीवः सदा समितमेजते यावत्परिणमते तावच्च तस्स जीवस्स अन्ते अन्तक्रिया न भवतीति ॥

दुक्खावणयाए सोआवणयाए जूरावणयाए तिप्पावणयाए पिट्टावणयाए नि (वि) द्दावणयाए परियावणयाए वट्टइ, से तेणट्ठेणं मंडियपुत्ता एवं वुच्चइ, जावं च णं से जीवे सया समियं एजति जाव परिणमति, तावं च णं तस्स जीवस्स अंते अंतकिरिया ण हवइ' त्ति। एतद्वृत्तिर्यथा–क्रियाधिकारादिदमाह–'जीवेणं' इत्यादि। इह जीवग्रहणेऽपि सयोग एवासौ ग्राह्यः, अयोगस्यैजनादेरसम्भवात्; सदा–नित्यं 'समियं'ति–सप्रमाणं 'एयइ' त्ति एजते कम्पते 'एजृ कम्पने' इति वचनात्; 'वेयइ' त्ति व्येजते विविधं कम्पते, 'चलइ' त्ति स्थानान्तरं गच्छति, 'फंदइ' त्ति स्पन्दते किञ्चिच्चलति, 'स्पदि किञ्चिच्चलने' इति वचनात्; अन्यमवकाशं गत्वा पुनस्तत्रैवागच्छतीत्यन्ये, 'घट्टइ' त्ति सर्वदिक्षु चलति, पदार्थान्तरं वा स्पृशति; 'खुब्भइ' त्ति क्षुभ्यति–पृथिवीं प्रविशति, क्षोभयति वा पृथिवीम्, बिभेति वा; 'उदीरइ' त्ति प्राबल्येन प्रेरयति, पदार्थान्तरं वा प्रतिपादयति। शेषक्रियासङ्ग्रहार्थमाह–'तं तं भावं परिणमति' त्ति उक्षेपणावक्षेपणाकुञ्चनप्रसारणादिकं परिणामं यातीत्यर्थः। एषां वैजनादिभावानां क्रमभावित्वेन सामान्यतः सदेति मन्तव्यम् ? नतु प्रत्येकापेक्षया, क्रमभाविनां युगपदभावादिति। तस्स जीवस्स 'अंते' त्ति मरणान्ते 'अंतकिरिय' त्ति सकलकर्मक्षयरूपा। 'आरम्भइ' त्ति आरभते पृथिव्यादीनुपद्रवयति, 'सारंभइ' त्ति संरभते–तेषु विनाशसंकल्पं करोति, 'समारंभइ' त्ति समारभते–तानेव परितापयति, आह च–"संकप्पो संरंभो परितावकरो हवे समारंभो। आरंभो उवद्दओ सव्वणयाणं विसुद्धाणं ॥ १ ॥" इदं च क्रिया क्रियावतोः कथञ्चिदभेद इत्यभिधानाय तयोः समानाधिकरणतः सूत्रमुक्तम्। अथ तयोः कथञ्चिद्भेदोऽप्यस्तीति दर्शयितुं पूर्वोक्तमेवार्थं व्यधिकरणत आह–'आरंभे' इत्यादि। आरम्भेऽधिकरणभूते वर्त्तते जीवः, एवं संरंभे समारम्भे च, अनन्तरोक्तवाक्यार्थद्वयानुवादेन प्रकृतयोजनामाह–'आरभमाणः' संरभमाणः समारभमाणो जीवः–इत्यनेन प्रथमो वाक्यार्थोऽनूदितः, 'आरम्भे वर्त्तमानः' इत्यादिना तु द्वितीयः, 'दुक्खावणयाए' इत्यादौ वा शब्दस्य प्राकृतप्रभवत्वाद् दुःखापनायां–मरणलक्षणदुःखप्रापणायाम्, अथवेष्टवियोगादिदुःखहेतुप्रापणायां वर्त्तते इति योगः; तथा शोकापनायां दैन्यप्रापणायाम्, 'जूरावणयाए' त्ति शोकातिरेकाच्छरीरजीर्णताप्रापणायाम्, 'तिप्पावणयाए' त्ति 'तेपापनायां' तिपृ ष्टेपृ क्षरणार्थाविति वचनात्, शोकातिरेकादेवाश्रुलालादिक्षरणप्रापणायाम्,। 'पिट्टावणयाए' त्ति पिट्टनप्रापणायाम्, ततश्च परितापनायां शरीरसन्तापे वर्त्तते, क्वचि-

त्पठ्यते ' दुक्खावणयाए ' इत्यादि, तच्च व्यक्तमेव; । यच्च तत्र ' किलामणयाए उद्दवणया ' इत्यधिकमभिधीयते, तत्र ' किलामणाए ' त्ति ग्लानिनयने, ' उद्दवणयाए ' त्ति उत्त्रासन इति । अत्र ह्येजनादिक्रियाणामारम्भादिद्वारैवान्तक्रियाविरोधित्वं प्रतीयते । आरम्भादीनां चैजनादिक्रियानियतत्वम्, नियमश्चायं यथासम्भवं द्रष्टव्यः, तेन नाप्रमत्तानामारम्भवत्संरम्भसमारम्भयोरप्यापत्तिरिति वृद्धाः । युक्तं चैतत्—" [१]जाव णं एस जीवे सया समिअं एअइ वेयइ जाव तं तं भावं परिणमइ ताव णं अट्ठविहबंधए वा सत्तविहबंधए वा छव्विहबंधए वा एगविहबंधए वा, नोणं अबंधए । " इत्यत्रैजनादिक्रियाणामष्टविधाद्यन्यतरबन्धव्याप्यत्ववत्प्रकृतेरप्यारम्भाद्यन्यतरव्याप्यत्वस्यैव व्युत्पत्तिमर्यादया लाभात् । परः पुनरेनमेवार्थं " सुमुनीनां शोभना मुनयः सुमुनयः सुसाधवस्तेषामप्रमत्तगुणस्थानकादारभ्य त्रयोदशगुणस्थानं यावदारम्भे वर्त्तमानानामप्यारम्भिकी क्रिया न भवति " इत्यादि स्वयमेव ग्रन्थान्तरे लिखितमस्मरन्निवान्यथैवात्र व्याख्याप्रकारमारचयति । तथाहि—अन्तक्रियाप्रतिबन्धकास्तावद्योगा एव, यावद् योगास्तावदन्तक्रिया न भवति, योगनिरोधे च भवतीति तेषां तत्प्रतिबन्धकत्वाद्, यदभावो यत्र कारणं तदेव तत्र प्रतिबन्धकमिति जगत्स्थितेः । न चैवं क्वाप्यागमे जीवघातनिरोधे तज्जन्यकर्मबन्धनिरोधे वाऽन्तक्रिया भणिता । तस्मात्साक्षाज्जीवघातलक्षण आरम्भो नान्तक्रियायाः प्रतिबन्धकः, तदभावेऽन्तक्रियाया अभणनात्, प्रत्युताग्निकापुत्राचार्यगजसुकुमारादिदृष्टान्तेन सत्यामपि जीवविराधनायां केवलज्ञानान्तक्रिययोर्जायमानत्वात् कुतस्तत्प्रतिबधकत्वशङ्कापाति । अत्र सूत्रे एजनादिक्रियाजन्यआरम्भो न भणितः, किन्तु क्रियारम्भयोरेकाधिकरणे नियमो भणितः, स चैवं—यावत्कालं यतनादिक्रियावान् तावत्कालं स आरम्भादिमानेव; एवं च सति कम्पनादिक्रिया व्याप्या, आरम्भश्च व्यापकः, तेन कम्पनादिक्रिया नारम्भहेतुः, किन्त्वारम्भः कम्पनादिक्रियाहेतुः । यथा ' यावत्कालं यो धूमवाँस्तावत्कालं स आर्द्रेन्धनप्रभववह्निमानेव ' इत्यत्र धूमस्तथाभूतवह्नेर्जनको न भवति, भवति च तथाभूतो वह्निर्धूमजनक इति । अतः क्रियाप्रतिबन्धकारम्भव्याप्यत्वेन कम्पनादिक्रियाणामन्तक्रियाप्रतिबन्धकत्वं व्याख्येयम्, आरम्भशब्देन च

---

१ यावदेष जीवः सदा समितमेजते, व्येजते यावत् तं तं भावं परिणमते तावदष्टविधबन्धको वा सप्तविध बन्धको वा षड्विधबन्धको वा एकविधबन्धको वा; नो अबन्धकः ॥

योगा उच्यन्ते, जीवघातादिलक्षणारम्भादिजनकत्वेन कारणे कार्योपचारात्, शास्त्रसम्मतं च योगानामारम्भत्वम् । तदुक्तं भगवतीवृत्तौ—" ननु 'मिथ्यात्वाविरतिकषाययोगाः कर्मबन्धहेतव' इति प्रसिद्धिः, इह तु आरम्भिक्यादयोऽभिहिता इति कथं न विरोधः ? उच्यते—आरम्भपरिग्रहशब्दाभ्यां योगपरिग्रहः, योगानां तद्रूपत्वात्, शेषपदेषु च शेषबन्धहेतुपरिग्रहः प्रतीत एवेति।" एतच्चायुक्तम्, आरम्भादिशब्दत्रयेण योगाभिधानस्य दुर्घटत्वाद्, एजनादिक्रियातिरिक्तकायादिसध्रीचीनजीवव्यापाररूपयोगसद्भावे प्रमाणाभावाद्, योगानां योगनिरोधरूपान्तक्रियायां प्रतिबन्धकत्वाभावाच्च; नहि घटो घटनाशं प्रति प्रतिबन्धक इति । तस्मादेजनादिरहितो नारम्भादिषु वर्त्तते, तथा च न प्राणादीनां दुःखापनादिषु, तथा च योगनिरोधाभिधानशुक्लध्यानेन सकलकर्मध्वंसरूपाऽन्तक्रिया भवतीति भगवतीवृत्तावेवाग्रे व्यतिरेकप्रदर्शनादेजनादीनामारम्भादिद्वाराऽन्तक्रियाविरोधित्व व्याख्यानमेव न्याय्यमिति । यत्तु एवमपि यद्यारम्भादिशब्दैरुक्तप्रकारेणेहाव्याख्यातत्वात् साक्षाज्जीवघातोऽभिमतः, तर्हि " जीवे णं भंते ! सया समिअं एयइ" इत्यादिसामान्यसूत्रे सयोगिजीवः केवलिव्यतिरिक्त एव ग्राह्यः, अन्यथा " सत्तहिं ठाणेहिं केवलि जाणेज्जा "—इत्यादि विशेषसूत्रविरोधेन सूत्राभिप्रायकल्पने मतिकल्पना महानर्थहेतुः—इत्याद्युक्तं तदुपहासपात्रम्, वृत्तिकृदभिप्रायोल्लङ्घनेन स्वस्यैव मतिकल्पनाया महानर्थहेतुत्वात्, 'सत्तहिं ठाणेहिं' इत्यादिसूत्रस्य भिन्नविषयत्वेन प्रकृतसामान्यसूत्रावधिकविशेषसूत्रस्य केनापि ग्रन्थकारेणानुपदर्शितत्वाच्चेति ॥६५॥

स्यादियमाशङ्का—सकलसयोगिगतैजनादिक्रियासामान्यस्य न साक्षादारम्भादिनियतत्वम्, भगवतीवृत्तावेव सूक्ष्मपृथिव्यादीनां साक्षादात्मारम्भकत्वनिषेधाद्, एवं च भवत्यपि केवलिनः सदा साक्षादारम्भानभ्युपगमेन यदा तदभावस्तदा द्वाराभावादेजनादिक्रियया ऽप्रतिबन्धात्केवलज्ञानोत्पत्त्यनन्तरमेव केवलिनोऽन्तक्रियाप्रसङ्गः । यदि चान्तक्रियायां कदाचित् क्रियामात्रस्य कदाचिच्च साक्षादारम्भस्यानियतविरोधित्वं स्वीक्रियते तदा नियतारम्भादिद्वारकत्वेन तद्विरोधित्वव्याख्यानविरोध इत्यत्राह—

[1]आरंभाइज्जुअत्तं तस्सत्तीए फुडेइं (हिं) ण उ तेहिं।
तस्सत्तीविगमे पुण जोगणिरोहो अपडिबद्धो ॥६६॥

---

१ आरम्भादियुतत्वं तच्छक्त्यां स्फुटैर्न तु तैः ।
तच्छक्तिविगमे पुनर्योगनिरोधोऽप्रतिबद्धः ॥ ६६ ॥

व्याख्या—' आरम्भादियुतत्वं ' आरम्भादिनियतत्वं ' क्रियाणाम् ' इति प्राक्तनमिहानुषज्यते; ' तच्छक्त्या ' आरम्भादिशक्त्या, तुरेवकारार्थो भिन्नक्रमश्च, ननु तैः स्फुटैः—स्फुटैरेव तैरारम्भादिभिर्नेत्यर्थः। अयं भावः—स्थूलकालावच्छेदेन तावदेतत्सूत्रोक्तएजनादिक्रियाणां साक्षादारम्भनियमो वदेरयोगस्य (?) नासम्भवी, इत्थम्भूतनियमस्यापि सूत्रेऽभिधानाद्, अत एव यस्मिन् समये कायिकी क्रिया, तस्मिन् पारितापनिकी प्राणातिपातिकी च प्रज्ञापनोक्तेदृशनियमेनैव वृत्तिकृतोपपादिता। तथाहि—समयग्रहणेन चेह सामान्यः कालो गृह्यते, न पुनः परमनिरुद्धो यथोक्तस्वरूपो नैश्चयिकः समयः, परितापनस्य प्राणातिपातस्य वा बाणादिक्षेपजन्यतया कायिक्याः प्रथम समय एवासम्भवादिति। अयं च नियम आरम्भजातीयस्य दोषत्वस्फुटीकरणार्थं व्यवहारेणोच्यते, न तु केवलिनोऽप्यारम्भो दोष इति नानुपपत्तिः, तथापि निश्चयतो योगानां केवलानामेव यत्प्रतिबन्धकत्वं परेणोद्भाव्यते, तत्र वयं वदामः—न स्फुटारम्भयुक्तानां नवा केवलानां योगानामन्तक्रियाप्रतिबन्धकत्वं निश्चिनुमः, किन्त्वारम्भशक्तियुक्तानामन्तक्रियाविरोधित्वं प्राणघातानुकूलपुद्गलप्रेरणाकारिस्थूलक्रियारूपारम्भजननशक्तिसहितैर्योगैः स्थूलक्रियारूपारम्भजननद्वाराऽन्तक्रियाप्रतिघाताद्, अत एव चरमयोगे आरम्भजननशक्त्यनन्वयात्, तेन नान्तक्रियाप्रतिबन्ध इति तदनन्तरमेवान्तक्रियासम्भवस्तदिदमाह—' तच्छक्तिविगमे ' आरम्भादिजननशक्तिविलये पुनर्योगनिरोधोऽप्रतिबद्धोऽस्खलितसामग्रीकः, चरमयोगक्षणस्यैव योगनिरोधजनकत्वाद्। इदं च सूक्ष्मर्जुसूत्रनयमतमित्यविरुद्धमिति मन्तव्यम् ॥ ६६ ॥

नन्वेवमनेन सूत्रेण केवलिन आरम्भजननशक्त्यन्वितयोगवत्त्वं भवद्भिरभ्युपगतम्, तच्चास्माकमपि सम्मतमेव, आरम्भस्वरूपयोग्यतायाः केवलियोगेष्वस्माभिरभ्युपगमात्। नचातः केवलिन्यारम्भसम्भवोऽपि, मोहनीयाभावेन तन्निरूपितफलोपहितयोग्यतायास्तत्रास्वीकारादिति पराशङ्कायामाह—

पोग्गलपणोल्लणाए जो आरंभो इमीइ किरियाए।
णियया मुणीण भणिओ सोऽदुट्ठो सत्थिअनाएण[1] ॥ ६७ ॥

---

१ पुद्गलप्रणोदनायां य आरम्भोऽनया क्रियया।
नियमान्मुनीनां भणितः सोऽदुष्टः शास्त्रिकज्ञातेन ॥ ६७ ॥

व्याख्या—' पोग्गलपणोल्लणाए ' त्ति। अनयाऽऽरम्भशक्त्या हेतुभूतया क्रियया-एजनादिलक्षणया पुद्गलप्रणोदनायां जीवघनलोकान्तरस्थापरापरपुद्गलप्रेरणायां तथाविधसहकारिसम्पर्कसमुद्भूतायां सत्यां य आरम्भो भवति स नियमान्मुनीनां शास्यिकज्ञातेनादुष्टो भणितः।

अयं भावः—स्थूलक्रियाया (यां) पुद्गलप्रेरणायामारम्भस्तावत्साधूनामप्यवर्जनीयो भवति। अत एवाहारकसमुद्घातनिःसृष्टपुद्गलैरपि शरीरसम्बद्धैस्तदसम्बद्धैर्वा प्राणादिघाते त्रिक्रियत्वादिकमुक्तम्। तथा च समुद्घातपदे प्रज्ञापनासूत्रम्— " [१]तेणं भंते! पोग्गला णिच्छूढा समाणा जाइं तत्थ पाणाइं भूआइं जीवाइं सत्ताइं अभिहणंति जाव उवद्दवेंति, ते णं जीवे कइकिरिए? गो०! सिय तिकिरिए सिय चउकिरिए सिय पंचकिरिए। ते णं भंते! जीवा ताओ जीवाओ कइकिरिआ? एवं चेव से णं भंते! जीवे ते अजीवा अण्णेसिं जीवाणं परं पराघाएणं कइकिरिया? गो०! तिकिरियावि चउकिरियावि पंचकिरिया वि त्ति "। परं प्रमत्ततादशायामारम्भप्रत्यया क्रिया निमित्तम्, अप्रमत्ततादशायां तु धार्मिकक्रियायोगान्तर्भूततया शास्यिकदृष्टान्तेन हितत्वाद् योगातिरिक्तदोषविधया न दोषभाक्। तदुक्तं बृहत्कल्पभाष्ये—" [२]आहारणीहारविहीसु जोगो, सव्वो अदोसाय जहा जयस्स। हिआय सस्संमि व सस्सियस्स भंडस्स एयं परिकम्मणं तु ॥ १ ॥ " यथा यतस्य प्रयत्नपरस्य साधोराहारनीहारादिविषयः सर्वोऽपि योगो भवन्मतेनाप्यदोषाय भवति, तथा भाण्डस्योपकरणस्य परिकर्मणमपि छेदनादिकमेव यतनया क्रियमाणं निर्दोषं द्रष्टव्यम्। दृष्टान्तमाह—' हियाय सस्संमि व सस्सिअस ' त्ति। शस्येन चरतीति शास्यिकः, तस्य यथा तद्विषयं परिकर्मणं नंदिणतादिकं हिताय भवति, तथेदमपि भाण्डपरिकर्मणम्। तथा चोक्तं— " यद्वच्छस्यहितार्थं शस्याकीर्णेऽपि विचरतः क्षेत्रे। या भवति शस्यपीडा, यत्न-

---

१ तेन भदन्त! पुद्गला निःक्षिप्ताः सन्तः यान् तत्र प्राणान् भूतान् जीवान् सत्त्वानि अभिघ्नन्ति, यावदुपद्रवन्ति स भदन्त! जीवः कतिक्रियः गौ०! स्यात् त्रिक्रियः स्यात् चतुष्क्रियः स्यात्पञ्चक्रियः। ते च भदन्त जीवाः ते कतिक्रियाः। एवमेव स च भदन्त! जीवः। ते अजीवा अन्येषां जीवानां परम्पराघातेन कतिक्रियाः? गौ०! स्याद् त्रिक्रिया अपि, चतुष्क्रिया अपि, पञ्चक्रिया वेति ॥

२ आहारनीहारविधिषु योगः सर्वोऽदोषाय यथा यतस्य।
हिताय शस्य इव शास्यिकस्य भाण्डस्यैतत्परिकर्मणं तु ॥

वतः साऽल्पदोषाय ॥ १ ॥ तद्रज्जीवहितार्थं जोवाकीर्णेऽपि विचरतो लोके। या भवति जीवपीडा यत्नवतः साल्पदोषाय ॥ २ ॥" इति। तथा च स्थूलक्रियैवारम्भरूपा सम्पन्ना, मोहनीयं च न तस्यां हेतुः, दृष्टेष्टविरोधाद्–इत्येवंभूतारम्भस्य भगवति सत्त्वे न बाधकमित्यारम्भशक्तिरेवारम्भाक्षेपिका, अन्यथा तु चरमयोग इव प्राक्तनयोगेष्वप्यारम्भशक्तिकल्पने प्रमाणाभावः, निश्चयेन कार्यं कुर्वत एव कारणत्वाभ्युपगमाद्। न च शक्तिविशेषं विना योगत्वेनैव केवलियोगस्यारम्भस्वरूपयोग्यत्वाभ्युपगमो यौक्तिकः, चरमयोगस्यापि तत्त्वापत्तेः। न चेष्टापत्तिः, आरम्भस्वरूपयोग्ययोगत्वेनान्तक्रियाविरोधित्वाद्–इत्यारम्भशक्तिसत्वे केवलिनः स्थूलक्रियारूपारम्भो नानुपपन्न इति ॥ ६७ ॥

एतदेवाह—

[१]सो केवलिणो विहवे चलोवगरणत्तणं जमेयस्स।
सहगारिवसा णियतं पायं थूलाइ किरियाए ॥ ६८ ॥

व्याख्या—'सो त्ति' स पुद्गलप्रेरणाद्वारक आरम्भः केवलिनोऽपि भवेद्, यद् यस्मादेतस्य केवलिनश्चलोपकरणत्वं सहकारिवशाद्–गमनक्रियापरिणामादिसहकारिवशात्प्रायः स्थूलया क्रियया नियतं वर्त्तते।

अयं भावः––चलोपकरणत्वं तावद् भगवतोऽप्यस्त्येव, तथा च भगवती सूत्रम्–" [१]केवली णं भंते ! अस्सिं समयंसि जेसु आगासपएसेसु हत्थं वा पायं वा बाहुं वा ऊरुं वा ओगाहित्ता णं चिट्ठइ पभू णं केवली सेअकालंसि तेसु चेव आगासपएसेसु हत्थं वा जाव ओगाहित्ता णं चिट्ठित्तए ? गो० णो इणट्ठे समट्ठे।

---

१ स केवलिनोऽपि भवेद् चलोपकरणत्वं यदेतस्य।
सहकारिवशान्नियतं प्रायः स्थूलया क्रियया ॥ ६८ ॥

१ केवली भदन्त ! अस्मिन् समये येष्वाकाशप्रदेशेषु हस्तं वा पादं वा बाहुं वा ऊरुं वा अवगाह्य तिष्ठति प्रभुः केवली एष्यत्काले तेष्वेवाकाशप्रदेशेषु हस्तं वा यावदवगाह्य स्थातुम् ? गौतम ! नायमर्थः समर्थः। स केनार्थेन भदन्त ! एवमुच्यते–यावत्केवली अस्मिन् समये येष्वाकाशप्रदेशेषु यावत्तिष्ठति न प्रभुः केवली एष्यत्कालेऽपि तेष्वेवाकाशप्रदेशेषु हस्तं वा यावत्स्थातुम्। गौतम ! केवलिनो वीर्यसयोगसद्रव्यतया चलानि उपकरणानि भवन्ति, चलोपकरणार्थतया च केवली अस्मिन् समये येष्वाकाशप्रदेशेषु हस्तं वा यावत्तिष्ठति, न प्रभुः केवली एष्यत्कालेऽपि तेष्वेव स्थातुम्, स तेनार्थेन यावदुच्यते अस्मिन् समये यावत्स्थातुम्।

से केणट्ठेणं भंते ! एवं वुच्चइ ? जाव केवली णं अस्सिं समयंसि जेसु आगासपएसेसु जाव चिट्ठइ, णो णं पभू केवली सेयकालंसि वि तेसु चेव आगासपएसेसु हत्थं वा जाव चिट्ठित्तए ? गो० केवलिस्स णं वीरियसजोगसद्दव्वयाए चलाइं उवगरणाइं भवंति, चलोवगरणट्ठयाए अ णं केवली अस्सिं समयंसि जेसु आगासपएसेसु हत्थं वा जाव चिट्ठइ, णो णं पभू केवली सेयकालंसि वि तेसु चेव चिट्ठित्तए, सो तेणट्ठेणं जाव वुच्चइ केवली अस्सिं समयंसि जाव चिट्ठित्तए " ॥

एतद्वृत्तिर्यथा–' अस्सिं समयंसि त्ति । अस्मिन् वर्त्तमानसमये 'उग्गाहित्ता णं' ति अवगाह्य–आक्रम्य ' सेयकालंसि वि ' त्ति एष्यत्कालेऽपि ' वीरियसजोगसद्दव्वयाए ' त्ति वीर्यं–वीर्यान्तरायक्षयप्रभवा शक्तिः तत्प्रधानं सयोगं मानसादिव्यापारयुक्तं यत् सद्विद्यमानं द्रव्यं जीवद्रव्यं तत्तथा, वीर्यसद्भावेऽपि जीवद्रव्यस्य योगान् विना चलनं न स्यादिति सयोगशब्देन सद्द्रव्यं विशेषितम् । सदिति विशेषणं च तस्य सदा सत्तावधारणार्थम् । अथवा स्व आत्मा तद्रूपं स्वद्रव्यम्, ततः कर्मधारयः, अथवा वीर्यप्रधानः सयोगो योगवान् वीर्यसयोगः, स चासौ सद्द्रव्यश्च मनःप्रभृतिवर्गणायुक्तो वीर्यसयोगसद्द्रव्यस्तस्य भावस्तत्ता, तया हेतुभूतया ' चलाइं ' ति अस्थिराणि ' उवगरणाइं ' अङ्गानि, ' चलोवगरणट्ठयाए अ ' त्ति चलोपकरणलक्षणो योऽर्थस्तद्भावश्चलोपकरणता तया, चशब्दः पुनरर्थे इति " ॥

एतच्च चलोपकरणत्वं निरन्तरसूक्ष्मगात्रसञ्चारबीजं चलनसामान्यसामग्र्यां निविशमानं गमनादिक्रियापरिणाममात्रसहकृतं सद् गमनादिस्थूलक्रियामपि जनयत्येव । सा च स्थूलक्रियाऽवर्जनीयारम्भसङ्गता सती केवलिनो न वीर्यान्तरायक्षयक्षतिकरी, यतस्तत्सामान्यकारणं चलोपकरणत्वमपि नामकर्मपरिणतिविशेषापादितयोगाशक्तिनियतमेव । यदाह सूत्रकृताङ्गवृत्तिकृत्–" सयोगी जीवो न शक्नोति क्षणमप्येकनिश्चलं स्थातुम्, अग्निना ताप्यमानोदकवत् कार्मणशरीरानुगतः सदा परिवर्त्तयन्नेवास्ते " इत्यादीति । तत्कार्यस्थूलक्रियायामप्यशक्यपरिहारारम्भत्यागे योगाशक्तिरेव निमित्तमिति । केचित्तु सूक्ष्मक्रियाणामिव स्थूलक्रियाणामपि चलोपकरणतावशादनियतदेशत्वावश्यकत्वात् तत्प्रयुक्तारम्भसम्भवः केवलिनोऽपि दुर्निवार इत्याहुः ॥ ६८ ॥

ननु यद्येवं स्थूलक्रियैव द्रव्यारम्भस्तदा केवलिनस्तस्य कादाचित्कत्वं न स्याद्, इष्यते चायमन्यसाधूनामपि कादाचित्क एव, 'आहच्च हिंसा समिअस्स जा उ सा

दव्वओ होइ ण भावओ उ।" त्ति वचनाद्–इत्याशङ्कामेतद्वचनं फलीभूतसाक्षात्सम्बद्धारम्भविषयत्वान्नानुपपन्नम्, स च केवलिनोऽपि कादाचित्क एवेत्यभिप्रायेण निराचिकीर्षुराह—

[१]सक्खं तु कायफासे जो आरंभो कयाइ सो हुज्जा।
अहिगिच्च तं णिमित्तं मग्गिज्जइ कम्मबंधठिई ॥६९॥

व्याख्या—'सक्खं तु' त्ति। साक्षात्तु कायस्पर्शे य आरम्भः स कदाचिदेव भवेत्, तं च साक्षात्कायस्पर्शाज्जायमानं द्रव्यारम्भं व्यवहारिजनप्रतीयमानमिति गम्यं, निमित्तमधिकृत्य कर्मबन्धस्थितिर्मृग्यते शास्त्रकारैरिति गम्यम्। यद्यप्यप्रमत्तानामवश्यभावी जीवघातो न प्राणातिपातत्वेन दोषः, तथापि निमित्तभूतस्यास्यैकाधिकरणोपादानसद्भावासद्भावकृतं फलवैचित्र्यं विचार्यत इत्यर्थः ॥ ६९ ॥

कथमित्याह—

[२]तत्थ णिमित्ते सरिसे जेणोवादाणकारणाविक्खो।
बंधाबंधविसेसो भणिओ आयारवित्तीए ॥ ७० ॥

व्याख्या—'तत्थ' त्ति। तत्र साक्षात्कायस्पर्शाज्जायमानारम्भे निमित्ते सदृशे आकेवलिनमेकरूपे सति येन कारणेनोपादानकारणस्यापेक्षा नियतसद्भावा सद्भावाश्रयणरूपा यत्र स तथा बन्धावन्धविशेषः–कर्मबन्धतारतम्यतदभावप्रकारो भणित इति आचारवृत्तौ। तत्र प्रथममेतदधिकारसम्बद्धमाचाराङ्गलोकसाराध्ययनचतुर्थोद्देशकस्थं सूत्रं लिख्यते–" से[१] अभिक्कममाणे पडिक्कममाणे संकुचेमाणे पसारेमाणे विणिअट्टमाणे संपलिज्जमाणे एगया गुणसमिअस्स रीयतो कायसंफासमणुचिन्ना एगइआ पाणा उद्दाइंति, इह लोगवेदणवेज्जावडियं जं आउट्टिकयं

---

१ साक्षात्तु कायस्पर्शे य आरम्भो कदाचित्स भवेत्।
अधिकृत्य तं निमितं मृग्यते कर्मबन्धस्थितिः।

२ तत्र निमित्ते सदृशे येनोपादानकारणापेक्षः।
बन्धाबन्धविशेषो भणित आचारवृत्त्याम् ॥ ७० ॥

१ स अभिक्रामन् प्रतिक्रामन् संकुचन् प्रसारयन् संपरिमृजन् एकदा गुणसमितस्य रीयमानस्य कायसंस्पर्शमनुचीर्णा एके प्राणा अपद्रान्ति, इह लोकवेदनवेद्यापतितं यत्पुनराउट्टिकृतं कर्म तत्परिज्ञाय विवेकमेति ॥

कर्म्म तत्परिज्ञाय विवेगमेति त्ति" ॥ अथैतद्वृत्तिः–'से' इत्यादि । स भिक्षुः सदा गुर्वादेशविधायी एतद्व्यापारवान् भवति, तद्यथा–अभिक्रामन्–गच्छन्, प्रतिक्रामन्–निवर्त्तमानः, संकुचन् हस्तपादादिसङ्कोचनतः, प्रसारयन् हस्तादीनवयवान्, विनिवर्त्तमानः समस्ताशुभव्यापारान् सम्यक् परिसमन्ताद् हस्तपादादीनवयवांस्तन्निक्षेपस्थानिव रजोहरणादिना मृजन् संपरिमृजन्, गुरुकुलवासे वसेदिति सर्वत्र सम्बन्धनीयम् । तत्र निविष्टस्य विधिः–भूम्यामेकमूरुं व्यवस्थाप्य द्वितीयमुत्क्षिप्य तिष्ठेत्, निश्चलस्थानासहिष्णुतया भूमीं प्रत्युपेक्ष्य प्रमृज्य च कुक्कुटीविजृम्भितदृष्टान्तेन सङ्कोचयेत्प्रसारयेद्वा, स्वपन्नपि मयूरवत् स्वपिति, स किलान्यसत्त्वभयादेकपार्श्वशायी सचेतनश्च स्वपिति, निरीक्ष्य च परिवर्त्तनादिकाः क्रिया विधत्ते इत्येवमादि सम्परिमृजन् सर्वाः क्रियाः करोति । एवं चाप्रमत्ततया पूर्वोक्ताः क्रियाः कुर्वतोऽपि कदाचिदवश्यं भावितया यत् स्यात्तदाह–'एगया' इत्यादि । एकदा कदाचिद् गुणसमितस्य गुणयुक्तस्याप्रमत्ततया रीयमाणस्य सम्यगनुष्ठानवतोऽभिक्रामतः प्रतिक्रामत सङ्कुचतः प्रसारयतो विनिवर्त्तमानस्य संपरिमृजतः कस्यां चिदवस्थायां कायः शरीरं तसंत्स्पर्शमनुचीर्णाः कायसङ्गमागताः सम्पातिमादयः प्राणिन एके परितापमाप्नुवन्ति, एके ग्लानतामुपयान्ति, एकेऽवयवविध्वंसमाप्यन्ते । अपश्चिमावस्थां तु सूत्रेणैव दर्शयति–एके प्राणाः प्राणिनोऽपद्रान्ति–प्राणैर्विमुच्यन्ते । अत्र च कर्मबन्धं प्रति विचित्रता । तथा हि–शैलेश्यवस्थायां मशकादीनां कायसंस्पर्शेन प्राणत्यागेऽपि पञ्चधोपादानकारणयोगाभावान्नास्ति बन्धः, उपशान्तक्षीणमोहसयोगिकेवलिनां स्थितिनिमित्तकषायाभावात् सामयिकः, अप्रमत्तयतेर्जघन्यतोऽन्तर्मुहूर्त्तम्, उत्कृष्टतश्चान्तःकोटाकोटिस्थितिरिति । प्रमत्तस्य त्वनाकुट्टिकतामुपेत्य प्रवृत्तस्य क्वचित्पाण्याद्यवयवसंस्पर्शात् प्राण्युपतापनादौ जघन्यत उत्कृष्टतश्च प्राक्तन एव विशेषिततरः । सचेतनोपि भवेन क्षिप्यत इति सूत्रेणैव दर्शयितुमाह–'इह लोग' इत्यादि । इहास्मिन् लोके जन्मनि वेदमनुभवनमिह लोकवेदनं तेन वेद्यमनुभवनीयमिहलोकवेदनवेद्यं तत्रापतितमिहलोकवेदनवेद्यापतितम्, इदमुक्तं भवति–प्रमत्तयतिनापि यदि कायतः कृतं कर्म कायसङ्घट्टनादिना तदैहिकभवानुबन्धि, तेनैव भवेन क्षिप्यमाणत्वाद्, आकुट्टिकृतकर्मणि तु यद्विधेयं तदाह 'जं आउट्टी' इत्यादि । यत्तु पुनः कर्माकुट्टया कृतमागमोक्तकारणमन्तरेणोपेत्य प्राण्युपमर्दनेन विहितं तत्परिज्ञाय ज्ञपरिज्ञया विवेकमेति विविच्यतेऽनेनेति विवेकः

प्रायश्चित्तं दशविधं तस्यान्यतरं भेदमुपैति तद्विवेकं वाऽभावाख्यमुपैति, तत्करोति येन कर्मणोऽभावो भवतीति ॥"

अत्र गुर्वादेशविधायिनमभिक्रमणादिव्यापारवन्तमप्रयत्नसंयतमवश्यंभाविजीवविराधनाभागिनमनूद्य कर्मबन्धाबन्धविशेषविधानं वृत्तौ पूरितम्, अनाकुट्टिकयाऽऽकुट्टिकया च जीवविराधनाकारिणं प्रमत्तसंयतमनूद्येहलोकवेदनवेद्यापतितस्य विवेकयोग्यस्य च कर्मबन्धस्य विधानं साक्षादेव सूत्रेऽभिहितम्, तत्र केवली 'उद्देसोपासगस्स णत्थि' त्ति वचनाद् गुर्वादेशविधायित्वाभावात् सम्भावितभाविजीवघातभयाविनाभाविनियताभिक्रमणादिक्रियाभावाच्च नानूद्य इति तद्वहिर्भावेनैवावश्यंभाविजीवविराधनानिमित्तकबन्धाबन्धविचार इति परोऽभिमन्यते, तन्महामृषावादविलसितम्। साक्षादेव केवलिनमनूद्य वृत्तौ तत्समर्थनस्य ब्रह्मणापि पराकर्तुमशक्यत्वात्। तत्रानूद्यतावच्छेदकधर्मे विरोधोद्भावनेन च वृत्तिकृत एव सूत्राभिप्रायानभिज्ञतां वक्तुमुपक्रान्तो देवानां प्रियस्तमेव मन्यमानस्तमेव वाऽवमन्यस इति महाकष्टं तद्। न चैतद्विरोधोद्भावनं विचार्यमाणं चमत्कारकारि,गुर्वादेशविधायित्वस्य भगवति फलतोऽभिधानाविरोधाद्, अत एव "किं ते भंते! जत्ता? सोमिला! जं मे तवणियमसंजमसज्झायज्झाणावस्सयमाईसु जयणा। सेत्तं जत्ता"। इत्यत्र सूत्रे एतेषु च यद्यपि भगवतो न किञ्चित्तदानीं विशेषतः सम्भवति, तथापि तत्फलसद्भावात्तदस्तीत्यवगन्तव्यमित्युक्तम्। अभिक्रमणादियतनाव्यापाराश्च यादृशाश्छद्मस्थसंयतानामयतनाभयाविनाभाविनस्तादृशा एवायतनाभयाभावेऽपि भगवतः सम्भवत्येव, साधुसमानधर्मतयैव कल्पिकपरिहारादियतनावदभिक्रमणादियतनाया अप्युपपत्तेरिति न किञ्चिदेतत्।

यत्त्ववश्यंभावित्वं प्रायोऽसम्भविसम्भविकार्यत्वम्, यदेव हि प्रायोऽसम्भवि सत् कदाचित्सम्भवति तदेवावश्यम्भावीति व्यवह्रियते, अन्यथा सर्वमपि कार्यमवश्यभावित्वेन वक्तव्यं स्यात्; पञ्चसमवायवादिभिर्जनैः सर्वस्यापि कार्यस्य नियतिजन्यतामधिकृत्यावश्यभावित्वेनेष्टत्वात्, कालादिषु पञ्चसु कारणेषु नियतेरपि परिगणनाद्, अत एव जमालिनिमित्तकनिह्नवमार्गोत्पत्तिरवश्यभाविनीति प्रवचने प्रतीतिः। तीर्थंकरदीक्षितशिष्यात् निह्नवमार्गोत्पत्तेः प्रायोऽसम्भविसम्भवाद्, एवमप्रमत्तसंयतस्य कायादिव्यापाराज्जायमानानाभोगवशेन कादाचित्कीत्यवश्यभाविनी वक्तुं युज्यते नतु केवलिनः, तस्य तत्कादाचित्कतानियामकानाभोगाभावादिति नावश्यंभाविविराधनावन्तं केवलिनमनूद्य किमपि विचार-

णीयमस्ति' इति परेणोद्घुष्यते, तदसद् । अनाभोगादेरिव विषयासन्निधानादेरपि कादाचित्कत्वेनावश्यंभावित्वोपपत्तेः केवलिनोऽप्यप्रमत्ततयेरिवावश्यंभाविजीवविराधनोपपत्तेः । अन्यथा तमधिकृत्य वृत्तिकृता यत्सामयिककर्मबन्धाबन्धव्याख्यानं कृतं तस्यात्यन्तमनुपपत्तेः । किञ्च अवश्यंभाविनो जीवविराधना प्रायोऽसम्भविसम्भवाऽप्रमत्तस्यैव नतु प्रमत्तस्य, तदीयकायव्यापाराज्जायमानस्य जीवघातस्य प्रायः सम्भविसम्भवत्वात्, प्रमत्तयोगानां तथास्वभावत्वाद्, अत एव प्रमत्तसंयतस्य प्रमत्तयोगानङ्गीकृत्यारम्भिकी क्रियापि, तेषां योगानां जीवघातार्हत्वाद्, अन्यथा प्रमत्ताप्रमत्तयोरविशेषः सम्पद्येति (तेति) परस्याभ्युपगमेऽवस्थितसूत्रस्यैवानुपपतिः, अनाकुट्टिकयाऽनुपेत्य प्रवृत्तमवश्यंभाविजीवविराधनावन्तं प्रमत्तसंयतमधिकृत्यैवेहलोकवेदनवेद्यापतितकर्मबन्धस्य साक्षात्सूत्रेऽभिधानात्, तस्य च जीवविराधनाया अवश्यंभावित्वस्य प्रायः सम्भविसम्भवत्वेन परेण निषेधात्, तस्माद्नायं पन्थाः, किन्त्वनभिमतत्वे सत्यवर्जनीयसामग्रीकत्वमवश्यंभावित्वव्यवहारविषयः, अत एव जिज्ञासितयोर्द्वयोर्वस्तुनोः पुरःस्थितयोरेकस्य दर्शनार्थमुन्मीलितेन चक्षुषाऽपरस्यापि दर्शनमवश्यं भवतीति व्यवह्रियते । अत एव च जमालेर्भगवता दीक्षणे निह्नवमार्गोत्पादस्यावश्यंभावित्वमपि नानुपपन्नम्, तदानीं तस्यानभिमतस्याप्यवर्जनीयसामग्रीकत्वात्; एवंविधा चावश्यंभाविनी विराधना संयतानां सर्वेषामपि सम्भवतीति तामधिकृत्य वृत्तिकृदुक्ता व्यवस्था केवलिन्यपि युक्तिमत्येवेति । वस्तुतः सर्वस्यापि कार्यस्य पुरुषकारभवितव्यतोभयजन्यत्वेऽपीदं कार्यं पुरुषकारजनितमिदं च भवितव्यताजनितमिति विभक्तो व्यवहार एकैकस्योत्कटत्वलक्षणां बहुत्वलक्षणां वा मुख्यतामादायैव शास्त्रकारैरुपपादितः । तदिह साधूनामनाकुट्या जायमाने जीवघाते भवितव्यताया एव मुख्यतया व्याप्रियमाणत्वात् तत्रावश्यंभावित्वव्यवहारः, न त्वनाभोगजन्यत्वमेव तत्र तन्त्रम्, आभोगपूर्वकस्य कारणिकस्यापि तस्य विवेकयोग्यबन्धहेतोः पृथक्करणे नेहलोकवेदनवेद्यापतितकर्मबन्धहेतुतया परिशेषितस्यावश्यंभावित्वेनैव परिगणनात्, ततो जीवरक्षापरिणामवतामाकुट्या जीवघातप्रवृत्तिरहितानां सर्वेषामेव संयतानां या काचिद्विराधना भवति साऽवश्यंभाविनीति कायस्पर्शमनुचीर्णैः प्राणिभिरुपजायमानां तामाश्रित्याकेवलिनं वृत्तिकृदुक्तव्यवस्थायां न कोऽपि सन्देह इति सूक्ष्ममीक्षणीयम् । एवं सत्यपि परस्येयं शङ्कोन्मीलति—यदुताऽत्र कर्मबन्धं प्रति विचित्रता । तथाहि—'शैलेश्यवस्थायां कायसंस्पर्शेन मशकादीनां प्राणत्या-

गेऽपि पञ्चविधोपादानकारणाभावान्नास्ति बन्धः' इत्यत्र कर्तुः सम्यग्विचारे मशकादीनां प्राणत्यागस्य कर्त्ता किमयोगिकेवली, उतान्यः कश्चिद् । नाद्यः, अयोगित्वकर्तृत्वयोर्विरोधेनायोगिकेवलिनः कर्तृत्वाभावात्; नहि कायादिव्यापारमन्तरेण कर्त्ता भवितुमर्हति, 'क्रियाहेतुः स्वतन्त्रः कर्ता' इति वचनात् । यदि चायोगिकेवलिनः शरीरस्य सम्पर्कादपि जायमानो जीवघातस्तन्निमित्तकत्वेन तत्कर्तृको भण्यते, तर्हि अपसिद्धान्तः स्यात् । पुरुषप्रयत्नमन्तरेणापि प्राणत्यागलक्षणस्य कार्यस्य जायमानत्वेन पञ्चसमवायवादित्वहानेः । निमित्तत्वमात्रेण च कर्तृत्वव्यपदेशोऽपि न भवति, साध्वादिनिमित्तकोपसर्गस्य दानादेश्च साध्वादिकर्तृकत्वेन व्यपदेशप्रसक्तेः । द्वितीयविकल्पेऽन्यः कश्चित् कर्ता—इत्यत्रानन्यगत्याऽनाभोगवतः कूपपातवदनिष्टोऽपि मशकादीनां निजप्राणत्यागोऽनाभोगवशेन म्रियमाणमशकादिकर्तृक एव, यदि मशकादीनां निजकायादिव्यापारो नाभविष्यत् तर्हि शरीरसम्पर्काभावेन निजप्राणत्यागोऽपि नाभविष्यद्—इति व्याप्तिबलेन मशकादियोगजन्यत्वात् । तथा चायोगिकेवलिनि मशकादिकर्तृका जीवविराधना बन्धाभाववती सम्भवत्यपि सयोगिकेवलिनि तु सा कथं स्यात् ? तत्र हिंसा भवन्ती तद्योगान्वयव्यतिरेकानुविधायित्वेन तत्कर्तृकापि स्यात्, न च केवलिनो जीवविराधनाकर्तृकार्यभावसम्बन्धेन जीवविराधनाविचारे कथं केवलिनो निर्देशो युज्यते ? इति ॥ ७० ॥

तत्र आह—

कारगसंबंधेणं तस्स णिमित्तस्सिमा उ मज्जाया ।
कत्ता पुणो पमत्तो णियमा पाणाइवायस्स ॥ ७१ ॥

व्याख्या—'कारगसंबंधेणं' ति । कारकस्यापि करणादिरूपस्यायोगिकेवल्यादेः पञ्चानुपूर्व्या प्रमत्तसंयतान्तस्य सम्बन्धेन तस्य साक्षात्कायस्पर्शप्रत्ययारम्भस्य निमित्तस्येयमाचाराङ्गवृत्तिकृदुक्ता मर्यादा—अयोगिकेवल्यादिकारकसम्बन्धमात्रेणैव साक्षादारम्भस्य बाह्यस्य निमित्तस्य प्रस्तुता फलाफलविचारणा क्रियते, नतु कर्तृकार्यभावसम्बन्धेन जीवविराधनाविचारः क्रियत इति नोक्तानुपपत्तिरित्यर्थः । कर्ता पुनः प्राणातिपातस्य नियमात् प्रमत्त एव, शास्त्रीयव्यवहारेण प्रमादवत एव प्राणातिपातकर्तृत्वव्यवस्थितेः, ततो यदि कर्तृकार्यभावसम्बन्धेनैवात्र जीवविराधनाविचारः प्रस्तुतस्तदा पराभ्युपगमरीत्या केवलिन इवाप्रमत्तसंयतस्यापि निर्देशोऽप्रामाणिक इति सर्वमेव वृत्तिकृदुक्तं विशीर्येत । यदि

चोपचारेणाप्रमत्तयतेरपि कथञ्चित्तत्कर्तृत्वमिष्यते, तदोपरिष्टादप्युपचारेणैतत्कल्पनं ग्रन्थकाराभिप्रायानुरोधादेव निराबाधमिति यदुच्यते परेण 'सयोगि केवली कदाचिज्जीवविराधकः सम्भवति, भवस्थकेवलित्वाद् अयोगि केवलिवद्' इत्यत्र कदाचिज्जीवविराधकत्वं साध्यमयोगिकेवलिनि दृष्टान्ते नास्ति, तस्याकर्तृत्वात्। किञ्च —अयोगिकेवलिदृष्टान्तदातुरयोगित्वकर्तृत्वयोर्विरोधापरिज्ञानमपि स्फुटमेवेत्यादि, तत्सर्वं ग्रन्थाभिप्रायापरिज्ञानविजृम्भितमिति मन्तव्यम्; न ह्येवमधिकृताचाराङ्गवृत्तिग्रन्थः कथमप्युपपादितो भवतीति ॥ ७१ ॥

नन्वयं ग्रन्थः प्रासङ्गिक एव। तथाहि—अयोगिकेवलिनि मशकादिघातस्तावन्मशकादिकर्तृक एव, तथा च कर्मबन्धोऽप्यध्यवसायानुगतो मशकादीनामेव भवति, एककर्तृकयोरेव कर्मबन्धोपादानकारणयोः परस्परं कार्यकारणभावसंबन्धाद् न पुनर्भिन्नकर्तृकयोरपि, सांसारिकजीवकर्तृकैः पञ्चविधोपादानकारणैः सिद्धानामपि कर्मबन्धप्रसक्तेः। तस्मादन्वयव्यतिरेकाभ्यामनादिसिद्धकार्यभावव्यवस्थासिद्ध्यर्थमत्र च कर्मबन्धं प्रति विचित्रतेत्यादि प्रसङ्गतोऽभिहितम्। तत्रायोगिन्युपादानकारणाभावात् कर्मबन्धाभाव इति व्यतिरेकनियमः प्रदर्शितः, स चान्वयनियमस्य दार्ढ्यहेतुः, अन्यथा कर्मबन्धविचित्रताविचारेऽबन्धकस्यायोगिकेवलिनो भणनमनर्थकमेव सम्पद्येत, प्रयोजनाभावाद्। योगवत्सु चोपादानकारणसत्त्वे कर्मबन्धलक्षणकार्यसत्त्वमित्यन्वयनियमं प्रदर्शयन्नेव योगवतामपि कर्मबन्धवैचित्र्यमुपादानकारणवैचित्र्यायत्तमेवेति नियमसिद्ध्यर्थं प्रथमं कारणावैचित्र्ये कार्यं(र्या)वैचित्र्यमुपशान्तक्षीणमोहसयोगिकेवलिनां स्थितिनिमित्तकषायोदयाभावात् सामयिकः कर्मबन्ध इति समुच्चयभणनेन बभाण वृत्तिकारः, तेषां च त्रयाणामपि मिथ्यात्वाविरतिकषाययोगप्रमादलक्षणानां पञ्चविधोपादानकारणानां मध्ये केवलयोगस्यैव सत्त्वेन कर्मबन्धोऽपि तत्प्रत्यय एव। स च सामयिकसातवेदनीयकर्मबन्धलक्षणः समान एव भवति, विचित्रताहेतुमोहनीयोदयाभावाद्, न पुनरुपशान्तस्येव क्षीणमोहस्यापि जीवघातादिकं भवतीति बुद्ध्या समुच्चयेन भणनम्, सर्वांशसाम्यमधिकृत्य समुच्चयेन भणितेरसम्भवाद्, अन्यथोपशान्तस्येव क्षीणमोहस्यापि जीवघातादिहेतुमोहनीयसत्तापि वक्तव्या स्यात्, तथा केवलिवदुपशान्तस्याऽपि सर्वज्ञत्वं वक्तव्यं प्रसज्येत; नहि नारकतिर्यग्नरामराः कर्मबन्धका इत्यादिसमुच्चयभणनेन सर्वेषामपि साम्यं कस्यापि संमतम्। तस्माद्यथा सामान्यतः कर्मबन्धमधिकृत्य नारकादीनां समुच्चयेन भणनं तथा सामयिकसातवेदनीयकर्म-

बन्धमधिकृत्योपशान्तादीनां समुच्चयेन भणनमित्यत्र अप्रासङ्गिके प्रथमाङ्गवृत्तिग्रन्थे नास्माकमनभीप्सितसिद्धिरित्याशङ्कायामाह—

जो पुण इह कत्तारं नियमा मसगाइजीवमहिकिच्च।
जाणइ इमं पासंगियमइप्पसंगो फुडो तस्स ॥ ७५ ॥

व्याख्या—'जो पुण' त्ति। यः पुनरिह शैलेश्यवस्थायामवश्यंभाविन्यां जीवविराधनायां कर्त्तारं नियमान्मशकादिजीवमधिकृत्येदमाचाराङ्गवृत्त्युक्तं प्रासंगिकं भणति—तद्विराधनाकर्तृमशकादिजीवगतोपादानकर्मबन्धकार्यकारणभावप्रपञ्चप्रदर्शनमात्रप्रसङ्गप्राप्तं वदति, नतु स्वसम्बद्धजीवविराधनाफलाफलवैचित्र्यप्रदर्शनपरम्, तस्य स्फुट एवातिप्रसङ्गः। एवं ह्यप्रमत्तसंयतस्यापि प्रमादनियतजीवविराधनाकर्तृत्वाभावेन जीवविराधनानिमित्तकर्मबन्धो म्रियमाणजीवगत एव पर्यवस्येद्, नत्वप्रमत्तसंयतनिष्ठ इति कर्मबन्धानुमेयविराधनाया अप्रमत्तसंयतादिषु विचित्राया अभिधानमखिलं व्यधिकरणमेव स्यादिति।

किञ्च—अत्र 'कर्मबन्धं प्रति विचित्रता' इत्यत्र 'अत्र' इति निमित्तसप्तम्याश्रयणात् संयतसम्बद्धावश्यंभाविजीवविराधनानिमित्तमधिकृत्यैव कर्मबन्धविचित्रता वक्तुमुपक्रान्ता, सा च कर्मबन्धाभावकर्मबन्धावान्तरभेदान्यतररूपेति नायोगिनि तद्विचित्रताऽनुपपत्तिः। अत एव—"सेलेसिं पडिवन्नस्स जे सत्ता फरिसं पप्प उद्दायंति मसगादी, तत्थ कम्मबंधो णत्थि। सजोगिस्स कम्मबंधो दो समया। जो अपमत्तो उद्दवेइ तस्स जहन्नेणं अंतोमुहुत्तं, उक्कोसेणं अट्ठमुहुत्ता। जो पुण पमत्तो न य आउट्टिआए तस्स जहन्नेणं अंतोमुहुत्तं, उक्कोसेणं अट्ठसंवच्छराइं। जो उण आउट्टिआए पाणे उवद्दवेइ तवो वा छेओ वा वेयावडं वा करेइ॥"—इत्याचाराङ्गचूर्णावप्यवश्यंभाविजीवविराधनानिमित्तक एव कर्मबन्धाभावसः (वः) कर्मबन्धविशेषश्चायोगिकेवल्यादीनां संयतानां पश्चानुपूर्व्या व्यक्तः प्रतीयते। कर्मबन्धाभावादौ निमित्तत्वं च तत्र स्वसमानाधिकरणोपादानानुरोधेनाऽभिधीयमानं निमित्तमनैकान्तिकमिति सम्प्रदायादविरुद्धम्। तथा च 'सजोगिस्स कम्मबंधो दो समया' इत्यत्र 'तत्र' इत्यस्यावश्यमनुषङ्गात्। तत्र कायस्पर्शं प्राप्य सत्त्वोपद्रवे सयोगिकेवलिनो द्वौ समयौ कर्मबन्ध इति स्फुटार्थप्रतीतावुपशान्तक्षीणमोहयोरपि तत्समानजातीयत्वेन तत्र द्वावेव समयौ कर्म-

बन्धः स्फुट इति वृत्तावुपशान्तादीनां समुच्चयेन भणनं न जीवघातमधिकृत्येति यदुच्यते, तद्बहुश्रुतत्वयशःक्षतिकरमेव, समुच्चयप्रतियोगिनां पदार्थानां तुल्यवत्प्रकृतधर्मविशिष्टक्रियान्वयित्वेनैव समुच्चयनिर्वाहाद् । एवं च यथा सिकतादौ घृतादिसंसर्गेऽपि स्नेहाभावान्न बन्धः, बदरचूर्णसक्तुचूर्णादीनां तु चिरकालस्थितिहेतुस्नेहविशेषाभावादल्पकालीनो बन्धः, कणिकादीनां तु स्नेहोत्कर्षादुत्कृष्टबन्ध इत्यत्र बदरचूर्णादीनां तुल्यवदेव स्नेहविशेषाभावविशिष्टप्रकृतघृतादिसंसर्गनिमित्तकाल्पकालीनबन्धभवनक्रियान्वयेनैव समुच्चयः प्रतीयते, तथा प्रकृतेऽप्युपशान्तादीनां तुल्यवदेव स्थितिनिमित्तकषायाभावविशिष्टप्रकृतजीवघातनिमित्तकसामयिकबन्धभवनक्रियान्वयेनैव समुच्चयोपपत्तेरिति नारकतिर्यङ्नरामरा इति दृष्टान्तेन प्रत्येकपदार्थधर्ममादाय समुच्चयखण्डनमपाण्डित्यविजृम्भितमेव, तस्य केनाप्यनभ्युपगतत्वात् । प्रकृतधर्मविशिष्टक्रियान्वयतुल्यतारूपसमुच्चयखण्डने तु समुच्चयतात्पर्यकवाक्यस्यैवानुपपत्तिरिति न किञ्चिदेतत् ॥७२॥

तदेवमाचाराङ्गवृत्त्यभिप्रायेण यावदयोगिकेवलिनं संयतानामपि कायस्पर्शेनावश्यंभाविनी(न्या)जीवविराधनया(नाया)व्यक्तमेव प्रतीतावपि ये 'अयोगिकेवलिन्यवश्यंभावी मशकादिघातो मशकादिकर्तृको नत्वयोगिकेवलिकर्तृकः'—इति शब्दमात्रेण मुग्धान् प्रतारयति(न्ति) त एवं प्रष्टव्याः—सोऽयमेवंविध एव सयोगिकेवलिनः कथं न भवति ? इति । इत्थं पृष्टाश्च त एवमुत्तरं ददते—योगवतो हि केवलिनो जीवरक्षैव भवति, तत्कारणानां शुभयोगानां सत्त्वात् । अयोगिकेवलिनस्तु योगानामेवाभावेन स्वरूपयोग्यतयापि निजयोगजन्यजीवघातसामग्र्या अभाववज्जीवरक्षासामग्र्या अप्यभाव एवेति तत्राह—

जियरक्खा सुहजोगा जइ तुह इट्ठा सजोगिकेवलिणो ।
हंदि तया तयभावे अजोगिणो हुज्ज हीणत्तं ॥ ७३ ॥

'जिअरक्ख'त्ति । जीवरक्षा—जीवघाताभावरूपा यदि तव मते सयोगिकेवलिन इष्टा, केवलियोगानामेव जीवरक्षाहेतुत्वात्, 'हन्दीत्याक्षेपे' तदा तदभावे—योगाभावेन जीवरक्षाऽभावेऽयोगिकेवलिनो हीनत्वं सयोगिकेवल्यपेक्षयाऽपकृष्टत्वं भवेद् ।

अयं भावः—जीवघाताभावरूपा जीवरक्षा किं त्वया गुणरूपाऽभ्युपगम्यते,

दोषरूपा, उभयरूपा, अनुभयरूपा वा? आद्ये तद्गुणवैकल्येनायोगिकेवलिनो हीनत्वं दुर्निवारमेव। द्वितीये तु स्वाभ्युपगमस्य हानिर्लोकशास्त्रविरोधश्च। तृतीयश्च पक्षो विहितक्रियापरिणतयोगरूपां जीवरक्षामधिकृत्य विहितक्रियात्वेन गुणत्वं योगत्वेन च दोषत्वमभिप्रेत्य सम्भवदुक्तिकोऽपि स्वाभाविकजीवघाताभावरूपां जीवरक्षामधिकृत्यासम्भवदुक्तिक एव; नहि स गुणो दोषश्चेत्युभयरूपतामास्कन्दतीति। चतुर्थे तु तदभावेऽप्ययोगिकेवलिन इव सयोगिकेवालनोऽपि न बाधक इति, किं तत्रावश्यंभाविजीवविराधनानिरासव्यसनितया? अथ जीवघाताभावमात्ररूपा जीवरक्षा न गुणः, किन्तु योगजन्यजीवघाताभावरूपा; सा च मशकादिकर्तृकमशकादिजीवघातकालेऽयोगिकेवलिनोऽपि विशिष्टाभावसत्वान्नानुपपन्नेति न तस्य तद्गुणवैकल्यम्। न वा सयोगिकेवलिनोऽपि योगात् कदाचिदपि जीवघातापत्तिः, तादृशजीवरक्षारूपातिशयस्य चारित्रमोहनीयक्षयसमुत्थस्य ज्ञानावरणीयक्षयसमुत्थकेवलज्ञानस्येव सर्वकेवलिसाधारणत्वात् संयतानां यज्जीववविषयकाभोगस्तज्जीवरक्षाया नियतत्वाच्च। अत एव सामान्यसाधूनामप्यनाभोगजन्यायामेव विराधनायां परिणामशुद्ध्या फलतोऽवधकत्वमुपदर्शितम्॥ तथा चोक्तं हितोपदेशमालायां—

"णणु कह उवउत्ताण वि छउमत्थ मुणीण सुहुमजिअरक्खा।
सच्चं तहवि ण वहगा उवओगवरा जओ भणिअं॥ १॥"

एतद्व्याख्या यथा—नन्विति पूर्वपक्षोपन्यासे। छद्मस्थानां विशिष्टातिशयज्ञानरहितानां मुनीनां साधूनामुपयुक्तानामपि सम्यगीर्यासमितानामपि सूक्ष्माणां चर्मचक्षुषामदृश्यानां जीवानां कथं रक्षासम्भवः? आचार्य आह—सत्यमवितथमेतत्, तथापि विशिष्टज्ञानशून्या अपि यद्युपयोगपराः पूर्वोक्तयुक्त्या चंक्रमणप्रवृत्तास्तदा सम्भवत्यपि प्राणिवधे न वधका—वधकार्यपापभाजः॥" न चैतत्काल्पनिकम्, यत 'उच्चालिअंमि पाए' इत्यादि; यत एव भगवतोऽहिंसातिशयः, अत एव 'अणासवो केवलीणं ठाणं' इति प्रश्नव्याकरणसूत्रे केवलिनां स्थानं केवलिनामहिंसायां व्यवस्थितत्वादित्युक्तम्। तथा चतुःशरणप्रकीर्णकेऽपि 'सव्वजिआणमहिंसं अरिहंता'—इत्यत्र सर्वे सूक्ष्मबादरत्रसस्थावरलक्षणा ये जीवास्तेषां न हिंसाऽहिंसा तामर्हन्त इति विवृतमिति चेत्, नन्वेवं योगजन्यजीवघाताभावरूपाया जीवरक्षाया भगवतोऽतिशयत्वं स्वीकुर्वाणस्य तव मते सयोगिकेवलिनो

योगाज्जीवघातो मा भूद्, अयोगिकेवलिवन्मशकादियोगादेव तत्कायस्पर्शेन मशकादिघातस्तु जायमानः कथं वारणीयः ? समानावच्छेदकतासम्बन्धेन तत्र केवलियोगानां प्रतिबन्धकत्वात् स वारणीय इति चेत् । तर्हि प्रतिबन्धकत्वं शुभयोगत्वेन, उत केवलियोगत्वेन, आहोस्वित् क्षीणमोहयोगत्वेन । नाद्यः, अप्रमत्तसंयतानामपि जीवघातानापत्तेः, तेषामप्यात्माद्यनारम्भकत्वेन शुभयोगत्वात् । न द्वितीयः, केवलियोगत्वेन जीवघातप्रतिबन्धकत्वे क्षीणमोहयोगात् तदापत्तेरप्रतिबन्धात्, सा च तवानिष्टेति । नापि तृतीयः, क्षीणमोहयोगत्वेन तत्प्रतिबन्धकत्वे कल्पनीये आवश्यकत्वाल्लाघवाच्च मोहक्षयस्यैव तथात्वकल्पनौचित्यात् । तथा चायोगिकेवलिनोऽपि कायस्पर्शान्मशकादिव्यापत्त्यभ्युपगमो दुर्घटः स्यादिति । न च सर्वजीवाहिंसालक्षणोऽतिशयोऽहिंसायाः केवलिस्थानत्वं वाऽयोगिकेवलिबहिर्भावेन क्वापि प्रतिपादितमस्ति, येन त्वया तत्र व्यभिचारणाय क्षीणमोहयोगत्वेन जीवघातप्रतिबन्धकत्वं कल्प्यमानं युक्तिक्षमं स्यादिति सर्वजीवाहिंसादिप्रतिपादनं सकलभावाकरणनियमनिष्ठाभिधानाभिप्रायेणैव नतु हिंसाया अपि सर्वथाऽभावाभिप्रायेण । अनाभोगस्तु न तज्जनको येन तदभावात्तदभावः स्यादिति तु शतशः प्रतिपादितमेवेति न किञ्चिदेतदिति स्मर्त्तव्यम् ।

किंच—मशकादिकर्तृकजीवघातं प्रत्यपि केवलियोगानां त्वया प्रतिबन्धकत्वं कल्प्यते तत् केवलं व्यसनितयैव, उत तादृशस्यापि तस्य दोषत्वात् । नाद्यः, व्यसनितामात्रकृतकल्पनाया अनादेयत्वाद् । न द्वितीयः, तादृशस्य जीवघातस्य सयोगिकेवलिनो दोषत्वेऽयोगिकेवलिनोऽपि दोषत्वाप्रच्यवादिति बहुतरमूहनीयम् ॥ ७३ ॥

अथ केवलिनो योगा एव रक्षाहेतव इति पराभ्युपगमप्रकारं विकल्प्य दूषयन्नाह—

[1]सा तस्स सरूवेणं वावारेणं च आइमे पक्खे ।
पडिलेहणाइहाणी बितिए अ असक्कपरिहारो ॥७४॥

व्याख्या—'सा तस्स' त्ति । सा जीवरक्षा तस्य केवलिनः शुभयोगस्य स्वरूपेण सत्तामात्रेण वा, अथवा व्यापारेण—जीवरक्षार्थं स्वस्य रक्षणीयजीवस्य वाऽन्यदेशनयनाभिमुखपरिणामेन । आदिमे प्रथमे पक्षे प्रतिलेखनादिहानिः ।

---

१ सा तस्य स्वरूपेण व्यापारेण चादिमे पक्षे ।
प्रतिलेखनादिहानिः, द्वितीये चाशक्यपरिहारः ॥ ७४ ॥

प्रतिलेखना हि केवलिनः प्राणैः संसक्तस्यैव वस्त्रादेः प्रवचने प्रसिद्धा । तदुक्तमोघनिर्युक्तौ–

" [१]पाणेहि उ संसत्ता पडिलेहा होइ केवलीणं तु ।
संसत्तमसंसत्ता छउमत्थाणं पडिलेहा ॥ १ ॥ " त्ति ॥ २५७ ॥

सा च स्वरूपेणैव योगानां जीवरक्षाहेतुत्वेऽनुपपन्ना स्यात्, तद्व्यापारं विनापि जीवरक्षोपपत्तौ तद्विविक्तीकरणप्रयासस्य पलिमन्थत्वाद्, न च पलिमन्थः केवलिनो युज्यते, अत एव प्रत्युपेक्षितमपि वस्त्राद्यवश्यभाविजीवसंसर्गं जानन् केवली पलिमन्थादेव नानागतमेव प्रत्युपेक्षते, किन्तूपभोगकाल एव प्रत्युपेक्षते इति व्यवस्थितम् । तदुक्तम्–

" [२]संसज्जइ धुवमेअं अपेहिअं तेण पुव्व पडिलेहे ।
पडिलेहिअंपि संसज्जइत्ति संसत्तमेव जिणा ॥ " ॥ २५८ ॥ त्ति ।

"एतद्व्याख्या यथा–संसज्यते प्राणिभिः संसर्गमुपयाति ध्रुवमवश्यमेतद्वस्त्रादि अप्रत्युपेक्षितं सत् तेन पूर्वमेव केवलिनः प्रत्युपेक्षणां कुर्वन्ति । यदि पुनरपि संविद्रते–इदमिदानीं वस्त्रादि प्रत्युपेक्षितमप्युपभोगकाले संसज्यते, तदा 'संसत्तमेव जिण' त्ति संसक्तमेव जिनाः केवलिनः प्रत्युपेक्षन्ते, न त्वनागतमेव, पलिमन्थादिति ॥ "

' पडिलेहणाइहाणी ' इत्यत्रादिना जीवरक्षाहेतूल्लङ्घनप्रलङ्घनादिव्यापारस्यापि केवलिनो वैयर्थ्यं बोध्यम्, नियतव्यापारेणैव केवलियोगाज्जीवरक्षेति । द्वितीये च पक्षेऽङ्गीक्रियमाणेऽशक्यपरिहारोऽप्यवश्यमभ्युपगन्तव्य इति गम्यम्, सर्वत्र जीवरक्षाव्यापारस्य स्वकायस्य जीवानां वा विविक्तीकरणपर्यवसितस्य दुष्करत्वात् ॥ ७४ ॥ तथाहि—

[३]ण हु सक्का काउं जे इह बायरवाउकायउद्धरणं ।
केवलिणावि विहारे जलाइ जीवाण य तयंति ॥७५॥

---

१ प्राणैः संसक्तानां प्रतिलेखा भवति केवलिनां तु ।
संसक्तासंसक्तानां छद्मस्थानां तु प्रतिलेखा ॥
२ संसज्यते ध्रुवमेतद् अप्रेक्षितं तेन पूर्वं प्रतिलेखयेयुः ।
प्रतिलेखितमपि संसज्यते इति संसक्तमेव जिनाः ॥
३ नैव शक्यं कर्तुमिह बादरवायुकायिकोद्धरणम् ।
केवलिनाऽपि विहारे जलादिजीवानां च तदिति ॥ ७६ ॥

व्याख्या—'णहु सक्क' त्ति। 'ण हु' नैव शक्यम्, दीर्घत्वं प्राकृतत्वात्, कर्तुं 'जे' इति पादपूरणार्थो निपातः। इह जीवघने लोके बादरवायुकायिकानां जीवानां स्वत एवोपनिपत्य केवलिनः कायमुपस्पृशतामुद्धरणं—विविक्तदेशसंक्रमणम्, केवलिनापि च पुनर्विहारे जलादिजीवानां तद्—उद्धरणम्, इति वाक्यार्थपरिसमाप्तौ।

अयं भावः—केवलियोगव्यापारस्य जीवरक्षाहेतुत्वे यत्र स्वाभावप्रयुक्तं तद्वैकल्यं तत्र तत्सार्थक्यमस्तु, यत्र तु जीवनिरन्तरतयैव जीवविविक्तीकरणमशक्यं तत्रावश्यंभाविन्यां जीवविराधनायां जिनस्य तद्योगानां वा को दोषः? नहि कारणान्तरवैकल्यप्रयुक्तकार्याभावेऽधिकृतकारणस्याशक्तोद्भावनमधीततर्कशास्त्रा विदधते। इत्थं सति दण्डसत्त्वेऽपि चक्राभावे घटाभावाद्दण्डस्यापि घटाशक्तताया उद्भावनीयत्वप्रसङ्गादिति ॥ ७५ ॥

अत्र परः शङ्कते—

[२]णणु जिणजोगाउ तहा जलाइजीवाण घायपरिणामो।
अचित्तपएसेणं जह गमणं पुप्फचूलाए ॥ ७६ ॥

व्याख्याः—'णणु' त्ति। नन्विति पूर्वपक्षे, यथा पुष्पचूलायाः साध्व्या अवाप्तकेवलज्ञानाया अपि मेघे वर्षत्यपि अतथाविधजलपरिणतिविशेषादचित्तप्रदेशे खे गमनं संपन्नम्, तथा विहारेऽपि जलादिजीवानां जिनयोगादघातपरिणामोऽस्तु, नह्येवमस्माकं काप्यनुपपत्तिरस्ति, केवलिमात्रजीवमात्रयोर्घात्यघातकसम्बन्धाभावे केवलिनोऽघातकस्वभावेन जीवानां चाघात्यस्वभावेन तथैव केवलिनो विहारादिनिर्वाहो भवति, यथा न पृथिव्यादिजीवानां स्वयोगेन भयादिलेशोऽपि सम्पद्यत इति ॥ ७६ ॥

अत्र समाधानमाह—

[२]भण्णइ सव्वं एयं भणियं णु तए परोप्परविरुद्धं।
दिट्ठंतियदिट्ठंता जमेगरूवा ण संपन्ना ॥ ७७ ॥

---

१ ननु जिनयोगात् तथा जलादिजीवानां घातपरिणामः।
अचित्तप्रदेशेन यथा गमनं पुष्पचूलायाः ॥ ७६ ॥

२ भण्यते सर्वमेतद् भणितं नु त्वया परस्परविरुद्धम्।
दार्ष्टान्तिकदृष्टान्तौ यदेकरूपौ न संपन्नौ ॥ ७७ ॥

व्याख्या—'भण्णइ' त्ति। भण्यते—अत्रोत्तरं दीयते, सर्वमेतत्, 'नु' इति वितर्के, त्वया परस्परविरुद्धं भणितम्, यद् यस्माद्दार्ष्टान्तिकदृष्टान्तौ नैकरूपौ सम्पन्नौ ॥ ७७ ॥

तथा हि—

[२]एगत्थ जलमचित्तं अण्णत्थ सचित्तयंति महन्नेउ।
अफुसिअगमणं तीएण सुअं अण्णस्स व जिणस्स।७८।

व्याख्याः—'एगत्थ'त्ति। एकत्र पुष्पचूलाया वर्षति मेघे गमनेऽचित्तं जलं साक्षादेव शास्त्रे प्रोक्तम्, अन्यत्र केवलिनां विहारादौ नद्युत्तारे च जलं सचित्तमिति महान् तयोर्दृष्टान्तदार्ष्टान्तिकयोर्भेदः। नहि केवलिनो विहारादावनियतनद्युत्तारे निरन्तरप्रवाहपतितं तज्जलमचित्तमेवेति क्वाप्युक्तमस्ति। अथैवमप्युक्तं नास्ति यदुत तीर्थकृद्व्यतिरिक्तोऽमुकनामा केवली नदीमुत्तीर्णवानिति, तीर्थकृतस्तु सुरसञ्चारितकनककमलोपरि गमनागमनपरिणतस्य जलस्पर्शस्याप्यभावात् तथा पि केवलिनो नद्युत्तरणसम्भावनायामचित्तप्रदेशैरेव नद्युत्तारः कल्प्यते, नहि स विविच्य व्यवहर्त्तुं परिहर्त्तुं च जानन् सचित्तप्रदेशैर्नदीमुत्तरति; केवलित्वहानेः। तस्मात्पुष्पचूलादिदृष्टान्ते नद्यादौ यथास्थितमेव जलं जलवायुसूर्यकिरणादिलक्षणस्वकायपरकायशस्त्रादिना तथाविधकालादिसामग्रीयोगेन कदाचिदचित्ततया परिणमति; पुनरपि तदेव जलं सचित्तभवनहेतुकालादिसामग्रीयोगेन सचित्ततया पि परिणमति। तत्र दृष्टान्तः सम्मूर्च्छिममनुष्योत्पत्तिस्थानान्येव, परमेतत्परिणतिस्तथाभूता केवलिगम्येति। केवली तथापरिणतं जलं निश्चित्य नदीमुत्तरतीति कल्प्यत इति चेत्, सर्वमेतदभिनिवेशविजृम्भितम्। स्वकर्णाश्रवणमात्रेण केवलिनो नद्युत्तारस्य निषेद्धुमशक्यत्वाद्। अन्ततोऽनन्तानां जलमध्येऽन्तकृत्केवलिनामपि श्रवणेन सर्वत्र जलाचित्तता कल्पनस्याप्रामाणिकत्वात्। किञ्च सर्वत्र स्वोत्तरणादिकाले जलमचित्ततया परिणतं तदाश्रितपनकत्रसादिजीवाश्चाप्क्रान्ता इति किं तव कर्णे केवलिनोक्तम्? येनेत्थं कल्पयसि। पुष्पचूलादृष्टान्तेन तथा कल्पयामीति चेत्, तर्हि दृष्टान्तमात्रेण साध्यं साधयन्नपूर्वनैयायिकत्वमात्मनः प्रकटीकर्त्तुमुद्यतोऽसि। केवलियोगानामघातकत्वान्यथानुपपत्त्यैव तथा कल्पयामीति

---

१ एकत्र जलमचित्तमन्यत्र सचित्तमिति महान् भेदः।
अस्पृष्टगमनं तस्या न श्रुतमन्यस्य वा जिनस्य ॥

चेत्, तर्हि जलाचित्ततोकल्पने तव का व्यसनिता ? सचितमेव जलं केवलियोगमवेक्ष्याघात्यस्वभावं त्वया किं न कल्प्यते ? न खलु तव श्रुतपरम्पराङ्कुशरहितस्याद्दृष्टार्थकल्पने बाधकमस्ति, न चेदेवं तदा सचित्तवायुस्पर्शेऽपि तव केवलियोगानामघातकत्वसमर्थनं कथं स्याद् ? इति । अथ वायुरपि सचित्ताचित्ततया प्रवचने द्विप्रकार उक्त इति सचित्तवायुस्पर्शमपि भगवतो नाभ्युपगच्छामः, किं त्वचित्तवायुस्पर्शमेव, अन्यथा तु भगवत्कायस्पर्शेनापि पृथिव्यादीनां भयोत्पत्तिः स्याद्, न चैवं सम्भवति । यदस्माकमभ्युपगमः--

" [१]पुढवीपमुहा जीवा उप्पत्तिप्पमुहभाइणो हुंति ।
जह केवलिजोगाओ भयाइलेसंपि ण लहंति ॥ १ ॥ "

इति चेत्, हन्तैवं सचित्तास्पर्श एव भगवतोऽतिशयः प्राप्तः, तत्राह–सचित्तस्यास्पर्शो न पुनर्जिनातिशयः सिद्धः, भक्तिभरनम्रमनुष्यादिस्पर्शस्य भगवति सार्वजनिनत्वाद् । अथ न सचित्तस्पर्शाभावमात्रं भगवतोऽतिशयः, किन्तु यादृशसचित्तस्पर्शः साधूनां निषिद्धस्तादृशस्पर्शाभाव एवेति सचित्तजलादिस्पर्शाभावो भगवतोऽतिशयसिद्ध इति नानुपपत्तिरिति ॥ ७८ ॥

तत्राह--

सोइसओ कायकओ जागकओ वा हविज्ज केवलिणो ।
दुहओ वएिणयपुत्ताइणायओ पायमविरोहो ॥ ७९ ॥

व्याख्याः--' सोइसओ ' त्ति । स जलादिस्पर्शाभावलक्षणोऽतिशयः कायकृतः–कायनिष्ठफलविपाकप्रदर्शको योगकृतो वा–योगनिष्ठफलविपाकप्रदर्शको वा केवलिनो भवेद् । उभयतोऽप्यन्निकापुत्रादिज्ञाततः प्रकटविरोध एव । नह्यन्निकापुत्र–गजसुकुमारादीनामन्तकृत्केवलिनां सयोगिनामयोगिनां वा सचित्तजलतेजस्कायिकजीवादिस्पर्शस्त्वयापि नाभ्युपगम्यते; केवलं योगवतामयोगवतां वा तेषामन्तकृत्केवलिनां कायस्पर्शात्तज्जीवविराधनाऽविशेषेण घुणाक्षरन्यायेन स्वयमेव भवता स्वग्रन्थे क्वापि लिखिता; स्वाभ्युपगमरीत्या तु त्रयोदशगुणस्थानमुल्लङ्घ्य चतुर्दशगुणस्थाने वक्तुमुचितेति विशेषः । परतन्त्रस्यैवायं जलादि-

---

१ पृथिवीप्रमुखा जीवा उत्पत्तिप्रमुखभाजो भवन्ति ।
यथा केवलियोगाद् भयादिलेशमपि न लभन्ते ॥

स्पर्शः केवलिनो नतु स्वतन्त्रस्येति चेद् । नेयं भाषा भवतस्त्राणाय, " खीणम्मि अंतराए णो से य असक्कपरिहारो " त्ति वाङ्मात्रेणाशक्यपरिहाराभावमावेदयत आयुष्मतः केवलिनः परतन्त्रतयापि जलादिस्पर्शतज्जीवविराधनयोरभ्युपगन्तुमनुचितत्वाद्, अन्यथा केवली यत्र स्थितस्तत्रागन्तुकवायोरपि सचित्तताया अनिषेधप्रसङ्गात्; तस्मात् सचित्तजलादिस्पर्शेन केवलिनः सयोगस्याप्यवश्यंभाविनी जीवविराधना वा स्वीक्रियताम्, तद्योगाक्रान्तानामपि वा जीवानामघातपरिणाम एव (मो वा) स्वीक्रियतां नतु तृतीया गतिरस्ति । तत्र च प्रथमः पक्षोऽस्मन्मतप्रवेशभयादेव त्वयानाभ्युपगन्तव्य इति द्वितीयः पक्षस्तवाभ्युपगतुमशिष्यते (त) ॥

तत्राह—

एवं सव्वजिआण जोगाओ चिय अघायपरिणामे ।
केवलिणो उल्लंघणपलंघाईण वेफल्लं ॥ ८० ॥

व्याख्या—' एवं ' ति । एवं जलादिस्पर्शाभावाभ्युपगमस्य विरोधग्रस्तत्वे सर्वजीवानां केवलिनो योगादेवाघातपरिणामे स्वीक्रियमाणे उल्लङ्घनप्रलङ्घनादीनां व्यापाराणां वैफल्यं प्रसज्यते । स्वावच्छिन्नप्रदेशवर्त्तिजीवेषु केवलियोगक्रियाजनितात् केवलियोगजन्यजीवघातप्रतिबन्धकपरिणामादेव जीवघाताभावोपपत्तौ हि जीवाकुलां भूमिं वीक्ष्य केवलिन उल्लङ्घनादिकमकर्त्तव्यमेव स्यात्, प्रत्युत तेषु स्वयोगव्यापार एव कर्त्तव्यः स्यात, तस्य जीवरक्षाहेतुत्वादिति महदसमञ्जसमापद्यते । यदि चोल्लङ्घनादिव्यापारः शास्त्रसिद्धः केवलिनोऽप्यभ्युपगन्तव्यस्तदा केवलियोगानां न स्वरूपतो रक्षाहेतुत्वं, किन्तु नियतव्यापारद्वारेति तदविषयावश्यंभाविजीवविराधना दुर्निवारा । यदि च केवलियोगानां स्वरूपत एव जीवरक्षाहेतुत्वम्, उल्लङ्घनादिव्यापारश्च न तस्य जीवरक्षामात्रप्रयोजनः, किन्तु स्वव्यवहारानुपातिश्रुतव्यवहारपरिपालनमात्रप्रयोजन इति विभाव्यते, तदा तादृशादपि ततो जीवानामपसरणं भवति नवेति वक्तव्यम् । आद्ये साऽपसरणक्रिया भयपूर्विकेति केवलियोगात्पृथिव्यादिजीवाभयलेशमपि न प्राप्नुवन्तीति स्वप्रतिज्ञाव्याघातः । अन्त्ये चादृष्टपरिकल्पना, नह्युल्लङ्घनादिक्रिययोल्लङ्घमानादिजीवानामनपसरणं क्वापि दृष्टमिति । किंच—एवमादिपदग्राह्यप्रतिलेखनावैफल्यं दुरुद्धरमेव, जीवसंसक्तवस्त्रादेर्विविक्तीकरणेनैव तत्साफल्यसम्भवाद् । न च तत्केवलियोगाज्जीवानामनपसरणस्वभावकल्पने निर्वहतीति ॥ ८० ॥

एवं चापसरणादिद्वारं विना स्वरूपत एव केवलियोगानां जीवरक्षाहेतुत्वे उल्लङ्घनादिव्यापारवैकल्यापत्तौ व्यवस्थापितायां केवलियोगव्यापारकाले जीवानां स्वत एवापसरणस्वभावत्वं यत्परेण कल्पितं तदपि निरस्तमित्याह--

एएण मच्छियाई सहावकिरिआपरायणा हुंति ।
ण हु जिणकिरियापेरिआकिरियं जंतित्ति पमिसिद्धं ।८१।

व्याख्या--' एएण मच्छिआइ ' त्ति । एतेनोक्तहेतुना मक्षिकादयो मक्षिकापिपीलिकादंशमशकादयः स्वभावक्रियापरायणाः सहजसमुत्थगमनादिक्रियाकारिणो भवन्ति, ' णहु ' नैव जिनस्य या क्रिया गमनागमनादिरूपा तया प्रेरिता-तन्निमित्तका या क्रिया तां यान्ति-केवलियोगहेतुकस्वशरीरसङ्कोचमपि न कुर्वन्तीत्यर्थः । केवलिनो हि गमनागमनादिपरिणतौ पिपीलिकादयः क्षुद्रजन्तवः स्वत एवेतस्ततोऽपसरन्ति, अपसृता वा भवन्ति । यदि च कदाचिदसातवेदनीयकर्मोदयेन दंशमशकादयो नापसरन्ति, तदा केवली तत्कर्मक्षयनिमित्तं तत्कृतवेदनां सम्यगधिसहते, केवलज्ञानोत्पत्तिसमय एव तेनैव प्रकारेणात्मोयासातवेदनीयकर्मक्षयस्य दृष्टत्वात् ।

ननु केवलियोगजनितां किमपि क्रियां कुर्वन्ति तदिदमाह-

" तेणं मच्छिअपमुहा सहावकिरिया परायणा हुंति ।
ण य जिणकिरियापेरिअकिरियालेसंपि कुव्वंति " ॥-

इत्येतत् प्रतिषिद्धं, स्वत एव जीवानामपसरणस्वभावत्वे केवलिन उल्लङ्घनादिव्यापारवैफल्यापत्तेर्वज्रलेपत्वाद् । यच्च केवलियोगव्यापारमपेक्ष्य जीवानां स्वतोऽपसरणस्वभावत्वकल्पनं तदपां दहनान्तिके दाहजननस्वभावकल्पनसदृशमेव । अथ केवलिनः प्रतिलेखनादिव्यापाराज्जीवानामपसरणस्य प्रमाणसिद्धत्वात् केवलिक्रियानिमित्तकं क्रियामात्रं न तेषां प्रतिषिध्यते, किन्तु भयपूर्विका क्रिया प्रतिषिध्यते; नच्चभयदस्य भगवतः प्राणिनां साक्षात्त्रासजनकव्यापाररूपं भयदानं सम्भवति; परेषां भापनस्य भयमोहनायाश्रवत्वात्, ततः केवलिक्रियातः प्रतिलेखनादिव्यापारकाले या प्राणिनामपसरणादिक्रिया भवति सा न भयमूलेति स्वत एवेत्युच्यत इति चेत् । न, भयं विनैव केवलियोगात् सत्त्वापसरणकल्पने हिंसां विना तन्मरणकल्पनेऽपि बाधकाभावाद्, अदृष्टकल्पनाया उभयत्र तुल्यत्वाद् । आवश्यकक्रियावश्यंभाविना च प्राणिभयेन च यदि भयमोहनीयाश्रवभूतं भा-

पनमुच्यते, तदा तव मतेऽपि सूक्ष्मसम्परायोपशान्तमोहयोर्द्रव्यहिंसाऽभ्युपगमेन भाषनावश्यंभावाद् भयमोहनीयकर्मबन्धसम्भवे षड्विधबन्धकत्वमेकविधबन्धकत्वं च भज्येत। न च जानतो भयप्रयोजकव्यापाररूपमेव भाषनं भयमोहनीयाश्रव इति नायं दोष इति वाच्यम्, जानतोऽपि भगवतो योगात् त्रिपृष्ठवासुदेवभवविदारितसिंहजीवस्य पलायननिमित्तकभयश्रवणात्। यत्तु तस्य भयहेतवो न श्रीमहावीरयोगाः, किंतु तदीययोगा एव, यथाऽयोगिकेवलिशरीरान्मशकादीनां योगा एव कारणमिति कल्पनं तत्तु स्फुटातिप्रसङ्गग्रस्तम्। शक्यं ह्येवं वक्तुं, साधुयोगादपि न केषामपि भयमुत्पद्यते, किन्तु स्वयोगादेवेति। अथ भगवत्यभयदत्वं प्रसिद्धम्, तदुक्तं शक्रस्तवे–'अभयदयाणं'ति। एतद्वृत्त्येकदेशो यथा–"प्राणान्तिकोपसर्गकारिष्वपि न भयं दयन्ते, यद्वाऽभया सर्वप्राणिभयत्यागवती दया कृपा येषां तेऽभयदयास्तेभ्य इति। तन्निर्वाहार्थं केवलियोगादन्येषां न भयोत्पत्तिरिति कल्प्यते, साधुषु च तथाकल्पने न प्रयोजनमस्तीति चेद्, न। अस्मिन्नप्यर्थे सम्यग्व्युत्पन्नोऽसि, किं न जानासि? संयमस्यैवाभयत्वम्, येन संयमिनां संयमप्रामाण्यादेवान्यभयाजनकयोगत्वं न कल्पयसि। न जानामीति चेत्, तर्हि "तं नो करिस्सामि समुट्ठाए मंता मइमं अभयं विदित्ता"–इत्याचाराङ्गसूत्र एवाभयपदार्थं पर्यालोचय, येनाज्ञाननिवृत्तिः स्याद्, "अविद्यमानं भयमस्मिन् सत्त्वानामित्यभयः संयमः' इति ह्युक्तं वृत्ताविति ॥ ८१ ॥

परमतस्यैवोपपादकान्तरं निराकरोति—

जंपि मयं णारंभो लद्धिसेसाउ चेव केवलिणो।
तं पि इमीइ दिसाए णिराकयं होइ णायव्वं ॥ ८२ ॥

व्याख्या—'जं पि मयं'ति। यदपि मतं लब्धिविशेषादेव केवलिनो नारम्भः, प्रसिद्धं खल्वेतद्–यदुत घातिकर्मक्षयोपशमावाप्तजलचारणादिनानालब्धिमतां साधूनां नदीसमुद्रादिजलज्वलनशिखोपवनवनस्पतिपत्रपुष्पफलादिकमवलम्ब्य यदृच्छया गमनागमनादिपरायणानामपि जलजीवादिविराधना न भवतीति। तदुक्तं 'खीरासवमहुआसव'–इत्यादि चतुःशरणगाथावृत्तौ–"चारणेत्यादि यावत् केचित् पुष्पफलपत्रहिमवदादिगिर्यग्निशिखानीहारावश्यायमेघवारिधारा–मर्कटतन्तुज्योतीरश्मिलताद्यालम्बनेन गतिपरिणामकुशलास्तथा वापीनद्यादिजले तज्जीवानविराधयन्तो भूमाविव पादोत्क्षेपनिःक्षेपकुशला जलचारणा

इत्यादि "। कथं तर्हि घातिकर्मक्षयावाप्तलब्धिभाजः केवलिनो जीवविराधनासम्भवः ? एकस्या अपि क्षायिकलब्धेः सर्वक्षायोपशमिकलब्ध्यात्मकत्वेन क्षायोपशमिकलब्धिसाध्यस्य जीवरक्षादिकार्यमात्रस्य साधकत्वात् । सा च क्षायिकी लब्धिर्भगवतो जोवरक्षाहेतुरनुत्तरचारित्रान्तर्भूता द्रष्टव्या। तत्प्रभावादेव न केवलिनः कदाप्यारम्भ इति। तदपि मतमनया दिशा निराकृतं ज्ञातव्यं भवति, लब्धिस्वभावादेव जोवरक्षोपपत्तौ केवलिन उल्लङ्घनादिव्यापारवैयर्थ्यापत्तेरेति भावः ॥८२॥

दिग्दर्शितमेव दूषणं विकल्प्य स्फुटीकुर्वन्नाह--

तं खलु जवजीवंतो पमायवं तुह मए जिणो हुज्जा ।
सेलेसीए वि फलं ण तस्स जवजीवणाभावे ॥ ८३ ॥

व्याख्या--' तं खलु ' त्ति । तं लब्धिविशेषमुपजीवन्-जीवरक्षार्थं व्यापारयन् खलु निश्चितं जिनः केवली तव मते प्रमादवान् स्याद्, लब्ध्युपजीवनं हि प्रमत्तस्यैव भवतीति शास्त्रमर्यादा । अस्तु तर्हि स लब्धिविशेषोऽनुपजीवित एव जोवरक्षाहेतुः, क्षायिकीनां हि लब्धीनां न प्रयुञ्जना भवति, तासामनवरतमेकस्वभावेनैव सर्वकालीनत्वात्, तासां च फलवत्त्वमपि तथैव । तदितराणां तु कादाचित्कत्वेन फलवत्त्वात् प्रयुञ्जति विशेषः-इत्येव ह्यस्मन्मतमित्यत्राह-तस्य लब्धिविशेषस्योपजीवनाभावे तु शैलेश्यामपि फलं जीवरक्षारूपं नास्ति, तदानीं तत्कायस्पर्शेन मशकादिव्यापत्तेस्त्वयापि स्वीकारात्, किं पुनः सयोगिकेवलिनि वाच्यम्; तथा चोपजीवनानुपजीवनविकल्पव्याघातात् तादृशलब्धिविशेषकल्पनमप्रामाणिकमेवेति भावः ॥ ८३ ॥

अथ चारित्रमोहनोयकर्मक्षयजनिता जोवरक्षाहेतुर्लब्धिर्योगगतैव कल्प्यत इति शैलेश्यवस्थायां नोक्तदोष इत्याशङ्कायामाह--

जोगगया सा लद्धी अजोगिणो खाइगावि जइ णत्थि ।
ता तक्कम्मस्सुदओ तस्सेव हवे पराहुत्तो ॥ ८४ ॥

व्याख्या--' जोगगय ' त्ति । सा जोवरक्षाहेतुर्लब्धिर्योगगतेति कृत्वा क्षायिक्यपि यदि अयोगिनोऽयोगिकेवलिनो नास्ति, तदा तस्यैवायोगिकेवलिन एव तत्कर्मणश्चारित्रमोहनोयकर्मण उदयः पराङ्मुखो भवेत्, चारित्रमोहक्षयकार्याभावस्य चारित्रमोहोदयव्याप्यत्वादिति भावः ॥ किंच-यदि लब्ध्युपजीविजल-

चारणादिषु परिदृष्टा जीवविराधनाऽभावलब्धिरनुपजीव्या यदि केवलिनि कल्प्यते, तदा तादृशजङ्घाचारणादिषु परिदृष्टाऽतिशयचरणलब्धिरप्यनुपजीव्या केवलिनि कस्मान्न कल्प्यते ? तस्या उपजीव्यत्वनियमान्न तत्कल्पनं केवलिनि कर्तुं शक्यत इति चेद्, तदेतदन्यत्रापि तुल्यमिति स्वयमेव विभावय । तस्मान्नियतयोगव्यापारादेव भगवतां जीवरक्षा, नतु स्वरूपत इत्यवश्यंभाविन्यां जीवविराधनायां न किञ्चिद्बाधकमिति स्थितम् ॥ ८४ ॥

नन्वेवमवश्यभाविन्याऽपि जीवविराधनया केवलिनोऽष्टादशदोषरहितत्वं न स्याद्, हिंसादोषस्य तदवस्थत्वाद् । न 'देवोऽष्टादशदोषरहित एव'–इत्यत्राप्येकान्तवादो जैनानामनिष्ट इति शङ्कनीयम्, अनेकान्तवादस्याप्यनेकान्तत्वेनात्रैकान्ताभ्युपगमेऽपि दोषाभावादित्याशङ्कायामाह––

दव्वारंभं दोसं अट्ठारसदोसमज्झयारम्मि ।
जो इच्छइ सो इच्छइ णो दव्वपरिग्गहं कम्हा ॥ ८५ ॥

'दव्वारंभं'ति । अष्टादशदोषमध्ये यो द्रव्यारम्भं दोषमिच्छति, स द्रव्यपरिग्रहं दोषं कस्मान्नेच्छति ? तथा च धर्मोपकरणसद्भावाद् द्रव्यपरिग्रहेण यथा न दोषवत्त्वं तथा द्रव्यारम्भेणापि न दोषवत्त्वम्, भावदोषविगमादेव भगवति निर्दोषत्वव्यवस्थितेरिति भावनीयम् । यच्चोक्तं निर्दोषत्वे भगवतो नानेकान्त इति, तदसद्; दोषविभागकृतानेकान्तस्य तत्राप्यविरोधाद् । यच्चानेकान्तस्यानेकान्तत्वमधिकरणानियमापेक्षयोद्भावितं तत्केनाभिप्रायेण ? इति वक्तव्यम्, अन्ततः स्वपररूपापेक्षयाऽप्यनेकान्तस्य सर्वत्र सम्भवाद्, अत एवात्मानात्मापेक्षया सर्वत्रानेकान्तो वाचकपुङ्गवेनोक्तः । द्रव्यात्मेत्युपचारः सर्वद्रव्येषु नयविशेषेण, आत्मादेशादात्मा भवति, अनात्मा परादेशादिति । अनेकान्तस्यानेकान्तत्वं तु स्याद्वाङ्नयसप्तभङ्गीवाक्यघटकैकतरभङ्गावच्छेदकरूपापेक्षया व्यवस्थितम् । अत एव––

" भयणा वि हु भइअव्वा जह भयणा भयइ सव्वदव्वाइं ।
एवं भयणाणियमो वि होइ समयाविरोहणया ॥ " त्ति

सम्मतिगाथायां भजनाऽभजनायाः समयाविरोधना । " इमाणं भंते ! रयणप्पभापुढवी किं सासया असासया ? गो ! सिय सासया, सिअ असासया " इति । स्याद्वाददेशनायां द्रव्यार्थतया शाश्वत्येव, पर्यायार्थतया त्वशाश्वत्येवेत्यधि-

कृतभङ्गरूपनिर्द्धारणापेक्षया वृत्तौ व्याख्याता । निःक्षेपादिप्रपञ्चोऽपि हि सर्वत्र स्याद्वादघटनार्थमेव, यतः प्रस्तुतार्थव्याकरणादप्रस्तुतार्थापाकरणाच्च निःक्षेपः फलवानुच्यते, ततश्च स्याद्वादसिद्धिरिति । अत एव सर्वत्रौत्सर्गिकी स्याद्वाददेशनैवोक्तेति सम्मत्यादिग्रन्थानुसारेण सूक्ष्ममीक्षणीयम् ॥ ८५ ॥

अथ य एवमवश्यंभाविन्याऽपि जीवविराधनया सद्भूतदोषमुत्प्रेक्ष्य भगवतोऽसद्दोषाध्यारोपणं कुर्वन्ति तेषामपायमाविष्कुर्वन्नाह--

मिच्छादोसवयणओ संसारमविमहाकम्मिं ।
जिणवरणिंदारसिआ भमिहिंति अणोरपारम्मि॥८६॥

व्याख्या--' मिच्छादोसवयणओ 'त्ति । मिथ्यादोषवचनाद्--असद्भूतदोषाभिधानाद् जिनवरनिन्दारसिका अभव्या दूरभव्या वा जनाः संसाराटवीमहागहनेऽनर्वाक्पारे भ्रमिष्यन्ति, तीव्राभिनिवेशेन तीर्थंकराशातनाया दुरन्तानन्तसंसारहेतुत्वात् । उक्तं च--' तित्थयरपवयणसुअं ' इत्यादि ८६ ॥

अथ केवलि--छद्मस्थलिङ्गविचारणया न केवलिनोऽवश्यंभाविनी विराधना सम्भवतीति व्यामोहोऽपि न कर्त्तव्यः, सम्यग्विचारपर्यवसानत्वात्तस्य, इत्यभिप्रायवानाह--

जोवि य जायइ मोहो छउमत्थजिणाण लिंगवयणाउ ।
उवउत्तस्स ण चिट्ठइ सोवि य परमत्थदिट्ठीए ॥८७॥

' जो वियत्ति' । योऽपि च छद्मस्थजिनयोर्लिङ्गवचनात् स्थानाङ्गस्थान्मोहो जायते दुर्व्याख्यातुर्व्याख्यां शृण्वतामिति शेषः, सोऽपि परमार्थदृष्टावुपयुक्तस्य न तिष्ठति; अपण्डितव्याख्याकृतभ्रमस्य पण्डितकृतव्याख्याऽवधारणमात्रनिवर्त्तनीयत्वादिति भावः । तत्र छद्मस्थकेवलिलिङ्गवचनमित्थं स्थानाङ्गे व्यवस्थितम्--" सत्तहिं ठाणेहिं छउमत्थं जाणेज्जा । तं०--पाणे अइवाइत्ता भवति, मुसं वदित्ता भवति, अदिन्नमादित्ता भवति, सद्दफरिसरसरूवगंधे आसाइत्ता भवति, पूआसक्कारमणुवूहित्ता भवइ,'इमं सावज्जं'ति पण्णवेत्ता पडिसेवेत्ता भवति,णो जहावादी तहाकारी यावि भवति । सत्तहिं ठाणेहिं केवली जाणिज्जा । तं०--णो पाणे अइवाइत्ता भवइ, जाव जहावाई तहाकारी यावि भवइ " इति । एतद्वृत्तिर्यथा--"भयं

च छद्मस्थस्यैव भवति, स च यैः स्थानैर्ज्ञायते तान्याह–'सत्तहिं ठाणेहिं' इत्यादि। सप्तभिः स्थानैर्हेतुभूतैश्छद्मस्थं जानीयात्। तद् यथा–प्राणानतिपातयिता–तेषां कदाचिद् व्यापादनशीलो भवति। इह च प्राणातिपातनमिति वक्तव्येऽपि धर्मधर्मिणोरभेदादतिपातयितेति धर्मिनिर्दिष्टः। प्राणातिपातनाच्छद्मस्थोऽयमित्यवसीयते। केवली हि क्षीणचारित्रावरणत्वान्निरतिचारसंयमत्वादप्रतिषेवित्वान्न कदाचिदपि प्राणानामतिपातयिता भवति। इत्येवं सर्वत्र भावना कार्या। तथा मृषा वदिता भवति। अदत्तमादाता–गृहीता भवति। शब्दादीनास्वादयिता भवति। पूजासत्कारौ–पुष्पार्चनवस्त्राद्यर्चनेऽनुवृंहयिता–परेण स्वस्य क्रियमाणस्य तस्यानुमोदयिता तद्भावे हर्षकारीत्यर्थः। तथेदमाधाकर्मादि सावद्यं सपापमित्येवं प्रज्ञाप्य तदेव प्रतिषेविता भवति। तथा सामान्यतो नो यथावादी तथाकारी–अन्यथाभिधायान्यथा कर्त्ता भवति। चापीति समुच्चये। एतान्येव विपर्यस्तानि केवलिगमकानि भवन्ति। इत्येतत्प्रतिपादनपरं केवलिसूत्रं सुगममेवेति।"

अत्रेयं परस्य प्रक्रिया—छद्मस्थसंयतः परीक्षावसरेऽप्रमत्त एव पक्षीकर्त्तव्यः, तत्रैव चक्षुःपक्ष्मनिपातमपि सूत्रोक्तयतनया कुर्वाणे 'किमयं छद्मस्थ उत केवली' इति संशये सति छद्मस्थत(ता)साधनाय लिङ्गापेक्षोपपत्तेः, उक्तस्वरूपरहितस्य तु निद्राविकथादिप्रमादवतश्छद्मस्थत्वेन संशयाभावान्न परीक्षायां प्रवेश इति न तस्य पक्षत्वम्, आह—

"छउमत्थो पुण केवलिकप्पो अपमत्तसंजओ णेओ।
सो विअ संजमजोगे उवउत्तो सुत्तआणाए॥" त्ति।

लिंगानि च तत्र पञ्चमहाव्रतातिक्रमापवादानाभोगविषयसप्तस्थानप्रतिपादितानि द्रव्यप्राणातिपातादिरूपाण्येव ग्राह्याणि, नतु भावप्राणातिपातादिरूपाण्यपि, तेषां छद्मस्थज्ञानागोचरत्वेन लिङ्गत्वाभावाद्। लिङ्गं हि छद्मस्थज्ञानहेतवे प्रयुज्यते, तच्च ज्ञातमेव ज्ञापकं नाज्ञातमपीति, तानि च मोहनीयाविनाभावीनि यावदुपशान्तवीतरागं भवन्ति, न परतोऽपि; तत ऊर्ध्वं मोहनीयसत्ताया अप्यभावाद्। आह च—

"छउमत्थनाणहेऊ लिंगाइं दव्वओ ण भावाओ।
उवसंतवीयरायं जा तावं ताणि जाणाहिं॥" ति।

नन्वपूर्वादिषु पञ्चसु गुणस्थानकेषु चतस्रोऽपि भाषा भवन्तीति कर्मग्रन्थे भ-

णितम्, तथा च सिद्धं क्षीणमोहस्यापि मृषा भाषणम्, तच्च छद्मस्थत्वावबोधकं लिङ्गमेव, तत्कथमुच्यते छद्मस्थत्वज्ञापकलिङ्गानि यावदुपशान्तवीतरागमेव भवन्ति ? इति चेद् । मैवम्, छद्मस्थज्ञानगोचरस्यैव मृषाभाषणस्य लिङ्गत्वेनाभिमतत्वात् । तच्च द्रव्यतो मृषाभाषणं क्षीणमोहस्य न भवति, क्रोधादिजन्यत्वाद् । यदागमः–" सइं भंते! मुसावायं पच्चक्खामि । से कोहा वा लोहा वा, भया वा, हासा वा, " इत्यादि क्षीणमोहस्य च क्रोधादयो न भवन्तीति कारणाभावाद् द्रव्यतो मृषाभाषणस्याभावः; तथा च भावतो मृषाभाषणस्य सुतरामभावः, तस्य मोहनीयोदयजन्यत्वात् । तथा च क्षीणमोहमात्रस्य द्रव्यतो भावतो वा मृषाभाषणं न भवत्येव; संयतानां जीवघातादावनाभोगसहकृतमोहनीयकर्मणो हेतुत्वात्; मोहनीयाभावे चानाभोगो वास्तवमृषाभाषणं प्रत्यकारणं सन्नपि सम्भावनारूढमृषाभाषणं प्रति कारणं भवत्येव, अनाभोगस्य तथास्वभावस्यानुभवसिद्धत्वात्; तेन क्षीणमोहस्याप्यनाभोगहेतुकं सम्भावनारूढजीवविराधनावन्मृषाभाषणमपि भवत्येव; तच्च छद्मस्थज्ञानागोचरत्वेन छद्मस्थत्वावबोधकं लिङ्गं न भवति, तस्य केवलज्ञानगम्यत्वात्; न च सम्भावनारूढस्य मृषाभाषणस्य मृषाभाषणत्वव्यपदेशो न भविष्यतीति शङ्कनीयम्, सम्भावनारूढं मृषाभाषणमिति भणित्वापि मृषाभाषणव्यपदेशो न भविष्यतीति भणतो वदद्व्याघातापत्तेः । किञ्च–जैनानामलोकेऽपि कल्पितलोकस्याङ्गीकारे कल्पनाया इव सम्भावनाया अपि प्रामाण्यमेव, तत एव कालशौकरिकस्य कल्पितमहिषव्यापादनं महिषव्यापादनतया भगवता श्री महावीरेण भणितमिति प्रवचने प्रसिद्धिः; तस्मात् कर्मबन्धहेतुत्वेऽपि सम्भावनारूढमृषाभाषणस्य स्नातकचारित्रप्रतिबन्धकत्वेन द्रव्यमृषाभाषणस्येव दोषत्वम्, चित्रलिखितायां नार्यां नारीत्वव्यपदेशस्येव मृषावादव्यपदेशस्य च विषयत्वं प्रतिपत्तव्यमिति न दोष इति; तस्माद् यावदुपशान्तवीतरागमेव छद्मस्थत्वज्ञापकानि लिङ्गानीति स्थितम् । तानि च प्रत्यक्षगम्यानि मिथ्याकारादिलिङ्गगम्यानि वा; अयं साधुः साक्षात् सम्भावनया वा प्राणातिपातादिप्रतिषेवितैव, मिथ्याकारान्यथानुपपत्तेः, अस्मदादिवद्–इत्येवं लिङ्गगम्येनापि प्राणातिपातादिना लिङ्गेन 'छद्मस्थोऽयं संयतः' इत्येवं निश्चयसम्भवात् । स च मिथ्याकारः कादाचित्क एव जीवघातादौ भवति, पुनरकरणाभिप्रायेण तस्य फलवत्त्वात्, सार्वदिकस्य तु तस्य सम्भवे सर्वविरतिपरिणामस्यैवानुपपत्तिः; प्रतिसमयमनवरतं जीवघातो भवत्येव इत्यभिप्रायस्य

तत्प्रतिबन्धकत्वादिति । अत्र च छद्मस्थत्वज्ञापकलिङ्गानां सप्तानामपि मोहनीयकर्मजन्यत्वेन परस्परानुविद्धानां स्वरूपयोग्यतया निश्चयतः सर्वकालीनत्वेऽपि फलोपहितयोग्यतया व्यवहारेणानवरतं नियमाभावोऽप्याद्येषु पञ्चस्वेव, चरमयोस्तु द्वयोर्लिङ्गयोः सामान्यतः सर्वकालीनत्वेन सूक्ष्मदृशां पुरःस्फूर्त्तिकत्वात्, ताभ्यां छद्मस्थत्वनिर्णयो विवक्षितपरीक्षाकाले सुलभ एव । तथा हि—इच्छाकारादिसाधुसामाचारोपरायणस्य छद्मस्थसंयतस्य गमनागमनस्थितिशयनाशनासनप्रत्युपेक्षणादिक्रियासु चक्षुषा पुनः पुनर्निरीक्षणं, (निरीक्ष्य) च यथासम्भवं रजोहरणादिना प्रमार्जनं, प्रमृज्य च हस्तपादाद्यवयवानां यथास्थानेऽभ्यसनं त्वक्परावर्त्तनं, तथैव वस्त्रपात्राद्युपकरणानामादाननिक्षेपणम्, प्रमृजतश्च रजोहरणादिक्रियया मक्षिकापिपीलिकादीनां भयत्रासोत्पादनेनेतस्ततो नयनं चेत्याद्यनेकप्रकारमनुष्ठानं सम्भावितभाविजीवघातादिदोषभयजन्यं कालमधिकृत्यानियतमप्यन्यतमत्किंचिदनवरतं भवत्येव, तत्रापि पिपीलिकादिजन्तूनां भयत्रासोत्पादनं सावद्यमिति प्रज्ञाप्य जीवघातवर्जनाभिप्रायवतोऽप्यशक्यपरिहारेण तत्प्रतिषेवणं षष्ठलिङ्गात्मकं छद्मस्थत्वाभिव्यञ्जकं सामान्यतः सर्वकालीनसुलभमेव । तत्प्रतिषेवणे च संयतो न यथावादी तथा कर्त्तेत्यपि मन्तव्यम्, अशक्यपरिहारेणापि प्रत्याख्यातस्य सावद्यस्य प्रतिषेवणादिति केवलिनोऽपि परीक्षायां विपरीतानि छद्मस्थलिङ्गानि द्रव्यरूपाण्येव ग्राह्याणि, तेषामेव छद्मस्थज्ञानगोचरत्वेनानुमितिजनकत्वात् । यथाहि—छद्मस्थसंयतोऽनाभोगसहकृतमोहनीयवशेन कदाचित्प्राणानामतिपातयिता भवति, परीक्षोपयोगिघात्यजीवानां सम्पर्कस्य तद्विषयकानाभोगस्य च कादाचित्कत्वात्; तथा केवली न भवतीत्येवं प्राणातिपातादिविपर्ययलिङ्गैर्द्रव्यरूपैः केवलित्वं साध्यमिति । स च केवली द्विविधो ग्राह्यः—सद्भूतकेवली, अन्तर्मुहूर्त्तभाविकेवलज्ञानाभिमुखः क्षीणमोहश्च । यथा बद्धदेवायुर्देवगत्यभिमुखत्वेन देवत्वव्यपदेशविषयः प्रवचने प्रतीतः, तथाऽन्तर्मुहूर्त्तेनोत्पत्स्यमानकेवलज्ञानः क्षीणमोहोऽपि केवलिव्यपदेशविषयो भवत्येवेति, तथा 'भाविनि भूतवदुपचारः' इति न्यायात् प्रत्यासन्नभाविपर्यायस्य भूतवद्वचनं युक्तमेव । यथा गर्भस्थोप्यर्हन् शक्रेण भावार्हत्तया स्तुतः । एवं क्षीणमोहमात्रस्य छद्मस्थवीतरागस्यापि कथञ्चित्केवलित्वव्यपदेशो न दोषावहः । किं च—केवलित्वगमकानि सप्तापि लिङ्गानि मोहनीयक्षयसमुत्थान्येव, 'केवली हि क्षीणचारित्रावरणत्वान्निरतिचारसंयमत्वादप्रतिषेवित्वान्न कदाचिदपि प्राणानामतिपात-

यिता भवति ' इति वचनात्, तेन लिङ्गापेक्षया द्वयोरपि साम्यमेव। एवं च सति यदि क्षीणमोहस्य छद्मस्थवीतरागस्य कथंचित्केवलित्वं नाभ्युपगम्यते, तर्हि क्षीणमोहे छद्मस्थवीतरागे सप्तापि लिङ्गानि व्यभिचरन्ति, तत्र हेतुषु विद्यमानेषु साध्यस्य केवलित्वस्यासत्त्वात्। नन्वास्तामन्यत्, परं केवलिनः पञ्चानुत्तराणि भवन्ति। यदागमः—"केवलिस्स णं पंच अणुत्तरा पं०। तं०—अणुत्तरे नाणे, अणुत्तरे दंसणे, अणुत्तरे चरित्ते, अणुत्तरे तवे, अणुत्तरे विरिए" त्ति। एतानि पञ्चापि केवलिनि वर्त्तमानानि कथं केवलित्वगमकलिङ्गतया नोक्तानि? इति चेद्, उच्यते—एतेषां पञ्चानामपि छद्मस्थज्ञानागोचरत्वेनानुमितिजनकत्वाभावात् न लिङ्गानि भवितुमर्हन्ति, प्रत्युत केवलज्ञानादिपरिज्ञानार्थमेवोक्तलिङ्गानां प्रज्ञापनेति। एतेन सप्तापि प्राणातिपातादीनि छद्मस्थानां रागद्वेषजनितानि, तेषां तयोः सत्त्वात्। केवलिनस्तु रागद्वेषजनितानां तेषां निषेधो न पुनः सर्वथा निषेधः, चक्षुःपक्ष्मनिपातमात्रजन्याया असङ्ख्येयवायुकायजीवविराधनायाः केवलिनोऽप्यनिवृत्तेरिति निरस्तम्, अशक्यपरिहारस्यापि केवलिनि निरासात्।

किंच—परकीयरागद्वेषयोस्तदभावस्य च निरतिशयच्छद्मस्थज्ञानागोचरत्वेन तथाभूतच्छद्मस्थमात्रानुमितिजनकलिङ्गानां विशेषणत्वासम्भवात्, सम्भवे च यो रागद्वेषवान् स छद्मस्थः, यस्तु रागद्वेषरहितः स केवलीति विशेषणज्ञानमात्रेण छद्मस्थकेवलिनोर्विवेकेन सम्यग्निर्णये जाते प्राणातिपातादीनां तन्निषेधरूपाणां च विशेष्यपदानां भणनमुन्मत्तप्रलापकल्पं सम्पद्येत, प्रयोजनाभावात्, धर्मोपदेशादिक्रियामात्रस्यापि तथात्वेन सप्तसङ्ख्याभणनस्यायुक्तत्वाच्च। किंच—अप्रसिद्धविशेषणदानेन हेतूनां सन्दिग्धस्वरूपासिद्धतापि, तथा रागद्वेषवत्त्वछद्मस्थत्वयोस्तद्राहित्यकेवलित्वयोश्चैक्यमेवेति हेतोः साध्यघटितत्वेन हेतुस्वरूपहानिः; तस्मादविशिष्टानामेव छद्मस्थगम्यप्राणातिपातादिनिषेधरूपाणां केवलित्वगमकलिङ्गत्वं प्रतिपत्तव्यम्। यत्तु छद्मस्थत्वज्ञापकलिङ्गेषु ' कदाचिद् ' इति विशेषणं टीकाकारेण दत्तं तत्सप्तानामपि लिङ्गानां स्वरूपासिद्धिचारणार्थम्, नहि छद्मस्थसाधावनवरतं प्राणातिपातादिशीलत्वं सम्भवतीति। यच्च केवलित्वज्ञापकलिङ्गेषु ' कदाचिदपि ' इति विशिष्टविशेषणमुपात्तं तच्छद्मस्थसाधौ व्याभचारवारणाय; भवति ह्येतद्विशेषणं विना छद्मस्थसाधौ प्राणातिपाताद्यभावावस्थायां हेतुषु विद्यमानेषु केवलित्वाभावेन व्यभिचार इति।

अत्र वदन्ति—' सत्तहिं ठाणेहिं छउमत्थं जाणिज्जा ' इत्यत्राप्रमत्तस्य पक्षी-

करणे प्राणातिपातकत्वादयः सर्वेऽपि हेतवः स्वरूपासिद्धतामाप्नुवन्ति, प्राणातिपातादिनिमित्तक्रियाभावेन तस्य प्राणातिपातकत्वाद्यभावात् । यथा हि—कर्मग्रन्थाद्यभिप्रायेण निद्रोदयस्याप्रमत्तादिगुणस्थानेषु सत्त्वेऽपि न तेन प्रमत्तत्वम्, द्रव्यतो निद्राविषयादिवत्त्वस्य प्रमत्तत्वाप्रयोजकत्वात्; तथा द्रव्यतो जीवविराधनायामप्यप्रमत्ताः प्राणातिपातका न प्रोच्यन्त इति । न चौपचारिकैरपारमार्थिकैर्द्रव्यतः प्राणातिपातकत्वादिभिस्त्वत्कल्पितैरपि पारमार्थिकं छद्मस्थत्वं साधयितुं शक्यते, द्रव्यतो विरतिमहाव्रतवत्त्वादिभिः परिव्राजकेष्वभव्यनिह्नवादिषु च पारमार्थिकविरतत्वचारित्रित्वादिसाधनप्रसक्तेः । किं च—औपचारिकं प्राणातिपातकत्वं 'यावज्जीवः सयोगस्तावदारभते' इत्याद्यागमवचनादेव प्रसिद्धव्यभिचारमिति सद्भूतप्राणातिपातकत्वादिभिश्छद्मस्थत्वस्य साधनात् प्रमत्त एवात्र पक्षीकार्यः, तेन न स्वरूपासिद्धिः, तत्र पारमार्थिकानां हेतूनां सत्त्वादिति ।

किंच—'व्यापादनशीलो भवति' इत्यत्र फलनिरपेक्षा वृत्तिः शीलमिति, शीलार्थत्वात्, तस्याश्च स्वभावनिबन्धनत्वात् प्राणातिपातादिस्वभावहेतुसिद्ध्यर्थं प्रमत्त एव पक्षीकर्त्तव्य इति । न च प्रमत्तत्वादेव तत्र छद्मस्थत्वरूपसाध्यस्यापि प्रतीतत्वात्साध्यत्वाभावः, 'अप्रतीतमनिराकृतमभीप्सितं साध्यम्' इति वचनादिति वाच्यम्, व्यामूढमनसां तद्व्यामोहनिवृत्त्यर्थं छद्मस्थत्वस्य साध्यमानत्वोपपत्तेः ।

"प्रसिद्धानां प्रमाणानां लक्षणोक्तौ प्रयोजनम् ।
तद्व्यामोहनिवृत्तिः स्याद् व्यामूढमनसामिह ॥"—

इति न्यायावतारवचनात् । यथा हि—सास्नादिमत्त्वाद् गवि गोत्वसिद्धेऽपि व्यामूढस्य तत्प्रतिपत्त्यर्थं प्रयोगः क्रियते—यथा इयं गौः, सास्नादिमत्त्वात्, यत्र गोत्वाभावस्तत्र सास्नादिमत्त्वाभावो यथा महिष इत्यादि । एवमत्रापि पुरुषविशेषे प्रमत्तत्वाच्छद्मस्थत्वे सिद्धेऽपि व्यामूढस्य ज्ञापनार्थमनुमाने कर्त्तव्ये छद्मस्थत्वस्य साध्यत्वं घटत एवेति । एतेन निद्राविकथादिप्रमादवतश्छद्मस्थत्वेन संशयानुपपत्तेर्न तत्परिज्ञानाय लिङ्गापेक्षेत्यपि निरस्तम्, उक्तयुक्त्या व्यामोहनिरासार्थं तदुपपत्तेः, विप्रतिपत्त्यादिना केवलिच्छद्मस्थविशेषज्ञस्यापि संशये सति तत्साधनोपपत्तेश्च । न च सूत्रे प्राणातिपातकत्वादीनां सामान्येन छद्मस्थलिङ्गत्वेन प्रोक्तत्वात् प्रमत्तछद्मस्थरूपविशेषे व्याख्यायमाने सूत्राशात-

नेति वाच्यम्, सूत्रस्य सूत्रान्तरेसम्मत्या व्याख्यानकरणे आशातनायाः परित्यागात्। किंच–भवतोऽप्यप्रमत्तरूपछद्मस्थविशेषमुपादायैव व्याख्यानकरणान्नैतद्विषये पर्यनुयोग एव युज्यते।

" यत्रोभयोः समो दोषः परिहारोऽपि वा समः।
नैकः पर्यनुयोक्तव्यस्तादृगर्थविचारणे ॥ "

इति वचनात्। ननु प्रमत्तस्य पक्षत्वेऽप्रमत्तसंयते कथं छद्मस्थत्वं स्याद्? लिङ्गाभावाद्–इति चेद्, न। लिङ्गिनि लिङ्गावश्यंभावनियमाभावाद्, धूमं विनापि तप्तायोगोलके वह्निदर्शनात्। ननु यद्येवं प्रमत्तस्य पक्ष भावतः प्राणातिपातकत्वादीनां च लिङ्गत्वं तदा छद्मस्थत्वगमकलिङ्गेषु 'कदाचिद्'–इति विशेषणं यत्टीकाकारेण दत्तं तदनुपपन्नं स्याद्, अप्रमत्तसंयतपक्षे द्रव्यप्राणातिपातादीनां लिङ्गत्वे हि तेषां सार्वदिकत्वाभावेन स्वरूपासिद्धिवारणार्थं तदुपपन्नं स्यात्। प्रमत्तसंयतपक्षे भावाप्राणातिपातस्य सार्वदिकत्वेन तद्विशेषणस्यानुपपत्तिरेवेति। मैवम्, अविशेषेणोक्तस्य प्राणातिपातकत्वादेः स्वरूपसिद्धत्वाभावेन 'कदाचिद्'–इत्यस्योभयमतेऽपि स्वरूपविशेषणत्वात् कालिकसम्बन्धेन व्याप्तेरभिप्रेतत्वेऽपि 'कदाचिद्' इत्यस्य कालान्तरोपसङ्ग्रहेऽनुपयोगाद्, यदा प्राणातिपातकत्वादिकं तथा छद्मस्थत्वमिति नियमसिद्धौ 'कदाचिद्' इत्यनेन किमुपकर्त्तव्यमेतादृशनियमस्फोरणं विनेति। केचित्तु केवली कदाचिदपि प्राणानामतिपातयिता न भवतीति यत्केवलिनो लिङ्गमुक्तं तत्सर्वाप्रमत्तानामपि समानमिति तद्व्यावृत्त्यर्थं छद्मस्थलिङ्गेषु 'कदाचिद्' इति विशेषणमुक्तम्। इत्थं चाप्रमत्तानां प्रमत्तगुणस्थानवर्त्तित्वे प्रमत्तत्वात् कदाचिद्भावतोऽपि यत्प्राणातिपातकत्वं सम्भवति, न तु केवलिनः, तस्य देशोनपूर्वकोटीकालमप्यप्रमत्तत्वस्यैव भावादिति विशेषोऽवबुद्धो भवति। न चाप्रमत्ता अपि सर्वदा प्राणानतिपातका एव भवन्ति, प्रमत्तत्वेन प्राणातिपातकत्वेऽत्वप्रमत्ता एव नोच्यन्ते इत्यतिप्रसक्त्यैवैतल्लक्षणमिति वाच्यम्, अप्रमत्तस्य प्रमत्तगुणस्थानवर्त्तिनो जीवघाते अहो 'अप्रमत्तोऽपि जीवघातं करोति' इति व्यपदेशसम्भवात्, चतुर्दशपूर्व्यादीनां चतुर्गतिकत्वादिवचनवदेतदुपपत्तेः। यथाहि–'भगवानपि भुवनगुरुरुन्मार्गदेशनात्सागरोपमकोटाकोटीं भ्रान्तः' इति योगशास्त्रवृत्तिवचनम्। लोकेऽपि च घृतघटे घृताभावेऽपि 'घृतघट' इति व्यपदेशो भाविनि भूतवदुपचारेण दृश्यते, तथैवाप्रमत्तादिगुणस्थानवर्त्तिनोऽपि प्रमादवत्त्वे भावतः प्राणातिपातक-

त्वादिव्यपदेशो भवति नतु केवलिनः, तस्य कदाचिदपि प्रमादवत्त्वाभावादिति नातिव्याप्त्यादिदोष इत्याहुः ॥

तेषां यद्ययमाशयोऽप्रमत्तसंयतेषु केवलित्वगमकप्राणातिपाताभावादिलिंगानां व्यभिचारः, 'कदाचिदपि' इति विशेषणेन तद्योग्यताभावानां लिङ्गत्वलाभेन वार्यत इति छद्मस्थलिङ्गेषु 'कदाचिद्' इति विशेषणं योग्यतास्पष्टत्वार्थमिति; तदा सा योग्यता प्राणातिपातादिप्रागभावरूपा ग्राह्येति केवलिपरोक्षायां क्षपकश्रेणावपूर्वकरणादीनां तदभावात्तेषु व्यभिचारो दुर्वारः। छद्मस्थपरीक्षायां च प्रमत्तस्यैव पक्षत्वे योग्यताग्रहणवैकल्यम्, सर्वेषां तु छद्मस्थानां पक्षत्वे तेष्वेवासिद्धिरिति किमप्रमत्तादावौपचारिकप्राणातिपातकत्वादिविवक्षया ? इति प्रमत्ताप्रमत्तसाधारणपक्षकछद्मस्थत्वसाधने प्राणातिपातादिलिङ्गेषु 'कदाचिद्' इति विशेषणेन साध्याधिकरणकिञ्चित्कालावच्छिन्नत्वं देयम्, केवलित्वगमकलिङ्गेषु च साध्याधिकरणयावत्कालावच्छिन्नत्वं देयमिति नोद्देश्यासिद्धिर्न वा व्यभिचार इति विभावनीयम् । यत्तु भावभूतलिङ्गानां न छद्मस्थज्ञानोपयोगित्वमिति । तदसद्, भावभूतानामेव शमादिलिंगानां छद्मस्थानां परनिष्ठसम्यक्त्वज्ञानजनकत्वप्रतिपादनात्। तदुक्तं योगशास्त्रवृत्तौ—" पञ्चभिर्लक्षणैर्लिङ्गैः परस्थं परोक्षमपि सम्यक्त्वं सम्यगुपलक्ष्यते, लिङ्गानि तु शमसंवेगनिर्वेदानुकम्पास्तिक्यस्वरूपाणीत्यादि " । बाह्यपरिणतिविशेषादेव तत्र शमादिभावलिङ्गज्ञानसौलभ्यमिति चेद्, अत्रापि तत एव न भावलिङ्गज्ञानदौर्लभ्यं परीक्षकाणाम् । एतेन छद्मस्थत्वगमकानि लिङ्गानि यावदुपशान्तवीतरागमेव भवन्ति । यच्च क्षीणमोहस्य मृषाभाषणं तच्छद्मस्थज्ञानगोचरत्वेन न लिङ्गम्, द्रव्यतो मृषाभाषणस्य क्रोधाद्यभावेन क्षीणमोहेऽभावादित्यादि यदुक्तं तन्निरस्तम्, उक्तरीत्या द्रव्यव्यतिरिक्तस्यापि मृषावादस्य सुपरीक्षकाणां सुग्रहत्वात् । किंच-क्षीणमोहस्य द्रव्यतो मृषाभाषणं नास्तीति सर्वशास्त्रविरुद्धम्, यस्मात्सर्वावस्थासु कर्मबन्धोऽस्ति, कर्मबन्धानुमेया च विराधना, इष्यते चासौ द्रव्यतो वीतरागस्यापि छद्मस्थस्य, चतुर्णामपि मनोयोगादीनामभिधानादिति पञ्चाशकवृत्तौ द्रव्यत एव मृषावादस्य क्षीणमोहेऽभिधानात् । अत एव सूक्ष्मप्रमादनिमित्तविराधनयाऽऽलोचनाप्रायश्चित्तं तत्रोक्तम् । तथाहि—

आलोअणाविवेगो वा णियंठस्स दुवे भवे ।
विवेगो अ सिणायस्स एमेया पडिवत्तिओ ॥ " त्ति

यतिजीतकल्पसूत्रे प्रोक्तम् । " आलोचनाप्रायश्चित्तं विवेकप्रायश्चित्तमित्येते द्वे प्रायश्चित्ते निर्ग्रन्थस्य भवतः, स्नातकस्य केवल एको विवेकः।"–इति तद्वृत्तौ। अत्र स्नातकस्य केवलविवेकप्रायश्चित्तभणनेन निर्ग्रन्थयोरुपशान्तक्षीणमोहयोरालोचनाविवेकप्रायश्चित्ते द्वेऽविशेषेणैवोक्ते सम्भाव्येते; अन्यथा निर्ग्रन्थे विकल्पद्वयमकरिष्यद्; यथा–कुत्रचिन्निर्ग्रन्थे विवेकप्रायश्चित्तमेव, कुत्रचित्त्वालोचनाविवेकरूपे द्वे इति; न चैवं क्वचिदुपदर्शितमिति माध्यस्थ्येन पर्यालोच्यम् । तथा चालोचनाप्रायश्चित्तशोध्या द्रव्यविराधना केवलिविलक्षणे क्षीणमोहे शास्त्रसिद्धेति द्रव्यतो मृषाभाषणं क्षीणमोहे न भवतीति यद्वचनं तन्निरर्थकमेव । यत्तु तत्रानाभोगहेतुकं सम्भावनारूढं जीवविराधनावत्मृषाभाषणमुपपादितं तत्र दृष्टान्तासिद्धिः, द्रव्यतो जीवविराधनाया तत्रोपपादितत्वाद्, भगवत्यामपि तत्र जीवविराधनायाः स्पष्टमुक्तत्वाच्च । तथा च तत्सूत्रं १८ श०–" अणगारस्स णं भंते! भाविअप्पणो पुरओ दुहओ जुगमायाए पेहाए रीयं रीयमाणस्स पायस्स अहे कुक्कुडपोए वा वट्टापोए वा कुलिंगच्छाए वा परियावज्जेज्जा, तस्स णं भंते! किं इरियावहिया किरिया कज्जइ, संपराइआ किरिया कज्जइ ? गो० अणगारस्स णं भविअप्पणो जाव तस्स णं इरियावहिआ किरिया कज्जइ, णो संपराइआ किरिया कज्जइ । केणट्ठेणं भंते! एवं वुच्चइ ? जहा सत्तमसए संवुड्ढुद्देसए व जाव अट्ठो णिक्खित्तो " त्ति ॥ 'पुरओ 'त्ति अग्रतः, 'दुहओ'त्ति द्विधा--अन्तराऽन्तरा पार्श्वतः पृष्ठतश्चेत्यर्थः, 'जुगमायाए 'त्ति यूपमात्रया दृष्ट्या, ' पेहाए 'त्ति प्रेक्ष्य ' रीयं 'ति गतं गमनं ' रीयमाणस्स 'त्ति कुर्वत इत्यर्थः, ' कुक्कुडपोयए ' त्ति कुर्कुटादिपोतः, ' वट्टापोयए 'त्ति इह वर्त्तकः पक्षिविशेषः, ' कुलिंगच्छाए व 'त्ति पिपीलिकादिसदृशः, ' परियावज्जेज्ज 'त्ति पर्यापद्येत–म्रियते । 'एवं जहा सत्त मसए' इत्यादि। अनेन यत्सूचितं तस्यार्थलेश एवम्–अथ केनार्थेन भदंत! एवमुच्यते ? गौतम! यस्य क्रोधादयो व्यवच्छिन्ना भवन्ति, तस्येर्यापथिक्येव क्रिया भवति "–इत्यादि तद्वृत्तावुक्तम् ।

अत्र भावितात्माऽनगार उपशान्तः क्षीणमोहश्च ग्राह्यः, अन्यस्येर्यापथिकीक्रियाऽभावात्, केवलिनश्चानाभोगप्रयुक्तोक्तविशिष्टगमनासम्भवादिति वदन्ति । तथा सम्भावनारूढं मृषाभाषणं द्रव्यभावाभ्यां भिन्नं न कुत्राप्युपदर्शितमिति क्षीणमोहे तदभिधानं भवतोऽपूर्वपाण्डित्याभिव्यञ्जकमेव, द्रव्यभावातिरिक्तस्य सम्भावनारूढस्य शशविषाणवदवस्तुत्वात् । यच्च व्यक्तिशक्तिरूपं सम्भवे सम्भाव्ये

च योगवीर्यमुक्तं तद्भावपरिणामरूपमेव, यथोक्तं सूत्रकृताङ्गवीर्याध्ययनवृत्तौ। तथा मनोवाक्कायादीनां तद्भावपरिणतानां यद्वीर्यं सामर्थ्यं तद्द्विविधं—सम्भवे सम्भाव्ये च। सम्भवे तावत्तीर्थकृतामनुत्तरोपपातिकानां च सुराणामतीव पटूनि मनोद्रव्याणि भवन्ति । तथाहि—तीर्थकृतामनुत्तरोपपातिकसुरमनःपर्यायज्ञानिप्रश्नव्याकरणस्य द्रव्यमनसैव करणाद्, अनुत्तरोपपातिकसुराणां च सर्वव्यापारस्यैव मनसा निष्पादनादिति । सम्भाव्ये तु यो हि यमर्थं पटुमतिना प्रोच्यमानं न शक्नोति साम्प्रतं परिणमयितुं, सम्भाव्यते त्वेष परिकर्म्यमाणः शक्ष्यत्यमुमर्थं परिणमयितुमिति । वाग्वीर्यमपि द्विविधं—सम्भवे संभाव्ये च। तत्र सम्भवे तीर्थकृतां योजननिर्हारिणी वाक् सर्वस्वभाषानुगता च; तथाऽन्येषामपि क्षीरमध्वाश्रवादिलब्धिमतां वाचः सौभाग्यमिति । तथा हंसकोकिलादीनां सम्भवति स्वरमाधुर्यम् । सम्भाव्ये तु सम्भाव्यते श्यामायाः स्त्रियो गानमाधुर्यम् । तथा चोक्तम्—"श्यामा गायति मधुरं काली गायति खरं च रूक्षे(क्षं चे)"त्यादि। तथा सम्भावयाम एनं श्रावकदारकमकृतमुखसंस्कारमप्यक्षरेषु यथावदभिलप्स्यन्तेष्विति, तथा सम्भावयामः—शुकसारिकादीनां वाचो मानुषभाषापरिणामः । कायवीर्यमप्यौरस्यं यद्यस्य बलम् । तदपि द्विविधं—सम्भवे सम्भाव्ये च । सम्भवे यथा चक्रवर्त्तिबलदेववासुदेवानां यद्बाहुबलादिकायबलम् । तद्यथा—कोटिशिला त्रिपृष्ठेन वामकरतलादुद्धृता, यदि वा 'सोलसरायसहस्सा' इत्यादि यावदपरिमितबला जिनवरेन्द्रा इति। सम्भाव्ये तु—सम्भाव्यते तीर्थकरो लोकमलोके कन्दुकवत् प्रक्षेप्तुम्, तथा मेरुं दण्डवत् गृहीत्वा वसुधां छत्रकवद्धर्तुमिति । तथा सम्भाव्यतेऽन्यतरसुराधिपो जम्बूद्वीपं वामहस्तेन छत्रकवद्धर्तुमयत्नेनैव मन्दरमिति । तथा सम्भाव्यतेऽयं दारकः परिवर्द्धमानः शिलामेनामुद्धर्त्तुं हस्तिनं दमयितुमश्वं वाहयितुमित्यादि, तद्वदिह यदि क्षीणमोहे सम्भावनारूढं मृषाभाषणं सम्भवे वक्तव्यं तदा व्यक्तित एव भावरूपं संपन्नम् । यदि च सम्भाव्ये तदा शक्तित इति न कथमपि पृथग् भवितुमर्हति । न च क्षीणमोहे मृषाभाषणं केवलं सम्भाव्यमेव, अपूर्वादिषु पञ्चसु गुणस्थानकेषु चतसृणां भाषाणां कर्मग्रन्थे द्वितीयतृतीयवाग्योगौ मिथ्यादृष्टेरारब्धौ यावत् क्षीणकषायवीतरागछद्मस्थस्तावल्लभ्येते। तथोपशान्तकषायस्थाने क्षीणकषायस्थाने च 'नवयोगा बन्धहेतवः' इत्यस्य चार्थस्याविशेषेणैवाभिधानाद् । अवश्यंभावित्वाभिप्रायेण च यत्सम्भाव्यत्वाभिधानं तत्तु सत्संयतमात्रस्यैव मृषाभाषणादेः स्यादिति द्रष्टव्यम् ।

किञ्च—सर्वमपि मृषाभाषणं क्रोधमूलकमेवेति वदतस्तव सम्भावनारूढमपि

मृषाभाषणं तन्मूलकमेव स्यात्, तथा च क्षीणमोहे तस्याप्यभावः प्राप्नोति। ननूक्तं तदनाभोगहेतुकमेवेति चेत्, तर्हि तादृशं द्रव्यतो मृषाभाषणमेव किमिति नाभ्युपेयते? किं सम्भावनया? न च द्रव्यभूतेन तेन प्रत्याख्यानभङ्गो भवति, भावभूतस्यैव तस्य प्रत्याख्यातत्वात्, "प्रमत्तयोगादसदभिधानं मृषा" इति तत्त्वार्थवचनात्। न च भावतः प्राणातिपातमृषाभाषणादेर्यत्कारणं तदेव तस्य द्रव्यतोऽपीति क्षीणमोहेन तत्सम्भवतीति वाच्यम्, एवं सति भावतो ज्ञानदर्शनचारित्राणां यानि कारणानि तान्येव द्रव्यभूतानां तेषां कारणानि स्युरिति अभव्यादीनामपि द्रव्यतो ज्ञानदर्शनचारित्रवतां ज्ञानावरणीय-दर्शनमोहनीय-चारित्रमोहनीयकर्मक्षयोपशमाः कारणानि स्युः। तथा चागमबाधा।

किञ्च-एवं केवलिनो द्रव्येन्द्रियाणामप्यभावापत्तिः, भावेन्द्रियहेतुज्ञानावरणदर्शनावरणक्षयोपशमयोः केवलिन्यभावाद्। न च द्रव्येन्द्रियाभावः केवलिन्युक्तः, किन्तु भावेन्द्रियाभाव एवेति।

किं च-उपशान्तमोहे यथा जीवविराधना मोहनीयकारणमन्तरेणापि भवति, तथा क्षीणमोहे मोहाभावेऽपि द्रव्यतो जीवविराधनामृषाभाषादिसद्भावे किं बाधकम्? अथास्त्येवागमबाधा। तथा हि-" रायगिहे जाव एवं वयासी, अह भंते! पाणाइवाए मुसावाए अदिण्णादाणे मेहुणे परिग्गहे' एस णं कतिवण्णे कतिगंधे कतिरसे कतिफासे पण्णत्ते? गोयमा! पंचवण्णे दुगंधे पंचरसे चउफासे पण्णत्ते" इत्यादि भगवतीसूत्रे द्वादशशते पञ्चमोद्देशके प्रोक्तम्। 'रायगिहे' इत्यादि। 'पाणाइवाए' त्ति प्राणातिपातजनितं तज्जनकं वा चारित्रमोहनीयं कर्मोपचारात् प्राणातिपातः, एवमुत्तरत्रापि, तस्य च पुद्गलरूपत्वात् वर्णादयो भवन्ति, अत उक्तं 'पंचवण्णे' इत्यादि। आह च-"पंचरस-पंचवण्णेहिं परिणायं दुविहगंधचउफासं। दवियमणंतपएसं सिद्धेहिं णंतगुणहीणं॥"-इत्याद्येतद्वृत्तावुक्तम्। एतदनुसारेण च प्राणातिपातादीनां चारित्रमोहनीयत्वात् क्षीणमोहे तदनुपपत्तेः। उपशान्तमोहे तु मोहसद्भावात्प्राणातिपाताद्यङ्गीकारे न किञ्चिद्बाधकमिति चेद्। एतदप्यसत्, भावप्राणातिपातापेक्षयैवोक्तोपचारव्यवस्थितेः, अन्यथा द्रव्यप्राणातिपातादीनां चारित्रमोहनीयकर्मजनकत्वे सूक्ष्मसम्परायादौ षड्विधबन्धकत्वादि न स्यात्। तज्जन्यत्वे च तस्योदितस्यानुदितस्य वा जनकत्वं वाच्यम्। आद्ये उपशान्तमोहद्रव्यप्राणातिपाताद्यनुपपत्तिः। अन्त्ये च चारित्रमोहनीयसत्तामात्रादुपशान्तमोहे तत्कार्यप्राणातिपातस्वीकारे नाग्न्यादीनां सप्तानां परीषहाणामपि तत्र स्वीकारा-

पत्तेः,तेषामपि चारित्रमोहनीयकार्यत्वप्रतिपादनात् ।, तदुक्तं भगवत्यां–"चरित्तमोहणिज्जे णं भंते ! कम्मे कतिपरीसहा समोअरंति ? गो० सत्त परीसहा समोअरंति । तं०–" अरती अचेल इत्थी णिसीहिआ जायणा य अक्कोसा । सक्कार-पुरक्कारे चरित्तमोहंमि सत्तेत्ति " ॥ तत्त्वार्थभाष्येऽप्युक्तम्–" चारित्रमोहे नाग्न्यारतिस्त्रीनिषद्याक्रोशयाचनासत्कारपुरस्काराः परीषहा उक्ताः । " इति । एतद्वृत्तिर्यथा–"दर्शनमोहवर्जं शेषं चारित्रमोहनीयं–चारित्रान्मूलोत्तरगुणसम्पन्नान्मोहनात्पराङ्मुखत्वाच्चारित्रमोहनीयम्, तदुदये सत्येते नाग्न्यादयः सप्त परीषहा भवन्ति । नाग्न्यं जुगुप्सोदयाद्, अरत्युदयादरतिः, स्त्रीवेदोदयात् स्त्रीपरिषहः, निषद्या स्थानासेवित्वं भयोदयात्, क्रोधोदयादा क्रोशपरीषहः, मानोदयाद् याच्ञा परीषह इति ॥ अथचारित्रमोहोदये सत्येते परीषहाः प्रोक्ताः, तस्मादुपशान्ते न भवन्तीति चेत्, तर्हि चारित्रमोहनीयकर्मोदये सति प्राणातिपातादयः प्रोक्ताः, अतस्तेऽपि तत्र मा भूवन् । अथ भावत एव प्राणातिपातादयश्चारित्रमोहनीयोदयसमुत्थाः, द्रव्यतस्तु चारित्रमोहनीयस्य सत्तायामपि तत्र ते भवन्तीति चेत्, तर्हि भावत एव चारित्रमोहनीयोदयसमुत्थाः सप्त परीषहाः सूक्ष्मसम्परायगुणस्थानं यावद्भवन्ति, द्रव्यतस्तु त एवोपशान्तमोहेऽपि चारित्रमोहसत्तानिमित्तका भवन्तु, युक्तेरुभयत्र तौल्यादिति । यच्च संभावनारूढमृषाभाषणनिषेधव्याघातेनैव तत्सिद्धिसमर्थनं कृतम्, तत्तु शशशृङ्गस्यापि निषेधव्याघातात् तत्सिद्धिसमर्थनप्रायम् । या च (अ)लोके लोककल्पनातुल्या सम्भावना प्रोक्ता, सा तु प्रकृतार्थस्यातिशयितत्वमेव प्रतिपादयेद् । अलोके लोकप्रमाणासंख्येयखण्डप्रमाणावधिज्ञानविषयकल्पना हि वैज्ञानिकसम्बन्धेन तद्विषयविशिष्टतामवधिज्ञानस्यैव ज्ञापयतीति । आह च भाष्यकारः–

" वट्टंतो पुण बाहिं लोगत्थं चेव पासई दव्वं ।
सुहुमयरं सुहुमयरं परमोही जावपरमाणुं ॥ "– इति ।

तद्वदिहापि सम्भावनया विशिष्टमेव मृषाभाषणं प्रसज्येतेति विपरीतैवेयं कल्पना भवत इति । यच्च अत एव ' कालशौकरिकस्य 'इत्याद्युक्तं, तत्तु तं प्रत्येव लगति, यतः कालशौकरिकस्य महिषव्यापादनत्वेन भगवतोक्तं तद्भावमाश्रित्य, तेन तत्र तत्कल्पनायाः प्रामाण्यम्, सम्भावनारूढमृषाभाषणादेर्मृषाभाषात्वादिकं तु भावतो नोच्यत इति कथं तत्कल्पना स्याद् ? नह्यसतः सम्भावनापि सम्भवति, नहि क्षीणमोहे मैथुनादीनां भवतापि सम्भावना क्रियते; अत एव क्षीणमोहे

सम्भावनारूढमृषाभाषादेः स्नातकचारित्रप्रतिबन्धकत्वेन दोषत्वमित्यपि निरस्तम्, असतो दोषत्वायोगात् । अत एव चित्रलिखितनारीदृष्टान्तोऽपि निरस्तः, असत आकारमात्रताया अप्यभावादिति न किञ्चिदेतत् ।

यच्च छद्मस्थलिङ्गानां द्रव्यभूतानां मिथ्याकारादिलिङ्गगम्यत्वस्यापि सम्भवान्मिथ्याकारस्य वाऽनवरतप्रवृत्तावसम्भवात् संयतानां द्रव्यहिंसादिकं कादाचित्कत्वेनानाभोगप्रयुक्तमेवेत्यभिधानं तदयुक्तम्, प्रत्याख्यातभावहिंसादेरेवानाभोगप्रयुक्तकादाचित्कभङ्गपरिणतिवतो मिथ्याकारविषयत्वाद्, द्रव्यहिंसामात्रे तदभावाद्, अन्यथाऽपवादपदजिनपूजाऽऽहारविहारादिक्रियाणामपि मिथ्याकारविषयत्वापत्तेः । यच्च षष्ठसप्तमलिंगयोश्छद्मस्थमात्रे सुलभत्वमुक्तम्, तत्प्रतिलेखनाप्रमार्जनादिक्रियाणां पिपीलिकादिक्षुद्रजन्तुभयोत्पादकत्वेन सावद्यत्वे स्यात्, तदेव तु नास्ति, कायादिनियताचाररूपाणां तासामौत्सर्गिकीणां क्रियाणामत्यन्तनिरवद्यत्वाद् । अपवादकल्पत्वादासां कथञ्चित्सावद्यत्वमिति चेद्, न । अपवादस्यापि विधिशुद्धस्य सावद्यत्वाभावे तत्कल्पत्वेनाभिमते तदभावाद् । न चोत्सर्गापवादव्यतिरिक्तोऽपवादकल्पो राशित्रयकल्पनारसिकं भवन्तं विनाऽन्येन केनापीष्यत इति तत्सद्भावे प्रमाणमस्ति । शक्याशक्यपरिहारविषयभेदेनापवादापवादकल्पयोर्भेदाभ्युपगमे च दुष्करसुकरत्वादिभेदेनानशनयुक्ताहारादिक्रियाणामुत्सर्गोत्सर्गकल्पभेदकल्पनाया अप्यापत्तेरिति न किञ्चिदेतत् । तस्मात् षष्ठसप्तमलिंगयोः सौलभ्यमपि प्रमत्तस्यैव प्रतिषेवणदशायां ज्ञेयम्, अप्रमत्तस्य तु सत्तामात्रेणैवतद्द्रष्टव्यम् । यत्तु केवलिनोऽपि परीक्षायां छद्मस्थज्ञानगोचरत्वेन द्रव्यरूपाण्येव लिङ्गानि ग्राह्याणीत्युक्तम्, तन्न चतुरचेतश्चमत्कारकारि, द्रव्यरूपाणामपि प्राणातिपातादीनामभावस्य सर्वकालीनत्वस्य हेतुघटकस्य दुर्ग्रहत्वात् । सूक्ष्मदृष्ट्या तद्ग्रहे च भावरूपलिङ्गानामपि न दुर्ग्रहत्वमिति । यच्चोक्तं 'स च केवली द्विविधो ग्राह्य इत्यादि, तदसत् । क्षीणमोहे केवलित्वस्यागमबाधितत्वात्, आगमे छद्मस्थवीतरागमध्य एव क्षीणमोहस्य परिगणितत्वात् । उक्तं च प्रज्ञापनायां—" स किं तं खीणकसायवीयरायचरित्तायरिआ ? खीणकसायवीयरागचरित्तायरिआ दुविहा पं० । तं०—छउमत्थखीणकसायवीयरायचरित्तायरिया य, केवली खीणकसायवीयरागचरित्तायरिया य " इत्यादि । यदि चैता(मा)गम बाधामुल्लङ्घ्यापि 'भाविनि भूतवदुपचारः' इति न्यायाद् द्वादशे गुणस्थाने कथञ्चित्केवलित्वमभ्युपगम्यते, तर्हि चरमशरीरिणि प्रथमादिगुणस्थानवर्त्तिनि क्षपकश्रेण्यारूढे वा सप्तमादिगुण-

स्थानवर्त्तिनि तदभ्युपगन्तव्यं स्यात्। किञ्च–क्षीणमोहस्य केवलित्वविवक्षा केनापि न कृतेति कथं भवता कर्त्तव्या ? नहि स्वल्पकालभाविकेवलज्ञानस्यापि छद्मस्थस्य केवलित्वविवक्षा कर्त्तुं युज्यते। अत एव " छ ठाणाइं छउमत्थे सव्वभावेणं ण जाणइ, ण पासइ। तं०–धम्मत्थिकायं अधम्मत्थिकायं आगासं जीवं असरीरपडिबद्धं परमाणुपोग्गलं। एताणि चेव उप्पण्णणाणदंसणधरे जाणति'–इत्यादि स्थानाङ्गसूत्रे। " इह छद्मस्थो विशिष्टावध्यादिविकलः, नत्वकेवली, यतो यद्यपि धर्माधर्माकाशान्यशरीरजीवं च परमावधिर्न जानाति, तथापि परमाणुशब्दौ जानात्येव, रूपित्वात् तयोः, रूपिद्रव्यविषयत्वाच्चावधेः।"–इत्यादि वृत्तावुक्तम्। अत्र परमावधेरन्तर्मुहूर्त्तादूर्ध्वमुत्पत्स्यमानकेवलज्ञानस्यापि केवलित्वविवक्षा न कृता। यदि च परमावधिमतः केवलित्वविवक्षामकरिष्यत् तदा व्यभिचारशङ्कैव नास्तीति छद्मस्थपदस्य विशेषपरत्वं नावक्ष्यद् वृत्तिकारः। तस्मात् क्षीणमोहस्याप्यन्तर्मुहूर्त्तादूर्ध्वमुत्पत्स्यमानकेवलज्ञानस्य कथञ्चित्केवलित्वविवक्षा शास्त्रबाधितैवेति। यदि च क्षीणचारित्रावरणत्वाद्धेतोः क्षीणमोहे केवलित्वं दुर्निवारं, तदा निरतिचारसंयमत्वादप्रतिषेवित्वाच्चोपशान्तमोहे कषायकुशीले च तद्दुर्निवारं स्यादिति बोध्यम्। यच्च रागद्वेषवत्त्वच्छद्मस्थत्वादीनामैक्यौद्भावनेन दूषणं दत्तं, तत्तु न किञ्चिद्; एवं सति समनियतधर्ममात्रव्याप्त्युच्छेदप्रसङ्गादिति दिग्।

इदं त्विहास्माकमाभाति–यदालोचनायोग्यविराधनादिकं छद्मस्थमात्रलिङ्गं, तदभावश्च केवलिनो लिङ्गम्, 'कदाचिद्' इत्यनेन 'कदाचिदपि' इत्यनेन चैतदर्थस्यैव स्फोरणात्। आलोचनायोग्यताया अनाभोगप्रयुक्तकादाचित्कतानियतत्वाद्, इतरत्र च तदभावाद्। इत्थं च केवली न कदाचिदपि प्राणानामतिपातयिता भवति, क्षीणचारित्रावरणत्वाद्–इत्यादौ विशिष्टो हेतुरनुसन्धेयः, अन्यथा केवलित्वगमकानि लिङ्गानि क्षीणमोहे न सन्ति, किन्तु स्वरूपतः सन्ति। यथा–वह्निरनुष्णः, कृतकत्वाद्–इत्यनुमाने कृतकत्वं वह्नौ स्वरूपतः सदप्यनुष्णत्वगमकलिङ्गत्वेन नास्तीति प्रत्यक्षबाधितपक्षत्वादगमकं प्रोच्यते, तद्वत् 'क्षीणमोहे सन्नापि स्थानानि' इत्युक्तावपि न निस्तारः, तद्वदेवाप्रयोजकत्वेन प्रकृतिलिङ्गव्यभिचारानुद्धारात्। नह्ययः पिण्डो धूमवान्, वह्निमत्वाद्–इत्यत्र पक्षदोषमात्रेण हेतुदोषो निराकर्तुं शक्यते–इत्यनुमानहेतुत्वे उक्तप्रकार आश्रयणीयः, सम्भावनाहेतुत्वे तु न किमप्युपपादनीयम्–इत्युपयुक्तैर्विभावनीयमिति दिक् ॥ ८७ ॥

'तदेवं केवलिनोऽवश्यंभाविनी जीवविराधना न भवति'इति स्वमतिविकल्पनमनर्थहेतुरित्येतादृशाः कुविकल्पा मोक्षार्थिना त्याज्या इत्याह—

तिव्वासग्गहदोसा एयारिसया हवंति कुविगप्पा।
ते उच्छिंदिय सम्मं आणाइ मुणी पयट्टिज्जा ॥ ८८ ॥

तीव्रात्—सम्यग्वक्तृवचनानिवर्त्तनीयत्वेनोत्कटाद्, अभिनिवेशाद्विपर्ययग्रहादेतादृशकाः कुविकल्पा भवन्ति, तानुच्छिद्य सम्यगाज्ञायां गुरुशास्त्रपारतन्त्र्यलक्षणायां मुनिः प्रवर्त्तेत, न तु बहुश्रुतत्वादिख्यातिमात्रेण स्वमतिविकल्पजालग्रथनरसिको भवेदिति। 'एतादृशकाः'—इत्यतिदेशेन यः परस्यायं कुविकल्पोऽस्ति—यो मांसमश्नाति तस्य सम्यक्त्वं न भवत्येवेति, सोऽप्यपास्तो बोद्धव्यः, केवलसम्यक्त्वधारिणोऽविरतेरेव माहात्म्यादितराभक्ष्यभक्षणस्येव मांसभक्षणादपि निवृत्तेरनियमात्। यदि च सद्यः सम्मूर्च्छितानन्तजन्तुसन्तानदूषितं तद् ज्ञात्वा भुञ्जानस्य सर्वांशानुकम्पाराहित्यान्न सम्यक्त्वमित्यभ्युपगमः, तदाऽनन्तजन्तुमयं ज्ञात्वा मूलकादिकं भक्षयतोऽपि सम्यक्त्वक्षतिरभ्युपगन्तव्या स्याद्। यदि च मांसभक्षणस्यातिनिन्द्यत्वात्तस्य सम्यक्त्वनाशकत्वं तदा परदारगमनस्य तत्सुतरां स्यादिति तद्व्यसनवतः सत्यकिप्रभृतेः सम्यक्त्वमुच्छिद्येत। एतेन 'बिलवासिनामपि मनुजानां तथाविधकर्मक्षयोपशमेन यदि मांसपरिहारनियन्तृत्वं तदा सम्यग्दृशां तत्सुतरां स्यादिति मांसभक्षणे सम्यक्त्वक्षतिरेव' इति निरस्तम्, सम्यक्त्वस्य भावधर्मत्वेन कुलधर्ममात्रत्वाभावात्, तथाविधकर्मपरिणतेरनुचितप्रवृत्तिमतोऽपि श्रद्धानगुणेन तदनपगमात्। अन्यथा स्तेनानामपि केषाञ्चित्परदारगमनपरिहारनियन्तृत्वात्, ततोऽनिवृत्तस्य सत्यकिप्रभृतेः सम्यक्त्वमुच्छिद्येतैवेति। न च मांसाहारस्य नरकायुर्बन्धस्थानत्वादेव तदनिवृत्तौ न सम्यक्त्वमिति शङ्कनीयम्, महारम्भमहापरिग्रहादीनामपि तथात्वात्, तदनिवृत्तौ कृष्णवासुदेवानामपि सम्यक्त्वापगमापत्तेः। किं च—सम्यक्त्वधारिणां कृष्णप्रभृतीनां मांसभक्षणेऽपि सम्यक्त्वानपगमः शास्त्रेऽपि श्रूयते। तदुक्तं षष्ठाङ्गे—तएणं दुवए राया कंपिल्लपुरं णगरं अणुपविसइ, अणुपविसित्ता विउलं असणं ४ उवक्खडावेइ, उवक्खडावित्ता कोडुंबियपुरिसे सद्दावित्ता एवं वयासी—गच्छह णं तुब्भे देवाणुप्पिया विउलं असणं ४ सुरं मज्जं मंसं च पसन्नं च सुबहुपुप्फफलवत्थगंधमल्लालंकारं वासुदेवप्पामोक्खाणं रायसहस्साणं आवासेसु साहरह। तेवि साहरंति। तएणं ति

वासुदेवप्पामोक्खा विउलं असणं जाव संपन्नं आसाएमाणा विहरंति "त्ति । न चात्र मांसभक्षणादिकं स्वपरिवारभूतमिथ्यादृशामेव तदाज्ञानिमित्तकत्वात् तत्कर्तृकं व्यपदिष्टमिति शंकनीयम्, 'वासुदेवप्रमुखा' इत्यत्र सर्वेषामेककियायोगात् सम्यक्त्वनाशके तत्र तदाज्ञानस्याप्यनुपपत्तेश्च । यत्तु वर्णनमात्रत्वेनैतत्सूत्रस्याकिञ्चित्करत्वं परेणोद्भाव्यते, तस्य महानेव कृतान्तकोपः। एवं सति स्वर्गद्ध्यादिप्रतिपादकसूत्राणामपि वर्णनमात्रत्वेनाकिञ्चित्करताया वावदूकेन वक्तुं शक्यत्वाद्, लोकनिन्द्यविषयमात्रेणापि यथास्थितार्थप्रतिपादकसूत्रविलोपे नास्तिकत्वस्यानिवारितप्रसरतया सर्वविलोपप्रसङ्गादिति ।

किञ्च–यद्यनन्तकायादिमांसादिभक्षणे सम्यक्त्वस्य मूलोच्छेदः स्यात्, तदा तत्र तपःप्रायश्चित्तं नोपदिष्टं स्यात्, उक्तं च तत्तत्र । तदुक्तं श्राद्धजीतसूत्रवृत्त्योः–

" चउगुरुणं ते चउलहु परित्तभोगे सचित्तवज्जिस्स ।
मंसासववयभंगे छग्गुरु चउगुरु अणाभोगे ॥ "

व्या०–सचित्तवर्जस्य श्रावकादेः 'अनन्त'त्ति अनन्तकायानां मूलकार्द्रादीनां भक्षणे चतुर्गुरुप्रायश्चित्तं भवति । यदागमः–" सो उ जिणपडिकुट्ठो अणंतजीवाण गा(वा)यणिप्फण्णो । गेहीपसंगदोसा अणंतकाओ अओ गुरुगा " ॥ १ ॥ तथा सचित्तवर्जस्यैव श्राद्धादेः 'परित्त'त्ति प्रत्येकपरिभोगे–प्रत्येकाम्रादिपुष्पफलादिभोगे चतुर्लघुप्रायश्चित्तम् । तथा मांसासवयोरुपलक्षणान्मधुनवनीतयोश्च 'वयभंगे' त्ति अनाभोगतः पृथग्वक्ष्यमाणत्वादत्राभोगतो ज्ञेयम् । ततश्चाभोगे सति व्रतस्य नियमस्य भङ्गे षड्गुरु, 'चउगुरु'त्ति अनाभोगे मांसासवमधुनवनीतानां व्रतभङ्गेषु चतुर्गुरुप्रायश्चित्तं भवतीति गाथाक्षरार्थ इति । ततो 'मांसभक्षणे सम्यक्त्वं नश्यत्येव' इत्ययमपि कुविकल्प एवेति बोध्यम्, ॥ ८८ ॥

ननु विकल्पोच्छेदेनाज्ञया प्रवृत्तिर्हितावहोक्ता । न चाज्ञामात्रानुसरणं हितावहं सम्भवति, सर्वत्र सौलभ्याद्, दृश्यन्ते हि सर्वेऽपि निजनिजगुर्वाद्याज्ञायत्ता इत्युपादेयाज्ञाविशेषमाह—

आणा पुण जगगुरुणो एगंतसुहावहा सुपरिसुद्धा ।
अपरिक्किआ ण गिज्झा सा सव्वा णाममित्तेणं ॥८९॥

व्याख्या–'आणा पुण'त्ति । आज्ञा पुनर्जगद्गुरोस्त्रिभुवनधर्मगुरोर्भगवतो वीतरागस्य सुपरिशुद्धा सम्यक्परीक्षाप्राप्ता एकान्तसुखावहा नियमेन स्वर्गाप-

वर्गादिसुखहेतुर्ग्राह्येति योगः। साऽऽज्ञा सर्वा नाममात्रेणापरीक्षिता सती न ग्राह्या, प्रेक्षावत्प्रवृत्तेः परीक्षानियतत्वादिति भावः ॥ ८९ ॥

एतत्परीक्षोपायमाह–

कस-छेय-ताव-जोगा परिक्खियव्वा य सा सुवण्णं व।
एसा धम्मपरिक्खा णायव्वा बुद्धिमंतेणं ॥ ९० ॥

व्याख्या––सा–आज्ञा कषच्छेदतापयोगात् सुवर्णमिव परीक्षणीया। यथाहि–युक्तिस्वर्णे जात्यस्वर्णे च सुवर्णमात्रसाम्येन मुग्धलोकैरभेदेन प्रतीयमाने कषच्छेदतापैर्विचक्षणास्तत्परीक्षणं कर्तुमुत्सहन्ते, तथाऽऽज्ञायामपि मुग्धैः सर्वत्र नाममात्रादेकत्वेन प्रतीयमानायां विचक्षणास्तत्परीक्षां कषच्छेदतापैः कर्तुमुत्सहन्त इति बुद्धिमतैषा धर्मपरीक्षा ज्ञातव्या। यैव ह्याज्ञा स एव धर्म इत्याज्ञापरीक्षैव धर्मपरीक्षेति भावः ॥ ९० ॥

कषादीनेवात्र योजयितुमाह–

विहिपडिसेहाउ कसो तज्जोगक्खेमकारिणी किरिया।
छेउ तावो य इहं वाउ जीवाइतत्ताणं ॥ ९१ ॥

व्याख्या––'विहिपडिसेहाउ' त्ति। विधिः–अविरुद्धकर्त्तव्यार्थोपदेशकं वाक्यम्। यथा– स्वर्ग–केवलार्थिना तपोध्यानादि कर्त्तव्यमित्यादि। प्रतिषेधः पुनर्न हिंस्यात् सर्वभूतानीत्यादि। एतौ द्वाविह धर्मपरीक्षायां कष एव, सुवर्णपरीक्षायां कषपट्टकरेखेव। इदमुक्तं भवति– यत्र धर्मे उक्तलक्षणौ विधिप्रतिषेधौ पुष्कलावुपलभ्येते स धर्मः कषशुद्धः, न पुनः–

"अन्यधर्मस्थिताः सत्त्वा असुरा इव विष्णुना।
उच्छेदनीयास्तेषां हि वधे दोषो न विद्यते ॥"

–इत्यादिवाक्यगर्भ इति। तयोर्विधिप्रतिषेधयोर्योगोऽनाविर्भूतयोः संभवम्, क्षेमं चाविर्भूतयोः पालना, तत्कारिणी क्रिया भिक्षाटनादिबाह्यव्यापाररूपा छेदः। यथा कषशुद्धावप्यन्तर्गतामशुद्धिमाशङ्कमानाः सौवर्णिकाः सुवर्णगोलिकादेश्छेदमादियन्ते, तथा कषशुद्धावपि धर्मस्य छेदमपेक्षन्ते प्रेक्षावन्तः। स च छेदो विशु-

द्धबाह्यचेष्टारूपः, विशुद्धा च चेष्टा सा यत्रासन्तावपि विधिप्रतिषेधावबाधितरूपौ स्वात्मानं लभेते, लब्धात्मानौ चातिचारविरहितावुत्तरोत्तरां वृद्धिमनुभवतः, ईदृशी यत्र धर्मे चेष्टा सम्प्रपञ्चा प्रोच्यते सधर्मश्छेदशुद्ध इति। तापश्च जीवादितत्त्वानां वादः—स्याद्वादरीत्योपन्यासः । यथा हि—कषच्छेदशुद्धमपि सुवर्णं तापमसहमानं कालिकोन्मीलनदोषान्न सुवर्णभावमश्नुते, एवं धर्मोऽपि सत्यामपि कषच्छेदशुद्धौ तापपरीक्षायामनिर्वहमाणो न स्वभावमासादयति, अतो जीवादितत्त्वानां स्याद्वादप्ररूपणया तापशुद्धिरन्वेषणीया । यत्र हि शास्त्रे द्रव्यरूपतयाऽप्रच्युतानुत्पन्नः पर्यायात्मकतया च प्रतिस्वमपरापरस्वभावास्कन्देनानित्यस्वभावो जीवादिरवस्थाप्यते स्यात्तत्र तापशुद्धिः । यतः परिणामिन्येवात्मादौ तथाविधाशुद्धपर्यायप्रादुर्भावादुक्तलक्षणः कषो बाह्यचेष्टाशुद्धिलक्षणश्च छेद उपपद्यते न पुनरन्यथेति । अत्र च तापपरीक्षा बलवती, कषच्छेदभावेऽपि तापाभावे परीक्षाऽसिद्धेः, नहि तापे विघटमानं हेम कषच्छेदयोः सतोरपि स्वं स्वरूपं प्रतिपत्तुमलम, युक्तिस्वर्णत्वात्तस्येति ॥ ९१ ॥

एताभिः परीक्षाभिर्धर्मं परीक्षिते धर्मवान् गुरुरपि परीक्षित एव भवतीत्यभिप्रायवानाह—

एयाहिं परिक्काहिं सुद्धे धम्मंमि परिणया जे उ ।
गुरुणो गुणजलणिहिणो ते वि विसुद्धा सुवण्णं व ॥९२॥

व्याख्या—एताभिः कषादिपरीक्षाभिः शुद्धे धर्मे ये परिणता एव ते गुरवोऽपि गुणजलनिधयः सुवर्णमिव विशुद्धा द्रष्टव्याः, यद्द्रव्यं यदा यद्रूपेण परिणमते तदा तन्मयमेवेति शुद्धधर्मपरिणता गुरवोऽपि शुद्धधर्मरूपत्वेनैवादरणीया इति भावः ॥ ९२ ॥

सुवर्णसदृशत्वमेव गुरूणां भावयन्नाह—

सत्थोइयगुणजुत्तो सुवन्नसरिसो गुरू विणिद्दिट्ठो ।
ता तत्थ नणंति इमे विसघायाई सुवन्नगुणे ॥ ९३ ॥

व्याख्या—'सत्थोइय' त्ति । शास्त्रे दशवैकालिकादावुदिताः प्रतिपादिता ये गुणाः साधुगुणास्तैर्युक्तः सहितः सुवर्णसदृशो गुरुर्विनिर्दिष्टः, तत्तस्मात्कारणा-

त् तत्र गुरौ विषघातादीन् इमाननन्तरमेव वक्ष्यमाणान् सुवर्णगुणान् योजयन्ति ॥ ९३ ॥

अत्रार्थेऽष्टसुवर्णगुणप्रतिपादनाय भावसाधौ गुरौ तद्योजनाय च पूर्वाचार्यकृता एव तिस्रो गाथा उपन्यस्यति–

विसघाइ-रसायण-मंगलत्थ-विणए-पयाहिणावत्ते ।
गुरुए अडज्झ-कुच्छे अट्ठ सुवन्ने गुणा हुंति ॥ ९४ ॥

व्याख्या–– ' विसघाइ ' इत्यादि । विषघाति–गरदोषहननशीलं सुवर्णं भवति । रसायनमङ्गलार्थविनीतमिति कर्मधारयपदम् । रसायनं–वयःस्तम्भनम्, मंगलार्थं–मंगलप्रयोजनम्, विनीतमिव विनीतम्, कटककेयूरादीष्टविशेषैः परिणमनात् । तथा प्रदक्षिणावर्त्तमतितापने प्रदक्षिणावृत्ति, तथा गुरुकम्, अलघुसारत्वात् । अदाह्याकुत्स्यमिति कर्मधारयपदम्, तत्रादाह्यमग्नेरदहनीयम्, सारत्वादेव; अकुत्स्यमकुत्सनीयम्, अकुथितगन्धत्वादिति । एवमष्टौ सुवर्णे हेम्नि गुणा असाधारणधर्मा भवन्ति स्युरिति गाथार्थः ॥ ९४ ॥

एतत्समानान् साधुगुणानाह–

इय मोहविसं घायइ सिवोवएसा रसायणं होइ ।
गुणइ य मंगलत्थं कुणइ विणीअ जोग्गो त्ति ॥९५॥

व्याख्या––' इय ' त्ति । इत्येवं सुवर्णवदित्यर्थः, मोहविषं–विवेकचैतन्यापहारि घातयति–नाशयति केषांचित्, साधुरिति प्रक्रमः । कुतः ? इत्याह–शिवोपदेशान्मोक्षमार्गप्ररूपणात् । तथा स एव रसायनमिव रसायनं भवति जायते, शिवोपदेशादेवाजरामररक्षाहेतुत्वात् । तथा गुणतश्च स्वगुणमाहात्म्येन च मङ्गलार्थं मङ्गलप्रयोजनदुरितोपशममित्यर्थः, करोति विधत्ते, विनीतश्च प्रकृत्यैव भवत्यसौ योग्य इति कृत्वा ॥ ९५ ॥

मग्गणुसारि पयाहिण गंभीरो गरुअओ तहा होइ
कोहग्गिणा अडज्झो अकुच्छो सइसीलभावेण ॥९६॥

व्याख्या––' मग्गणुसारि 'त्ति । मार्गानुसारित्वं सर्वत्र यत्साधोस्तत्प्रदक्षिणावर्त्तत्वमुच्यते । गम्भीरोऽतुच्छचेताः गुरुकको गुरुक इत्यर्थः ' तथा ' इति

समुच्चये, भवति स्यात् । तथा क्रोधाग्निना अदाह्यः, सुवर्णवत् । तथाऽकुत्स्यः सदाशील भावेन–शीललक्षणसौगन्ध्यसद्भावेनेति ॥ ९६ ॥

निगमयन्नाह—

एवं सुवन्नसरिसो पडिपुन्नाहिअगुणो गुरू णेओ ।
इयरो विसमुचियगुणो ण उ मूलगुणेहि परिहीणो ॥९७॥

व्याख्या—'एवं'ति । एवमुक्तप्रकारेण सुवर्णसदृशः, सामान्यतो भावसाधुगुणयोगात् । तथा प्रतिपूर्णा अन्यूनाः अधिकगुणाः प्रतिरूपादिविशेषगुणा यस्य स तथा गुरुर्ज्ञेयः । अपवादाभिप्रायेणाह–इतरोऽपि कालादिवैगुण्यादेकादिगुणहीनोऽपि समुचितगुणः पादार्द्धहीनगुणो गुरुर्ज्ञेयः, नतु मूलगुणैः परिहीनः, तद्रहितस्य गुरुलक्षणवैकल्यप्रतिपादनाद् । उक्तं च–गुरुगुणरहिओ अ इहं दट्ठवो मूलगुणविउत्तो जो" त्ति । मूलगुणसाहित्ये तु समुचितगुणलाभाद् न किञ्चिद्गुणवैकल्येनागुरुत्वमुद्भावनीयमिति भावः ॥ उक्तं च–"ण उ गुणमित्तविहूणोत्ति चंडरुद्दो उदाहरणं ।" ति ॥ ९७ ॥

उचितगुणश्च गुरुर्न परित्याज्यः, किन्तु तदाज्ञायामेव वर्तितव्यमित्याह–

एयारिसो खलु गुरू कुलवहूणाएण णेव मोत्तव्वो ।
एयस्स उ आणाए जइणा धम्मंमि जइअव्वं ॥ ९८॥

एतादृश उचितगुणः खलु निश्चये गुरुः कुलवधूज्ञातेन नैव मोक्तव्यः । यथाहि–कुलवधूर्भर्त्रा भर्त्सिताऽपि तच्चरणौ न परित्यजति, तथा सुशिष्येण भर्त्सितेनाप्युचितगुणस्य गुरोश्चरणसेवा न परित्याज्येति भावः । 'तु' पुनः, एतस्योचितगुणस्य गुरोराज्ञया यतिना धर्मे यतितव्यम् ॥ ९८ ॥

तदाज्ञास्थितस्य च यो गुणः सम्पद्यते तमाह–

गुरुआणाइ ठियस्स य बज्झाणुट्ठाणसुद्धचित्तस्स ।
अज्झप्पज्झाणम्मिवि एगग्गत्तं समुल्लसइ ॥ ९९ ॥

व्याख्या–'गुरुआणाइ'त्ति । गुर्वाज्ञास्थितस्य च परिणतव्यवहारस्य सतो बाह्यानुष्ठानेन–विहितावश्यकादिक्रियायोगरूपेण शुद्धचित्तस्य ज्ञानयोगप्रति-

बन्धककर्ममलविगमविशदीकृतहृदयस्य निश्चयावलम्बनदशायां शुद्धात्मस्वभावपरिणतौ प्रकटीभूतायामध्यात्मध्यानेऽपि एकाग्रत्वं समुल्लसति ॥ ९९ ॥

ततः किं भवति ? इत्याह—

तंमि य आयमरूवं विसयकसायाइदोसमलरहिअं ।
विन्नाणाणंदघणं परिसुद्धं होइ पच्चक्खं ॥ १०० ॥

व्याख्या—' तंमि य ' त्ति । तस्मिंश्चाध्यात्मध्यानैकाग्रत्वे समुल्लसिते विषयाः शब्दादय इन्द्रियार्थाः कषायाः क्रोधमानमायालोभास्तदादयो ये दोषमला जीवगुणमालिन्यहेतवस्तद्रहितं, तथा विज्ञानानन्दघनं स्वरूपप्रतिभासप्रशमसुखैकरसतामापन्नं, परिशुद्धमनुपहितस्फटिकरत्नवत् प्रकृत्यैव निर्मलमात्मस्वरूपं प्रत्यक्षं भवति ॥ १०० ॥

ततश्चात्मन्येव रतस्य तत्रैव तृप्तस्य तत्रैव च सन्तुष्टस्य स्वात्ममात्रप्रतिबन्धविश्रान्ततया विकल्पोपरमः स्यादित्याह—

जलहिम्मि असंखोभे पवणाभावे जहा जलतरंगा ।
परपरिणामाभावे एव विअप्पा तया हुंति ॥ १०१ ॥

व्याख्या—' जलहिम्मि ' त्ति । असंक्षोभे संक्षोभपरिणामरहिते जलधौ समुद्रे पवनाभावे यथा जलतरङ्गा नैव भवन्ति, तथा तदा—आत्मस्वरूपप्रत्यक्षतादशायां परपरिणामस्य पुद्गलग्रहणमोचनपरिणामस्याभावे नैव विकल्पाः शुभाशुभरूपाश्चित्तविप्लवा भवन्ति ॥ १०१ ॥

अध्यात्मध्यानजनितायामात्मस्वरूपप्रत्यक्षतादशायां संहृतसकलविकल्पावस्थायां सूक्ष्मविकल्पोपरमेणैव स्थूलविकल्पोपरमदार्ढ्यमाह—

का अरती आणंदे केवत्ति वियप्पणं ण जत्थुत्तं ।
अप्पे तत्थ वियप्पा पुग्गलसंजोगजा कत्तो ॥ १०२ ॥

'का अरति 'त्ति । का अरतिः ? को वा आनन्दः ? इति विकल्पनमपि न त(य)त्र—आत्मस्वरूपप्रत्यक्षतायामुक्तम्, अध्यात्मशास्त्रे स्वरूपानुभवमग्नतया सन्निहितसुखदुःखविकल्पस्य सूक्ष्मस्याप्यनवकाशात् । तत्रान्ये विकल्पाः स्थूलाः पुद्गल-

लसंयोगजा गृहधनस्वजनभोजनादिपुद्गलसंसर्गजनिताः कुतो भवन्ति ? अपि तु न कुतश्चित्; स्वाभाविकधर्मज्ञानसामग्र्या औपाधिकधर्मज्ञानमात्रं प्रति प्रतिबन्धकत्वादिति भावः। तदयं शुद्धात्मस्वभावानुभवनामा सन्मात्रार्थनिर्भासो धर्मशुक्लध्यानफलंविगलितवेद्यान्तरचिदानन्दनिष्पन्दभूतोऽविकल्पः समाधिरुपगीयते॥ १०२॥

अस्यैवाविकल्पसमाधेरुपायभूतं शुद्धं विकल्पमुपदर्शयति--

अण्णे पुग्गलभावा अण्णो एगो य णाणमित्तोहं।
सुद्धो एसवियप्पो अविअप्पसमाहिसंजणओ ॥१०३॥

'अण्णे' ति। पुद्गलभावाः पुद्गलपरिणामाः-कायमनोवागानप्राणकर्मवर्गणाधनगृहक्षेत्रारामादिसंस्थानभाजोऽविद्याप्रपञ्चोपरचितममकारविषयीभूता अन्ये-मदात्मद्रव्यादेकान्तेन पृथग्भूताः, कालत्रयेऽप्युपयोगलक्षणासंस्पर्शादिति भावः। अहं च ज्ञानमात्रमुपयोगमात्रस्वभाव इति हेतोः पुद्गलभावेभ्योऽन्य एकश्च, कालत्रयेऽप्यन्यद्रव्यसंसर्गेऽपि तत्स्वभावापरिग्रहाद् अनन्तपर्यायाविर्भावतिरोभावाभ्यामप्यविचलितशुद्धात्मद्रव्यैकशक्तिमत्त्वाच्च। न च ज्ञानदर्शनचारित्ररूपरत्नत्रयस्वभावशालित्वेनापि शुद्धात्मद्रव्यस्यैकत्वक्षतिः सम्भवति प्रभानैर्मल्यदोषहरणशक्तिगुणयोगाज्जात्यरत्नस्येवेति। एष शुद्धात्मद्रव्यविषयत्वेन शुद्धो विकल्पोऽविकल्पसमाधेः सम्यक् प्रकारेण जनकः, एतज्जनितसंस्कारस्य विकल्पान्तरसंस्कारविरोधित्वेन ततस्तदनुत्थानाद्, एतस्य च बहिर्दार्ढ्यं विनाश्यानु विनाशवदशुभविकल्पजालमुच्छेद्य स्वत एवोपरमादिति॥ १०३॥

" तदेतदध्यात्मध्यानमविकल्पसमाधिसम्बन्धबन्धुरमित्येतदेवाभिष्टुवन्नाह-

एयं परमं णाणं परमो धम्मो इमो च्चिय पसिद्धो।
एयं परमरहस्सं णिच्छयसुद्धं जिणा बिंति ॥ १०४॥

व्याख्या--'एयं परमं' ति। एतदध्यात्मध्यानं परमं ज्ञानं, ज्ञानस्य विरतिफलत्वाद्, विरतेश्च समतासारत्वात्, समतायाश्चैतदायत्तत्वादिति भावः। परमो धर्मोऽयमेव प्रसिद्धः, दुर्गतौ पततो जन्तोर्धरणात्, सिद्धिगतौ नियमेन धारणाच्च। एतच्च परमरहस्यमुत्कृष्टोपनिषद्भूतं निश्चयशुद्धं पारमार्थिकनयविशदीकृतं जिनास्तीर्थकरा ब्रुवते। यदागमः--

" परमरहस्समिसीणं समत्तगणिपिडगझारिअसाराणं ।
परिणामियं पमाणं णिच्छयमवलंबमाणाणं ॥ " ति ॥ १०४ ॥

अध्यात्मस्य प्रवचने परमरहस्यत्वादेव परीक्षकैः सर्वत्र तदनुल्लङ्घनेनैव प्रवृत्तिः कर्त्तव्येत्यभिप्रायवानाह--

अज्झप्पावाहेणं विसयविवेगं अओ मुणी बिंति ।
जुत्तो हु धम्मवाओ ण सुक्कवाओ विवाओ वा ॥१०५॥

व्याख्या--' अज्झप्पावाहेणं'ति । अतोऽध्यात्मस्य परमरहस्यत्वादध्यात्मा-बाधेन-स्वपरगतमैत्र्यादिसमन्वितशुभाशयाविच्छेदेन विषयविवेकं निर्णिनीषितार्थनिर्णयं ब्रुवते मुनयो विगलितरागद्वेषाः साधवः कर्त्तव्यमिति शेषः । हि यतो धर्मवाद एव मध्यस्थेन पापभीरुणा च समं तत्वनिर्णयार्थमपक्षपातेन कथा-प्रारम्भलक्षणो युक्तः, तत्त्वज्ञानफलत्वात् तस्य; न शुष्कवादः, जये पराजये वा परस्य स्वस्य चानर्थलघुत्वापत्तेः; कण्ठशोषमात्रफलो विवादो वा-दुःस्थितेनार्थिना सह छलजातिप्रधानो जल्पो युक्तः, साधूनां माध्यस्थ्यप्रधानत्वात्, शुभानुबन्धित्वाच्च साधूनां प्रयत्नस्य ॥ १०५ ॥

तदेवं धर्मवादेनैवाध्यात्मावाधेन तत्त्वनिर्णयस्य कर्त्तव्यत्वाच्छिष्टाचारानुरोधेन तथोद्देशेनैव प्रारब्धस्य स्वग्रन्थफलोपहितत्वं प्रदर्शयन्नन्यैरपि तत्त्वनिर्णयसिद्ध्यर्थमित्थमेव भणितव्यमित्युपदेशमाह-

भणियं किंचि फुडमिणं दिसाइ इय धम्मवायमग्गस्स ।
अण्णेहि वि एवं चिय सुआणुसारेण भणियव्वं ॥१०६॥

व्याख्या--' भणियं ' ति । इत्युक्तहेतोर्धर्मवादमार्गस्य दिशैव स्फुटमिदं किञ्चित्प्रकृतार्थगोचरं भणितं मया, तेन च तात्पर्यार्थदृष्ट्या तत्त्वनिर्णयसिद्धिरपि कृतैवेति भावः । अन्यैरपि धर्मपरीक्षकैरेवमेव श्रुतानुसारेण भणितव्यम् । इत्थमेव प्रकृतार्थभ्रमनिवृत्त्या तत्त्वज्ञानसिद्धे रागद्वेषपरिणामाभावेन कल्याणबीजसम्पत्तेश्चेति भावनीयम् ॥ १०६ ॥

सर्वस्वोपदेशमाह--

किं बहुणा इह जह जह रागद्दोसा लहुं विलिज्जंति ।
तह तह पयट्टियव्वं एसा आणा जिणिंदाणं ॥ १०७ ॥

व्याख्या--' किं बहुण 'त्ति । स्पष्टा ॥ १०७ ॥

एसा धम्मपरिक्खा रइआ नविआण तत्तबोहट्ठा ।
सोहिंतु पसायपरा तं गियत्था विसेसविऊ ॥ १०८ ॥

सूरिश्रीविजयादिदेवसुगुरोः पट्टाम्बराहर्मणौ
सूरिश्रीविजयादिसिंहसुगुरौ शक्रासनं भेजुषि ।
सूरिश्रीविजयप्रभे श्रितवति प्राज्यं च राज्यं कृतो
ग्रन्थोऽयं वितनोतु कोविदकुले मोदं विनोदं तथा ॥ १ ॥
महोपाध्यायश्रीविनयविजयैश्चारुमतिभिः
प्रचक्रे साहाय्यं तदिह घनसौष्ठवमभूत् ।
प्रसर्पत्कस्तूरीपरिमलविशेषाद्भवति हि
प्रसिद्धः शृङ्गारस्त्रिभुवनजनानन्दजननः ॥ २ ॥
सन्तः सन्तु प्रसन्ना मे ग्रन्थश्रमविदो भृशम् ।
येषामनुग्रहादस्य सौभाग्यं प्रथितं भवेत् ॥ ३ ॥

इति जगद्गुरुविरुदधारिभट्टारकश्रीहीरविजयसूरीश्वरशिष्यमुख्यषट्तर्की-विद्याविशारदमहोपाध्यायश्रीकल्याणविजयगणिशिष्यावतंसशास्त्रज्ञतिलकपण्डित-श्रीलाभविजयगणिशिष्यरत्नगुणगणगरिष्ठपण्डितश्रीजीतविजयगणिसतीर्थ्यतिल-कविपुलयशःप्रतापसौभाग्यनिधिपण्डितश्रीनयविजयगणिचरणकमलसेविना पण्डि तश्रीपद्मविजयगणिसहोदरेण पण्डितयशोविजयेन कृतो धर्मपरीक्षानामा ग्रन्थः सम्पूर्णः ॥

संवत्सरसाक्षीसप्तेन्दुनभे च सितपक्षके ।
अष्टमीविधुवारे हि लिखिता पत्तने पुरे ॥

श्रीरस्तु